CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13.
Coll. No. 96[illegible]1

Title Rāmāyaṇa (Sundara-kāṇḍa)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 960 Subject : Kāvya.

Title : Rāmāyaṇa (Sundarakāṇḍa) - Tattvadīpikā

Author : Vālmīki - Maheśvara Scribe : —

Date of the work : — Date of the Ms. : V.S. 1783

Place of the work : — Place of the Ms. : —

Size : 16" by 6·8" Extent : 82 foll.

Language : Sanskrit Script : Devanāgarī.

Remarks :

सुदरकांड

सु॰ १

श्रीगणेशाय नमः॥ श्रीरामचंद्राय नमः॥ अथ श्रीमत्सुंदरकांडे व्याख्येयानि व्याक्रियंते पूर्वस्मिन्कांडे जगाम मनसा लंकां मनस्वीति मनसा गमनमुक्तं इदानीं कायेनापि गमनं कर्तुमैच्छदित्याह। ततो रावणनीताया
इत्यादिना वशतिगायत्र्या द्वादशाक्षरं। ततो रावणनीताया इत्यस्य श्लोकस्य चतुर्थाक्षरेण च इत्यनेन संगृह्णाति। अत्र गंतुमिति। परस्मध्याहर्तव्यं। शत्रुकर्शनो हनुमान् रावणनीतायाः। रावणेनापहृतायाः सीतायाः
परं स्थानं अन्वेष्टुं चारणाचरिते पथि चारणा देवजातयः तै राचरितः क्रियमाणसंचारः तादृशे पथि आकाशमार्ग इत्यर्थः। गंतुमियेषेति योजना॥ दुष्करमिति। निष्प्रतिद्वंद्वं प्रतिद्वंद्वाविक्रांतं प्रतिबंधकरहित

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः। इयेष पदमन्वेष्टुं चारणाचरिते पथि॥१॥ दुष्करं निष्प्रतिद्वंद्वं चिकीर्षन्कर्म वानरः। समुदग्रशिरोग्रीवो गवांपतिरि
वाबभौ॥२॥ अथ वैदूर्यवर्णेषु शाद्वलेषु महाबलः। धीरः सलिलकल्पेषु विचचार यथासुखं॥३॥ द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन्। मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी॥४॥ नील
लोहितमांजिष्ठपत्रवर्णैः सितासितैः। स्वभावविहितैश्चित्रैर्धातुभिः समलंकृतं॥५॥ कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः। यक्षकिंनरगंधर्वैर्देवकल्पैश्च पन्नगैः॥६॥ स तस्य गिरिवर्यस्य
तले नागवरायुते। तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ॥७॥

मित्यर्थः। यद्वा निष्प्रतिद्वंद्वं सहायांतररहितं। कर्म समुद्रलंघनपूर्वकसीतान्वेषणकर्म। समुदग्रशिरोग्रीवः समुदग्रे शिरोग्रीवे यस्य स तथोक्तः। अत एव गवांपतिर्वृषभ इवाबभौ॥ अथेति। वैदूर्यवर्णेषु मरक
तच्छायेषु सलिलकल्पेषु तद्वच्छीतलेष्वित्यर्थः। द्विजानिति। केसरीव विचचारेति पूर्वेणान्वयः। नीलेत्यादि सार्धश्लोकद्वयमेकं वाक्यं। अत्र यच्छेषोध्याहर्तव्यः। नीलादिपत्रसमानवर्णैः सितासितैः। कृत्स्ना रम॰ १
पत्रवर्णैः। मांजिष्ठः पाटलः। स्वभावविहितैः स्वभावसिद्धैः समलंकृतं सपरिच्छदैः सालंकारैर्यक्षादिभिराविष्टं यत्तत्र तले तिष्ठन्बभौ॥७॥

अथेष्टदेवताप्रार्थनापूर्वकं यात्रासमारंभमाहेत्याह । सूर्यायेत्यादि ॥८॥ रामवृद्ध्यर्थं रामाभ्युदयार्थं ॥१०॥ मुहूर्तं स्वल्पकालं अशातयत् अपातयत् ॥१२॥ रीतिरिति महेंद्रः कांचनांजनराजतीः कांचनांजनरजतमयीः री-
तिः पद्धतीः धारा इत्यर्थः । निर्वर्तयामास । प्रादुर्भावयामासेत्यर्थः ॥१५॥ मुमोचेति । समनःशिलाः धातुविशेषसहिताः । मध्यमेनार्चिषा जुष्टः कालीकराली विस्फुलिंगिनी धूम्रवर्णा विश्वरुचि लोहिता मनोजवा अभिधा

मस्तु पीयमहेंद्राय पवनाय स्वयंभुवे ॥ धृतेभ्यश्चांजलिं कृत्वा चकार गमने मतिं ॥८॥ अंजलिं प्राङ्मुखः कुर्वन्पवनायात्मयोनये ॥ ततो हि ववृधे गंतुं दक्षिणो दक्षिणां दिशं ॥९॥ प्लवंगप्रवरैर्दृष्टः प्लवने
कृतनिश्चयः ॥ ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥१०॥ निष्प्रमाणशरीरः सँल्लिलंघयिषुरर्णवं ॥ बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतं ॥११॥ स चचालाचलश्चा-
शु मुहूर्तं कपिपीडितः ॥ तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥१२॥ तेन पादपमुक्तेन पुष्पौघेण सुगंधिना ॥ सर्वतः संवृतः शैलो बभौ पुष्पमयो यथा ॥१३॥ तेन चोत्तमवीर्येण पीड्यमानः स पर्व-
तः ॥ सलिलं संप्रसुस्राव मदं मत्त इव द्विपः ॥१४॥ पीड्यमानस्तु बलिना महेंद्रस्तेन पर्वतः ॥ रीतीर्निर्वर्तयामास कांचनांजनराजतीः ॥१५॥ मुमोच च शिलाः शैलो विशालाः समनःशिलाः ॥ मध्य-
मेनार्चिषा जुष्टो धूमराजीरिवानलः ॥१६॥ हरिणा पीड्यमानेन पीड्यमानानि सर्वशः ॥ गुहाविष्टानि भूतानि विनेदुर्विकृतैः स्वरैः ॥१७॥ स महान्सत्वसन्नादः शैलपीडानिमित्तजः ॥ पृथिवीं पूर-
यामास दिशश्चोपवनानि च ॥१८॥ शिरोभिः पृथुभिः सर्पा व्यक्तस्वस्तिकलक्षणैः ॥ वमंतः पावकं घोरं ददंशुर्दशनैः शिलाः ॥१९॥ तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः ॥ जज्वलुः
पावकोद्दीप्ता विभिदुश्च सहस्रधा ॥२०॥ यानि चौषधिजालानि तस्मिन्जातानि पर्वते ॥ विषघ्नान्यपि नागानां न शेकुः शमितुं विषं ॥२१॥ अपरे तु महाकाया यावंतोऽस्मिन्सुतेजसः ॥ कंदरेभ्यो विनि-
ष्पेतुः कपिपादनिपीडिताः ॥२२॥ गिरेराक्रममाणस्य तरवस्तत्र तरंगकाः ॥ मुमुचुः पुष्पवर्षाणि व्यक्तपुष्पलगंधिनः ॥२३॥ गैरिकांजनसंयुक्ता हरितालसमाहृताः ॥ पतंति गिरे-
स्तस्य शिलास्ताः समनःशिलाः ॥२४॥ सर्वतः स्नायमानस्तं चित्रैः काननधातुभिः ॥ रक्तपाशितिविनिभैर्नीलैर्यगैरिकधातुभिः ॥२५॥

नात्तस मनस्विभिर्जिह्वाश्च मध्यमयार्चिषा ज्वालया विशिष्टः अग्निः धूमराजीरिव धूमनिचयानिवेत्यनलः पर्वतः शिलाः मुमोचेति संबंधः ॥१६॥ महासत्वा महाजंतवः तेषां संनादः ॥१८॥ शिरोभिरिति । उपलक्षिताः स्व-
स्तिकः फणस्थो नीलरेखाविशेषः ॥१९॥ यानीति ॥ शमितुं शमयितुं ॥२१॥

सुं. १

त्रियतइति। स्र्तैः घधिचारिभिः सह ॥ २५ ॥ आर्षभानिक्षष भवर्मपिनद्धानि चर्माणि फलकाणि कनकत्सरून् नलङ्कष्टीन् ॥ २७ ॥ कृतेति कंठगुणाः कंठस्रजः क्षीबा मत्ताः ॥ २८ ॥ हारेति। पारिहार्यः वलयः। आवासकः।
पारिहार्यः कटकं कनयोस्त्रियामित्यमरः ॥ २९ ॥ दर्शयंतइति। विद्याधरमहर्षयः। विद्याधरश्रेष्ठा इत्यमरः। महाविद्या मणिमादिसिद्धि ॥ ३० ॥ शब्दं वाक्यं ॥ एतच्छब्दं स्पष्टयति तमेवाह। एष इत्या दिवानराधनिषां रामकार्येन

भिद्यते यं गिरिर्भूतै रिति मत्वा तपस्विनः। त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैः सह ॥ २५ ॥ पानभूमिगतं हित्वा हैममासवभाजनं। पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २६ ॥ लेह्यानुच्चाव-
चान्भक्ष्यान्मांसानि विविधानि च। आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥ २७ ॥ कृतकंठगुणाः क्षीबा रक्तमाल्यानुलेपनाः। रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ॥ २८ ॥ हारनूपुरकेयूरपा-
रिहार्यधराः स्त्रियः। विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह ॥ २९ ॥ दर्शयंतो महाविद्यां विद्याधरमहर्षयः। सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतं ॥ ३० ॥ शुश्रुवुश्च तदा शब्दमृषीणां भावि-
तात्मनां। चारणानां च सिद्धानां स्थितानां विमलेंबरे ॥ ३१ ॥ एष पर्वतसंकाशो हनूमान्मारुतात्मजः। तितीर्षति महावेगः समुद्रं मकरालयं ॥ ३२ ॥ रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करं। समुद्र-
स्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ ३३ ॥ इति विद्याधराः श्रुत्वा वचस्तेषां तपस्विनां। तमप्रमेयं ददृशुः पर्वते वानरर्षभं ॥ ३४ ॥ दुधुवे च स रोमाणि चकंपे चाचलोपमः। ननाद सुमहानादं सु-
महानिव तोयदः ॥ ३५ ॥ आनुपूर्व्याच्च वृत्तं च लांगूलं लोमभिश्चितं। उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगं ॥ ३६ ॥ तस्य लांगूलमाविद्धमात्तवेगस्य पृष्ठतः। ददृशे गरुडेनेव ह्रियमाणो यथो-
रगः ॥ ३७ ॥ बाहू संस्तंभयामास महापरिघसंनिभौ। ससाद च कपिः कट्यां चरणौ संचुकोच च ॥ ३८ ॥ संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधरां। तेजः सत्वं तथा वीर्यमाविवेश स वीर्य-
वान् ॥ ३९ ॥ मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः। रुरोध हृदये प्राणानाकाशमवलोकयन् ॥ ४० ॥ पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुंजरः। निकुंच्य कर्णौ हनुमानुत्पतिष्य-
न्महाबलः ॥ ४१ ॥ वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत्। यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ॥ ४२ ॥

तथाभिमानात्। आनुपूर्व्यात् वृत्तं लांगूलं विचिक्षेपेत्यन्वयः। आविद्धं धुतं। बाहू संस्तंभयामास पर्वते परिघविन्यासेन निष्पंदी चकार। ससाद कपिः कट्यामिति। कायजसारणात् कट्यां प्रदेशे राम. २
कृशो भवदित्यर्थः। चरणौ संचुकोचयामास इति निजं रुतिः। तेजः पराभिभवसामर्थ्यं सत्वं बलं। यथेति ॥

आनयिष्यामि। आनेष्यामि। सप्तुत्पतति हनूमति सति उत्पतति सति नगरोहिणः पर्वतस्थवृक्षाः विटपान्संहृत्य संक्षिप्य वेगात्सहोत्पेतुरित्यर्थः। सारवंतः गुरुत्वातिशययुक्ताः। विप्रमुक्ता इति। तस्य हनूमतो वेगेन
विप्रमुक्ताः द्रुमाः पुष्पाणि उत्सृज्य सलिले अवशीर्यंत अडुभवन्नार्षः। स्वहृदयथेति विष्क प्रस्थापनार्थं गताः सुहृदो यथा निवर्तंते तथा द्रुमा निवृत्ता इत्यर्थः। पिबन्निवेति अर्णवस

च्छेत्तद्वद्गमिष्यामि लंकां रावणपालितां॥ नहि द्रक्ष्यामि यदि तां लंकायां जनकात्मजां ॥४३॥ अनेनैव हि वेगेन गमिष्यामि सुरालयं। यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः ॥४४
बद्ध्वा राक्षसराजानमानयिष्यामि रावणं। सर्वथा कृतकार्योहमेष्यामि सह सीतया ॥४५॥ आनयिष्यामि वा लंकां समुत्पाट्य सरावणां। एवमुक्त्वा तु हनुमान्वानरो वानरोत्तमः ॥४६
उत्पपाताथ वेगेन वेगवानविचारयन्। सुपर्णमिव चात्मानं मेने स कपिकुंजरः ॥४७॥ समुत्पतति वेगात्तु वेगात्तेन गरोहिणः। संहृत्य विटपान्सर्वान्समुत्पेतुः समंततः ॥४८॥ स म
त्तकोयष्टिमकान्पादपान्पुष्पशालिनः। उद्वहन्नूरुवेगेन जगाम विमलेंबरे ॥४९॥ ऊरुवेगोत्थिता वृक्षा मुहूर्तं कपिमन्वयुः। प्रस्थितं दीर्घमध्वानं स्वबंधुमिव बांधवाः ॥५०॥ तमू
रुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः। अनुजग्मुर्हनूमंतं सैन्या इव महीपतिं ॥५१॥ सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः। हनुमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥५२॥ सा
रवंतोथ ये वृक्षाः न्यमज्जंल्लवणांभसि। भयादिव महेंद्रस्य पर्वता वरुणालये ॥५३॥ स नानाकुसुमैः कीर्णः कपिः सांकुरकोरकैः। शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥५४॥ विमुक्ता
स्तद्वृक्षाः न्यमज्जंल्लवणांभसि। भयादिव महेंद्रस्य पर्वता वरुणालये स्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः। अवशीर्यंत सलिले निवृत्ता बांधवा यथा ॥५५॥ लघुत्वेनोपपन्नं तद्विचित्रं
सागरेपतत्। द्रुमाणां विविधं पुष्पं कपिवायुसमीरितं ॥५६॥ तारकाचितमिवाकाशं प्रबभौ स महार्णवः। पुष्पौघेणानुबंधेन नानावर्णेन वानरः। बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषि
तः। तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत ॥५७॥ ताराभिरभिरामाभिरुदिताभिरिवांबरं। तस्यांबरगतौ बाहू ददृशाते प्रसारितौ ॥५९॥ पर्वताग्राद्विनिष्क्रांतौ पंचास्याविव पन्नगौ।
पिबन्निव बभौ चापि सोर्मिमालं महार्णवं ॥६०॥ पिपासुरिव चाकाशं ददृशे स महाकपिः। तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः ॥६१॥ नयने विप्रकाशेते पर्वतस्थाविवानलौ

मीपगमनवेलायामुदधिं पिबन्निव बभौ। परिगमनावस्थायां आकाशं पिपासुरिव ददृशे ॥ ॥

सुंदर॰
३

पिंगेति।परिमंडले वर्तुलाकारे।स्फिग्देशेन वालमूलप्रदेशेन।तस्येति।गर्जति गर्जपतत्पतंगसंकाशः।गच्छत्सूर्यसदृशः।व्यायतः कपिः बध्यमानया कक्ष्यया गजमध्यबंधनरज्वा प्रवृद्धः
दीर्घीभूतो मातंग इव शुशुभे इति योजना।उपरिष्टादिति।उपरिष्टात्स्थितशरीरेणावगाढया सागरांतः प्रविष्टया छायया प्रतिबिंबेन च एकाकारः सन्सागरांतर्मग्नमूलावहिष्ठोर्ध्वभागा मारुताविष्टा
वायुप्रेरिता नौरिवासीदिति योजना।यमिति।सोन्माद इव लक्ष्यते सपुद्रः अपस्मारीव लक्ष्यते भ्रमणफेनजलोद्गमनघोषादिमत्वादियमुपमा।शैलवर्ष्मणा शैलसदृशेन।उरः शब्देन उरोवेग

पिंगे पिंगाक्षमुख्यस्य बृहती परिमंडले॥६२॥चक्षुषी संप्रकाशेते चंद्रसूर्याविवोदितौ॥मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ॥६३॥संध्यया समभिस्पृष्टं यथा स्यात्सूर्यमंडलं
लांगूलं च समाविद्धं प्लवमानस्य शोभते॥६४॥अंबरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितं॥लांगूलचक्रो हनुमान् शुक्लदंष्ट्रोनिलात्मजः व्यरोचत महाप्राज्ञः परिवेषीव भास्करः॥स्फि
ग्देशेनाभिताम्रेण रराज स महाकपिः॥६६॥महता दारितेनेव गिरिर्गैरिकधातुना॥तस्य वानरसिंहस्य प्लवमानस्य सागरं॥६७॥कक्षांतरगतो वायुर्जीमूत इव गर्जति॥खे यथा निप
तत्युल्का उत्तरांताद्विनिःसृताः॥६८॥दृश्यते सानुबंधा च तथा स कपिकुंजरः॥पतत्पतंगसंकाशो व्यायतः शुशुभे कपिः॥६९॥प्रवृद्ध इव मातंगः कक्ष्यया बध्यमानया उपरिष्टा
च्छरीरेण छायया चावगाढया॥७०॥सागरे मारुताविष्टा नौरिवासीत्तदा कपिः॥यं यं देशं समुद्रस्य जगाम स महाकपिः॥७१॥स तु तस्यांगवेगेन सोन्माद इव लक्ष्यते।सागरस्यो
र्मिजालानामुरसा शैलवर्ष्मणा॥७२॥अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः।कपिवातश्च बलवान्मेघवातश्च निर्गतः॥७३॥सागरं भीमनिर्घोषं कंपयामासतुर्भृशं।विकर्ष
न्नूर्मिजालानि बृहंति लवणांभसि॥७४॥पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी।मेरुमंदरसंकाशानुद्गतान्सुमहार्णवे॥७५॥अतिक्रामन्महावेगस्तरंगान्गणयन्निव।तस्य वेगस
मुद्धूतं जलं सजलदं तथा॥७६॥अंबरस्थं विबभ्राजे शारदाभ्रमिवाततं।तिमिनक्रझषाः कूर्मा दृश्यंते विवृतास्तदा॥७७॥वस्त्रापकर्षणेनेव शरीराणि शरीरिणां॥

जनितवायुर्लक्ष्यते।विकर्षन्निति।विकिरन्निव रोदसी द्यावापृथिव्यौ ऊर्मिजालानि विकिरन् विक्षिपन्निव बलवत्‌ शतिसंबंधतस्येति।वेगसमुद्धूतं वेगेनोत्कीर्णं अत एवांबरस्थं।अत	राम॰
एव सजलदं जलदसहचरं जलं शारदाभ्रमिव स्वयं च जलदविशेषवत् विबभ्राजे इत्यर्थः।वेगसमुद्धूतमित्यपि पाठः।तिमीति।शरीराणि अवयवाः॥॥	२

श्वेताभ्रघनराजी वा अभ्रशब्देन स्वच्छतोच्यते। घनशब्देन सांद्रता। तथा च निर्मलाभ्रसांद्रपंक्तिरित्यर्थः। आपात इति। आपतंति संचरंत्यस्मिन्नित्यापातो मार्गः। सागरः सगरसंबंधि अत एवेक्ष्वाकुकुल
मानार्थी। इत्यर्थी। चिंताप्रकारमेवाह। साहाय्यमिति। विवक्षतां वक्तुमिच्छतां वागिंद्रियवृत्तीनामित्यर्थः। सर्ववाच्यः सर्वनिंद्यो वा विषयोऽभविष्यमित्यर्थः। तथेति। शेषं भागशेषं। हिरण्यनाभं

क्रममाणं समीक्ष्याथ भुजगाः सागरालयाः। व्योम्नि तं कपिशार्दूलं सुपर्णमिव मेनिरे॥७८॥ दशयोजनविस्तीर्णा त्रिंशद्योजनमायता। छाया वानरसिंहस्य जले चारुतराभवत्॥७९॥
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी। तस्य सा शुशुभे छाया पतिता लवणांभसि॥८०॥ शुशुभे स महातेजा महाकायो महाकपिः। वायुमार्गे निरालंबे पक्षवानिव पर्वतः॥८१॥ येना
सौ याति बलवान्वेगेन कपिकुंजरः। तेन मार्गेण सहसा द्रोणीकृत इवार्णवः॥८२॥ आपाते पक्षिसंघानां पक्षिराज इव व्रजन्। हनूमान्मेघजालानि प्रकर्षन्मारुतो यथा॥८३॥ पांडुरारुणवर्णा
नि नीलमांजिष्ठकानि च। कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे। प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः। प्रच्छन्नश्च प्रकाशश्च चंद्रमा इव लक्ष्यते॥८५॥ प्लवमानं तु तं दृष्ट्वा प्लवगं त्वरि
तं तदा। ववृषुः पुष्पवर्षाणि देवगंधर्वदानवाः॥८६॥ तताप न हि तं सूर्यः प्लवंतं वानरेश्वरं। सिषेवे च तदा वायू रामकार्यार्थसिद्धये॥८७॥ ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा। जगुश्च देवगं
धर्वाः प्रशंसंतो महौजसं॥८८॥ नागाश्च तुष्टुवुर्यक्षा रक्षांसि विविधानि च। प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमं॥८९॥ तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति। इक्ष्वाकुकुलमानार्थी चिंत
यामास सागरः॥९०॥ साहाय्यं वानरेंद्रस्य यदि नाहं हनूमतः। करिष्यामि भविष्यामि सर्ववाच्यो विवक्षतां॥९१॥ अहमिक्ष्वाकुनाथेन सगरेण विवर्धितः। इक्ष्वाकुसचिवश्चायं नार्हत्य
वसीदितुं॥९२॥ तथा मया विधातव्यं विश्रमेत यथा कपिः। शेषं च मयि विश्रांतः सुखी सोऽतिगमिष्यति॥९३॥ इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमंभसि। हिरण्यनाभं मैनाकमुवाच गिरिसत्त
मं॥९४॥ त्वमिहासुरसंघानां पातालतलवासिनां। देवराज्ञा गिरिश्रेष्ठ परिघः सन्निवेशितः॥९५॥ त्वमेषां ज्ञातवीर्याणां पुनरेवोत्पतिष्यतां। पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि

। हिरण्यनाभं हिरण्मयमित्यर्थः। नाभिः प्रधाने कस्तूर्यामिति विश्वः। त्वमिति। परिघः सन्निवेशितः आयुधविशेषत्वेन वेशं निवेशितः। अनेन पक्षच्छेदभयात्समुद्रप्रवेशानंतरं पातालस्थ
राक्षसनिरोधार्थं देवराजेन मैनाकः स्थापित इत्यवगम्यते॥ ॥

तिर्यगिति । वर्धितुं शक्तिरस्तीति शेषः । स एष हि त्वामुपरि त्वदुपरि क्रमतीति । अतः साचिव्यकरणात् अस्माकं कार्यं प्रयोजनं नातिक्रमेत न लङ्घयतामित्यर्थः । कार्यातिक्रमे अनिष्टमाह । कर्तव्यमिति ।
चामीकरहिरण्यात्मक । हिरण्यनाभ इति । निशम्य वचनमिति शेषः । आनृशंस्यं कृतज्ञतां स महात्मेत्यादि श्लोकद्वयमेकं वाक्यं । शातकुम्भमयैः शृङ्गैरुपलक्षितः । तप्तेति । शस्त्रसंकाशं शस्त्र

तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुं । तस्मात्त्वां बोधयामि त्वामुत्तिष्ठ नगसत्तम ॥ ९७ ॥ स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् । हनूमान्रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥ ९८ ॥
अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः । मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ ९९ ॥ कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् । कर्तव्यं न तु यत्कार्यं सतां मन्युमुदीरयेत् ॥ १०० ॥
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि । अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः ॥ १ ॥ चामीकरमहानाभ देवगन्धर्वसेवित । हनूमांस्त्वयि विश्रान्तस्ततः शेषं गमिष्यति ॥ २ ॥ काकु-
त्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनं । श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ ३ ॥ हिरण्यनाभो मैनाको निशम्य लवणाम्भसः । उत्पपात जलात्तूर्णं महाद्रुमलतावृतः ॥ ४ ॥ स सागरस्य
जलं भित्त्वा बभूवाभ्युत्थितस्तदा । यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ ५ ॥ स महात्मा मुहूर्तेन पर्वतः सलिलावृतः । दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ ६ ॥ शातकुम्भमयैः शृ-
ङ्गैः भ्राजमानैः स्वयंप्रभैः । आदित्योदयसंकाशैरालिखद्भिरिवाम्बरं ॥ ७ ॥ तप्तजाम्बूनदैः शृङ्गैः पर्वतस्य समुत्थितैः । आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभं ॥ ८ ॥ जातरूपमयैः शृङ्गैर्भ्रा-
जमानैः स्वयंप्रभैः । आदित्यशतसंकाशः सोऽभवद्गिरिसत्तमः ॥ ९ ॥ तमुत्थितमसङ्गेन हनूमानग्रतः स्थितं । मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १० ॥ स तमुच्छ्रितमत्यर्थं महावेगो
महाकपिः । उरसा पातयामास जीमूतमिव मारुतः ॥ ११ ॥ स तथा पातितस्तेन कपिना पर्वतोत्तमः । बुद्ध्वा तस्य महावेगं जहर्ष च ननन्द च ॥ १२ ॥ तमाकाशगतं वीरमाकाशे समवस्थितः । प्रीतो
हृष्टमना वाक्यं पर्वतः कपिमब्रवीत् ॥ १३ ॥ मानुषं धारयन्रूपमात्मनः शिखरे स्थितः । उवाच हरिशार्दूलं मैनाकः पवनात्मजं ॥ १४ ॥ दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम । निपत्य मम शृ-
ङ्गेषु विश्रमस्व यथासुखं ॥ १५ ॥ राघवस्य कुले जातैरुदधिः परिवर्धितः । स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ॥ १६ ॥

श्यामं सत् काञ्चनप्रभं । कनकगौरमासीदित्यर्थः । तमिति । असङ्गेन एकाकिना । जहर्ष ननन्देत्यनेन कार्यमनेनैव सिद्धमिति सूच्यते

कृतेचेति। कृते उपकारे सोपकृत्पुरुषैः तत्प्रतिकारार्थी। तस्योपकारस्य प्रत्युपकारार्थी त्वत्तः सन्मानमर्हति। त्वत्सत्कारागतसत्कारस्य रूपो पूजां प्राप्तुं योग्यो भवतीत्यर्थः। त्वन्निमित्तमित्यादिश्लोकद्वयमेकं
वाक्यं। एष कपिः योजनानां शतमाप्लुतः। समाप्लुतोपि त्वत्सानुषु विश्रान्तः शेषां मार्गशेषां प्रक्रमतामिति। त्वन्निमित्तमनेन सागरेणाहं बहुमानात्प्रचोदितः। अतः कपिशार्दूल त्वं तिष्ठ म

कृते च प्रतिकर्तव्यमेष धर्मः सनातनः। सोयं तत्प्रतिकारार्थी त्वत्तः सन्मानमर्हति॥१७॥ त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः। तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यतां॥१८॥ योजना
नां शतं चापि कपिरेष समाप्लुतः। तव सानुषु विश्रान्तः शेषं विप्रक्रमतामिति॥१९॥ तदिदं गंधवत्स्वादु कंदमूलफलं बहु। तदास्वाद्य हरिश्रेष्ठ विश्रान्तोत्पतिष्यसि॥२०॥ अस्माकमपि
संबंधः कपिमुख्य त्वयास्ति वै। प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः॥२१॥ वेगवंतः प्लवंतो ये प्लवगा मारुतात्मज। तेषां मुख्यतमं मन्ये त्वामहं कपिकुंजर॥२२॥ अतिथिः किल पूजा
र्हः प्राकृतोपि विजानता। धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान्॥२३॥ त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः। पुत्रस्तस्यैव वेगेन सदृशः कपिकुंजर॥२४॥ पूजिते त्वयि धर्मज्ञे
पूजां प्राप्नोति मारुतः। तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणं॥२५॥ पूर्वं कृतयुगे तात पर्वताः पक्षिणोभवन्। तेपि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः॥२६॥ ततस्तेषु प्रयातेषु
देवसंघाः सहर्षिभिः। भूतानि च भयं जग्मुस्तेषां पतनशंकया॥२७॥ ततः क्रुद्धः सहस्राक्षः पर्वतानां क्रतोयायवै। पक्षांश्चिच्छेद वज्रेण ततः शतसहस्रशः॥२८॥ स मामुपगतः क्रुद्धो
वज्रमुद्यम्य देवराट्। ततोहं सहसा क्षिप्तः श्वसनेन महात्मना॥२९॥ अस्मिंल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम। गुप्तपक्षः समग्रश्च तव पित्राभिरक्षितः॥३०॥ ततोहं मानयामि त्वां मा
न्यो हि मम मारुतः। त्वया मे ह्येष संबंधः कपिमुख्य महागुणः॥३१॥ अस्मिन्नेवंगते कार्ये सागरस्य ममैव हि। प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे॥३२॥ श्रमं मोक्षय पूजां च गृहाण
कपिसत्तम। प्रीतिं च बहु मन्यस्व प्रीतोस्मि तव दर्शनात्॥३३॥ एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत्। प्रीतोस्मि कृतमातिथ्यं मन्युरेषोपनीयतां॥३४॥

यि विश्रम्य गम्यतामित्यन्वयः। तदिदमिति। तत्त्वसिद्धं। अस्माकमिति। महागुणपरिग्रहः महागुणेन वायुना परिगृह्यत इति तथा। अतिथिरिति। त्वादृशो महानिति पाठः। अस्मिन्निति। एवंगते प्राप्ते सति का
र्ये उपकाररूपकार्ये प्रीतिं कर्तुमर्हसि। प्रज्ञास्वीकारेणेति भावः। एवमिति। मन्युः पूजानंगीकारनिबंधने दैन्यं॥॥

सुं॰ ५

त्वरत इति। कार्यकालः लंकाप्रवेशकालः। त्वरते विलंबं न सहते। आलभ्य स्पृष्ट्वा प्रहसन्निव अमत्त्रगुरुकः सन्। पितुः पंथानं वायुमार्गं तदिति। समुद्रलंघनं प्रथमं कर्म द्वितीयं मैनाकगिरावविश्रम्य गमनं।
साह्यमिति। साह्यं सहकर्म सहकारित्वमिति यावत्। तेन त्वमत्रिदशेभ्यो भयेष्वप्यनिर्भयस्य हनूमतः साह्यं कृतमतो अभयं प्रयच्छामीति संबंधः। हनूमानिति। सागरे मैनाकाधिष्ठितप्रदेशं त्वा मि

त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते। प्रतिज्ञा च मया दत्ता न स्थातव्यमिहांतरे ॥३५॥ एवमुक्त्वा पाणिना शैलमालभ्य हरिपुंगवः। जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥३६॥ स पर्वतसमु
द्राभ्यां बहुमानादवेक्षितः। पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ॥३७॥ अथ ऊर्ध्वं दूरमुत्प्लुत्य हित्वा शैलमहार्णवौ ॥३॥ पितुः पंथानमास्थाय जगाम विमलेंबरे ॥३८॥ भूयश्चोर्ध्वगतिं प्रा
प्य गिरिं तमवलोकयन्। वायुसूनुर्निरालंबे जगाम विमलेंबरे ॥३९॥ तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करं। प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥४०॥ देवताश्चाभवन्हृष्टास्तत्रस्थास्त
स्य कर्मणा। कांचनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥४१॥ उवाच वचनं धीमान्परितोषात्सगद्गदं। सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः। हिरण्यनाभ शैलेंद्र परितुष्टोस्मि ते भृशं।
अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखं ॥४३॥ साह्यं कृतं ते सुमहद्विक्रांतस्य हनूमतः। क्रमतो योजनशतं निर्भयस्य भये सति ॥४४॥ रामस्यैष हि दूत्येन याति दाशरथेर्हरिः। सत्क्रि
यां कुर्वता शक्त्या तोषितोस्मि दृढं त्वया ॥४५॥ ततः प्रहर्षमलभद्विपुलं पर्वतोत्तमः। देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुं ॥४६॥ स वै दत्तवरः शैलो बभूवावस्थितस्तदा। हनूमांश्च मुहू
र्तेन व्यतिचक्राम सागरं ॥४७॥ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः। अब्रुवन्सूर्यसंकाशां सुरसां नागमातरं ॥४८॥ अयं वातात्मजः श्री
मान्प्लवते सागरोपरि ॥४९॥ हनूमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर। राक्षसं रूपमास्थाय सुघोरं पर्वतोपमं ॥५०॥ दंष्ट्राकरालं पिंगाक्षं वक्त्रं कृत्वा नभःस्पृशं। बलमिच्छामहे ज्ञा
तुं भूयश्चास्य पराक्रमं ॥५१॥ त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति। एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ॥५२॥ समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः। विकृतं च विरूपं च सर्वस्य
च भयावहं ॥५३॥ प्लवमानं हनूमंतमावृत्येदमुवाच ह ॥ ॥

विजेष्यत्युपायेन विजेष्यति। अभिभविष्यति वा विषादं दैन्यं गमिष्यति वेति। ज्ञातुमिच्छामहे इति संबंधः ॥५१॥

राम॰ ५

ममेति। ईश्वरैः देवैः। अन्येति। कार्यविषक्तस्य मायामृगवधप्रस्थितस्य। तस्मादिति विषयवासिनी। रामराज्यवासिनी त्वं नो कर्तनायत्वादमुना यस्येति भावः। एवमिति। कश्चिदपि जनः। नातिवर्तेत मामि

मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ॥ अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननं॥५५॥ वर एष पुरा दत्तो मम धात्रेति सत्वरा॥ व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः॥५६॥ एव
मुक्तः सुरसया प्राञ्जलिः पवनात्मजः। प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत॥५७॥ रामो दाशरथिर्नाम प्रविष्टो दण्डकावनं। लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया॥५८॥ अ
न्यकार्यविषयक्तस्य बद्धवैरस्य राक्षसैः। तस्य सीता हृता भार्या रावणेन यशस्विनी॥५९॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात्। कर्तुमर्हसि रामस्य साह्यं विषयवासि
नि॥६०॥ अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणं॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते॥६१॥ एवमुक्ता हनुमता सुरसा कामरूपिणी। अब्रवीन्नातिवर्तेत कश्चिदेष वरो
मम॥६२॥ तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत। बलं जिज्ञासमाना वै नागमाता हनूमतः॥६३॥ प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम। वर एष पुरा दत्तो मम धात्रेति सत्वरा॥६४
व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः। एवमुक्तः सुरसया क्रुद्धो वानरपुंगवः॥६५॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे। इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः॥६६॥ दश
योजनविस्तारो हनूमान्कृतनक्रुद्धः त्रिंशद्योजनमायतः हनुमान् कपिः॥६७॥ तं दृष्ट्वा गिरिसंकाशं दशयोजनमायतं। चकार सुरसाप्यास्यं विंशद्योजनमायतं॥६८॥ चकार सुर
सा वक्त्रं चत्वारिंशत्तथोच्छ्रितं। बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः॥६९॥ चकार सुरसा वक्त्रं षष्टियोजनमुच्छ्रितं। तथैव हनुमान्वीरः सप्ततिं योजनोच्छ्रितः॥७०॥ चकार सुरसा
वक्त्रमशीतिं योजनोच्छ्रितं। हनूमानचलप्रख्यो नवतिं योजनोच्छ्रितः॥७१॥ चकार सुरसा वक्त्रं शतयोजनमायतं। तं दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान॥७२॥ दीर्घजिह्वं
सुरसया सुघोरं नरकोपमं। सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः॥७३॥ सोऽभिपत्याथ तद्वक्त्रं निष्पत्य च महाबलः। अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत॥७४॥
प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते। गमिष्ये यत्र वैदेही सत्यं चासीद्वरस्तव॥७५॥ तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव। अब्रवीत्सुरसा देवी स्वेन रूपेण वानरं॥७६॥

तिशेषः। नातिवर्तेन्मामिति पिपासुः। अथ परदानं। श्रुत्वापि जिगमिषुं तं प्रत्याह। तमिति। एवमिति। विषहिष्यसे। अभिभविष्यसि गमिष्यसे इत्यर्थः। तं दृष्ट्वेति। सुरसया व्यादितमास्यं॥ ॥ ॥

सुं०
९

अर्थेति।समानयसंयोजय।तृतीयंकर्मास्वरसावक्रांतिक्रमणं।सेवितइति।कैशिकाचार्यैर्गकैशिकंगानंतन्नामारितराचार्यैस्तंबुरुप्रभृतिभिः।ऐरावतनिषेविते।ऐरावतमिति।अनुदीर्घमिंद्रधनुरुच्य
तेवज्राशनिसमाघातैः।वज्राशन्योःसमस्तव्यः।आघातःअभिघातः।येषांतैःपावकैः।आकाशस्थएकोनपंचाशदग्निसंबंधस्थत्वात्तत्त्वधानभूतचित्रभानुसंबंधमाह।वहतेति।विविक्तइतिविवि

अर्थसिद्ध्यैहरिश्रेष्ठगच्छसौम्ययथासुखं।समानयचवैदेहींराघवेणमहात्मना॥७७॥तृतीयंहनुमतोदृष्ट्वाकर्मसुदुष्करं।साधुसाध्वितिभूतानिप्रशशंसुस्तदाहरिं॥७८॥ससागरमनाधृ
ष्यमभ्येत्यवरुणालयं।जगामाकाशमाविश्यवेगेनगरुडोपमः॥७९॥सेवितेवारिधाराभिःपतगैश्चनिषेविते।चरितेकैशिकाचार्यैरैरावतनिषेविते॥८०॥सिंहकुंजरशार्दूलपत
गोरगवाहनैः।संपतद्भिश्चविमलैर्विमानैःसमलंकृते॥८१॥वज्राशनिसमाघातैःपावकैरुपशोभिते।कृतपुण्यैर्महाभागैःस्वर्गजिद्भिरधिष्ठिते॥८२॥वहताहव्यमत्यंतंसेवितेचि
त्रभानुना।ग्रहनक्षत्रचंद्रार्कतारागणविभूषिते॥८३॥महर्षिगणगंधर्वनागयक्षसमाकुले।विविक्तेविमलेविश्वेविश्वावसुनिषेविते॥८४॥देवराजगजाक्रांतेचंद्रसूर्यपथेशिवे॥
वितानेजीवलोकस्यविमलेब्रह्मनिर्मिते।बहुशःसेवितेवीरैर्विद्याधरगणैर्वरैः।जगामवायुमार्गेणगरुत्मानिवमारुतिः॥८६॥हनुमान्मेघजालानिप्रकर्षन्मारुतोयथा॥
कालागरुसवर्णानिरक्तपीतसितानिच॥८७॥कपिनाकृष्यमाणानिमहाभ्राणिचकाशिरे।प्रविशन्नभ्रजालानिनिष्पतंश्चपुनःपुनः॥८८॥प्रावृषींदुरिवाभातिनिष्पत
न्प्रविशंस्तदा।प्रदृश्यमानःसर्वत्रहनुमान्मारुतात्मजः॥८९॥भेजेंबरंनिरालंबंपक्षयुक्तइवाद्रिराट्।प्लवमानंतुतंदृष्ट्वासिंहिकानामराक्षसी।मनसाचिंतयामासप्रवृद्धा
कामरूपिणी॥अद्यदीर्घस्यकालस्यभविष्याम्यहमाशिता॥९१॥इदंममहासत्त्वंचिरस्यवशमागतं।इतिसंचिंत्यमनसाछायामस्यसमाक्षिपत्॥९२॥छायायांगृह्यमाणायां
चिंतयामासवानरः।समाक्षिप्तोस्मिसहसापंगूकृतपराक्रमः॥९३॥प्रतिलोमेनवातेनमहानौरिवसागरे।तिर्यगूर्ध्वमधश्चैववीक्षमाणस्ततःकपिः॥९४॥ददर्शसमहासत्त्वमु
त्थितंलवणांभसि।तंदृष्ट्वाचिंतयामासमारुतिर्विकृताननं॥९५॥कपिराजेनकथितंसत्त्वमद्भुतदर्शनं।छायाग्राहिमहावीर्यंतदिदंनात्रसंशयः॥९६॥सतांबुद्ध्वार्थत
त्त्वेनसिंहिकांमतिमान्कपिः।व्यवर्धतमहाकायःप्रावृषीवबलाहकः॥९७॥

विश्वावसुकोविश्वावसुर्गंधर्वराजः।छायेति।आशिता।भुक्तवती।समाक्षिपत्।जग्राह॥

राम०
९

तस्येति। पातालांतरसंनिभं पातालविवरसदृशं। ददर्शेति। कायमात्रं शरीरप्रमाणं। स्वशरीरकवलनपर्याप्तमित्यर्थः। सुखं ददर्श। मर्माणि प्राणस्थानानि। संक्षिप्य तत इति। मनःसंपातविक्रमः मनोग
नसमानगतिः। तामिति। दृष्ट्वा स्वक्षमदर्शनेन। धृत्या धैर्येण। दाक्षिण्येन कौशलेन क्षिप्रकारित्वेनेत्यर्थः। तस्याः संहारने उरस्येनवा। हतेति। सा सिंहिका। हतहत्वा विदारितहृदया। अतएव विधुरा वि

तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः। वक्त्रं प्रसारयामास पातालांतरसंनिभं ॥९७॥ घनराजीव गर्जंती वानरं समभिद्रवत्। स ददर्श ततस्तस्या विकृतं सुमहन्मुखं ॥९८॥ काय
मात्रं च मेधावी मर्माणि च महाकपिः। स तस्या विवृते वक्त्रे वज्रसंहननः कपिः ॥९९॥ संक्षिप्य मुहुरात्मानं निष्पपात महाकपिः। आस्ये तस्या निमज्जंतं ददृशुः सिद्धचारणाः। ग्रस्यमा
नं यथा चंद्रं पूर्णं पर्वणि राहुणा ॥२००॥ ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः। उत्पपाताथ वेगेन मनःसंपातविक्रमः ॥२१॥ तां तु दृष्ट्वा च धृत्या च दाक्षिण्येन निहत्य सः। सक
पिप्रवरो वेगाद्वृद्धे पुनरात्मवान् ॥२॥ हृतहृत्सा हनुमता पपात विधुराम्भसि। स्वयंभुवैव हनुमान् सृष्टस्तस्या निपातकः ॥३॥ तां हतां वानरेणाथ पतितां वीक्ष्य सिंहिकां। भूतान्याका
शचारीणि तमूचुः प्लवगर्षभं ॥४॥ भीममद्य कृतं कर्म महत्सत्त्वं त्वया हतं। साधयार्थमभिप्रेतमरिष्टं प्लवतां वर ॥५॥ ततस्त्वेतानि चत्वारि वानरेंद्र यथा तव। धृतिर्दृष्टिर्मतिर्दाक्ष्यं स्वक
र्मसु न सीदति ॥६॥ स तैः संभावितः पूज्यः प्रतिपन्नप्रयोजनः। जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥७॥ प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन्। योजनानां शतस्यांते
वनराजिं ददर्श सः ॥८॥ ददर्श च पतन्नेव विविधद्रुमभूषितं। द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥९॥ सागरं सागरानूपान् सागरानूपजान्द्रुमान्। सागरस्य च पत्नीनां मुखान्यपि
विलोकयन् ॥१०॥ स महामेघसंकाशं समीक्ष्यात्मानमात्मवान्। निरुंधंतमिवाकाशं चकार मतिमान्मतिं ॥११॥ कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः। मयि कौतूहलं कुर्युरिति मे
ने महाकपिः ॥१२॥

कला। अरिष्टं शुभं भवति। प्रतिपन्नप्रयोजनः प्राप्तप्राकृतकार्यः। प्राप्तेति। प्राप्तं प्राप्तप्रायं भूयिष्ठपारं महातीरं येन। ददर्शेति। पतन् गच्छन्। मलयः सं लंकायां मलयो नाम गिरिः। मतिं कर्त्त
व्यनिश्चयं। तामेवाह। कायवृद्धिमित्यादि ॥

ततइति॥ प्रकृतिं निजाकारं। वीतमोहः निवृत्तविघ्नः। उक्तशरीरसंक्षेपं दृष्टांतकथनार्थं उपहितानंदरूपमिति। क्वचिदिति। नानाविधरूपधारिपरैः शत्रुभिरशक्यः। अप्रधृष्यः। समीक्षितात्मा॥ समा
लोकितातिप्रमाणस्वशरीरः समवेक्षितार्थः। आलोचितानंतरकार्यः। प्रतिपन्नरूपः। अंगीकृतएवदेशदेहेः। अभूदितिशेषः। ततइति। लंबस्य। लंबाख्यस्यगिरेः विचित्रकूटे। विचित्राः कूटाः अवां
तरशिखराणियस्मिंस्तस्मिन् कूटे शृंगे पपातेति संबंधः। उक्तार्थं पुनः श्लोकद्वयेनाहाततस्त्वित्यादि॥ ॥इति श्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदीपिकायां सुंदरकांडे प्रथमः सर्गः॥ तत

ततः शरीरं संक्षिप्य तन्महीधरसन्निभं। पुनः प्रकृतिमापेदे वीतमोह इवात्मवान्॥३॥ तद्रूपमतिसंक्षिप्य हनूमान्प्रकृतौ स्थितिः। त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः॥१४॥ स
चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरं। परैरशक्यः प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः॥१५॥ ततः स लंबस्य गिरेः समृद्धे विचित्रकूटे निपपात कूटे। सकेतको
द्दालकनारिकेले महाद्रिकूटप्रतिमो महात्मा॥६॥ ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लंकां गिरिवर्यमूर्ध्नि। कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान्॥१७॥
स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनं। निपत्य तीरे च महोदधेस्तदा ददर्श लंकाममरावतीमिव॥२१८॥ इत्यार्षे रामायणे सुंदरकांडे हनुमल्लंघनं नाम प्र
थमः सर्गः॥ स सागरमनाधृष्यमतिक्रम्य महाबलः। त्रिकूटशिखरे लंकां स्थितां स्वस्थो ददर्श ह॥१॥ ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान्। अभिवृष्टः स्थितस्तत्र बभौ पुष्पम
योयथा॥२॥ योजनानां शतं तीर्त्वा तथाप्युत्तमविक्रमः। अनिश्वसन्कपिस्तत्र न ग्लानिमधिगच्छति॥३॥ शतान्यहं योजनानां क्रमेयं सुबहून्यपि। किं पुनः सागरस्यांतं सं
ख्यातं शतयोजनं॥४॥ स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः। जगाम वेगवान्लंकां लंघयित्वा महोदधिं॥५॥ शाद्वलानि च नीलानि गंडवंति वनानि च। गजवंति च मध्येन ज
गाम नगवंति च॥६॥ शैलांश्च तरुसंछन्नान् वनराजीश्च पुष्पिताः। अभिचक्राम तेजस्वी हनूमान्प्लवगर्षभः॥७॥ स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च। स नगाग्रे स्थितां लंकां
ददर्श पवनात्मजः॥८॥ सरलान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान्। प्रियालान्मुचुलिंदांश्च कुटजान्केतकानपि॥९॥ प्रियंगून्गंधपूर्णांश्च नीपान्सप्तच्छदांस्तथा। असनान्
कोविदारांश्च करवीरांश्च पुष्पितान्॥१०॥

इति। पुष्पमयो यथा पुष्पमयकपिरिवेत्यर्थः। योजनानीति। अनिश्वसन् श्रमनिबंधनदीर्घनिश्वासमकुर्वन् तत्र लंघननिमित्तेन ग्लानिमधिगच्छति
नाधिगच्छतीत्यर्थः। शतानीति। अहं सुबहून्यपि योजनानां शतानि क्रमेयं शतयोजनं यथा तथा संख्यातं सागरस्यांतं किं पुनरित्युच्यतामितिशेषः। शाद्वलानीति। गंडवंति। स्थूलपाषाणवंति। न
गवंति। क्षुद्रगिरिमंति। शाद्वलानि वनानि च पश्यन्निति शेषः। मध्येन मार्गेण। जगामेति संबंधः। स इति। स नगाग्रे। शिखरसहिते अचले लंबगिरौ स्थितिष्ठन्॥ ॥

आक्रीडान् राजसंबंधिनेपि सर्वसाधारणोद्यानानि। उद्यानानि। राज्ञामसाधारणानि। समासाद्येति। कां लंकां समीपं सीतापहरणार्थेन सीताहरणस्य हेतुना। आपद्भूत इत्यत्र तेन हेतुना खरक्षितामित्यर्थः। पांडु
राभिरिति। प्रतोल्यो रथ्याः। तासां पांडुरत्वमुच्चत्वं च तत्रत्यसौधसंबंधेन। अट्टालकशताकीर्णा। आकारवेदिकोपरिगृहा यंत्रविकल्पितमंचविशेषशतसंकुलां। मत्स्याद्याकाराध्वजाः। ततोन्याः पताकाः। लतापं
क्तयः विचित्ररचनाविशेषाः। ददर्श हनुमाल्लंकामिति। पुनर्दर्शनाभिधानं विशेषांतरविवक्षया उपमानांतरविवक्षया च लंकां स्वा। तेन न निरूपयति। वप्रेति। वः अः चयः प्राकाराधारवेदिके तिया चत्व॥ स्त्री

पुष्पभारातिनद्धाग्रस्तथा मुकुलितानपि। पादपान्विहगाकीर्णान्पवनाधूतमस्तकान्॥११॥ हंसकारंडवाकीर्णाः वापीः पद्मोत्पलायुताः। आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान्
॥१२॥ संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः। उद्यानानि च रम्याणि ददर्श कपिकुंजरः॥१३॥ समासाद्य च लक्ष्मीवाल्लंकां रावणपालितां। परिखाभिः सपद्माभिः सोत्पलाभिरलंकृतां॥१४॥ सी
तापहरणार्थेन रावणेन सुरक्षितां। समंताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः। कांचनेनावृतां रम्यां प्राकारेण महापुरीं। गृहैश्च गिरिसंकाशैः शारदांबुदसन्निभैः॥१६॥ पांडुराभिः प्रतोलीभिरुच्चा
भिरभिसंवृतां। अट्टालकशताकीर्णां पताकाध्वजमालिनीं॥१७॥ तोरणैः कांचनैर्दिव्यैर्लतापंक्तिविचित्रितैः। ददर्श हनुमाल्लंकां दिवि देवपुरीमिव। गिरिमूर्ध्नि स्थितां रम्यां पांडुरैर्भवनैः शुभैः।
ददर्श स कपिः श्रीमान्पुरमाकाशगं यथा॥१९॥ पालितां राक्षसेंद्रेण निर्मितां विश्वकर्मणा॥ प्लवमानामिवाकाशे ददर्श हनुमान्कपिः॥२०॥ वप्रप्राकारजघनां विपुलांबुनवांबरां। शतघ्नी
शूलकेशांतामट्टालकवतंसकां॥२१॥ मनसेव कृतां लंकां निर्मितां विश्वकर्मणा। द्वारमुत्तरमासाद्य चिंतयामास वानरः॥२२॥ कैलासनिलयप्रख्यमालिखंतमिवांबरं। डीयमानमिव
काशं उच्छ्रितैर्भवनोत्तमैः॥२३॥ संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव। अचिंत्यां सुकृतां स्पष्टां कौबेराध्युषितां पुरा॥२४॥ दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः। रक्षितां राक्ष
सैर्घोरैर्गुहामाशीविषैरिव॥२५॥ तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः। रावणं च रिपुं घोरं चिंतयामास वानरः॥२६॥

जघनोऽस्त्री स्त्रियाः श्रोणिरित्यमरः। विपुलांबुनवांबरां अंबुशब्देन परिखांतर्गतजलमुच्यते। निर्मितामित्यनुवृत्तेः दर्शनमनुवदति। द्वारमिति। चिंतयामास लंका केन प्रदेशेन सुप्रवेशेति ज्ञातुमिति भावः। डी
यमानामिवाकाशं चलद्वुच्छ्रितामिव स्थितां डीयमानत्वादिविशेषणविशिष्टां लंकां तस्यां महतीं गुप्तिं च सागरं च निरीक्ष्य रावणं घोरं रिपुं निरीक्ष्य वानरश्चिंतयामासेति संबंधः॥

सुं० ८

चिंतायुक्तमेवाह। आगत्यापीत्यादिना। अयुक्ता शोभनेति। आत्मरप्रकृत्यर्थे पचयवनर्दर्पपराक्रमसंपन्नत्वात्तस्मा मारीलामयुक्ता शोभनास्तीति भावः। चतुर्णामित्यागतिः। आभिः संभावितेति शेषः। यावदिति। जीव
तिवा नेति वैदेहीं जानामि यावत्तावज्जानाम्येव यदि जीवति तां जनकात्मजां दृष्ट्वा तत्रैव तस्मिन्काल एव चिंतयिष्यामीति योजना। यद्वा। जीवति वा। जीवतीती ति वैदेहीं न जानामि यावत्तावज्जानाम्येव वा। उत्तय
दिनावगतितो जनकात्मजां दृष्ट्वा तत्रैव तस्मिन्काल एव चिंतयिष्यामीत्यर्थः। लक्ष्यालक्ष्यरूपेण स्वदेहस्य समीरेण मुहूर्त्तं सीतान्वेषणरूपं आत्मकार्यं तु चिंतामिति चिंतयामासेति पूर्वेण संबंधः। तामिति।
ताद्दृष्ट्वा चिंतयामासेति संबंधः। चिंतायुक्तमेवाह। तामित्यादिना। तां पुरीमित्यादि विचिंत्य बहुधेत्यंतस्य अयथस्तदृष्टा चिंतयामासेत्यनेन संबंधः। केनोपायेन रावणेनादृष्टः सन्मैथिलीं पश्ये

आगत्यापीह हरयो भविष्यंति निरर्थकाः। नहि युद्धेन वै लंका शक्या जेतुं सुरैरपि। २७। इमां तु विषमां लंकां दुर्गां रावणपालितां। प्राप्यापि स महाबाहुः किं करिष्यति राघवः। २८। अव
काशो न सांत्वस्य राक्षसेष्वभिगम्यते। न दानस्य न भेदस्य नैव युद्धस्य दृश्यते। २९। चतुर्णामेव हि गतिर्वानराणां महात्मनां। वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः। ३०। यावज्जानामि वैदे
हीं यदि जीवति वा न वा। तत्रैव चिंतयिष्यामि दृष्ट्वा तां जनकात्मजां। ३१। ततः स चिंतयामास मुहूर्तं कपिकुंजरः। गिरिशृंगे स्थितस्तस्मिन्रामस्याभ्युदये रतः। ३२। अनेन रूपेण मया न श
क्या रक्षसां पुरी। प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः। ३३। महौजसो महावीर्या बलवंतश्च राक्षसाः। वंचनीया मया सर्वे जानकीं परिमार्गता। ३४। लक्ष्यालक्ष्येण रूपेण रात्रौ लंकापुरी मया॥
प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत्। ३५। तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः। हनूमांश्चिंतयामास विनिश्वस्य मुहुर्मुहुः। केनोपायेन पश्येयं मैथिलीं जनकात्मजां। अदृष्टो राक्ष
सेंद्रेण रावणेन दुरात्मना। ३७। एकामेकश्च पश्येयं रहिते जनकात्मजां। भूताश्चार्था विपद्यंते देशकालविरोधिताः। ३८। विक्लवं दूतमासाद्य तमः सूर्योदये यथा। अर्थानर्थांतरे बुद्धिर्नि
श्चितापि न शोभते। ३९। घातयंति हि कार्याणि दूताः पंडितमानिनः॥ ॥

... कार्यं कथं न विनश्येत। रहिते। जनरहिते। एकः सन्नेकां कथं पश्येयमित्यत आह भूता इति। भूताः स्वार्थाः निष्पन्ना अपि प्रयोजनानि विक्लवं अविवेकिनं आसाद्य देशकालविरोधिताः संतः वि
पद्यंते नश्यंतीति संबंधः। किंच। न केवलं कार्यहानिः। किंतु स्वाम्यादीनां बुद्धिरप्यन्यथा भवतीत्याह। अर्थेति। अर्थानर्थांतरे कार्याकार्यविषये निश्चितापि स्वामिना मंत्रिभिः सह निश्चितापि बुद्धिः राम० ८
विक्लवं दूतमासाद्य न शोभते अकिंचित्करा भवतीत्यर्थः। तस्माद्दूतदोषादेव राज्ञां कार्यहानिरित्याह। घातयंतीति॥ ॥

आउकारोषाः स्वस्मिन्यथा नश्येत्तथा कर्तव्यमित्याह नेति। कार्यं स्वामिकार्यं वैक्लव्यं बुद्धिहीनता। वैक्लव्यमित्यादौ स्यादिति शेषः। तथा कर्तव्यमिति श्लोकशेषः। उक्तानां कार्याविरोधाय भावरक्ष
णयं स्वगोपनमुचितमित्याह द्विभिर्यत्राह। मयि दृष्ट इत्यादिना। तदहमिति। स्वेन रूपेणवानररूपेण॥ सूर्ये चेति। वृषदंशकमात्रः वृषान्मूषकान्दशतीति वृषदंशकः मार्जारः। ओतुर्विडालो मार्जारः
वृषदंशक आखुभुक् इत्यमरः। प्रदोषेति। प्रविवेश प्रवेष्टुमुपक्रान्तः। अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे इति चतुर्थे सर्गे साक्रान्तप्रवेशस्य वक्ष्यमाणत्वात्। प्रासादेति। स्तंभादिति रूप्यनिर्मितां

न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत्॥४०॥ लंघनं च समुद्रस्य कथं नु न वृथा भवेत्। मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः॥४१॥ भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः। न हि
शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः॥४२॥ एकामेक च पश्येयं रहिते जनकात्मजां। वायुरप्यत्र नाज्ञातश्चरेदिति मतिर्मम॥४३॥ न ह्यस्त्यविदितं किंचिद्राक्षसानां बलीयसां। इहाहं
यदि दृष्टोस्मि स्वेन रूपेण संवृतः॥४४॥ विनाशमुपयास्यामि भर्तुरर्थश्च हीयते। तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः॥४५॥ लंकामभिपतिष्यामि राघवस्यार्थसिद्धये। रावणस्य पुरीं रम्यां
प्रविश्य सुदुरासदां॥४६॥ प्रविश्य भवनं सर्वं द्रक्ष्यामि जनकात्मजां। इति निश्चित्य हनुमान्सूर्यस्यास्तमये हरिः॥४७॥ आचकांक्षे तदा वीरो वैदेह्या दर्शनोत्सुकः। सूर्ये चास्तं गते रात्रौ देहं सं
क्षिप्य मारुतिः॥४८॥ वृषदंशकमात्रः सन्बभूवाद्भुतदर्शनः। प्रदोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान्॥४९॥ प्रविवेश पुरीं रम्यां प्रविभक्तमहापथां। प्रासादमालावितता स्तंभैः
कांचनराजतैः॥५०॥ शातकुंभनिभैर्जालैर्गंधर्वनगरोपमां। सप्तभौमाष्टभौमैश्च स ददर्श महापुरीं॥५१॥ स्थलैः स्फटिकसंकीर्णैः कार्तस्वरपरिष्कृतैः। वैडूर्यमणिचित्रैश्च मुक्ताजाल
विभूषितैः॥५२॥ तलैः शुशुभिरे तानि भवनान्यत्र रक्षसां। कांचनानि विचित्राणि तोरणानि च रक्षसां॥५३॥ लंकामुद्योतयामासुः सर्वतः समलंकृतां। अचिंत्यामद्भुताकारां दृष्ट्वा
लंकां महाकपिः॥५४॥ आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः॥५५॥ स पांडुराविद्धविमानमालिनीं महार्हजांबूनदजालतोरणां॥ यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भी
मबलैः समावृतां॥५६॥ चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन्। ज्योत्स्नावितानेन वितत्य लोकानुत्तिष्ठते नैकसहस्ररश्मिः॥५७॥ शंखप्रभं क्षीरमृणाल
वर्णमुद्गच्छमानं व्यवभासमानं। ददर्श चंद्रं स कपिप्रवीरः पोप्लूयमानं सरसीव हंसं॥५८॥ इत्यार्षे रामायणे सुंदरकांडे द्वितीयः सर्गः॥२॥ समद्दशोक्षिवर्तमानकया समाप्ता॥

सप्तभौमेति। भूमिषु भवंतीति भौमानि तलानि सप्त भौमानि तलानि येषां तैस्तथा एवमष्टभौमाः तैः प्रासादैरिति शेषः। तैरुपलक्षितां पुरीं स ददर्शेति योजना। कांचनानीति। रक्षसां तोरणानि रक्षो
गृहद्वारस्थतोरणानि। अचिंत्यामिति। विषण्णः लंकायाः दुर्धर्षत्वात् विषण्णः। अद्भुतत्वाद्धृष्टश्च स इति। पांडुरेति। पांडुराविद्धविमानमालिनीं। धवलानां तत्र सप्तभौमप्रासादपंक्तिमतीं। चंद्रोपीति। ज्यो
त्स्नावितानेन लोकान्। वितत्य विस्तारीकृत्य अस्य साचिव्यमतः मैनाकवत्सिंधुवत्साचिव्यं कुर्वन्निवाकुर्वन्नेवा विराजन्मध्यगतः तारागणमध्यगतः तारागणैः सह उत्तिष्ठते प्रादुरभूदित्यर्थः।
न्वयः। चंद्रेति। पोप्लूयमानं शंखस्वमान इति श्रीमहेश्वरतीर्थीये सुंदरकांडे द्वितीयः सर्गः॥२॥

सुं॰ ९

स ततिलंबे। लंकायाः। लंबशिखरे। लंबगिरिशृंगे। सत्वमास्थाय। विटपावती अलकापुरी। चारु विति। चारुतोरणनिर्यूहां। निर्यूहा मत्तवारणं। तोरणस्य निर्यूहस्तोरणनिर्यूहः चारुस्तोरणनिर्यूहो यस्यां तां। पांडु
रद्वारतोरणां पांडुरे स्वधाधवलिते द्वारितोरणे यस्यां तां। जांबूनदमयैर्द्वारैरित्युपलक्षणे तृतीया। राजहंसनिषेवितैरित्यंतविशेषणविशिष्टैर्द्वारैरुपलक्षितां लंकां नगरीं समीक्ष्य हनूमान् जहर्षेति संबंधः। वज्र

स लंबशिखरे लंबे लंबतोयदसन्निभे। सत्वमास्थाय मेधावी हनूमान्मारुतात्मजः॥१॥ निशि लंकां महासत्वो विवेश कपिकुंजरः। रम्यकाननतोयाढ्यां पुरीं रावणपालितां॥२॥ शारदांबुधरप्र
ख्यैर्भवनैरुपशोभितां। सागरोपमनिर्घोषां सागरानिलसेवितां॥३॥ सुपुष्टबलसंगुप्तां यथा रक्षोगणे शृंगं वस्वौकसारप्रतिमां यथैव विटपावतीं॥४॥ चारुतोरणनिर्यूहां पांडुरद्वार
तोरणां। भुजगाचरितां गुप्तां शुभां भोगवतीमिव॥५॥ तां सविद्युद्घनाकीर्णां ज्योतिर्गणनिषेवितां। चंडमारुतसंकाशां यथा वै ह्यमरावतीं॥६॥ शातकुंभेन महता प्राकारेणाभिसंवृतां। किं
किणीजालघोषाभिः पताकाभिरलंकृतां॥७॥ आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान्। विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः॥८॥ जांबूनदमयैर्द्वारैर्वैदूर्यकृतवेदिकैः।
वज्रस्फटिकमुक्ताभिर्मणिकुट्टिमवेदिकैः॥९॥ तप्तहाटकनिर्यूहै राजतामलपांडुरैः। वैदूर्यकृतसोपानैः स्फाटिकांतरपांसुभिः॥१०॥ चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः।
क्रौंचबर्हिणसंघुष्टैः राजहंसनिषेवितैः॥११॥ तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादितां। वस्वौकसारप्रतिमां समीक्ष्य नगरीं ततः॥१२॥ खमिवोत्पतितां लंकां जहर्ष हनुमा
न्कपिः। तां समीक्ष्य पुरीं रम्यां राक्षसाधिपतेः शुभां॥१३॥ अनुत्तमामृद्धियुक्तां चिंतयामास वीर्यवान्। नेयमन्येन नगरी शक्या धर्षयितुं बलात्॥१४॥ रक्षिता रावणबलैरुद्यतायुधधा
रिभिः। कुमुदांगदयोर्वापि सुषेणस्य महाकपेः॥१५॥ प्रसिद्धेयं भवेद्भूमिर्मैंदद्विविदयोरपि। विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः॥१६॥ ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत्॥

स्फटिकमुक्ताभिर्भूषितैरिति शेषः। राजतामलपांडुरैः रजतमयामलपांडुरोपरिप्रदेशैः। चारुसंजवनोपेतैः रमणीयचतुःशालोपेतैः। सभा संजवनं त्विदं चतुःशालमित्यमरः। वस्वौकसारा पूर्वदिशि स्थि
तेंद्रपुरी। खमिति। उत्पतितकामां। उत्पतितुमिच्छंतीमिव स्थितां। अन्येषां असाध्या ये तेषां साध्यत्वमाह। कुमुदांगदयोरिति। प्रसिद्धा दुष्प्रवेशत्वेन प्रसिद्धेयं नगरी। कुमुदांगदादीनामपि भूमिः
विषयः भवेत्। विवस्वतस्तनूजस्य सुग्रीवस्य कुशपर्वतः मम च गतिर्भविता गम्या भवेत्॥

राम॰ ९

समीक्ष्येति। विक्रान्तं विक्रमं। रामलक्ष्मणाभ्यां अनायासेन जेतुं शक्येति मत्वा प्रीतिमान् हृष्ट इत्यर्थः। तां रत्नेत्यादि श्लोकद्वयमेकं वाक्यं। तत्रैकार्थत्वबन्धः प्रसिद्धः परः अन्यः प्रकृतपरामर्शी। अथेति स्वेन रू-
पेण अधिदेवतारूपेण। पुरस्तादिति। अवितिष्ठत् आत्मानं प्रकाशितवती। कस्त्वमिति। तेन च प्राणा यावद्धरन्ति अधियन्ते तावत् यत्तत्त्वं तत्कथयस्व। अहमिति। आज्ञाप्रतीक्षा। आज्ञानुवर्तिनी। वनानी-

समीक्ष्य च महाबाहू राघवस्य पराक्रमं ।।१७।। लक्ष्मणस्यापि विक्रान्तमभवत्प्रीतिमान्कपिः। तां रत्नवसनोपेतां गोष्ठागारावतंसकां ।।१८।। यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषितां
तां नष्टतिमिरां दीप्तां भास्वरैश्च महागृहैः ।।१९।। नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः। अथ सा हरिशार्दूलं प्रविशन्तं महाबलं ।।२०।। नगरी स्वेन रूपेण ददर्श पवनात्मजं। सा तं हरिवरं
दृष्ट्वा लंका रावणपालिता ।।२१।। स्वयमेवोत्थिता तत्र विकृताननदर्शना। पुरस्तात्तस्य वीरस्य वायुसूनोरतिष्ठत ।।२२।। मुंचमाना महानादमब्रवीत्पवनात्मजं। कस्त्वं केन च का-
र्येण इह प्राप्तो वनालय ।।२३।। कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते। न शक्यं खल्वियं लंका प्रवेष्टुं वानर त्वया ।।२४।। रक्षिता रावणबलैरभिगुप्ता समन्ततः। अथ तामब्रवीद्वी-
रो हनुमानग्रतः स्थितां। कथयिष्यामि ते तत्त्वं - - - - - ।। का त्वं विरूपनयना पुरद्वारेऽवतिष्ठसे ।।२६।। किमर्थं चापि मां क्रोधान्निर्भर्त्सयसि दारुणे। हनुमद्वचनं श्रु-
त्वा लंका सा कामरूपिणी ।।२७।। उवाच वचनं क्रुद्धा परुषं पवनात्मजं। अहं राक्षसराजस्य रावणस्य महात्मनः ।।२८।। आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमां। न श-
क्या मामवज्ञाय प्रवेष्टुं नगरी त्वया ।।२९।। अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया। अहं हि नगरी लंका स्वयमेव प्लवंगम ।।३०।। सर्वतः परिरक्षामि ह्यतस्ते कथितं मया।
लंकाया वचनं श्रुत्वा हनुमान्पवनात्मजः ।।३१।। यत्नवान्स हरिश्रेष्ठः स्थितः शैल इवापरः। स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुंगवः ।।३२।। आबभाषेथ मेधावी सत्त्ववान्प्लवग-
र्षभः। द्रक्ष्यामि नगरीं लंकां साट्टप्राकारतोरणां ।।३३।। निर्विशंकमिमं लोकं पश्यन्त्यास्तव संप्रतं। इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ।।३४।। वनान्युपवनानीह लंकायाः
काननानि च। सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ।।३५।। तस्य तद्वचनं श्रुत्वा लंका सा कामरूपिणी। भूय एव पुनर्वाक्यं बभाषे परुषाक्षरं ।।३६।। मामनिर्जित्य दुर्बुद्धे राक्ष-
सेश्वरपालितां ।। न शक्यमद्य ते द्रष्टुं पुरीयं वानराधम ।।३७।। ततः स हरिशार्दूलस्तामुवाच निशाचरीं। दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतं ।।३८।।

ति। उपवनानि क्रीडावनानि। वनानि स्वाभाविकानि। भूयः भृशं परुषाक्षरं वाक्यं पुनर्बभाषे इति संबन्धः।। ।।

ततः इति। वेगिता संजातवेगा। ततः इति। अंगुलीः संवर्तयामास। मुष्टिमावर्तितवानित्यर्थः। स्रात्विति। विकृताननदर्शना। विकृताननदृष्टिः। प्रसीदेति। समये। स्त्री न हंतव्येति व्यवस्थायां उज्जयत्वज्ञापनाय॥
स्वस्वरूपं तावदाह। अहं त्विति। अहं स्वयं सा लंकानगर्यधिष्ठात्री देवता अधिष्ठानदेवतात्वाद्देवता। त्वा देवाहं उज्जयेत्यर्थः। ततः किमत आह। निर्जितेति। उर्जया यद्यहं त्वया बलान्निर्जि

ततः कृत्वा महानादं सा वै लंका भयानकं। तलेन वानरश्रेष्ठं ताडयामास वेगिता॥ ३९॥ ततः स हरिशार्दूलो लंकया ताडितो भृशं। ननाद सुमहानादं वीर्यवान्पवनात्मजः॥ ४०॥
ततः संवर्तयामास वामहस्तस्य सोंगुलीः। मुष्टिनाभिजघानैनां हनूमान्क्रोधमूर्छितः॥ ४१॥ स्त्री चेति मन्यमानेन नातिक्रोधः स्वयं कृतः। सा तु तेन प्रहारेण विह्वलांगी
निशाचरी॥ ४२॥ पपात सहसा भूमौ विकृताननदर्शना। ततस्तु हनुमान्प्राज्ञस्तां दृष्ट्वा विनिपातितां॥ ४३॥ कृपां चकार तेजस्वी मन्यमानः स्त्रियं च तां। ततो वै भृशसंवि
ग्ना लंका सा गद्गदाक्षरं॥ ४४॥ उवाचागर्वितं वाक्यं हनूमंतं प्लवंगमं। प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम॥ ४५॥ समये सौम्य तिष्ठंति सत्ववंतो महाबलाः। अहं तु न
गरी लंका स्वयमेव प्लवंगम॥ ४६॥ निर्जिताहं त्वया वीर विक्रमेण महाबल॥ इदं तु तथ्यं शृणु मे ब्रुवंत्या मे हरीश्वर॥ ४७॥ स्वयं स्वयंभुवा दत्तं वरदानं यथा मम॥ यदा त्वां वा
नरः कश्चिद्विक्रमाद्वशमानयेत्॥ ४८॥ तदा त्वया हि विज्ञेयं रक्षसां भयमागतं॥ स हि मे समयः सौम्य प्राप्तोद्य तव दर्शनात्॥ ४९॥ स्वयंभूविहितः सत्यो न तस्यास्ति व्यतिक्र
मः। सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः॥ ५०॥ रक्षसां चैव सर्वेषां विनाशः समुपागतः। तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालितां॥ ५१॥ विधत्स्व सर्वकार्याणि यानि
यानीह वांछसि॥ प्रविश्य शापोपहतां हरीश्वरः पुरीं शुभां राक्षसराजपालितां॥ यदृच्छया त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखं॥ ५२॥ इत्यार्षे रामायणे सुं
दरकांडे तृतीयः सर्गः॥ ३॥

ता। अतः सत्यं स एवं लंकां तदवच्छिन्नो राक्षसा निर्जिता इति भावः। स्वनिर्जयेन राक्षसानां निर्जितत्वप्रतिपादनस्य कारणमाह। इदमित्यादिना। वरदानं दत्तं वरदानं कृतमित्यर्थः। अस्य स्वरूपमाह। राम॰ १०
यदेति। अत्र रावणाधिक्षेपप्रकुपितनंदिकेश्वरशापान्मत्यः प्राप्तो विनाशः स्वयंभुवरप्रसादाज्ञानरा...रनपर्यंतं प्रतिबद्ध इति कथानुसंधेया। प्रविश्येति। यदृच्छया स्वैरं इति महेश्वरती
र्थविरचितरामायणतत्त्वदीपिकायां सुंदरकांडे तृतीयः सर्गः

अद्वारेणेति। शत्रुस्थानमद्वारेण प्रवेष्टव्यमिति शास्त्राद्द्वारेणोत्प्लुत्य। प्रविश्येति। सव्यं दुष्प्रकम्प्य सव्यं पादं चक्रे अथ इति शेषः। सः अयनतः कृतः सव्यः पादः शत्रूणां मूर्द्ध्नि येन कृतो भवति अथवा स्व पादनिक्षेपे शत्रवः पराभूतास्तु रिति भावः। प्रविष्ट इति। महापथमास्थाय गम्यत्वेनावलम्ब्य प्रविष्टः। हसितेति। हसितानामुत्कृष्टनिनदैः अट्टहासैः। वज्राङ्कुशनिकाशैः वज्रनिकाशैः अङ्कुशनिकाशै श्च गृहमेधैः गृहश्रेष्ठैः गृहमुख्यैरित्यपि पाठः। प्रजज्वालेत्यत्र काशे पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः वर्द्धमानगृहैः वर्द्धमाननाम्ना संस्थानेन संस्थिते

स निर्जित्य पुरीं श्रेष्ठां लंकां तां कामरूपिणीं॥ विक्रमेण महातेजा हनूमान्कपिसत्तमः॥१॥ अद्वारेण महाबाहुः प्राकारमवपुप्लुवे॥ निशि लंकां महासत्वो विवेश कपिकुंजरः॥ प्रविश्य नगरीं लंकां कपिराजहितंकरः॥२॥ चक्रेथ पादं सव्यं च शत्रूणां स तु मूर्द्धनि॥ प्रविष्टः सत्वसंपन्नो निशायां मारुतात्मजः॥३॥ स महापथमास्थाय मुक्तापुष्पविराजितं॥ सेवितां राक्षसैर्धीमद्भिर्बलिभिः शस्त्रपाणिभिः॥४॥ ततस्तु तां पुरीं लंकां रम्यामभिययौ कपिः॥ हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्कृतैः॥५॥ वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः॥ गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः॥ प्रजज्वाल तदा लंका रक्षोगणगृहैः शुभैः॥ सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः॥७॥ वर्द्धमानगृहैश्चापि सर्वतः सुविभूषितैः॥ गृहमुख्यैः पुरी रम्या बभासे द्यौरिवाम्बुदैः॥८॥ तां चित्रमाल्याभरणां कपिराजहितंकरः॥ राघवार्थं चरन्श्रीमान्ददर्श च ननंद च॥९॥ भवनाद्भवनं गच्छन्ददर्श कपिकुंजरः॥ विविधाकृतिरूपाणि भवनानि ततस्ततः॥१०॥ शुश्राव रुचिरं गीतं त्रिस्थानस्वरभूषितं॥ स्त्रीणां मदनविद्धानां दिवि चाप्सरसामिव॥११॥ शुश्राव कांचीनिनदं नूपुराणां च निस्वनं॥ सोपाननिनदांश्चापि भवनेषु महात्मनां॥१२॥ आस्फोटितनिनादांश्च क्ष्वेडितांश्च ततस्ततः॥ शुश्राव जपतां तत्र मंत्रान्रक्षोगृहेषु वै॥१३॥ स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः॥ रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि॥१४॥

गृहैः स्वस्तिकाख्यगृहाः। आकृत्या चतुरस्राः चतुःशाला चतुर्द्वारा सर्वतोभद्रसंज्ञिता पश्चिमद्वाररहिता नंद्यावर्ताख्या च सा। दक्षिणद्वाररहिता वर्धमाना धनप्रदा। प्राग्द्वाररहिता स्वस्तिकाख्या। पुत्रधनप्रदेत्युक्तेः पद्मस्वस्तिकवर्द्धमानाख्याः गृहाः। अथ गृहभेदा इत्यर्थः। शुश्रावेति। त्रिस्थानस्वरभूषितं उरःकंठशिरःस्थानत्रयोत्पन्नैर्मंद्रमध्यमताराख्यैः स्वरैः भूषितं। सोपाननिनदान् सोपानसंचरत्कांताजनमंजीरध्वनीनित्यर्थः। आस्फोटितनिनादान् हर्षोत्पन्नक्रियाविशेषजनितशब्दान्। क्ष्वेडितान् सिंहनादान्॥॥

सुं॰
११

राजमार्गमिति। मध्यमे गुल्मे नगरमध्यस्थसैन्यसंस्थे चरान्नगरवृत्तांतवेदकान्चारानित्यर्थः। गोजिनांबरवाससः गोचर्मवाससः। विरलतनाश्च दर्भमुष्टिप्रहरणान्। अनिष्टनिवारकानुष्ठान
साधनतया दर्भमुष्टीनामायुधत्वं अग्निकुंडायुधान् आहुत्याद्युत्पादनद्वारा शत्रुमारकतया अग्निकुंडानामायुधत्वं विकटान् विषमगात्रान्। क्षेपणी। क्षेपणीयाः शतेति। आरक्षं। आसमेता इत्य

राजमार्गं समावृत्य स्थितं रक्षोगणं महत्। ददर्श मध्यमे गुल्मे राक्षसस्य चरान्बहून्॥१५॥ दीक्षिताञ्जटिलान्मुंडान्गोजिनांबरवाससः। दर्भमुष्टिप्रहरणानग्निकुंडायुधांस्तथा
॥१६॥ कूटमुद्गरपाणींश्च दंडायुधधरानपि। एकाक्षानेककर्णांश्च लंबकर्णपयोधरान्॥१७॥ करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा। धन्विनः खड्गिनश्चैव शतघ्नीमुसलायु
धान्॥१८॥ परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान्। नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान्॥१९॥ नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान्। विरूपान्बहु
रूपांश्च सुरूपांश्च सुवर्चसः॥२०॥ पताकाध्वजिनश्चैव ददर्श विविधायुधान्। शक्तिवृक्षायुधांश्चैव पट्टिसाशनिधारिणः॥२१॥ क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः। स्रग्विण
स्त्वनुलिप्तांश्च वराभरणभूषितान्॥२२॥ नानावेषसमायुक्तान्यथा स्वैरचरान्बहून्। तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान्॥२३॥ शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः। र
क्षोधिपतिनिर्दिष्टं ददर्शांतःपुराग्रतः॥२४॥ स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणं। राक्षसेंद्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितं॥२५॥ पुंडरीकावतंसाभिः परिखाभिः समावृतं
प्राकारावृतमत्यंतं ददर्श स महाकपिः॥२६॥ त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितं। वाजिहेषितसंघुष्टं नादितं भूषणैस्तथा॥२७॥ रथैर्यानैर्विमानैश्च तथा हयगजैः
शुभैः। वारणैश्च चतुर्दंतैः श्वेताभ्रनिचयोपमैः। भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः। रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः॥२९॥ राक्षसाधिपतेर्गुप्तमाविवेश गृहं क
पिः॥ सहेमजांबूनदचक्रवालं महार्हमुक्तामणिभूषितांतरं॥ परार्ध्यकालागरुचंदनांकितं स रावणांतःपुरमाविवेश॥३२॥ इति सुंदरकांडे चतुर्थः सर्गः॥४॥

तीत्यारक्षः सैन्यं। अंतःपुराग्रतः रावणगृहस्याग्रतः। स इत्यादिश्लोकद्वयमेकं वाक्यं। द्वितीयस्तच्छब्दः प्रसिद्धपरः। रथैरिति। यानैः शिबिकादिभिः। इत्यादिविशेषणात्मना प्रासादात्मकवेश्मस्थ
समाप्तत्वात्सहेमेति। सहेमेति श्लोकः। हेमसहितं जांबूनदचक्रवालं स्वर्णप्राकारमंडलं युक्तं। अंतःपुरं अंतर्गृहं आविवेश॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे चतुर्थः सर्गः॥४॥ राम॰
११

ततइति। ततः प्रवेशानंतरं मध्यं गतं गगनम्मेति शेषः। यद्वा। तारामध्यं गतं। अंशुमंतं। चंद्रं। भानुमंतं। दीप्तिमंतं। लोकस्येति। पापपंकशोधनपापकलंकः अपमुच्यते। लोकाह्लादकत्वाच्चंद्रस्य ढः खविना
शकत्वं। यद्वा। सूर्यचंद्रादीनां लोकपावनत्वादिति भावः। या भातीति। याल्लक्ष्मीः मंदरादिस्थाने सु भाति सा लक्ष्मीः चारुनिशाकरस्था भातीति संबंधः। स्थितइति। परिपूर्णश्चंद्रः। परिहार्यं कलंकः
विनष्टेति। महाग्रहग्राह विनष्टपंकः। महाग्रहः सूर्यः तस्य ग्राहेण किरणसंक्रमेण विनष्टः। विना। शितः पंकस्त्सा येनमत थ्योक्तः चंद्रस्य सूर्यकिरणसंक्रमणद्वारा तमो विनाशकत्वात्तदुक्तं। सलि
लमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं क्षपयंति दर्पणोदरनिहिता इव मंदिरस्यांतरिति। विनष्टशीतांशुतुषारपंकः। शीतांशुहिमं तस्य तुषारः ... ततः। तएव पंकः मालिन्यं विनष्टः

ततः स मध्यं गतमंशुमंतं ज्योत्स्नावितानं महदुद्वमंतं ददर्श धीमान्दिवि भानुमंतं गोष्ठे वृषं मत्तमिव भ्रमंतं॥१॥ लोकस्य पापानि विनाशयंतं महोदधिं चापि समेधयंतं॥ भूता
नि सर्वाणि विराजयंतं ददर्श शीतांशुमथाभियांतं॥२॥ या भाति लक्ष्मीर्भुवि मंदरस्था तथा प्रदोषेषु च सागरस्था॥ तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था
॥३॥ हंसो यथा राजतपंजरस्थः सिंहो यथा मंदरकंदरस्थः। वीरो यथा गर्वितकुंजरस्थश्चंद्रोपि बभ्राज तथांबरस्थः॥४॥ स्थितः ककुद्मानिव तीक्ष्णशृंगो महाचलः श्वेत इवो
च्चशृंगः। हस्तीव जांबूनदबद्धशृंगो विभाति चंद्रः परिपूर्णशृंगः॥५॥ विनष्टशीतांबुतुषारपंको महाग्रहग्राहविनष्टपंकः॥ प्रकाशलक्ष्म्याश्रयनिर्मलांको रराज चंद्रो भग
वान्शशांकः॥६॥ शिलातलं प्राप्य यथा मृगेंद्रो महारणं प्राप्य यथा गजेंद्रः। राज्यं समासाद्य यथा नरेंद्रस्तथा प्रकाशो विरराज चंद्रः॥७॥ प्रकाशचंद्रोदयनष्टदोषः प्र
वृद्धरक्षःपिशिताशदोषः। रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः॥८॥ तंत्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपंति नार्यः पतिभिः सुवृत्ताः। नक्तंचराश्चा
पि तथा प्रवृत्ता विहर्तुमत्यद्भुतरौद्रवृत्ताः॥९॥

शीतांशुतुषारपंको यस्मिन्स्तथा। एतदपि सूर्यकिरणसंक्रमणादित्यवगंतव्यं। प्रकाशलक्ष्म्याश्रयनिर्मलांकः। प्रकाशस्य लक्ष्म्या आश्रयत्वात्‍ हेतुना अंकचिह्नं यस्यार्थः। प्रकाशेति। प्रकाशचंद्रो
दयनष्टदोषः प्रकाशचंद्रोदयेन नष्टः दोषस्तिमिररूपदोषो यस्य स तथा। प्रवृद्धरक्षः पिशिताशदोषः प्रवृद्धरक्षसां पिशितभक्षणरूपो दोषो यस्मिन् पिशितभक्षणस्य दोषत्वमवि
हितजीवहिंसाहेतुत्वात्। रामाभिरामेरितचित्तदोषः। रामाः कांताः अभिरामाः रमणाः स्त्रीभिः कांतैश्च ईरितो निरस्तः चित्तदोषः प्रणयकलहरूपो येन स तथोक्तः। स्वर्गप्रकाशः सी
तोद्वेपणस्यानुकूलत्वेनानंदहेतुत्वात्। प्रदोषकालस्य स्वर्गसदृशत्वोक्तिः। अतएव भगवान्प्रदोषः आदरणीय इति यावत्‍। अत्र विरराजेत्यनुषज्यते॥ ॥

मत्तेतिमध्यानि मरजनकडुद्येण अतएव अमत्तानि। अनवहितानि। अमत्तजनयोग्यान्याकुलानि भवनान्यपि तथोचंते मद्राः। गजाः। परस्परं चेत्यादि श्लोकद्वयमेकं वाक्यं। आक्षिपंतीत्यादि॥
शब्दं तानि रक्तांसि अन्यस्य विशेषणानि। आक्षिपंति। आकर्षंति। भुजानधिविक्षिपंति। अन्योन्यस्योपरि निक्षिपंति मत्तजल्पान् अधिक्षिपंति अधिकं संचंति। भर्त्सयंतीत्यर्थः। अन्योन्य
मधिक्षिपंति तिरस्कुर्वंति। रूपाणि। चित्राणि च विक्षिपंति विविधान्वेषान् विदधंति चापानि विक्षिपंति विस्फारयंति। वस्त्राणि विक्षिपंति। विहरणं वृति। एतादृशरक्षांसि कपिर्ददर्शेति

मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि। वीरश्रिया चापि समाकुलानि ददर्श धीमान्स कपिः कुलानि॥१०॥ परस्परं चाधिकमाक्षिपंति भुजांश्च पीनानधिवि
क्षिपंति। मत्तप्रलापानधिविक्षिपंति मत्तानि चान्योन्यमधिक्षिपंति॥११॥ रक्षांसि वक्षांसि च विक्षिपंति गात्राणि कांतासु च विक्षिपंति। रूपाणि चित्राणि च विक्षिपंति
दृढानि चापानि च विक्षिपंति॥१२॥ ददर्श कांताश्च समालभंत्यस्तथा परास्तत्र पुनः स्वपंतः। सुरूपवक्त्राश्च तथा हसंतः क्रुद्धाः पराश्चापि विनिश्वसंतः॥१३॥ महागजैश्चा
पि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः। रराज वीरैश्च विनिश्वसद्भिः ह्रदो भुजंगैरिव निश्वसद्भिः॥१४॥ बुद्धिप्रधानान् रुचिराभिधानान् संश्रद्दधानान् जगतः प्रधा
नान्। नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधानान्॥१५॥ ननंद दृष्ट्वा च स तान् सुरूपान् नानागुणानात्मगुणानुरूपान्। विद्योतमानान् स तदानुरूपा
न् ददर्श कांश्चिच्च पुनर्विरूपान्॥१६॥ ततो वराहाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः। प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुप्रभावाः॥१७॥ श्रियाज्व
लंत्यस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः। ददर्श काश्चित्प्रमदोपगूढा यथा विहंगाः कुसुमोपगूढाः॥१८॥ अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियांके
सुखोपविष्टाः। भर्तुः प्रिया धर्मपरा निविष्टा ददर्श धीमान्मदनाभिविष्टाः॥१९॥

दर्शक्रियया संबंधः॥ ददर्शेति। समालभंतः स्त्रग्रोहितीयार्थे प्रथमा। समालभंत्यः चंदनादिनालिंपंत्यः समालंभो विलेपनमित्यमरः। महागजैरिति। रराज उरीति शेषः। बुद्धीति
सत्यभामिधानान् सुचिरं वदनान्। नानावधानस्तत्र विस्नानमेधेयाः। नानाविधानां नानाप्रकाराणां नंदेति। आत्मगुणानुरूपान्। आत्मगुणानामनुरूपान्। यथा पा रा। ततः इति वराहाः श्रेष्ठभू
षणाः उपलपनादियोग्याः। श्रियेति। प्रमदोपगूढाः हर्षपूर्णाः। विहंगाः विहंगीरित्यर्थः। अन्या इति। निविष्टाः कृताः पाणिगृहीता इत्यर्थः। निवेशः शिविरोद्वाहविन्यासेषु इत्य
मरः॥

अथाप्रता इत्यादि श्लोकद्वयमेकं वाक्यं। अत्र ददर्शेति क्रियायाः सर्वत्रान्वयः। उत्तरीयरहिताः कांचनराजिवर्णाः। कनकरेखाकाराः। तपनीयवर्णाः। तप्तसुवर्णवर्णाः। शशलक्ष्मवर्णाः। चंद्रवर्णाः। कांतप्र
हीणाः प्रियविप्रयुक्ताः। रामाश्च ददर्श। ततः प्रियान्समीक्ष्य प्राप्य सुप्रीतियुक्ता रामाश्च ददर्श। गृहे सुहृष्टाः रामाः ददर्शेति संबंधः। यद्वा। तत इति। संहारे प्रकाः मनोभिरामान्प्रियान्प्राप्याभिरूप
सुप्रीतियुक्ता रामाः प्रसमीक्ष्य गृहे सुहृष्टाः स्वगृहे सुरमणं प्राप्य हृष्टाः परमाभिरामाश्च ददर्शेति संबंधः। सर्वांगानि यतः भर्तुः कामिनी सारिकासमभिव्याहारा ... नारा
गताः उच्यंते। नत्विति। साधुजातामित्येतस्य ता विशेषणं परमाभिजातां अत्यंताभिरूपां मनसाभिजातां अयोनिजां सनातने वर्त्मनि अविच्छेदेन प्रवृत्ते पातिव्रत्यरूपमार्गे संनिविष्टां सम्यक्स्थि

अथाप्रताः कांचनराजिवर्णाः पुनश्च काश्चिच्छशलक्ष्मवर्णाः। कांताः प्रहीणास्तु विरांगवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः ॥२०॥ ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीति
युक्ताः प्रसमीक्ष्य रामाः। गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥२१॥ चंद्रप्रकाशाश्च हि वक्त्रमाला वक्राक्षिपक्ष्माश्च सुनेत्रमालाः। विभूषणानां च ददर्श मा
लाः शतह्रदानामिव चारुमालाः ॥२२॥ न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजातां। लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाभिजातां ॥२३॥ सनातने वर्त्मनि सन्नि
विष्टां रामेक्षणां तां मदनाभिविष्टां। भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यो वराभ्यश्च सदा विशिष्टां ॥२४॥ उष्णार्दितां सानुसृतास्रकंठीं पुरा वरार्होत्तमनिष्ककंठीं। सुजातपक्ष्मा
मभिरक्तकंठीं वने प्रनृत्तामिव नीलकंठीं ॥२५॥ अव्यक्तरेखामिव चंद्रलेखां पांसुप्रदिग्धामिव हेमरेखां। क्षतप्ररूढामिव बाणरेखां वायुप्रभिन्नामिव मेघलेखां ॥२६॥ सीतामप
श्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य। बभूव दुःखाभिहतश्चिरस्य प्लवंगमो मंद इवाचिरस्य ॥२७॥ इत्यार्षे रामायणे सुंदरकांडे पंचमः सर्गः ॥ ॥

तां। उष्णार्दितां। विरहतापपीडितां। अनुसृतास्रेण कंठेन सह वर्तत इति सानुसृतास्रकंठी। निष्कं करोभूषणं। अव्यक्तरेखां अस्फुटप्रकाशां चंद्ररेखां चंद्रकलां। पांसुप्रदिग्धां पांसुरू
षितां हेमरेखां स्वर्णशलाकां। क्षतप्ररूढां क्षता चासौ प्ररूढा च तां अंतर्व्रणां बहिश्छादितामित्यर्थः। यद्वा। क्षते व्रणे प्ररूढां प्रलीनां बाणशकलमित्यर्थः। सीतामिति। चिरस्यापश्यन्। चि
रमविद्याप्रपश्यन्दुःखाभिभूतः अचिरस्य सद्य एव मंद इव मूढ इव बभूव ॥ इति श्रीमहेश्वरतीर्थविरचितायां रामायणतत्त्वदीपिकायां सुंदरकांडे पंचमः सर्गः

सुं·
१२ रक्षितमिति। चकाशे विस्मयाद् उल्लसितेत्यर्थः। चचार कपिकुंजर इति वा पाठः। रूप्यकेति रूप्यकोपहितैः रजतनिर्मितैः कक्ष्याभिः प्रकोष्ठैः। कक्ष्या प्रकोष्ठे हर्म्यादेरित्यमरः। गजास्थितैरिति। महामात्रैः
प्रधानैः महामात्राः प्रधानानीत्यमरः। असंहार्यैरवार्यैः। सिंहव्याघ्रतनुत्राणैः तच्चर्मनिर्मितवर्मभिरित्यर्थः। महारथसमावापं। महारथानां रथिकविशेषाणामावापः संस्थानं। समावापमिति पाठे ष्प

स निकामं विमानेषु विचरन्कामरूपधृक्। विचचार कपिर्लंकां लाघवेन समन्वितः॥१॥ आससादाथ लक्ष्मीवान्राक्षसेंद्रनिवेशनं। प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतं॥२॥ रक्षि
तं राक्षसैर्भीमैः सिंहैरिव महद्वनं। समीक्षमाणो भवनं चकाशे कपिकुंजरः॥३॥ रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषणैः। विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्वृतं॥४॥ गजास्थितैर्म
हामात्रैः शूरैश्च विगतश्रमैः। उपस्थितमसंहार्यैर्हयैः स्यंदनयायिभिः॥५॥ सिंहव्याघ्रतनुत्राणैर्दांतकांचनराजतैः। घोषवद्भिर्विचित्रैश्च सदा विरचितं रथैः॥६॥ बहुरत्नसमाकीर्णं
परार्ध्यासनभाजनं। महारथसमावापं महारथमहास्वनं॥७॥ दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः। विविधैर्बहुसाहस्रैः परिपूर्णं समंततः॥८॥ विनीतैरंतपालैश्च रक्षोभि
श्च सुरक्षितं। मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समंततः॥९॥ मुदितप्रमदारत्नं राक्षसेंद्रनिवेशनं। वराभरणनिर्ह्रादैः समुद्रस्वननिस्वनं॥१०॥ तद्राजगुणसंपन्नं मुख्यैश्चागरु
चंदनैः। महाजनसमाकीर्णं सिंहैरिव महद्वनं॥११॥ भेरीमृदंगाभिरुतं शंखघोषविनादितं। नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा॥१२॥ समुद्रमिव गंभीरं समुद्रमिव निस्वनं
महात्मनो महद्वेश्म महारत्नपरिच्छदं॥१३॥ महारत्नसमाकीर्णं ददर्श स महाकपिः। विराजमानं वपुषा गजाश्वरथसंकुलं॥१४॥ लंकाभरणमित्येव सोमन्यत महाकपिः। चचा
र हनुमांस्तत्र रावणस्य समीपतः॥१५॥ गृहाद्गृहं राक्षसानामुद्यानानि च वानरः। वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः॥१६॥ अवप्लुत्य महावेगः प्रहस्तस्य निवेशनं। त
तोन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान्॥१७॥ अथ मेघप्रतीकाशं कुंभकर्णनिवेशनं। विभीषणस्य च तथा पुप्लुवे स महाकपिः॥१८॥ महोदरस्य च तथा विरूपाक्षस्य चैव हि।
विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च॥१९॥

यमेवार्थः। महारथं च तत् महासनं च महास्वनं। दृश्यैरिति। दृश्यैर्दर्शनीयैः परमोदारैः अतिमहद्भिः। [illegible] राक्षसेंद्रनिवेशनमिति रा·प·
वासभूतं तदिति। राजगुणाः राजोपचाराः तैः संपन्नं। नित्यार्चितं गंधादिभिः। पर्वहुतं [illegible] रावणस्य समीपतः रावणभ १२
वनस्य समीपतः॥

विद्युज्जिह्वेंद्रजिह्वानामिति। वज्रवचनमार्षं। गृहात् गृहान्तरं गच्छन् ॥२५॥ रावणस्येति। उपशायिन्यः ... ॥२९॥ रक्ताश्वेता इति। श्वेताः ... सेनाश्वेतास्मराः ३०। रक्ताश्वेतानिति हरीन्नश्वान्
॥३१॥ कुलीनानिति। परगजारुजान्। परगजानां भंजकान्। निष्ठितान्। गजशिक्षायां। गजविद्याभ्यासे शिक्षितान् ॥३४॥ लतागृहाणीति। चित्रशालागृहाणि चित्रशालायुक्तगृहाणि दारुपर्वतकान्

वज्रदंष्ट्रस्य च तथा उत्प्लवे स महाकपिः। शुकस्य निमहावेगः सारणस्य च धीमतः॥२०॥ तथा चेंद्रजितो वेश्म जगाम हरियूथपः। जंबुमालेः सुमालेश्च जगाम हरिसत्तमः॥२१॥ रश्मिकेतोश्च भ-
वनं सूर्यशत्रोस्तथैव च। वज्रकायस्य च तथा उत्प्लवे स महाकपिः॥२२॥ धूम्राक्षस्याथ संपातेर्भवनं मारुतात्मजः। विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च॥२३॥ करालरूपस्य भीमस्य घनस्य वि-
घनस्य च। शुकनाभस्य वक्रस्य शठस्य कपटस्य च। ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः॥२४॥ युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य सादिनः। विद्युज्जिह्वेंद्रजिह्वानां तथा हस्तिमुख-
स्य च॥२५॥ करालस्य पिशाचस्य शोणिताक्षस्य चैव हि। प्लवमानः क्रमेणैव हनूमान्मारुतात्मजः॥२६॥ तेषु तेषु महार्हेषु भवनेषु महायशाः। तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः
॥२७॥ सर्वेषां समतिक्रम्य भवनानि समंततः। आससादाथ लक्ष्मीवान् राक्षसेंद्रनिवेशनं॥२८॥ रावणस्योपशायिन्यो ददर्श हरिसत्तमः। विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः॥२९
शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः॥ ददर्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे॥३०॥ राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान्। रक्तान्श्वेतान्सितांश्चापि हरींश्चापि महाज-
वान्॥३१॥ कुलीनान्रूपसंपन्नान्गजान्परगजारुजान्। निष्ठितान्गजशिक्षायामैरावतसमान्युधि॥३२॥ निहंतॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः। क्षरतश्च यथा मेघान्स्रवतश्च यथा
गिरीन्॥३३॥ मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः। सहस्रं वाजिनस्तत्र जांबूनदपरिष्कृतान्॥३४॥ हेमजालपरिच्छन्नांस्तरुणादित्यवर्चसः। ददर्श राक्षसेंद्रस्य रावणस्य निवे-
शने॥३५॥ शिबिका विविधाकाराः स कपिर्मारुतात्मजः। लतागृहाणि चित्राणि चित्रशालागृहाणि च॥३६॥ क्रीडागृहाणि चान्यानि दारुपर्वतकानि च। कामस्य गृहकं दिव्यं दिवागृ-
हकमेव च॥३७॥ ददर्श राक्षसेंद्रस्य रावणस्य निवेशने। स मंदरतलप्रख्यं मयूरस्थानसंकुलं। ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमं। अनंतरत्ननिचयं निधिजालं समंततः॥३९॥ धीरनि-
ष्ठितकर्मांतं गृहं भूतपतेरिव। अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च॥४०॥ विरराज च तद्वेश्म रश्मिवानिव रश्मिभिः। जांबूनदमयान्येव शयनान्यासनानि च॥४१॥ भाजनानि च शु-
भ्राणि ददर्श हरियूथपः॥ ॥

दारुमयक्रीडापर्वतान्। कामस्य गृहकं कामोद्दीपकगृहं। दिवागृहकं दिवाविहारोचितगृहं। मयूरस्थानानि क्रीडामयूरस्थानानि। धीरनिष्ठितकर्मांतानि
ष्ठिताः निष्ठावंतः। दृढव्रताः धीराश्च ते निष्ठिताश्च धीरनिष्ठिताः तेषां कर्म तपोरूपं तस्य अंतः फलं महातपःफलमिति यावत् भूतपतेः शिवस्य॥॥

सुं·
१४

सुस्थितिः मद्यासवकृतस्वेदं मद्यासवैः कौड्विकारमयैः कृतद्रवांनूढराणामितियोषविद्भिर्नादविशेषसंकैः अनेकैरन्यैश्चप्रासादादिति। सुवृहत्कक्ष्यं संनिवेशितप्रकोष्ठं व्यूहः पद्मस्वस्तिकादिरचनावि
शेषः इति श्रीमहेश्वरतीर्थविरचितायां रामायणतत्वदीपिकायां सुंदरकांडे षष्ठः सर्गः सवेश्मेति। व्यासक्तवैडूर्यसुवर्णजालं खचितवैडूर्यसुवर्णगवाक्षं सविहंगजालं मिलितपक्षिसमूहं निवेशनेति। निवे
शनानां गृहाणां संबंधिनी शाला अवांतरगृहाणि। प्रधानशंखायुधचापशालाः प्रधानैः शंखादिभिः। शाल्यंत इति। पुनर्विशाला वेश्माद्रिषु वेश्माद्युपरि स्वतेषु चंद्रशालाः शिरोगृहाणि। वेश्माद्रिष्वि
ति पाठे आदिशब्देन प्रासादादयः प्रधानस्थितोगृहाणीति। स्वबलार्जितानि कुबेरमाक्रम्याहृतानि। तानीति। प्रयत्नाभिसमाहितानि प्रयत्नेनाभितः सम्यगाहितानि यथायोग्यं स्थापितानीत्य

मद्यासवकृतस्वेदं मणिभाजनसंकुलं ॥४४॥ मनोरममसंबाधं कुबेरभवनं यथा। नूपुराणां च नादेन कांचीनां निनदेन च ॥४५॥ मृदंगतलनिर्घोषैर्घोषवद्भिर्विनादितं ॥ प्रासादसंघातयु
तं स्त्रीरत्नशतसंकुलं ॥४६॥ सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहं ॥ इत्यार्षे रामायणे सुंदरकांडे षष्ठः सर्गः ॥ स वेश्मजालं बलवान् ददर्श व्यासक्तवैडूर्यसुवर्णजालं ॥ यथा महत्प्रावृ
षि मेघजालं विद्युत्पिनद्धं सविहंगजालं ॥१॥ निवेशनानां विविधाश्च शालाः प्रधानशंखायुधचापशालाः ॥ मनोहराश्चापि पुनर्विशाला ददर्श वेश्माद्रिषु चंद्रशालाः ॥२॥ गृहाणि ना
नावसुराजितानि देवासुरैश्चापि सुपूजितानि ॥ सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥३॥ तानि प्रयत्नेन समाहितानि मयेन साक्षादिव निर्मितानि ॥ महीतले
सर्वगुणोत्तराणि ददर्श लंकाधिपतेर्गृहाणि ॥४॥ ततो ददर्शोच्छ्रितमेघरूपं मनोहरं कांचनचारुरूपं ॥ रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपं ॥५॥ महीतले स्व
र्गमिवावतीर्णं श्रिया ज्वलंतं बहुरत्नकीर्णं ॥ नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णं ॥६॥ नारीप्रवेकैरिव दीप्यमानं तडिद्भिरंभोदवदर्च्यमानं ॥ हंसप्रवेकैरिव वा
ह्यमानं श्रिया युतं खे सुकृतं विमानं ॥७॥ यथा नगाग्रं बहुधातुचित्रं यथा नभश्च ग्रहचंद्रचित्रं ॥ ददर्श युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रं ॥८॥

र्थः मयेन निर्मितानीव विश्वकर्मनिर्मितान्यपि मयेन विचित्रविधानेन समाहितत्वात्तेनैव साक्षान्निर्मितानीवेत्यर्थः। अथ पुष्पकं वर्णयति। ततस्तादिना। आत्मबलानुरूपं आत्मनो प्रति
पद्यलस्य सदृशं। गृहोत्तममिति पुष्पकमुच्यते। बहुरत्नकीर्णं। बहुरत्नकीर्णं। बहुरत्नं रजसा। पुष्परजसा। नारीति। तडिद्भिः दीप्यमानां अंभोदवत्। नारीप्रवेकैरिव नारीश्रेष्ठैरिवाइवार्थे। दी
प्यमानं। अर्च्यमानं पूज्यमानं। हंसप्रवेकैर्वाह्यमानं सुकृतं विमानमिवेत्यन्वयः। नाग्रमिति। ग्रहमाणं स्पष्टार्थं वा यथेति। युक्तीकृतमेघचित्रं रहितीकृतनानावर्णमेघवद्विचित्रमित्यर्थः। य	राम·
द्वा। इंद्रचापमिश्रीकृतमेघचित्रं विमानरत्नं पुष्पकं ॥ ॥	१४

महीत्पारि।यद्वेतिशेषः।स्वर्द्देशैत्पुष्पज्ञन्तो महीकृतेत्पारम्भपुष्करिणीपद्मसह्स्त्रैर्पतिमेकवावात्पत्पमधास्पेतानुसारार्थः। कृता कृतपुष्पाकंयनाम विमाने ददर्शेतिसंबंधः। पुष्पकपुष्पके पर्वतराजेः। कृताणिमहीकृतानिचित्ररूपाणिविलिखितानि तत्रशैलाः। प्रपाप्पविलिखिताः। इतिज्ञेयाः। पुष्पाकंयमितिविशेषमानामपितिपेचपद्धैर्विशिष्टा। तोप्पोपुष्पमानं। उन्नतप्रमाणं। तन्न तिमाः। पद्मारयश्चसतीत्याह। कृताश्चोत्पादिता। जात्पाशुरूपाः। जातितुरगसदृशाः। प्रवालेति। प्रवालजांबूनदमयानिपुष्पाणि पक्षेषु येषांतेथोक्ताः। सलीलमावर्जितजिह्मपक्षाः तिमाः। पद्मारयश्चसतीत्याह।
सलीलमावर्जिताश्चाकुंचिताः जिह्माः वक्राः पक्षायेषांते कामस्य पक्षाः। सहायाः कामोद्दीपकाइतियावत्। निषुकृपमानाः। त्वयमेवद्यापियमाणायन्तरूक्तिमिगजाः सतीतिशेषः। कामे कार्त्तैरियकृता सकेसराः। पद्माकरविहारिगजाकारनिर्माणात्सकेसरत्वादिकंपद्मिनिपद्माकरेपद्मसहस्तालक्ष्मीरपनकृताबभूतेतिशेषः। इवाचेति। इवेतिनिपातसमुदायःप्रकारवा

महीकृतापर्वतराजिपूर्णाशैलाः कृतावृक्षवितानपूर्णाः। वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं केसरपत्रपूर्णां॥ ९॥ कृतानिवेश्मानिचपांडुराणितथासुपुष्पाण्यपि पुष्करिण्यः। पुनश्चपद्मानिसकेसराणिवनानिचारूणिजथापराणि॥ १०॥ पुष्पाकंयनामविराजमानं रत्नप्रभाभिश्चविवर्द्धमानं। वेश्मोत्तमानामपिचोच्चमानं मह कपिस्तत्रमहाविमानं॥ ११॥ कृताश्चवैडूर्यमयाविहंगाः रूप्यप्रवालैश्चतथाविहंगाः। चित्राश्चनानावसुभिर्भुजंगा जात्यानुरूपास्तुरगाः शुभांगाः॥ १२॥ प्रवालजांबून दपुष्पपक्षाः सलीलमावर्जितजिह्मपक्षाः। कामस्यसाक्षादिवभांतिपक्षाः कृताविहंगाः सुमुखाः सुपक्षाः॥ १३॥ नियुज्यमानाश्चगजाः सुहस्ताः सकेसराश्चोत्पल पत्रहस्ताः। बभूवदेवीचकृतासुहस्ता लक्ष्मीस्तथापद्मिनिपद्महस्ता॥ १४॥ इतीवतद्गृहमभिगम्यशोभनं सविस्मयोनगमिवचारुशोभनं। पुनश्चतत्परमसुगंधिसुंद रं हिमात्ययेनगमिवचारुकंदरं॥ १५॥ ततःसतांकपिरभिपत्यपूजितांचरन्पुरींदशमुखबाहुनिर्जितां। अदृश्यतांजनकसुतांसुपूजितां सुदुःखितांपतिगुणवे गवर्जितां॥ १६॥ ततस्तुतांबहुविधभावितात्मनः कृतात्मनोजनकसुतांसुवर्त्मनः। अदृश्यतोऽभवदतिदुःखितंमनः सुचक्षुषःप्रविचरतोमहात्मनः॥ १७॥ इतिश्रीमद्रा
श्वरतीर्थीयेसुंदरकांडेसप्तमःसर्गः॥ ॥ ॥

चीइतिपूर्वोक्तप्रकारेणरमणीयंचारुशोभनंनगमिवपर्वतमिवस्थितंतद्गृहंरावणगृहं। अभिगम्य। अभितोगत्वासविस्मयोऽभूदितिशेषः। अभितोगत्वापिसम्यक्दीकरणाभावात्स्थितप्र देशेनागमममितिसविस्मयोऽभूदित्यर्थः। हिमात्यये वसंतकाले। चारुकंदरंनगमिवपरमसुगंधिसुंदरं। तद्गृहंपुनश्चाभिगम्य अभितोगत्वासविस्मयोऽभूत्। तत्परिच्छेदतत्त्वनधिगमा दितिभावः। ततइति। तांपुरींचरन्कपिः पतिगुणवेगनिर्जितां पतिगुणोत्कर्षवशीकृतां जनकात्मजां अदृश्यपश्यन् दृष्ट्वा सुदुःखितोऽभूदितिशेषः। ततइतिबहुविधभावितात्मनः

वङ्कविविधैर्विन्नाचिन्नाचिन्नस्येत्यर्थः। कृतात्मनः। कृतप्रयत्नस्य सुवर्त्मनः शोभन नीतिमार्गवर्त्तिनः सुकृत्सुपदः। इं साक्षात्कारसमर्थस्येत्यर्थः॥ रामायणतत्त्वदी पिकायांसुंदरकांडेसप्तमःसर्गः॥ ॥ ॥ ॥

भूयः पुष्पकं वारोचयति। स तस्येत्यादि। जाम्बूनदजालकृत्रिमं। तप्तहेमगवाक्षजालं। कृत्रिमं। निर्माणाय मिलितं तप्तजाम्बूनदमूहैर्निष्पन्नमिति वा। तदिति। अप्रमेयाप्रतिकारकृत्रि
मं च अपरिच्छेद्यमप्रतिकारमप्रतिनिर्माणं यथा भवति तथा निर्वृत्तं कृतं स्वयं साध्विति विश्वकर्मणा स्वयं साध्विति कृतं निर्माणवेलायां प्रशंसापूर्वकं कृतमित्यर्थः। दिवंगतं। आकाशग
तं। वायुपथप्रतिष्ठितं। अन्तरिक्षस्थितं। आदित्यपथस्य लक्ष्मवदादित्यमार्गचिह्नमिव। न तत्रेति। न कृतमित्यादेरयमर्थः यत्नशतस्य सुप्सुपेति समासः। तत्र विमाने प्रयत्नतो
न कृतमकृतं न सर्वमपि प्रयत्नतः कृतमेवेत्यर्थः। तप इति। तपः समाधानं तपोनुष्ठानं तेन च पराक्रमेण चार्जितं मनः समानविचारचारिणं समाधीयत इति समाधानाः। मनः स
माधानाः। मनोहितसंहिताः। तेषां ये विचाराः विविधमार्गाः तैः संचरणशीलं। मनोभिलषितसर्वदेशगमनशीलमित्यर्थः। यद्वा। मनःसमाधानेन। मनोनैश्चल्येन यत्र विचारः चिं
तितं तत्र चरणशीलं मनःसंकल्पितदेशगमनशीलमित्यर्थः। ततस्ततस्तुल्यविशेषदर्शनं। तुल्यानां रमणीयत्वेन सदृशानां विशेषाणां दर्शनं यस्मिंस्तत्सर्वतो रमणीयमित्यर्थः।

स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिरत्नचित्रितं। प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श वीरः पवनात्मजः कपिः॥१॥ तदप्रमेयाप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वक
र्मणा। दिवंगतं वायुपथप्रतिष्ठितं व्यराजतादित्यपथस्य लक्ष्मवत्॥२॥ न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्हरत्नवत्। न ते विशेषा नियताः सुरेष्वपि न तत्र
किंचिन्न महाविशेषवत्॥३॥ तपःसमाधानपराक्रमार्जितं मनःसमाधानविचारचारिणं। अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनं॥४॥ मनः
समाधाय तु शीघ्रगामिनं दुरासदं मारुततुल्यगामिनं। महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामग्र्यमुदामिवालयं॥५॥ विशेषमालम्ब्य विशेषसंस्थितं विचित्रकू
टं बहुकूटमंडितं। मनोभिरामं शरदिंदुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा॥६॥ वहंति यं कुंडलशोभितानना महाशना व्योमचरा निशाचराः। विवृत्तविध्वस्तविशाल
लोचना महाजवा भूतगणाः सहस्रशः॥७॥ वसंतपुष्पोत्करचारुदर्शनं वसंतमासादपि कांतदर्शनं। स पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः॥८॥ इत्यार्षे रामा
यणे सुंदरकांडेऽष्टमः सर्गः॥ ॥ ॥ ॥

मनः समाधाय त्वामिति चिंतं स्वहृदि निधाय। स्वामिचिंतं विदित्वेति यावत्। दुरासदं। दुर्निवारं। महर्द्धिनां। दीर्घायुषां। उदां। स्वर्गसदृशं। अग्र्यमुदां। महा
त्मनां। इंद्रादीनामालयं त्रिविष्टपमिव स्थितमित्यर्थः। विशेषमिति। विशेषं विशिष्टं दिव्यरत्नादि वस्तुजातं आलंब्य। अवलंब्य। विशेषसंस्थितं दिव्यसंस्थानविशेषेणावस्थितं
। बहुकूटमंडितं बहुभिः रत्नकूटैरलंकृतं विचित्रकूटं विचित्रशिखरं। वहंतीति। महदशनं येषां ते विवृत्तानि विध्वस्तानि विशाललोचनानि येषां ते विपर्यस्ता
नि। विशालानि लोचनानि येषां ते निशाचराः। वहंतीति वदतो ऽन्वयाध्याहार्यः। तथा च विमाने निर्मितनिशाचराकाराः प्रतिमा वहंतीत्यर्थः। तं विमानं ददर्शेत्युत्तरेणान्वयः। अ
न्यथा कामगस्य पातः पुरे विद्यमानस्य वाहनवहनरक्षणयोरयोगात्। वसंतपुष्पोत्करचारुदर्शनं वसंतकालीनपुष्पसमूहवच्चारुदर्शनं॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडेऽष्टमः सर्गः॥

तस्येत्यादि श्लोकद्वयमेकं वाक्यं। तस्यालयवरिष्ठस्य पूर्वोक्तपुष्पकस्य मध्ये भवनश्रेष्ठं भवनेषूत्तमं राक्षसेन्द्रस्य भवनं ददर्शेति संबंधः। मार्गमा
णइति सीतां मार्गमाणः सर्वतः पुष्पकादन्यत्र सर्वत्र परिचक्राम संचचार पुष्पकारोहणस्यापरिचस्यमाणत्वात्। उत्तममित्यादि श्लोकद्वयमेकं
वाक्यं। राक्षसावासमित्यनेन सर्वोपजीव्यत्वात्सर्वराक्षससाधारणत्वमुक्तं। राक्षसेन्द्रनिवेशनं। रावणभवनं। परिक्षिप्तं। परिवेष्टितं। उद्यायु
धैः राक्षसैरिति शेषः। राक्षसीभिरिति। रावणस्य निवेशनं। निवेश्यंते परिगृह्यंते। पत्न्यो यत्रेति निवेशनं। रमणस्थानमित्यर्थः। अत एव पत्नीभि
राहृतं। याश्चेत्यादि श्लोकद्वयेन। रावणगृहसर्वराक्षसगृहवर्तमानां लक्ष्मीमनुसंधत्ते। या लक्ष्मीर्वैश्रवणे दिशं नित्या नपायिनी सा सर्वापि रावण

तस्यालयवरिष्ठस्य मध्ये विपुलमायतं। ददर्श भवनश्रेष्ठं हनूमान्मारुतात्मजः ॥१॥ अर्धयोजनविस्तीर्णमायतं योजनं महत्। भवनं राक्षसेन्द्रस्य बहु
प्रासादसंकुलं ॥२॥ मार्गमाणस्तु वैदेहीं सीतामायतलोचनां। सर्वतः परिचक्राम हनूमानरिसूदनः ॥३॥ उत्तमं राक्षसेन्द्रस्य ह्यावासमवलोकयन्। आ
ससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनं ॥४॥ चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च। परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥५॥ राक्षसीभिश्च पत्नी
भी रावणस्य निवेशनं। आहृताभिश्च विक्रम्य राजकन्याभिरावृतं ॥६॥ तं नक्रमकराकीर्णं तिमिंगिलझषाकुलं। वायुवेगसमाधूतं पन्नगैरिव सा
गरं ॥७॥ या हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने। सा रावणगृहे रम्या नित्यमेवानपायिनी ॥८॥ या च राज्ञः कुबेरस्य यमस्य वरुणस्य च। तादृशी तद्विशि
ष्टा वा ऋद्धी रक्षोगृहेष्विह ॥९॥ तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितं। बहुनिर्यूहसंकीर्णं ददर्श पवनात्मजः ॥१०॥ ब्रह्मणोऽर्थे कृतं दिव्यं दिवि यद्वि
श्वकर्मणा। विमानं पुष्पकं नाम सर्वरत्नविभूषितं ॥११॥ परेण तपसा लेभे यत्कुबेरः पितामहात्। कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥१२॥ ईहा
मृगसमायुक्तैः कार्तस्वरहिरण्मयैः। सुकृतैराजितं स्तंभैः प्रदीप्तमिव च श्रिया ॥१३॥ मेरुमंदरसंकाशैरुल्लिखद्भिरिवांबरं। कूटागारैः शुभाकारैः
सर्वतः समलंकृतं ॥१४॥ ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा। हेमसोपानसंयुक्तं चारुप्रवरवेदिकं। जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि। इंद्रनीलमहानीलमणिप्रव
रवेदिकं ॥१६॥

गृहे सर्वराक्षसगृहेषु च तादृशी तद्विशिष्टा ततोऽप्यधिका वेति संबंधः। तस्य हर्म्यस्येत्यादि श्लोकत्रयस्य पवनात्मजः तद्विमानं ददर्शेति संबंधः। निर्यूहो मत्तवारणं। ईहामृ
गसमायुक्तैरित्यादीनामारोहमहाकपिरित्युत्तरेण संबंधः। ईहामृगाः। कृत्रिममृगाः। कार्तस्वरहिरण्मयैः। सुवर्णरजतमयैः। जालवातायनैर्युक्तं। कुड्यपरिभाग

सुं. १६

विद्रुमेण महाधनैः। मणिभिर्निर्मितलाभिः। वर्तुलाभिर्मुक्ताभिश्च करणैर्विचित्रेण तलेन कुट्टिमेन विराजितमिति संबंधः। आदित्यतरुणोपमं। तरुणादित्योपमं। तत्रस्थ इति। जिघ्रन्निव जिघ्रन्। रूपवंतमिवानिलं। अरूपस्य वायोर्गंधवद्रेणुभूयस्त्वाद्रूपवत्त्वोक्तिः। ततस्तामित्यारभ्य तां शोकनाशिनीं दिव्यां श्रियः संजननीमिवेत्यंतमेकं वाक्यं। एकवाक्यत्वे तत्र प्रस्थित इत्यनेन संबध्यते। अपरो ददर्शेत्यनेन। दंतांतरितरूपिकां। दंतैरंतरितानि मध्ये मध्ये निर्मितानि रूपाणि यस्यास्तां। सुवज्रस्तंभभूषितामित्यत्र। येकलक्ष्यः प्रस्थित इत्यनेन संबध्यते। अपरो ददर्शेत्यनेन। पृथिवीलक्षणांकया सरित्समुद्रगिरिराष्ट्रादिभिः पृथ्वीलक्षणवत्कुथविधाना यस्तंभानुवादान्न पौनरुक्त्यं स्तंभैरिति पक्षैरिवास्थितैस्तंभैर्दिवं संप्रस्थितामिव तुल्यत्वात्। पृथिवीलक्षणांकया सरित्समुद्रगिरिराष्ट्रादिभिः पृथ्वीलक्षण...

विद्रुमेण विचित्रेण मणिभिश्च महाधनैः। निस्तलाभिश्च मुक्ताभिस्तलेनाभिविराजितं॥१७॥ चंदनेन च रक्तेन तपनीयनिभेन च। सुपुण्यगंधिना युक्तमादित्यतरुणोपमं॥१८॥ विमानं पुष्पकं दिव्यमारुरोह महाकपिः। कूटागारैर्महागारैः सर्वतः समलंकृतं।१९। तत्रस्थः स तदा गंधं पानभक्ष्यान्नसंभवं। दिव्यं संमूर्छितं जिघ्रन्रूपवंतमिवानिलं।२०। स गंधस्तं महासत्त्वं बंधुर्बंधुमिवोत्तमं। इत एहीत्युवाचेव यत्र तत्र स रावणः।२१। ततस्तां प्रस्थितः शालां ददर्श महतीं शिवां। रावणस्य मनःकांतां कांतामिव वरस्त्रियं॥२२॥ मणिसोपानविकृतां हेमजालविराजितां। स्फाटिकैरावृततलां दंतांतरितरूपिकां।२३। मुक्तावज्रप्रवालैश्च रूप्यचामीकरैरपि। विभूषितां मणिस्तंभैः बहुस्तंभविभूषितां॥२४। समैरृजुभिरत्युच्चैः समंतात्सुविभूषितैः। स्तंभैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव।२५। महत्या कुथयास्तीर्णां पृथिवीलक्षणांकया। पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालिनीं।२६। नादितां मत्तविहगैर्दिव्यगंधाधिवासितां। परार्ध्यास्तरणोपेतां रक्षोधिपनिषेवितां।२७। धूम्रामगरुधूपेन विमलां हंसपांडुरां। चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभां।२८। मनःसंह्लादजननीं वर्णस्यापि प्रसाधिनीं। तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव।२९। इंद्रियाणींद्रियार्थैस्तु पंचपंचभिरुत्तमैः। तर्पयामास मातेव तदा रावणपालिता।३०। स्वर्गोयं देवलोकोयं इंद्रस्येयं पुरी भवेत्। गांधर्वीयं परा सिद्धिरित्यमन्यत मारुतिः।३१। प्रध्यायत इवापश्यत्प्रदीपांस्तत्र कांचनान्। ।

लक्षणैरंकितया। कुथया। परिस्तोमेन। विशालविचित्ररत्नकंबलेनेत्यर्थः। कल्माषीमिव। कल्माषशब्देन वसिष्ठधेनुरुच्यते। अनेन सर्वाभीष्टदायिनीति सूच्यते। इंद्रियाणीति। हनूमत इति शेषः। तर्पयामास। उक्तशालेति शेषः। स्वर्ग इति। स्वर्गः पातालादिः। देवलोकः वायुवरुणादिलोकः। इंद्रपुरी अमरावती परा सिद्धिः।

राम १६

धूर्तान्। अत्र धूर्तानां देवनेन। द्यूतेन। कवाटजालैरिति। कवाटजालैः प्रभामुद्वमंतीव स्थिता शालां प्रदीप्तेत्यभ्यमन्यतेति संबंधः। परिवृत्ते प्रवृत्ते सति। निःशब्दा
नरभूषणानि। निःशब्दांतराणि निःशब्दोदराणि भूषणानि यस्य तत्। प्रबुद्धानीव पद्मानीत्यनुषज्यते। तासां वदनानि। क्षपाक्षये दिवसे। पद्मानीव प्रबुद्धानि भूत्वा
रात्रौ पुनः संवृतपत्राणि पद्मानीव बभुरित्यन्वयः। इमानीति। मत्तषट्पदाः। इमानि मुखपद्मानि फुल्लान्यंबुजानीव पुनः पुनः प्रार्थयंति प्रार्थयेरन्। नियतं नू
नं प्रार्थयंतु इति पाठे प्रार्थयमाना भवेयुरिति शेषः। उपपत्त्या युक्त्या इतीव। इत्येवामन्यत उत्प्रेक्षितवान्। तामेवाह। मेन इति। तानि मुखानि गुणतः शैत्यमाध

धूर्तानिव महाधूर्तैर्देवनेन पराजितान्॥३२॥ दीपानां च प्रकाशेन तेजसा रावणस्य च। अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत॥३३॥ त
तोपश्यत्कुथासीनं नानावर्णांबरस्रजं। सहस्रं वरनारीणां वराभरणभूषितं॥३४॥ परिवृत्तेऽर्धरात्रे तु पाननिद्रावशंगतं। क्रीडित्वोपरतं रात्रौ
सुष्वाप बलवत्तदा॥३५॥ तत्प्रसुप्तं विरुरुचे निःशब्दांतरभूषितं। निःशब्दहंसभ्रमरं यथा पद्मवनं महत्॥३६॥ तासां संवृतदंतानि मीलिता
क्षीणि मारुतिः। अपश्यत्पद्मगंधीनि वदनानि सुयोषितां॥३७॥ प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये। पुनः संवृतपत्राणि रात्राविव बभु
स्तदा॥३८॥ इमानि मुखपद्मानि नियतं मत्तषट्पदाः। अंबुजानीव फुल्लानि प्रार्थयंति पुनः पुनः॥३९॥ इति वामन्यत श्रीमानुपपत्त्या महा
कपिः। मेने हि गुणतस्तानि समानि सलिलोद्भवैः॥४०॥ सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता। शारदीव प्रसन्ना द्यौस्ताराभिरभि
शोभिता॥४१॥ स च ताभिः परिवृतः शुशुभे राक्षसाधिपः। यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः॥४२॥ याश्च्यवंतेंबरात्ताराः पुण्यशेष
समावृताः। इमास्ताः संगताः कृत्स्ना इति मेने हरिस्तदा। ताराणामिव सुव्यक्तं महतीनां शुभार्चिषां। प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषि
तां॥४४॥ व्यावृत्तकचपीनस्रक्प्रकीर्णवरभूषणाः। पानव्यायामकालेषु निद्रापहृतचेतसः॥४५॥ व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रांतनू
पुराः। पार्श्वे गलितहाराश्च काश्चित्परमयोषितः॥४६॥ मुक्ताहारावृताश्चान्याः काश्चित्प्रस्रस्तवाससः। व्याविद्धरशनादामाः किशोर्य इव वा
हिताः। सुकुंडलधराश्चान्या विच्छिन्नमृदितस्रजः। गजेंद्रमृदिताः फुल्ला लता इव महावने॥४७॥

सौरभ्यादिगुणैः सलिलोद्भवैरंबुजैः समानि मेने हीति योजना। व्यावृत्तेति। पानव्यायामकालेषु। पानानंतरगीतनृत्यादिव्यापारकालेषु। व्यावृत्तगुरुपीनस्र
क्प्रकीर्णवरभूषणाः। व्यावृत्ता विपर्यस्ता गुरुपीनस्रजश्च प्रकीर्णवरभूषणानि च यासां ताः। तथाभूता विरेजुरिति पूर्वेण संबंधः॥ उद्भ्रांतनूपुराः स्वस्थानान्नवस्थि

सुं. ८

चंद्रेति। अंशवः। सूक्ष्मरश्मयः। किरणाः स्थूलरश्मयः। किंकिणीति। किंकिणीजालान्येवसंकोशा मुकुलायासांताः। हैमानि। हेमविभूषणान्येव। विपुलान्यंबुजा
नियासांताः। भावग्राहाः। भावाः। विलासाएवग्राहानक्रादयोयासांताः। यशस्तीरः लक्षणया कांतिराधस इत्यर्थः। मृदुष्विति। भूषणराजयः। भूषणप्रमर्दजनि
तरेखाः। विस्रस्तभूषणनामपिकासांचित्भूषणस्थानरेखाभूषणानीवबभूवुरित्यर्थः। ताइति। ताः अंशुकांताः। नानावर्णसुवर्णानां। नानावर्णसुवर्णः शोभ

चंद्रांशुकिरणाभाश्च हाराः कासांचिदुत्कटाः। हंसाइवबभुः सुप्तास्तनमध्येषुयोषितां। ४९। अपरासाचवैडूर्याः कादंबाइवपक्षिणः।
हेमसूत्राणिचान्यासां चक्रवाकाइवाभवत्। ५०। हंसकारंडवाकीर्णाश्चक्रवाकोपशोभिताः। आपगाइवतारेजुर्जघनैः पुलिनैरिव।
५१। किंकिणीजालसंबाधास्ताहेमविपुलांबुजाः। भावग्राहायशस्तीराः सुप्तानद्यइवाबभुः। ५२। मृदुष्वंगेषुकासांचित्कुचाग्रेषुच
संस्थिताः। बभूवुर्भूषणानीवशुभ्रा भूषणराजयः। ५३। अंशुकांताश्चकासांचिन्मुखमारुतकंपिताः। उपर्युपरिवक्त्राणांव्याधूयंते
पुनः पुनः। ५४। ताः पताकाइवोद्धूताः पत्नीनांरुचिरप्रभाः। नानावर्णसुवर्णानांवक्त्रमूलेषुरेजिरे। ५५। ववल्गुश्चात्रकासांचित्कुं
डलानिशुभार्चिषां। मुखमारुतसंसृष्टामात्मंदंमंदंस्मयोषितां। ५६। शर्करासवगंधः सः प्रकृत्यासुरभिः सुखः। तासांवदननिश्वा
सः सिषेवेरावणंतदा। ५७। रावणाननशंकाश्चकाश्चिद्रावणयोषितः। मुखानिचसपत्नीनांउपाजिघ्रन्पुनः पुनः। ५८। अत्यर्थंसक्त
मनसोरावणेतावरस्त्रियः। अस्वतंत्राः सपत्नीनांप्रियमेवाचरंस्तदा। ५९। । ।

नवर्णोयासांतासां। ननुताः सपत्नीभिः कृतमुखाघ्राणंकथंसहंतइत्यतआह। अत्यर्थमिति। अस्वतंत्राः। रागांधाः। रावणेअत्यर्थंसक्तमनसः ताः
सपत्नीभिराघ्रातमुखाः वरस्त्रियः तदाघ्राणंपत्युः प्रियमितिमत्वासपत्नीनांप्रियमेवाचरन्। रागांधाः किंकिंनकुर्वंतीतिभावः। । । राम ८

बाहूनिति। पारिहार्यविभूषितान्। पारिहार्यैर्वलयैः। उपनिधाय। उपधानं कृत्वा। अन्ये तादिश्लोकद्वये। शिश्यिर इत्येतद्यथायोगं वचनपरिणामेन उपनिधायेति
पदं च अनुवर्तनीयं। अन्योन्येति। मालेव पुष्पमालेव। उपमेयमत्र षट्पदस्थानीयाः कचभाराः। लतानामित्यादिश्लोकद्वयमेकवाक्यं। तद्रावणस्य स्त्रीवनं लतानां
वनमिवासीदिति संबंधः। विशेषणान्युभयत्रापि योज्यानि। उचितेष्विति। तदा तासां योषितामुचितेषु स्थानेषु स्थितानामपि भूषणांगांवरस्रजां विवेकः सूक्ष्मत्वाद्
तुं न शक्यः। अन्योन्यसंग्रथितत्वेन संसक्तत्वात्। इमा अस्या भूषणांगांवरःस्रजः। इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः। रावणेति। सुखसंविष्टे स नि

बाहूनुपनिधायान्याः पारिहार्यविभूषितान्। अंशुकानि च रम्याणि प्रमदास्तत्र शिश्यिरे॥ ६०॥ अन्याः कक्षासिचान्यस्यास्तस्याः काचित्तु न भुजं।
अपरा त्वंकमन्यस्यास्तस्याश्चाप्यपरा कुचौ॥ ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः। परस्परनिविष्टांग्यो मदस्नेहवशानुगाः। अन्योन्यसं
गसंस्पर्शान्प्रीयमाणाः सुमध्यमाः। एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः॥ ६३॥ अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा। मालेव ग्रथि
ता सूत्रे शुभे मत्तषट्पदा। लतानां माधवे मासि फुल्लानां वायुसेवनात्। अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयं॥ ६५॥ प्रतिवेष्टितसुस्कं
धमन्योन्यभ्रमराकुलं। आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत्॥ ६६॥ उचितेष्वपि सुव्यक्तं न तासां योषितां तदा। विवेकः शक्य आधातुं भूष
णांगांवरःस्रजां॥ ६७॥ रावणे सुखसंसुप्ते ताः स्त्रियो विविधप्रभाः। ज्वलनः कांचनादीपाः प्रेक्षंतेनिमिषा इव। राजर्षिविप्रपितृदैत्यानां
गंधर्वाणां च योषितः। रक्षसां चाभवत्कन्यास्तस्य कामवशंगताः। ६९। युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः। समदा मदनेनैव मोहिताः
काश्चिदागताः। ७०। न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः। न चान्यकामापि न चान्यपूर्वा विना वरार्हां जनकात्मजां तु। ७१।
न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता। भार्याभवत्तस्य न हीनसत्वा न चापि कांतस्य न कामनीया। । ७२। । ।

कांचनाः कांचनस्तंभगता दीपाः कर्तारः स्त्रियः कर्म अनिमिषा इव प्रेक्षंते अनेन जागरवस्थायां दीपा अपि निश्चलतया द्रष्टुं विष्पंनीति ध्वन्यते। राजर्षीति।
तस्य योषितो भवन्निति संबंधः। युद्धकामेनेति। युद्धकामेन ताः आहृताः तासु हृतासु तासां बंधुभिः सह युद्धं भविष्यतीति। युद्धकामयित्वानेनाहृताः न तु ताः का
मयित्वा। एतमेवार्थं विवृणोति। न तत्रेति। तत्र आहृतासु काश्चिदपि प्रमदा वीर्योपपन्नेन रावणेन न लब्धा। किं तु। गुणेनैसौदार्यादिगुणेन लब्धाः। । ।

नेत्रेति। सीता गुणैः तापनिवृत्त्या द्विगुणैर्गोधुर्वं विशिष्टा हि। अस्यामेतद्विषये लंकेश्वरः अनार्यकर्म अपहरणरूपं कर्म कृतवान् कष्टमिति स महात्मा ह
नुमान् आर्तरूपः सन् पुनश्चाचिंतयदिति संबंधः॥ ॥इति श्रीमहेश्वरतीर्थविरचितरामायणतत्वदीपिकायां सुंदरकांडे नवमः सर्गः॥ ॥ ॥

बभूवेति। इमां राक्षसराजभार्याः यथा स्वभर्तृविशिष्टाः सकलभोगयुक्ताः तथा राघवधर्मपत्नी ईदृशी स्वभर्तृसहिता यदि। अस्य रावणस्य सुजातं शोभनमिति साधु
बुद्धेर्हरीश्वरस्य हनूमतः बुद्धिर्बभूव। अपरं रावणः राघवधर्मपत्नीयदि अस्यर्पि पेत्तदा अस्य जन्म शोभनं स्यादिति हरीश्वरस्य बुद्धिर्जातेत्यर्थः। यद्वा। राघवधर्मप
त्नी यथा रावणेन बलाद्धानीता इमाः राक्षसराजभार्याः तथापि दिसुग्रीवेण बलाद्धृता यदि तदा हरीश्वरस्य सुग्रीवस्य। सुजातं हीति। साधुबुद्धेः सन्मतिबुद्धेः। अस्य
हनूमतः ईदृशी बुद्धिर्बभूवेत्यन्वयः। यद्वा। इमाः राक्षसराजभार्याः यथा रावणेनाहृता इत्यर्थः। राघवधर्मपत्नी ईदृशी यदि अनेन न हृता यदि तदा अस्य रावणस्य
सुजातं हि सुजातं किं सम्यक् न भविष्यति किं न भविष्यत्येव इति हरीश्वरस्य बुद्धिर्बभूव। मेमदेनानरा हृता वनाद्रजनीचरेण तदा विमथ्यसा। कथयमपरिपुंतम
घवेल्लवगपतेयमसंनिधिं नयामीति रामवाक्यात् रावणस्य सम्यक् न भविष्यतीत्यर्थः। यद्वा। इमाः राक्षसराजभार्याः यथा मया दृष्टा इति शेषः। राघवधर्मपत्नी ई
दृशी मया दृष्टा यदीत्यर्थः। तदा अस्य मम सुजातं अस्य मम जन्म सफलमिति हरीश्वरस्य बुद्धिर्बभूव। यस्मात् सा त्रिंश्रोत्रे दृष्टासीनेति वक्ष्यति। मनुल्याविभ
वोभोगे सुखेस विचरिष्यति। ततः प्रियतरो नास्ति मम प्राणाद्विशेषत इति सुग्रीववचनात्। प्रभोः सुग्रीवस्य प्रियसंपादकत्वेन मम जन्म सफलमिति भावः। य
द्वा। इमाः राक्षसराजभार्याः पृथक्पृथक् दृष्टाः राघवधर्मपत्नी ईदृशी यदि दृष्टा यदि। अस्य सीतायाः अदर्शनहेतुना सुग्रीवरामादिभयात् प्रायोपवेशनायोद्युक्ताग
द्वादिवानरस्य मृत्युः सेत्स्यर्थः। सुजातमिति। हरीश्वरस्य बुद्धिर्बभूव। अप्रहृष्टो चसीतायाः पापमेव करिष्यति। तस्मात् कृममिहायेवशत्प्रायोपविशंतं हि नः। स्वल्पा

बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी। इमा यथा राक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ।७४। पुनश्च सोऽचिंतयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता। अथायमस्यां कृतवान्महात्मा लंकेश्वरः कष्टमनार्यकर्म। ७५। इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे नवमः सर्गः। ॥

ज्ञाश्चिदारांश्चघनाश्चिवधूहाधिवेति। सीता अदर्शनव्यथितांगदादीन् पुनर्जीवितलाभात् सुजातमिति भावः। यद्वा। इमाः राक्षसराजभार्याः यथा जीवंतीत्य
र्थः। राघवधर्मपत्नी ईदृशी यदि जीवति यदि तदा अस्य रामस्य सुजातमिति हरीश्वरस्य बुद्धिर्बभूव। त्वाय तां सौम्य वैदेही यदि जीवति वानवा। नयहं जीवितुं
शक्तस्तां मृते जनकात्मजामिति। सीताजीवितसंशयव्यथितस्य रामस्य सीताजीवितनिश्चयेन सति हरौ जीवितलाभात् सुजातमिति भावः। यद्वा। हे राक्षसराज
इमाः प्रियाः यथा भार्याः। एवं राघवधर्मपत्नी ईदृशी यदि अस्य त्वन्वत् सर्वसंपत् स्यात् द्विपुरू पुत्रपौत्रादिसहितस्य इत्यर्थः। सुजातं हि किं सम्यक् न भविष्यति
किं न भविष्यतीति रावणस्य हितमुपदेष्टव्यमिति हरीश्वरस्य बुद्धिर्बभूव। यद्वा। एतासां मध्ये सीता नास्तीति निश्चित्यानेनैव बभूवेति। इमाः राक्षसराजभार्याः य
था यादृग्रूपवत्य इत्यर्थः। यदि किमित्यर्थे राघवधर्मपत्नी ईदृशी किं इदृग्रूपवती किं किं नु त्रिलोकसुंदरीत्यर्थः। अत एवात्र नास्तीति शेषः। इत्यस्य हरी

श्वरस्य सुजातमिति तया बुद्धिर्बभूव। किंतान्नारमाह ॥

तत्र त्रिश्लोक्यामेकं वाक्यं। तत्रासि इंदु दिव्योपमं। इंद्रशयनोपमं॥ अवेक्षमाणः इतस्ततोऽवलोकयन्॥ शयनासनं सनं च॥ पर्यंकं उभयोपकारादुभयव्यपदेशः। पद्य॥
आस्यतेऽस्मिन्नित्यासनं शयनस्यासनं शयनासनं शयनगृहमित्यर्थः॥ वैडूर्यवरासनैरुपपन्नं अभृतं आस्तृतं शयनासनं ददर्शेति संबंधः॥ तस्येति॥ तस्य पर्यंकस्य
एकतमे देशे शिरोभागे अथात्र रावणदर्शनकथनाय पुनः पर्यंकदर्शनं। हा। जातरूपेत्यादिश्लोकत्रयपञ्जा। जातरूपपरिष्कृतं स्वर्णनिर्मितं गवेंदुसदृशं दिव्यं गवै

तत्र दिव्योपमं रम्यं स्फाटिकं रत्नभूषितं। अवेक्षमाणो हनुमान् ददर्श शयनासनं। १। दांतकांचनचित्रांगैर्वैडूर्यैश्च वरासनैः। महासनस्तरणोपेतैरुपप
न्नं महासनैः। २। तस्य चैकतमे देशे सोऽग्र्यमाल्यविभूषितं। ददर्श पांडुरं छत्रं ताराधिपतिसंनिभं। ३। जातरूपपरिक्षिप्तं चित्रभानोः समप्रभं। अशोकमाला
विततं ददर्श परमासनं। ४। वालव्यजनहस्ताभिर्वीज्यमानं समंततः। गंधैश्च विविधैर्जुष्टं वरधूपेन धूपितं। ५। परमास्तरणास्तीर्णमाविकाजिनसंवृतं।
दामभिर्वरमाल्यानां समंतादुपशोभितं॥ ६॥ तस्मिंजीमूतसंकाशं प्रदीप्तोत्तमकुंडलं। लोहिताक्षं महाबाहुं महारजतवाससं॥ ७॥ लोहितेनानुलिप्तां
गं चंदनेन सुगंधिना॥ संध्यारक्तमिवाकाशे तोयदं सतडिद्गुणं। ८। वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणं। सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मंदरं। ९। क्रीडि
त्वोपरतं रात्रौ वराभरणभूषितं। प्रियं राक्षसकन्यानां राक्षसानां सुखावहं। १०। पीत्वाप्युपरतं चापि ददर्श स महाकपिः। भास्वरे शयने वीरं प्रसुप्तं राक्षसाधि
पं। ११। निश्वसंतं यथा नागं रावणं वानरोत्तमः॥ आसाद्य परमोद्विग्नः सोऽपासर्पत्सुभीतवत्। १२। अथारोहणमासाद्य वेदिकांतरमाश्रितः। सुप्तं राक्षसराजा
नं प्रेक्षते स्म महाकपिः। शुशुभे राक्षसेंद्रस्य स्वपतः शयनोत्तमं। गंधहस्तिनि संविष्टे यथा प्रस्रवणं महत्। १४। कांचनांगदसंनद्धौ ददर्श स महात्मनः।
विक्षिप्तौ राक्षसेंद्रस्य भुजाविंद्रध्वजोपमौ। १५। ऐरावतविषाणाग्रैरापीडनकृतव्रणौ। वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ। १६। पीनौ समसु
जातांसौ संगतौ बलसंयुतौ। सुलक्षणनखांगुष्ठौ स्वंगुलीयकलक्षितौ। १७। ।

धूपवासितं॥ आविकाजिनसंवृतं॥ आविकाजिनमूर्णायुचर्म॥ वरमाल्यानां॥ वरपुष्पाणां॥ तस्मिन्निति॥ महारजतवाससं॥ हेमविचित्रितवसनं॥ अथेति॥ आ
रोहणं सोपानं वेदिकांतरं सोपानपर्वमध्यं। शुशुभ इति। गंधहस्तिनि यस्य गंधेन अन्यगजा विभ्यति स गंधहस्ती। कांचनेति। विक्षिप्तौ दीर्घौ। वज्रोल्लिखित
पीनांसौ वज्रेण उल्लिखितौ आहतौ॥ पीनौ अंसौ ययोः स्कंधयोस्तथा॥ पीनाविति। समसंगतौ परस्परसदृशौ। संगतौ॥ दृढसंधिबंधौ॥ संहताविति पाठेऽप्ययमेवार्थः। । ।

प्रः मदाधिकं च अंगहारैः अंगविक्षेपैः । नृत्तशालिनीति विशेषणात्तु सुप्तवस्थायामपि वासनाबलेन नृत्तसंनिवेशविशिष्टा स्थितेति सूचयति । । ।

सुं. २९

विलसितौ । उमारितौ । एतादृशौ बाहू ददर्शेति पूर्वेण संबंधः । ददर्श स कपिस्तत्र ददर्शेति क्रियापदावृत्तिः । विशेषणबाहुल्यात । नाभ्याभिति । भुजाभ्यामिति द्वि

भुजत्वं । महाभुजावित्यादि विवक्षमाणेनैकभुजत्वं रावणस्य [illegible] तेन क्रुद्धेत । चूर्णेति । निःश्वासस्पन्दितदि सुरभिलं तदधिवासितं [illegible] अन्नरससंयुक्तः

पद्मसपदार्थगंधोपेतः । पानगंधपुरःसरः पीयत इति पानं । मधुना संप्रयुक्तः । मुक्तेति । अपवृत्तेन तलाख्यानात । किंचित् चलितेन उपलक्षितः । रक्तेति । एतादृशवक्षसा

उपलक्षितं । अपविद्धेन पर्यस्तेन क्षौमेण उत्तरीयतया धृतेन उपलक्षितं । विप्रकीर्णेति पाठे लिंगव्यत्यय आर्षः । विप्रकीर्णैरिति वा पाठः । उक्तविशेषणविशि

संहतौ परिघाकारौ वृत्तौ करिकरोपमौ । विक्षिप्तौ शयने शुभ्रे पंचशीर्षाविवोरगौ ।१८। शशक्षतजकल्पेन सुशीतेन सुगंधिना । चंदनेन परार्ध्येन स्व

नुलिप्तौ स्वलंकृतौ ।१९। उत्तमस्त्रीविमृदितौ गंधोत्तमनिषेवितौ । यक्षपन्नगगंधर्वदेवदानवराविणौ ।२०। ददर्श स कपिस्तत्र बाहू शयनसंस्थितौ । मं

दरस्यांतरे सुप्तौ महाही रुषिताविव ।२१। ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः । शुशुभेऽचलसंकाशः शृंगाभ्यामिव मंदरः ।२२। चूतपुन्नागसु

रभिर्वकुलोत्तमसंयुतः । मृष्टान्नरससंयुक्तः पानगंधपुरःसरः ।२३। तस्य राक्षससिंहस्य निश्चक्राम महामुखात् । शयानस्य विनिश्वासः पूरयन्नि

व तद्गृहं ।२४। मुक्तामणिविचित्रेण कांचनेन विराजितं । मुकुटेनापवृत्तेन कुंडलोज्ज्वलिताननं ।२५। रक्तचंदनदिग्धेन तथा हारेण शोभिना । पीना

यतविशालेन वक्षसाभिविराजितं ।२६। पांडुरेणापविद्धेन क्षौमेण क्षतजेक्षणं । महार्हेण सुसंवीतं पीतेनोत्तमवाससा ।२७। माषराशिप्र

काशं निश्वसंतं भुजंगवत् । गांगे महति तोयांते प्रसुप्तमिव कुंजरं ।२८। चतुर्भिः कांचनैर्दीपैर्दीप्यमानं चतुर्दिशं । प्रकाशीकृतसर्वांगं मेघं विद्युद्ग

णैरिव ।२९। पादमूलगताश्चापि ददर्श सुमहात्मनः । पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ।३०। शशिप्रकाशवदना वरकुंडलभूषणाः । अम्

लानमाल्याभरणा ददर्श हरियूथपः ।३१। नृत्यवादित्रकुशला राक्षसेंद्रभुजांकगाः । वराभरणधारिण्यो निषण्णा ददृशे कपिः ।३२। वज्रवैडूर्य

गर्भाणि श्रवणांतेषु योषितां । ददर्श तपनीयानि कुंडलान्यंगदानि च ।३३। तासां चंद्रोपमैर्वक्त्रैः शुभैर्ललितकुंडलैः । विरराज विमानं तन्नभस्ता

रागणैरिव ।३४। मदव्यायामखिन्नास्ता राक्षसेंद्रस्य योषितः । तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ।३५। अंगहारैस्तथैवान्या कोमलैर्नृत्तशा

लिनी । विन्यस्तशुभसर्वांगी प्रसुप्ता वरवर्णिनी ।३६।

भुजं रावणं तस्य पादमूलगताः पत्नीश्च ददर्शेति संबंधः । रक्षःपतेर्गृह इति परशेषः । नृत्तेति । राक्षसेंद्रभुजांकगाः राक्षसेंद्रस्य भुजांकं वक्षो गच्छंतीति तथा वल्लभा इति

राम २९

काचिदिति। महानदीप्रकीर्णेव। महानद्यां प्लवमानाम्लाननलिनीपोतं नलिनीं समूलनालदलां पद्मजालकं पोतं पद्रक्रयागतं। प्लवमाश्रितेव वीणां परिष्वज्य॥ प्रकाशत इ
ति संबंधः॥ विपंची। वीणाभेदः। डिंडिममिति॥ परिगृह्य अवलंब्य॥ तथैवासक्तडिंडिमा आश्लिष्टडिंडिमा तरुणं रमणं वत्सं पुत्रं च परिगृह्य प्रसुप्ता॥ काचिदिति।
आडंबरस्तूर्यभेदः भुजसंभोगः॥ भुजाश्लेष॥ कलशीमिति। कलशीं सलिलसंभृतामित्यर्थः॥ अपविध्य पर्यस्य परिमार्जिता विपर्यस्तस्वकीयकलशोदकार्द्रीकृतशरी
रा नारी वसंते पुष्पाणि परिहाराय परिमार्जिता जलसिक्ता अत एव पुष्पशबला शबलपुष्पेत्यर्थः॥ चूतं वभातीति संबंधः॥ आतोद्यानीति। आतोद्यानि ततानद्धसुषिरका
स्यनामकानि चतुर्विधवाद्यानि ततं वीणादिकं वाद्यमानद्धं मुरजादिकं। वंशादिकं तु सुषिरं कांस्यं तालादिकं घनं। चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं स्मृतम रः।

कांचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते। महानदीप्रकीर्णेव नलिनी पोतमाश्रिता। ।३७। अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा॥ प्रसुप्ता भामिनी भाति वा
लपुत्रेव वत्सला। ।३८। पटहं चारुसर्वांगी पीड्य शेते शुभस्तनी। चिरस्य रमणं लब्ध्वा परिष्वज्येव कामिनी॥ भुजपार्श्वांतरस्थेन कक्षगेन कृशोदरी॥ पणवेन स
हैवान्या सुप्ता मदकृतश्रमा। ।४०। डिंडिमं परिगृह्यान्या तथैवासक्तडिंडिमा। प्रसुप्ता तरुणं वत्समुपगूह्येव भामिनी॥ ।४१। काचिदाडंबरं नारी भुजसंभोगपी
डितं। कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता। ।४२। कलशीमपविध्यान्या प्रसुप्ता मदविह्वला। वसंतपुष्पशबला मालेव परिमार्जिता। पाणिभ्यां च कुचौ काचि
त्सुवर्णकलशोपमौ। आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः। ।४३। निपीड्य च कुचौ काश्चित्कामिन्यः कामुकानिव। तासामेकांतविन्यस्ते शयानां
शयने शुभे। ।४४। ददर्श रूपसंपन्नामपरां स कपिः स्त्रियं। मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषितां। ।४५। विभूषयंतीमिव च स्वश्रिया भवनोत्तमं। गौरीं क
नकवर्णाभामिष्टामंतःपुरेश्वरीं। ।४६। कपिर्मंदोदरीं तत्र शयानां चारुरूपिणीं। स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः॥ ।४७॥ तर्कयामास सीते
ति रूपयौवनसंपदा। हर्षेण महता युक्तो ननंद हरियूथपः। ।४८। दृष्ट्वा सीतेति निश्चयाभूद्दीनश्चारित्रदर्शनात्। आस्फोटयामास चुचुंब पुच्छं ननंद चिक्री
डजगौ जगाम। ।४९। स्तंभानरोहन्निपपात भूमौ निदर्शयन्स्वां प्रकृतिं कपीनां। ।५०। । इत्यार्षे रामायणे सुंदरकांडे दशमः सर्गः॥ ॥अवधूय च तां बुद्धिं
बभूवावस्थितस्तदा। जगाम चापरां चिंतां सीतां प्रति महाकपिः। ।१। ।

गौरीं हरिद्राभां। किमिव गौरीमित्यत आह। कनकवर्णाभामिति। तर्कयामास सीतेति रूपयौवनसंपदा। औचित्यमनालोच्य। रूपयौवनसंपन्मात्रदर्शनेन सीते
ति विचारितवानित्यर्थः। सीतेति व्यामोहात्कपित्वं प्रदर्शितवानित्याह। आस्फोटयामासेति। जगौ हर्षान्मंदगानं कृतवानित्यर्थः। ॥ इति श्रीमहेश्वरतीर्थीये सुंद
रकांडे दशमः सर्गः। । अवधूयेति। तां बुद्धिं अतस्मिंस्तद्बुद्धिमवस्थितः स्वस्थचित्तः। ।१। ।

अविचारान्मैथिली दृशबुद्धिर्निवृत्तेत्याह। न रामेणेत्यादि श्लोकद्वयेन पानभूमिमित्यारभ्य ददर्श हरियूथपइत्यंतमेकं वाक्यं। रताभिरतसंसुप्तमित्यत्र विशेषणत्वेन
रावणमित्यध्याहर्तव्यं। तथा च हरियूथपः पानभूमा चक्रे विशेषणविशिष्टा स्त्रियश्च अंगनासहस्रेण सह रावणं च ददर्शेति संबंधः। क्रीडितेनेति। पानप्रविहताः पा
नेन मग्नाः संविष्टाः सुप्ताः। रूपसंल्लापशीलेन। रूपं वा संल्लापश्च। शीलं वा तेन तत्वतो सौ दर्पवर्णन स्वभावेनेत्यर्थः। युक्तगीतार्थभाषिणा। युक्तमुपपन्नं यथा तथा गीत
स्याभरा तदा त्रास्यार्थं भाषितुं शीलमस्येति तथा। तेन भरतशास्त्रार्थव्याख्यानचतुरेणेत्यर्थः। देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः। युक्तवाक्याभिधायिना अ
वसरोचितभाषिणा। रताभिरतसंसुप्तं। रताभिरतश्चासौ संसुप्तश्च तं रतिश्रांत्या संसुप्तमित्यर्थः। सइति। परिकीर्णः। परिवेष्टितः। वराहेति। वराहः। शूकरः। वाध्री

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी। न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुं। २। नान्यं नरमुपस्थातुं सुराणामपि चेश्वरं। न हि रामसमः कश्चि
द्विद्यते त्रिदशेष्वपि। ३। अन्येयमिति निश्चित्य भूयस्तत्र चचार सः। पानभूमिं हरिश्रेष्ठः सीतासंदर्शनोत्सुकः। ४। क्रीडितेनापराः क्लांता गीतेन च
तथा पराः। नृत्येन च तथा क्लांता पानप्रविहतास्तथा। ५। मुरजेषु मृदंगेषु पीठिकासु च संस्थिताः। तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः। ६। अंग
नानां सहस्रेण भूषितेन विभूषणैः। रूपसंल्लापशीलेन युक्तगीतार्थभाषिणा। ७। देशकालाभियुक्तेन युक्तवाक्याभिधायिना। रताभिरतसंसुप्तं दद
र्श हरियूथपः। ८। अन्यत्रापि वरस्त्रीणां रूपसंल्लापशालिनां। सहस्रं युवतीनां तु प्रसुप्तं स ददर्श ह। ९। तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः। गो
ष्ठे महति मुख्यानां गवां मध्ये यथा वृषः। १०। स राक्षसेंद्रः शुशुभे ताभिः परिवृतः स्वयं। करेणुभिर्यथारण्ये परिकीर्णो यथा द्विपः। ११। सर्वकामैरु
पेतां च पानभूमिं महात्मनः। ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे। १२। मृगाणां महिषाणां च वराहाणां च भागशः। तत्र न्यस्तानि मांसानि पान
भूमौ ददर्श सः। रौक्मेषु च विशालेषु भाजनेष्वर्धभक्षितान्। ददर्श हरिशार्दूलो मायूरान्कौक्कुटांस्तथा। १३। वराहवाध्रीणसकान्दधिसौवर्चलायु
तान्। शल्यकान्मृगमायूरान्हनूमानन्ववैक्षत। १४।

णसः पक्षिविशेषः। कृष्णग्रीवो रक्तशिराश्चेतपक्षो विहंगमः। स वै वार्ध्रीणसः पक्षी इति विश्वधर्माः क्रेः। छागविशेषो वा। त्रिपिबं त्विंद्रियक्षीणं श्वेतं वृद्धमजा
पतिं वाध्रीणसं वंतश्राद्धे याज्ञिकाश्राद्धकर्मणी तिस्मरणात्। त्रिपिबं त्रिभिः मुखेन कर्णाभ्यां च पिबतीति त्रिपिबं। खड्गमृगो वा। वाध्रीणसः खड्गमृगइत्युत्पलायुधः।
दधिसौवर्चलायुतान्। दधिसौवर्चलाभ्यां संस्कृतानित्यर्थः। सौवर्चलं रुचकाख्यलवणं सौवर्चलं स्याद्रुचकमित्यमरः। शल्यान्। शल्यः श्वाविट्। १४।

क्ककरान्॥ क्ककराख्यपक्षिविशेषान्॥ कूसरानिति पाठे। तिलादिमिश्रितौदनान्। सिद्धान् पक्वान्॥ एकशल्यान्मत्स्यविशेषान्। कृतनिष्ठितान्। कृतेन हिंगुमरिचादिना नि
ष्ठितान् निष्पन्नान् पाकसंस्कारादिना संस्कृतानित्यर्थः। लेह्यमिति॥ रागषाडवैरिति। शर्कराद्राक्षादाडिममधुरद्रव्याणां विकाराः विरलरसा रागाः। तएव बहुगलिताः।
सान्द्राः षाडवाः। तदुक्तं। सितामध्वादिमधुरा रागास्ते स्वल्पतां गताः॥ ते सान्द्राः षाडवा लेह्या लावण्यगलिता इति। सितामध्वादिमधुरद्राक्षादाडिमजो रसः। विरलश्चेत्तदा रागः सा
न्द्रश्चेत्षाडवः स्मृत इति च॥ तत्रतत्रेत्यादिश्लोकद्वयमेकंवाक्यं। पानभूमिः तैः प्रदीप्तेवोपलक्ष्यत इति संबंधः। दिव्या इति। दिव्याः सुराः समुद्रमथनोत्पन्नाः सुराः कृतसुराः

क्ककरान्विविधान्छागान्चकोरानर्धभक्षितान्। महिषानेकशल्यांश्च मेषांश्च कृतनिष्ठितान्॥१५॥ लेह्यानुच्चावचान्पेयान्भोज्यानि विविधानि च। तयाम्ल
लवणैस्तैः सर्वविधै रागषाडवैः॥१६॥ हारनूपुरकेयूरपद्विद्धैर्महाधनैः। पानभाजननिक्षिप्तैर्विमलैर्विविधैरपि॥१७॥ कृतपुष्पोपहारा भूरधिकं पुष्यति
श्रियं। तत्रतत्र च विन्यस्तैः सुश्लिष्टशयनासनैः॥१८॥ पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते। बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः। मांसैः कुशलसंयु
क्तैः पानभूमिगतैः पृथक्। दिव्याः प्रसन्ना विविधाः सुराः कृतसुरास्तथा॥२०॥ शर्करासवमाध्वीकाः पुष्पासवफलासवाः। वासचूर्णैश्च विविधैर्दृष्टास्तैस्तैः पृ
थक्पृथक्॥२१॥ संतता शुशुभे भूमिर्माल्यैः सुबहुसंस्थितैः। हिरण्मयैश्च सुकृतैः करकैः स्फाटिकैरपि॥२२॥ जांबूनदमयैश्चान्यैः करकैरभिसंवृता। क्वचि
त्प्रभिन्नैः करकैः क्वचिद्रोलायितैर्घटैः॥२३॥ क्वचित्संश्लिष्टमाल्यानि मूलानि च फलानि च। राजतेषु च कुंभेषु जांबूनदमयेषु च॥२४॥ पानश्रेष्ठं तदा भूमिं
कपिस्तत्र ददर्श सः। सोपश्यच्छातकुंभानि शीधोर्मणिमयानि च॥२५॥ राजतानि च पूर्णानि भाजनानि महाकपिः। क्वचिदर्धावशेषाणि क्वचित्पीतानि सर्व
शः॥२६॥ क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह। क्वचिद्भक्ष्यांश्च विविधान् क्वचित्पानानि सर्वशः॥२७॥ क्वचिदर्धावशेषाणि पश्यन्वै विचचार ह। शयनान्य
त्र नारीणां शून्यानि बहुधा पुनः॥२८॥ परस्परं समाश्लिष्टाः काश्चित्सुप्ता वरांगनाः। क्वचिच्च वस्त्रमन्यस्या अपहृत्योपगृह्य तत्॥२९॥ उपगम्याबला सुप्ता
निद्राबलपराजिता। तासां मुखे स्पष्टोत्तनवस्त्रमाल्यस्रगात्रजं॥३०॥ नात्यर्थं स्पंदते चित्रं प्राप्य मंदमिवानिलं॥

कृत्रिमसुराः। ता एवाह। शर्करासवेत्यादिना। शर्करासवाः शर्करया कृताः। माध्वीकाः मधुना कृताः। मार्द्वीका इति पाठे। द्राक्षाफलविकाराः। मार्द्वीका गोस्तनी द्राक्षेत्यम
रः। पुष्पासवाः। पुष्पमकरंदकृताः। फलासवाः फलरसैः कृताः। वासचूर्णैः अधिवासचूर्णैः सुगंधिचूर्णैरित्यर्थः। सहउक्तसुरा दृष्टाः कपिनेति शेषः। संततेत्यादिश्लोकद्वयमे
कमेकं वाक्यं। हिरण्मयैः। रजतमयैर्माल्यादिभिः संवृता भूमिः। शुशुभ इति संबंधः। शीधोः मधस्य। क्वचिदिति। करकैर्घटैः। सहनिद्राबलपराजिता इत्यं तस्य परस्परं वि

सुं॰ चंदनस्येत्यादिना। मारुतश्चंदनादेश्च स्नानानां चंदनानां स्नानार्हचंदनानां। धूपानां। गृहाधिवासधूपानां। विविधं गंधं उद्वहन्नववौ अत एव सुरभिः घ्राणतर्पणः गंधः
२१ विमानेमूर्छितः। व्यास इति संबंधः। श्यामेति। राक्षसालये सुप्ता इति शेषः। तासामिति। निद्रापरवशत्वाच्च। मदेनेन। मदनहेतुकरत्वाच्च। विमूर्छितं। क्लांतं। तासां रूपं पद्मि

चंदनस्य च शीतस्य शीधोर्मधुरसस्य च। ३१। विविधस्य च माल्यस्य धूपस्य विविधस्य च। बहुधा मारुतस्तत्र गंधं विविधमुद्वहन्। ३२। स्नानानां
चंदनानां च धूपानां चैव मूर्छितः। प्रववौ सुरभिर्गंधो विमाने पुष्पके तदा॥३३॥ श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वरांगनाः। काश्चित्कांचनवर्णांग्यः
प्रमदा राक्षसालये।३४। तासां निद्रावशत्वाच्च मदनेन विमूर्छितं। पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि। ३५। एवं सर्वमशेषेण रावणांतःपुरं
कपिः। ददर्श सुमहातेजा न ददर्श च जानकीं॥३६। निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः। जगाम महतीं चिंतां धर्मसाध्वसशंकितः। ३७। प
रदारावरोधस्य प्रसुप्तस्य निरीक्षणं॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति। ३८। न हि मे परदाराणां दृष्टिर्विषयवर्तिनी। अयं चात्र मया दृष्टः प
रदारपरिग्रहः॥३९॥ तस्य प्रादुरभूच्चिंता पुनरन्या मनस्विनः। निश्चितैकांतचित्तस्य कार्यनिश्चयदर्शिनी। ४०। कामं दृष्टा मया सर्वा विश्वस्ता रावण
स्त्रियः। न तु मे मनसः किंचिद्वैकृत्यमुपपद्यते॥४१॥ मनो हि हेतुः सर्वेषामिंद्रियाणां प्रवर्तने। शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितं। ४२। ना
न्यत्र हि मया शक्या वैदेही परिमार्गितुं। स्त्रियो हि स्त्रीषु दृश्यंते सदा संपरिमार्गणे। ४३। यस्य सत्वस्य या योनिः तस्यां तत्परिमृग्यते। न शक्यं प्र
मदा नष्टा मृगीषु परिमार्गितुं॥४४॥ तदिदं मार्गितं तावत् शुद्धेन मनसा मया॥ रावणांतःपुरं सर्वं दृश्यते न च जानकी। देवगंधर्वकन्याश्च नागक
न्याश्च वीर्यवान्। अवेक्षमाणो हनुमान्नैवापश्यत जानकीं। ४६। तामपश्यन् कपिस्तत्र पश्यंश्चान्या वरस्त्रियः। अपक्रम्य तदा वीरः प्रध्यातुमु
पचक्रमे। ४७। स भूयः सर्वतः श्रीमान् मारुतिर्यत्नमास्थितः। आपानभूमिमुत्सृज्य तां विचेतुं प्रचक्रमे। ४८। । इति सुंदरकांडे एकादशः सर्गः।।

नीनां रूपं यथा रमणीयं तथैवासीदित्यर्थः। धर्मसाध्वसशंकितः। धर्मलोपभयाशंकितः। परदारपरिग्रहः। परदारावरोधपरिग्रहः तस्येति। निश्चितैकांतचि एकादशः सर्गः राम २१
त्तस्य। निश्चयनियतचित्तस्य। वैकृत्यं। विकारत्वं। योनिः जातिः। स इति। तत्र रावणगृहे।। इति श्रीमहेश्वरतीर्थविरचितायां रामायणतत्वदीपिकायां सुंदरकां

सनस्येति। निशागृहान्। रात्रिनिवासयोग्यगृहान्। पश्यति। पश्यत। स इति। जानकी विचिन्वतो मे दर्शनं यथा यस्मान्नैति तदा तस्मात् ध्रुवं म्रियते ममारेति संबंधः।
सेति। स्वशीलसंरक्षणं। पातिव्रत्यसंरक्षणं प्रतिदुष्टकर्मणा। अतिदुष्टकर्मणा। आर्यपथे। सन्मार्गे। विरूपदर्शने। विरूपाक्षिदर्शना। निचक्षुषि दीर्घाश्च विरूपदर्शना
श्चनास्त्ययोक्ताः। राक्षसराजयोषितः। रावणस्याज्ञाकारिणीः। सीतामिति। सुग्रीवसमीपगागतिः। गम्यत इति गतिर्मार्गः। सुग्रीवसमीपसंबंधिमार्गो मे नास्ति। सुग्रीव
समीपं प्रतिनगन्तव्यमितिभावः। मास्तु तत्समीपगमनं जांबवदादिसमीपगमनमपि दुरंनमितत्याह। किंत्वित्यादि। नद्धदस्वनः। इत्यत्र इत्युक्त इति शेषः। तामदृष्ट्वा किंप्र

सतस्यमध्ये भवनस्य संस्थितो लतागृहांश्चित्रगृहान्निशागृहान्। जगाम सीतां प्रतिदर्शनोत्सुको नचैव तां पश्यति चारुदर्शनां। १। स चिंतयामास ततो
महाकपिः प्रियामपश्यन् रघुनंदनस्य तां। ध्रुवंनु सीता म्रियते यथा नमे विचिन्वतो दर्शनमेति मैथिली। २। सा राक्षसानां प्रवरेण बाला स्वशीलसंरक्ष
णतत्परा सती। अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्यपथे परे स्थिता। ३। विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः। समीक्ष्य सा रा
क्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा। ४। सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरं। न मेऽस्ति सुग्रीवसमीपगा गतिः सुती
क्ष्णदंडो बलवांश्च वानरः। ५। दृष्टमंतःपुरं सर्वं दृष्टा राक्षसयोषितः। न सीता दृश्यते साध्वी वृथा जातो मम श्रमः। ६। किं नु मां वानराः सर्वे गतं वक्ष्यंति सं
गताः। गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः। ७। अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजां। ध्रुवं प्रायमुपैष्यंति कालस्य व्यतिवर्तने। ८। किं वा वक्ष्यति वृ
द्धश्च जांबवानंगदश्च सः। गतं पारं समुद्रस्य वानराश्च समागताः। ९। अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखं। भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः। १०।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः। करोति सफलं जंतोः कर्म यच्च करोति सः। ११। तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमं। अदृष्टांश्च विचेष्यामि देशान्
रावणपालितान्। १२। आपानशाला विचितास्तथा पुष्पगृहाणि च। चित्रशालाश्च विचिताः भूयः क्रीडागृहाणि च। १३। निष्कुटांतररथ्याश्च विमानानि
च सर्वशः। इति संचिंत्य भूयोऽपि विचेतुमुपचक्रमे। १४।

वक्ष्यामीति संबंधः। न किमपि वक्तुं शक्यमित्यर्थः। तत्र हेतुमाह। ध्रुवमिति। सीता न दृष्टेति वचनं श्रुत्वा ध्रुवं प्रायं। प्रायोपवेशनेन प्राणांस्त्यक्ष्यंतीत्यर्थः। हेत्वंतरमाह। कि
मिति। समुद्रस्य पारं तीरं गतं मां जांबवान्। न किं कुत्सितं वक्ष्यति। सागरः किं कुत्सितं वक्ष्यति समागताः। सीतान्वेषणार्थमागताः किं कुत्सितं वक्ष्यंतीत्यर्थः। एवं रक्षणमात्रं
निर्विद्य पुनरुत्साहमवलंब्याह। अनिर्वेद इत्यादि। अनिर्वेदः। अलंबुद्धिराहित्यं उत्साह इत्यर्थः। अनिर्वेदकृतमुत्साहप्रयुक्तं। १३। निष्कुटांतररथ्याः। निष्कुटाः गृह

सुं. २२

भूमीति। भूमिगृहान्। भूविलगृहान्। चैत्यगृहान्। बुद्धायतनानि गृहातिगृहकान्। गृहान् नीत्यश्चनतिदूरे स्वैरविहारार्थं निर्मितगृहाः। उत्पतन्निति। उत्पतन्।
उत्पतन्नारोहन्। निपतन्। क्वचित्तत्रावरोहन्। निष्पतन्। निष्क्रामन्। विलगृहेष्ववतरन्। उत्पतन्। पुनस्तेभ्यः उत्पतन्। प्राकारांतररथ्याः। प्राकारांतरमध्यवर्तिनीं
त्रिकुमारादिगृहवीथ्यः। वेदिकाश्चैत्यसंश्रयाः चतुष्पथवृक्षनिरूढाधारभूतवेदिकाः। प्रमथ्येति। प्रमथ्य नागकन्या बलाद्धृता इत्यनेन वंदीकृतानां गृहाणां पूर्वं तदीहानां

भूमीगृहांश्चैत्यगृहान् तथा चैत्यगृहानपि। उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः पुनः।१५। अपावृत्तानि द्वाराणि कपाटान्यवघट्टयन्। प्रविशन्निष्पतंश्चापि प्र
पतन्नुत्पतन्निव।१६। सर्वमप्यवकाशं स विचचार महाकपिः। चतुरंगुलमात्रोपि नावकाशः स विद्यते।१७। रावणांतःपुरे तस्मिन्यं कपिर्न जगाम सः। प्राका
रांतरवीथ्यश्च वेदिकाश्चैत्यसंश्रयाः।१८। श्वभ्राश्च पुष्करण्यश्च सर्वं तेनावलोकितं। राक्षस्यो विविधाकारा विरूपा विकृतास्तथा।१९। दृष्टा हनुमता तत्र न तु सा
जनकात्मजा। रूपेणाप्रतिमा लोके वरा विद्याधरस्त्रियः।२०। दृष्टा हनुमता तत्र न तु राघवनंदिनी। नागकन्या वरारोहाः पूर्णचंद्रनिभाननाः।२१। दृष्टा
हनुमता तत्र न तु सा जनकात्मजा। प्रमथ्य राक्षसेंद्रेण नागकन्या बलाद्धृताः।२२। दृष्टा हनुमता तत्र न सा जनकनंदिनी। सोपश्यंस्तां महाबाहुः पश्यंश्चान्या
वरस्त्रियः।२३। विषादमगमद्धीमान् हनूमान्मारुतात्मजः। उद्योगं वानरेंद्राणां प्लवनं सागरस्य च।२४। व्यर्थं वीक्ष्यानिलसुतश्चिंतां पुनरुपागतः। अ
वतीर्य विमानाच्च हनुमान्मारुतात्मजः।२५। चिंतामुपजगामाथ शोकोपहतचेतनः। । इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे द्वादशः सर्गः॥ ॥
विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः। हनूमान्वेगवानासीद्यथा विद्युद्घनांतरे।१। संपरिक्रम्य हनुमान् रावणस्य निवेशनान्। अदृष्ट्वा जानकीं सी
तामब्रवीद्वचनं कपिः।२। भूयिष्ठं लोलिता लंका रामस्य चरता प्रियं। न हि पश्यामि वैदेहीं सीतां सर्वांगशोभनां।३। पल्वलानि तटाकानि सरांसि सरितस्त
था। नद्योनूपवनांताश्च दुर्गाश्च धरणीधराः।४। लोलिता वसुधा सर्वा नतु पश्यामि जानकीं। इह संपातिना सीता रावणस्य निवेशने।५। आख्या
ता गृध्रराजेन न च पश्यामि तामहं। ।

नागकन्यानां अंतोनपुनरुक्तिः। ।इति श्रीमहेश्वरतीर्थीये सुंदरकांडे द्वादशः सर्गः। ।विमानादिति। संवेगवान्। हनूमान्। विमानात् प्राकारं संक्रम्य घ
नांतरे विद्युदिवासीदित्यन्वयः। अनेनोपमेन प्राकार इंद्रनीलकृत इत्यवगम्यते। समिति। निवेशनात् संपरिक्रम्य प्राकारमिति शेषः। भूयिष्ठं लोलिता। वङ्कशा

चिष्टेत्यर्थः। सरितः क्षुद्रनद्यः। अनूपवनानां ताः। जलप्रचुर वनप्रदेशाः॥ ॥

राम २२

किंश्चिति। सीतेत्यनेन अयोनिजत्वप्रयुक्तं वैशिष्ट्यं द्योत्यते॥ अथ राघवस्यार्थी गुणसमुच्चयपरः। वैदेहीत्यनेन देशसंबंधकृतवैशिष्ट्यं। मैथिलीत्यनेन सदाचारयुक्तसत्व
रूपावासनगरसंबंधनिबंधनवैशिष्ट्यं॥ जनकात्मजेत्यनेन कर्मणैव हि संसिद्धिमास्थिता जनकादय इति प्रसिद्धजनकसंबंधकृतवैशिष्ट्यं। एवं गुणविशिष्टा देवी दुष्टचा
रिणं रावणं॥ उपतिष्ठेत किं नु मित्रत्वेन शुश्रूषया किं तु न शुश्रूषया देवेत्यर्थः। अदर्शने हेतुमाह। क्षिप्रमित्यादिना। रामबाणानां। बाणौघैः। पीडितेन। पीडनेन। अथवेति।

किं नु सीताथ वैदेही मैथिली जनकात्मजा। उपतिष्ठेत विवशा रावणे न हृता बलात्॥ ७॥ क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः। बिभ्यतो रामबाणानामन्तरा
पतिता भवेत्। अथवा ह्रियमाणायाः पथि सिद्धनिषेविते। मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरं॥ ९॥ रावणस्योरुवेगेन भुजाभ्यां पीडितेन च। तया मन्ये विशा
लाक्ष्या त्यक्तं जीवितमार्यया॥ १०॥ उपर्युपरि वा नूनं सागरं क्रमतस्तदा। विवेष्टमाना पतिता सागरे जनकात्मजा॥ ११॥ अहो क्षुद्रेण वानेन रक्षन्ती शीलमात्मनः।
अबंधुर्भक्षिता सीता रावणेन तपस्विनी॥ १२॥ अथवा राक्षसेंद्रस्य पत्नीभिरसितेक्षणा। अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति॥ १३॥ संपूर्णचंद्रप्रतिमं पद्मपत्र
निभेक्षणं। रामस्य ध्यायती वक्त्रं पंचत्वं कृपणा गता। हा राम लक्ष्मणेत्येवं हायोध्येति च मैथिली। विलप्य बहु वैदेही न्यस्तदेहा भविष्यति॥ १५॥ रहो वा निहिता मन्ये
रावणस्य निवेशने। नूनं लालप्यते मंदं पंजरस्थेव शारिका॥ १६॥ जनकस्य कुले जाता रामपत्नी सुधार्मिका। कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत्॥ १७॥ विनष्टा
वा प्रनष्टा वा मृता वा जनकात्मजा। रामस्य प्रियभार्यस्य न निवेदयितुं क्षमं॥ १८॥ निवेद्यमाने दोषः स्यात् दोषः स्यादनिवेदने। कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे॥ १९॥
अस्मिन्नेवं गते कार्ये प्राप्तकाले क्षमं च किं। भवेदिति मतिं भूयो हनूमान्प्रविचारयन्॥ २०॥ यदि सीतामदृष्ट्वाहं वानरेंद्रपुरीमितः। गमिष्यामि ततः को मे पुरुषार्थो भवि
ष्यति॥ २१॥ ममेदं लंघनं व्यर्थं सागरस्य भविष्यति। प्रवेशश्चापि लंकाया राक्षसानां च दर्शनं॥ २२॥ किं वा वक्ष्यति सुग्रीवो हरयो वा महाबलाः। किष्किंधां समनुप्राप्तौ तौ
वा दशरथात्मजौ॥ २३॥ गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियं। न दृष्टा हि मया सीता ततस्त्यक्ष्यति जीवितं॥ २४॥

निहितां रहोदेशस्थापितां। मन्ये एवं पीड्यमानापि सीता रावणस्य वशं न व्रजेदित्याह। जनकस्येति। ननु किमेतावता विचारेण गतं यथा वृत्तं निवेद्यतां अत आह। विन
ष्टेत्यादि। दृष्टप्रदेशोपायया अदर्शनं विनाशः। अदृष्टप्रदेशेऽवस्थापनं प्रणाशः। रामविश्लेषजनितदुःखेन स्वयं मृता वा। निवेद्येति। दोषो वक्ष्यमाणः। अनिवेदने यथावृत्तां
नाकथने दोषः। स्वामिवंचनकरणरूपः स्यात्। अस्मिन्निति। प्राप्तकालं। कालोचितं। क्षमं। समर्थं। किं भवेदिति। मतिं। पक्षं। भूयः प्रविचारयत्। प्रव्यचारयत। ॥ २०॥

मु. २३ परुषं। कर्णकठोरं। दारुणं। भयंकरं। क्रूरमुग्रं। तीक्ष्णामसह्यं। इंद्रियतापनं। इंद्रियक्षोभकरं। स रामः पंचत्वगतमानसं। मरणे कृतनिश्चयं। नेति। निरोधेषु। गुहादिसंवृत
प्रदेशेषु। मयीति। धरिष्येत प्राणानिति शेषः। हस्तादानः। हस्तपतितफलपर्णाद्याशी। मुखादानः। मुखोपतितभोजी। वृक्षमूलिकः। वृक्षमूलवासी। अरणीसुतं। अग्निं। उपवि

परुषं दारुणं तीक्ष्णं क्रूरमिंद्रियपातनं। सीतानिमित्तं दुर्वाक्यं श्रुत्वा स न भविष्यति। २५। तं तु रामं गतं दृष्ट्वा पंचत्वगतमानसं। भृशानुरक्तो मेधावी न भवि
ष्यति लक्ष्मणः। २६। विनष्टौ भ्रातरौ श्रुत्वा भरतोऽपि मरिष्यति। भरतं च मृतं दृष्ट्वा शत्रुघ्नो न भविष्यति। २७। पुत्रान्मृतान्समीक्ष्याथ न भविष्यंति मातरः। कौ
शल्या च सुमित्रा च कैकयी च न संशयः। २८। कृतज्ञः सत्यसंधश्च सुग्रीवः प्लवगाधिपः। रामं तथा गतं दृष्ट्वा ततस्त्यक्ष्यति जीवितं। २९। दुर्मना व्यथिता दीना
निरानंदा तपस्विनी। पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितं। ३०। वालिजेन तु दुःखेन पीडिता शोककर्शिता। पंचत्वं च गते राज्ञि तारापि न भविष्य
ति। ३१। मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च। कुमारोप्यंगदो वालस्तस्मान्न भविष्यति। ३२। भर्तृजेन तु दुःखेन अभिभूता वनौकसः। शिरांस्य
भिहनिष्यंति तलैर्मुष्टिभिरेव च। ३३। सांत्वेनानुप्रदानेन मानेन च यशस्विना। लालिताः कपिनाथेन प्राणांस्त्यक्ष्यंति वानराः। ३४। न वनेषु न शैलेषु नि
रोधेषु च वानराः। क्रीडामनुभविष्यंति समेत्यमपिकुंजराः। ३५। सपुत्रदाराः सामात्या भर्तृव्यसनकर्शिताः। शैलाग्रेभ्यः पतिष्यंति समेषु विषमेषु च। ३६।
विषमुद्बंधनं वापि प्रवेशं ज्वलनस्य वा। उपवासमथो शस्त्रं प्रचरिष्यंति वानराः। ३७। घोरमारोदनं मन्ये गते मयि भविष्यति। इक्ष्वाकुकुलनाशश्च नाश
श्चैव वनौकसां। ३८। सोऽहं नैव गमिष्यामि किष्किंधां नगरीमितः। नहि शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना। ३९। मय्यगच्छति चेहस्थे धर्मात्मानौ महा
रथौ। आशया तौ धरिष्येते वानराश्च मनस्विनः। ४०। हस्तादानो मुखादानो नियतो वृक्षमूलिकः। वानप्रस्थो भविष्यामि ह्यदृष्ट्वा जनकात्मजां। ४१।
सागरानूपजे देशे बहुमूलफलोदके। चितां कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतं। ४२। उपविष्टस्य वा सम्यक् लिंगिनं साधयिष्यतः। शरीरं भक्ष
यिष्यंति वायसाः श्वापदानि च। ४३। इदमप्यृषिभिर्दृष्टं निर्याणमिति मे मतिः। सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीं। ४४। राम २३

ष्टस्य प्रायोपविष्टस्य। लिंगिनां लिंगशरीरमस्यास्तीति लिंगिनं आत्मानमित्यर्थः। साधयिष्यतः। शरीरान्मोचयिष्यतः। श्वापदानि। श्वापदाः। व्याघ्रादयः। न चात्मह
त्यादोषोपीत्याह। इदमिति। निर्याणं। मरणं। आपः। अपः। ४४।

सुजातेति।आदितः।आदितआरभ्यसीतान्वेषणेऽपयुक्तयावशोमनमूलासुभगाश्रीतान्वेषणस्सौकर्यापादकचंद्रिकयामनोहरा।कीर्त्तिमाला।कीर्त्तनंकीर्त्तिःसीतान्वेषणसह
कारिणीतिसर्वैःक्रियमाणाकीर्त्तिरेवमालायस्यासायशस्विनी।हनूमल्लंकाप्रवेशरात्रिरितिव्याख्यानेमतीचिरसंभिः।चिरकालनविशिष्टारात्रिश्चिरारात्रिर्दीर्घरात्रिरितिपाव
त।अनेनरामकार्यसहकारेणक्षपारात्रिरपिवर्द्धितवतीत्यवगम्यते।सीतामपश्यतोममप्रभग्नानिष्फलाजातेत्यर्थः।पूर्वोक्तयोस्तापसमरणपक्षयोःप्रथमंपक्षमवलं

सुजातमूलासुभगाकीर्त्तिमालायशस्विनी।प्रभग्नाचिररात्रीयंममसीतामपश्यतः॥४५॥तापसोवाभविष्यामिनियतोवृक्षमूलिकः।नतुप्रतिगमिष्यामिताम
दृष्ट्वायतेक्षणां॥४६॥यदितःप्रतिगच्छामिसीतामनधिगम्यतां।अंगदःसहितैःसर्वैर्वानरैर्नभविष्यति॥४७॥विनाशेबहवोदोषाजीवन्भद्राणिपश्यति।तस्मात्प्रा
णान्धरिष्यामिध्रुवोजीवितसंगमः॥४८॥एवंबहुविधंदुःखंमनसाधारयन्मुहुः।नाध्यगच्छत्तदापारंशोकस्यकपिकुंजरः॥४९॥ततोविक्रममासाद्यधैर्यवान्क
पिकुंजरः।रावणंवावधिष्यामिदशग्रीवंमहाबलं॥५०॥रामपत्नीहृतायेनप्रत्याचीर्णंभविष्यति।अथवैनंसमुत्क्षिप्यउपर्युपरिसागरं॥५१॥रामायोपहरि
ष्यामिपशुंपशुपतेरिव।इतिचिंतांसमापन्नःसीतामनधिगम्यतां॥५२॥ध्यानशोकपरीतात्माचिंतयामासवानरः।यावत्सीतांतुपश्यामिरामपत्नींयशस्वि
नीं॥५३॥तावदेनांपुरींलंकांविचिनोमिपुनःपुनः।संपातिवचनाच्चापिरामंयद्यानयाम्यहं॥५४॥अपश्यन्राघवोभार्यांनिर्दहेत्सर्ववानरान्।इहैव
नियताहारोवत्स्यामिनियतेंद्रियः॥५५॥नमत्कृतेविनश्येयुःसर्वेतेनरवानराः।अशोकवनिकाचापिमहतीयंमहाद्रुमा॥५६॥इमामधिगमिष्यामिनही
यंविचितामया।वसून्रुद्रांस्तथादित्यानश्विनौमरुतोपिच॥५७॥नमस्कृत्वागमिष्यामिरक्षसांशोकवर्द्धनं।जित्वातुराक्षसान्देवीमिक्ष्वाकुकुलनंदि
नीं।संप्रदास्यामिरामायसिद्धीमिवतपस्विने।समुहूर्तमिवध्यात्वाचिंताविग्रथितेंद्रियः।उदतिष्ठन्महाबाहुर्हनूमान्मारुतात्मजः॥५९॥नमोस्तुरामा
यसलक्ष्मणायदेव्यैचतस्यैजनकात्मजायै।नमोस्तुरुद्रेंद्रयमानिलेभ्योनमोस्तुचंद्रार्कमरुद्गणेभ्यः॥॥६०॥।

व्याह।तापसइत्यादिना।जीवितसंगमः।जीवितेसंगमः।श्रेयःसंगमः।ध्रुवः।किंदैन्येनविक्रमिष्यामीत्याह।रावणमिति।हृतासीताकाममस्तुयथातथावाभ
वतुरावणंवधिष्याम्येवतेनकिं।प्रत्याचीर्णं।प्रत्याचरणं।वैरनिर्यातनमितियावत्।चिंताप्रकारमेवाह।यावदिति।पश्यामिविचिनोमीतिलट्।भविष्यदर्थे
सीतामदृष्ट्वैवसंपातिवचनाद्रामःसमानीयेततदामहाननर्थःप्रविष्यतीत्याह।संपातीति।इहेतिविनश्येयुःसीतामदृष्ट्वानत्रमरुममनांतरमितिभावः।जित्वेति।

सत्विति। सुग्रीवायचेत्यत्र नमश्चक्र इति केचिन्नेर्विपरीणामः। अशोकवनिकां गतः। मनसेति शेषः। अशोकवनिकां प्रतीति पाठे समालोकयदित्यालोकयते र्विपरिणा
मः। अन्यथा तद्वैद्यातिरिच्यते। स इति। मनसा गत्वा गंतुं निश्चित्येत्यर्थः। उत्तरं। उत्तरकर्तव्यं। वनाकुला काननावृता रक्षिणः इति। अत्र अशोकवनिकाया विहिता नि
युक्ताः। सर्वात्मा वायुः। संक्षिप्त इति। एषार्थो। रावणस्येति। गूढ इत्या सीतादर्शनस्याकांक्षितत्वाद्रावणदर्शनपरिहारार्थत्वाच्च भयर्थित्वं। दास्यंति। दद्रतीत्यर्थः।
स तु तेभ्यो नमस्कृत्वा सुग्रीवाय च मारुतिः। दिशः सर्वाः समालोक्य सोऽशोकवनिकां गतः ॥६०॥ स गत्वा मनसा पूर्वमशोकवनिकां शुभां। उत्तरं चिंतयामास
वानरो मारुतात्मजः ॥६१॥ ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला। अशोकवनिका पुण्या सर्वसंस्कारसंस्कृता ॥६२॥ रक्षिणश्चात्र सहिता नूनं रक्षंति पाद
पान्। भगवानपि विश्वात्मा नातिक्षोभं प्रवाति वै ॥६३॥ संक्षिप्तोऽयं मयात्मा च रामार्थे रावणस्य च। सिद्धिं मे संविधास्यंति देवाः सर्षिगणास्त्विह ॥६४॥ ब्रह्मा स्वयंभुर्भ
गवान् देवाश्चैव दिशंतु मे। सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥६५॥ वरुणः पाशहस्तश्च सोमादित्यौ तथैव च। अश्विनौ च महात्मानौ मरुतः सर्व एव
च ॥६६॥ सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः। दास्यंति मम ये चान्ये ह्यदृष्टाः पथि गोचराः ॥६७॥ समुन्नसं पांडुरदंतमव्रणं शुचिस्मितं पद्मपलाश
लोचनं। द्रक्ष्ये तदार्यावदनं कदान्वहं प्रसन्नताराधिपतुल्यदर्शनं ॥६८॥ क्षुद्रेण हीनेन नृशंसमूर्तिना सुदारुणालंकृतवेषधारिणा। बलाभिभूता ह्यबलात
पस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥६९॥ इत्यार्षे रामायणे सुंदरकांडे त्रयोदशः सर्गः ॥ स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य तां। अवप्लुतो महाते
जाः प्राकारं तस्य वेश्मनः ॥१॥ स तु संहृष्टसर्वांगः प्राकारस्थो महाकपिः। पुष्पिताग्रान्वसंतादौ ददर्श विविधान्द्रुमान् ॥२॥ सालानशोकान्भव्यांश्च चंपकांश्च सुपु
ष्पितान्। उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ॥३॥ तथाम्रवणसंछन्नान्लताशतसमावृतान्। ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकां ॥४॥ स प्र
विश्य विचित्रां तां विहगैरभिनादितां। राजतैः कांचनैश्चैव पादपैः सर्वतो वृतां ॥५॥ ।

पथि गोचराः। दृष्टाः अदृष्टाश्च ये ते सिद्धिं दास्यंति। समुन्नसं। समुन्नतनासायस्य। तत्समुन्नसं। अव्रणा मनवैधं सुदारुणालंकृतवेषधारिणा असत्ववेषधारिणा रावणे
नेति शेषः ॥ ॥ इति श्रीयुद्धकांडे त्रयोदशः सर्गः ॥ स इति। तामशोकवनिकां मनसाधिगम्य तत्र मनो निधायेत्यर्थः। तस्य रावणस्य वेश्मनः। वेश्मप्रकारादि
त्यर्थः। प्रकारं वनप्राकारं। अवप्लुतः प्राप्तः। आम्रवनं। चूतवनं। ॥५॥ ।

चित्रकाननं। चित्रद्रुमषंडं। पुष्पोपगफलोपगैः। पुष्पाण्युपगच्छंतीति पुष्पोपगाः पुष्पसंपन्नाः। एवं फलोपगाः। प्रहृष्टमनुजे। प्रहृष्टजने काले वसंतादौ इत्यर्थः। पुष्पवृष्टयः
। पुष्पवृष्टीः। धूर्त्तान्। अहृष्टधूर्त्तान्। विहंगेति। स्कंधमात्राश्रयाः। स्कंधानामेवाश्रयाः। नतु पत्रपुष्पादीनां अत एवागमाः। अगम्याः। असेव्या इति यावत्। निधूताः। कंपिताः।
विहगैर्मृगसंघैश्च विचित्रां चित्रकाननां। उदितादित्यसंकाशां ददर्श हनुमान्कपिः॥६॥ वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः। कोकिलैर्भृंगराजैश्च
मत्तैर्नित्यनिषेवितां॥७॥ प्रहृष्टमनुजे काले मृगपक्षिसमाकुले। मत्तबर्हिणसंघुष्टां नानाद्विजगणायुतां॥८॥ मार्गमाणो वरारोहां राजपुत्रीमनिंदितां।
सुखप्रसुप्तान्विहगान्बोधयामास वानरः॥९॥ उत्पतद्भिर्द्विजगणैः पक्षैः सालाः समाहताः। अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः॥१०॥ पुष्पावकीर्णः शुशु
भे हनुमान्मारुतात्मजः। अशोकवनिकामध्ये यथा पुष्पमयो गिरिः॥११॥ सर्वा दिशोभिधावंतं वृक्षषंडगतं कपिं। दृष्ट्वा सर्वाणि भूतानि वसंत इति
मेनिरे॥१२॥ वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः। रराज वसुधा तत्र प्रमदेव विभूषिता॥१३॥ तरस्विना ते तरवस्तरसाभिप्रकंपिताः। कुसुमानि
विचित्राणि ससृजुः कपिनोद्धृता॥१४॥ निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः। निक्षिप्तवस्त्राभरणा धूर्त्ता इव पराजिताः॥१५॥ हनूमता वेगवता
कंपितास्ते नगोत्तमाः। पुष्पपर्णफलान्याशु मुमुचुः फलशालिनः॥१५॥ विहंगसंघैर्हीनास्ते स्कंधमात्राश्रया द्रुमाः। बभूवुरगमाः सर्वे मारुतेन
विनिर्धुताः॥१६॥ विधूतकेशी युवती यथा मृदितवर्णका। निष्पीतशुभदंतोष्ठी नखैर्दंतैश्च विक्षता॥१७॥ तथा लांगूलहस्तैस्तु चरणाभ्यां च मर्दिता।
बभ्रवाशोकवनिका प्रभग्नवरपादपा॥१८॥ महालतानां दामानि व्यधमत्तरसा कपिः। यथा प्रावृषि विंध्यस्य मेघजालानि मारुतः॥१९॥ स तत्र मणिभूमी
श्च राजतीश्च मनोरमाः। तथा कांचनभूमीश्च ददर्श विचरन्कपिः॥२०॥ वापीश्च विविधाकाराः पूर्णाः परमवारिणा। महार्हैर्मणिसोपानैरुपपन्नास्त
तस्ततः॥२१॥ मुक्ताप्रवालसिकताः स्फाटिकांतरकुट्टिमाः। कांचनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः॥२२॥ फुल्लपद्मोत्पलवनाः ~~[illegible]~~ श्चक्रवा
कोपशोभिताः। नत्यूहरुतसंघुष्टा हंससारसनादिताः॥२३॥ दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समंततः। अमृतोपमतोयाभिः शिवाभिरुपसंस्कृ
ताः। लताशतैरवतताः संतानकसमावृताः। नानागुल्मावृतवनाः करवीरकृतांतराः॥२४॥ ।
मृदितवर्णकाः। मृदितांगरागाः। वापीरित्यादि सार्द्धश्लोकचतुष्टयमेकं वाक्यं। उक्तविशेषणविशिष्टा वापीर्ददर्शेति पूर्वेण संबंधः। लताशतैरिति। संतान

कुसुमैर्वृताः। कल्पवृक्षकुसुमावृताः। करवीरकृतांतराः। । करवीरैः कृतविशेषाः। ।

गिरिंश्री डा पर्वतं तत्स्य विशेषणं जगतीति। पर्वतमिति। ह्रस्व आर्षः। जगती भूमिः। मृदिति यावत् तत्प्रधाना जगतिपर्वतमित्युक्तिः। ददर्शेति। निपतितां। निर्गतां। तस्या नघाः कुपितकांतासाम्यं सार्द्धश्लोकद्वयेनाह। अंकादिति। पतितां क्रोधान्निर्गतां। जलेनिपतितान्ग्रैः पादपैः प्रियबंधुभिर्वार्यमाणां क्रुद्धां प्रमदामिवोपशोभितां अतएव कांतस्य प्रसन्नामतएव पुनरुपस्थितां कांतामिव पुनरावृत्तां यां ददर्शेति संबंधः। पद्मिन्यः पद्मिनीः। कृत्रिमा दीर्घीका इत्यादि सार्द्धश्लोकद्वयस्य। ददर्शेति पूर्वेणान्वयः

नतो बुधसंकाशं प्रवृद्धशिखरं गिरिं। विचित्रकूटं कूटैश्च सर्वतः परिवारितं ॥२६॥ शिलागृहैरवततं नानावृक्षैः समावृतं। ददर्श हरिशार्दूलो रम्यं जगतिपर्वतं ॥२७॥ ददर्श स नगान्नस्मा नदीं निपतितां कपिः। अंकादिव समुत्पत्य प्रियस्य पतितां प्रियां ॥२८॥ जले निपतितान्ग्रैश्च पादपैरुपशोभितां। वार्यमाणामिव क्रुद्धां प्रमदां प्रियबंधुभिः ॥२९॥ पुनरावृत्ततोयां च ददर्श स महाकपिः। प्रसन्नामिव कांतस्य कांतां पुनरुपस्थितां ॥३०॥ तस्यादूरात्स पद्मिन्यो नानाद्विजगणावृताः। ददर्श कपिशार्दूलो हनूमान्मारुतात्मजः ॥३०॥ कृत्रिमां दीर्घीकां चापि पूर्णां शीतेन वारिणा। मणिप्रवरसोपानां मुक्तासिकतशोभितां ॥३१॥ विविधैर्मृगसंघैश्च विचित्रां चित्रकाननां। प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥३२॥ काननैः कृत्रिमैश्चापि सर्वतः समलंकृतां। येके चित्पादपास्तत्र पुष्पोपगफलोपगाः ॥३३॥ सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः। लतावितानैर्बहुभिः पर्णैश्च बहुभिर्वृतां ॥३४॥ कांचनीं शिंशुपामेकां ददर्श स महाकपिः। वृतां हेममयीभिश्च वेदिकाभिः समंततः ॥३५॥ सोऽपश्यद्भूमिभागांश्च गर्तप्रस्रवणानि च। सुवर्णवृक्षानपरान्ददर्श शिखिसन्निभान् ॥३६॥ तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः। अमन्यत तदा वीरः कांचनोऽस्मीति वानरः ॥३७॥ तां कांचनैस्तरुगणैर्मारुतेन च वीजितां। किंकिणीशतनिर्घोषां दृष्ट्वा विस्मयमागतः ॥३८॥ सुपुष्पिताग्रां रुचिरां तरुणांकुरपल्लवां। तामारुह्य महावेगः शिंशुपां पर्णसंवृतां ॥३९॥ इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसां। इतश्चेतश्च दुःखार्तां संपतंतीं यदृच्छया ॥४०॥ अशोकवनिका चेयं दृढं रम्या दुरात्मनः। चंदनैश्चंपकैश्चापि बकुलैश्च विभूषिता ॥४१॥

पयासंबंधः। येके चिदिति। सछत्रा इत्येतच्छवनासनादीनामप्युपलक्षणं। सवितर्दीकाः। सौवर्णवेदिकाश्चेति। महावेदिकापरिक्रांतकाश्च वेदिकाश्च सन्निति शेषः। लताप्रतानैरिति सार्द्धश्लोकमेकं वाक्यं। तेषामिति। मेरोः प्रभया द्रुमाणां प्रभया कांचनः कांचनमयोऽस्मीत्यमन्यतेत्यन्वयः। न तरुगणान्परलक्षितां तद्वनं दृष्ट्वा सुपुष्पिताग्रामिति शिंशुपामारुह्यवक्ष्यमाणमचिंतयदिति शेषः। चिंताप्रकारमेवाह। इतो द्रक्ष्यामीत्यादिना। अशोकवनिकेति। चंदनादिभिर्भूषिता रम्यापि मशोकवनिका दुरात्मनो रावणस्य।

वाल्मीकीये ॥१४॥ सुन्दरे टीकायां चतुर्दशः सर्गः ॥

इयं च नलिनी रम्या सा राममहिषी इमां नलिनीं नूनमेष्यतीति योजना। सा रामेति। वनसंचारकुशला। राममहिषीत्वादुद्यानवनसंचारचतुरेत्यर्थः। अथवेति। पक्षांतरे वनस्यास्य
अशोकवनस्य विचक्षणा वनसंबंधिसुखानुभवे चतुरेत्यर्थः। इह च नलिनी परिसरवर्तिवनं वनेचराणां स्पृहयंत कुशलमिति शेषः। संध्याकालमनाः। संध्याकाले
मनो यस्याः सा तथा। संध्या चंदनतत्परेत्यर्थः। एवमिति। पर्णघने। पर्णसांद्रे। पूर्वोक्तं शिंशुपावृक्षे लीनः। अभूदिति शेषः॥ ॥इति श्रीमहेश्वरतीर्थीये सुंदरकांडे चतुर्दशः सर्गः॥
सवीक्षमाण इति सः हनूमान् तत्रस्थः शिंशुपापर्णघनस्थः शिंशुपातीक्ष्णधारः। मैथिलीं मार्गमाणः। मैथिलीमार्गणार्थं हेतोः लक्षणहेत्वोः क्रियाया इति शानच्। वीक्षमाणः। विवि

इयं च नलिनी रम्या द्विजसंघनिषेविता। इमां सा राजमहिषी नूनमेष्यति जानकी॥४२॥ सा रामा राजमहिषी राघवस्य प्रिया सती। वनसंचारकुशला ध्रुवमेष्यति
जानकी॥४३॥ अथवा मृगशावाक्षी वनस्यास्य विचक्षणा। वनमेष्यति सार्येह रामचिंतासुकर्षिता॥४४॥ रामशोकाभिसंतप्ता सा देवी वामलोचना। वनवासरता
नित्यमेष्यते वनचारिणी॥४५॥ वनेचराणां सततं नूनं स्पृहयते पुरी। रामस्य दयिता भार्या जनकस्य सुता सती॥४६॥ संध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी।
नदीं चेमां शुभजलां संध्यार्थे वरवर्णिनी॥४७॥ तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा। शुभा या पार्थिवेंद्रस्य पत्नी रामस्य संमता॥४८॥ यदि जीवति सा देवी तारा
धिपनिभानना। आगमिष्यति साऽवश्यमिमां शीतजलां नदीं॥४९॥ एवं तु मत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेंद्रपत्नीं। अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्ण
घने निलीनः॥५०॥ ॥इत्यार्षे रामायणे सुंदरकांडे चतुर्दशः सर्गः॥ ॥सवीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीं॥ अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत॥
॥१॥ संतानकलताभिश्च पादपैरुपशोभितां। दिव्यगंधरसोपेतां सर्वतः समलंकृतां॥२॥ तां स नंदनसंकाशां मृगपक्षिभिरावृतां। हर्म्यप्रासादसंबाधां कोकिलाकु
लनिस्वनां॥३॥ कांचनोत्पलपद्माभिर्वापीभिरुपशोभितां। बह्वासनकुथोपेतां बहुभूमिगृहायुतां॥४॥ सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः। पुष्पितानाम
शोकानां श्रिया सूर्योदयप्रभां॥५॥ प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत। निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत्॥६॥ विनिष्पतद्भिः शतशश्चित्रैः पु
ष्पावतंसकैः। आमूलपुष्पनिचितैरशोकैः शोकनाशनैः॥७॥

धं च चतुर्विक्षिपन् महीं चावेक्षमाणः महीप्रत्यवेक्षणं कुर्वन् सर्वां तामशोकवनिकामन्ववैक्षतेत्यन्वयः। बह्वीति। बह्वासनकुथोपेतां। बह्वासनैः कुथैरास्तरणैश्चोपेतां। भूमि
गृहाः। भूविलगृहाः। सर्वर्तुकुसुमैः सर्वर्तुषु कुसुमानि येषु तैः पादपैरुपलक्षितां। सूर्योदयप्रभां। उद्यत्सूर्यप्रभामित्यर्थः। निष्पत्रेति। पुष्पावतंसकैः पुष्पाण्येव वतंसश्च त्वतीयमा
नानि येषां पक्षिणां तैः युगपत्पातित्वेन पक्षिपक्षापिहितपर्णतया पत्ररहितशाखामिव स्थितामित्यर्थः। किंच। आमूलपुष्पनिचितैः। मूलादारभ्य पुष्पपूर्णैः।

सुं. २६

पुष्पभारः। पुष्पसमूहः। कुसुमितैः कर्णिकारादिभिरुपलक्षितामशोकवनिकामन्वैक्षतेति पूर्वेण संबंधः। स इति। तेषां वृक्षाणां प्रदीप्त इव स्थित इति शेषः। पुन्नागा इत्यादि श्लोक
द्वयमेकं वाक्यं। अथ पुनः प्रकारांतरेणाशोकवनं वर्णयति। नंदनमित्यादिना॥ विविधोद्यानं। नानाविधावांतरवनं। चित्रं यन्नंदनं इंद्रोद्यानं। चैत्ररथं। कुबेरोद्यानं। तदुभयम
तिवृत्तं। अतिक्रांतमिव स्थितमित्यर्थः। पुष्पज्योतिर्गणायुतं। पुष्पाण्येव ज्योतिर्गणाः। नक्षत्रगणाः। उद्यानमशोकवनं अपश्यदिति शेषः। अशोकवनिकायामित्यादि श्लोकत्रय
मेकं वाक्यं। चैत्यप्रासादं। बुद्धाडाकारप्रासादं। प्रांशुभावत्वात्। उन्नतस्वरूपत्वात्। ततः इत्यारभ्य दुःखसंतप्तां व्यसनानामकोविदामित्यंतस्य ग्रंथस्य ददर्शेति क्रियया संबंधः। मलि

पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीं। कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः।८।स देशः प्रभया तेषां प्रदीप्त इव सर्वतः। पुन्नागाः सप्तपर्णाश्च चंप
कोद्दालकास्तथा।९। विवृद्धमूला बहवः शोभंते स्म सुपुष्पिताः। शातकुंभनिभाः केचित्केचिदग्निशिखोपमाः।१०। नीलांजननिभाः केचित्तत्राशोकाः सह
स्रशः। नंदनं विविधोद्यानं चित्रं चैत्ररथं यथा।११। अतिवृत्तमिवाचिंत्यं दिव्यं रम्यं श्रिया युतं। द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतं।१२। पुष्परत्नशतै
श्चित्रं पंचमं सागरं यथा। सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगंधिभिः।१३। नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः। अनेकगंधप्रवहं पुण्यगंधं मनोहरं।१४। शै
लेंद्रमिव गंधाढ्यं द्वितीयं गंधमादनं। अशोकवनिकायां तु तस्यां वानरपुंगवः।१५। स ददर्शाविदूरस्थं चैत्यप्रासादमुत्तमं। मध्ये स्तंभसहस्रेण स्थितं कैला
सपांडुरं।१६। प्रवालकृतसोपानं तप्तकांचनवेदिकं। मुष्णंतमिव चक्षूंषि द्योतमानमिव श्रिया।१७। विमलं प्रांशुभावत्वादुल्लिखंतमिवांबरं। ततो मलि
नसंवीतां राक्षसीभिः समावृतां।१८। उपवासकृशां दीनां निःश्वसंतीं पुनः पुनः। ददर्श शुक्लपक्षादौ चंद्ररेखामिवामलां।१९। मंदप्रख्यायमानेन रूपेण रुचि
रप्रभां। पिनद्धां धूमजालेन शिखामिव विभावसोः।२०। पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा। सपंकामनलंकारां पहीनामिव श्रियं। पीडितां दुःखसं
तप्तां परिक्षीणां तपस्विनीं। ग्रहेणांगारकेणेव पीडितामिव रोहिणीं।२२। अश्रुपूर्णमुखीं दीनां कृशामनशनेन च। शोकध्यानपरां दीनां नित्यं दुःखपराय
णां।२३। प्रियं जनमपश्यंतीं पश्यंतीं राक्षसीगणं। स्वगणेन मृगीं हीनां श्वगणेनावृतामिव।२४। नीलनागाभया वेण्या जघनं गतयैकया। नीलया नीर
दापाये वनराज्या महीमिव।२५। सुखार्हां दुःखसंतप्तां व्यसनानामकोविदां। तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशां। तर्कयामास सीतेति कारणैरुपपादिभिः। राम २६

नसंवीतां। मलिनवस्त्रोपेतां। मंदप्रख्यायमानेन इदं तदिति कथंचिदूह्यमानेन रूपेणोपलक्षितां। क्लिष्टेन जीर्णेन। नीलनागाभया। कृष्णसर्पतुल्यया। वनराज्या उपलक्षितां मही
मिव स्थितां तामिति। तां पूर्वोक्तविशेषणविशिष्टां। उपपादिभिः। उपपादनशीलैः। कारणैर्वक्ष्यमाणलिंगैः। सीतेति तर्कयामास संभावितवानित्यर्थः।

कारणान्याह। क्लिश्यमानेति। अन्तःशीतमिति तर्कयामासेति पूर्वेण संबंधः। किंच पूर्णचंद्रेत्यादि। सुभ्रूं सुभ्रुवं। चंद्रप्रभामिवेति। सर्वानंदकरत्वमुक्तं। भुजगेंद्रवधूमिवे
ति। दुष्प्रधर्षत्वं शिखामिव विभावसोरिति। पातिव्रत्यं। तां प्रसिद्धां स्मृतिमिव चा दिवाकरादीर्घत्वात्। संदिग्धां। संदिग्धार्थां। सोपसर्गां। सांतरायां। सकलुषां। सकपटां। अभूते
नापवादेन। मिथ्यापवादेन। रामोपरोधव्यथितां। रामप्राप्तिनिरोधेन व्यथितां। तस्य हनूमतः। बुद्धिः संदिदिहे कार्श्यमालिन्यादिना तिरोहिततद्रूपत्वादिति भावः। आम्ना
यानामयोगेन अभ्यासाभावेन दुःखेन कृच्छ्रेण संस्कारेण यथा हीनां वाचमर्थांतरंगतां संस्काराद्युत्पत्तिः तया हीनां अत एव विवक्षितार्थात्तरंगतां विपरीतार्थ

क्लिश्यमानां तदा तेन रक्षसा कामरूपिणा ॥२७॥ यथारूपां हि दृष्टा वै तथारूपेयमंगना। पूर्णचंद्राननां सुभ्रूं चारुवृत्तपयोधरां। कुर्वंतीं प्रभया देवीं सर्वा
वितिमिरा दिशः। तां नीलकेशीं बिंबोष्ठीं सुमध्यां सुप्रतिष्ठितां ॥२९॥ सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा। इष्टां सर्वस्य जगतः पूर्णचंद्रप्रभामिव ॥
॥३०॥ भूमौ सुतनुमासीनां नियतामिव तापसीं। निश्वासबहुलां भीरुं भुजगेंद्रवधूमिव ॥३१॥ शोकजालेन महता विततेन न राजतीं। संसक्तां धूमजालेन
शिखामिव विभावसोः ॥३२॥ तां स्मृतीमिव संदिग्धां ऋद्धिं निपतितामिव। विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥३३॥ सोपसर्गां यथा सिद्धिं बुद्धिं
सकलुषामिव। अभूतेनापवादेन कीर्तिं निपतितामिव ॥३४॥ रामोपरोधव्यथितां रक्षोहरणकातरां। अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ॥३५॥
बाष्पांबुप्रतिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा। वदनेनाप्रसन्नेन निश्वसंतीं पुनः पुनः ॥३६॥ मलपंकधरां दीनां मंडनार्हाममंडितां। प्रभां नक्षत्रराजस्य कालमे
घैरिवावृतां ॥३७॥ तस्य संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य च। आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥३८॥ दुःखेन बुबुधे सीतां हनुमाननलंकृतां। सं
स्कारेण यथा हीनां वाचमर्थांतरं गतां ॥३९॥ तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिंदितां। तर्कयामास सीतेति कारणैरुपपादिभिः। वैदेह्या यानि चांगेषु
तदा रामोन्वकीर्तयत्। तान्याभरणजालानि शाखाशोभीनि लक्षये ॥४१॥ सुसंकृतौ कर्णवेष्टौ श्वदंष्ट्रौ चापि संस्थितौ। मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥४२॥

बोधयंतीं सम्यग्व्युत्पत्त्यभावदशायामर्थांतरंगतां वाग्व्युत्पत्त्यनंतरं स्वार्थं प्रदर्शयति। तद्वत्सीतां दुःखेन बुबुधे इत्यर्थः। कारणैर्लिंगैस्तान्येवाह। वैदेह्या इत्यादि। शाखा
शोभीनि। शाखायां शोभंत इति तथा। अनेन रामविश्लेषसमये भूषणधारणस्यानुचितत्वाद्वैदेह्या भूषणानि स्वांगेभ्यः उन्मुच्य शाखायां न्यस्तानीत्यवगम्यते। सुकृ
ताविति। कर्णवेष्टौ। कुंडले। कुंडलं कर्णवेष्टनमित्यमरः। श्वदंष्ट्रौ त्रिकर्णाख्यौ श्वदंष्ट्रकुसुमाकारकर्णाभरणविशेषौ त्रिकर्णकश्वदंष्ट्रेत्यभिधानरत्नमालायां
। हस्तेषु हस्तनदवयवेषु। ।

सुं० २७

श्यामानीति। चिरयुक्तत्वाच्चिरधृतत्वात्। संस्थानवंति चिरसंगेष्वेवावस्थानवंति च। तत्रेति। तत्ररूश्यमुकेयान्याभरणानि श्ववहीनानि पतितानि यानि नावहीनानि तत्रप
तितानि अस्याः सकाशान्नानीमानीति संबंधः। स्वस्तमंतरिक्षाद् दृष्टं नगासक्तं ह्रूक्लंतं प्लवंगमैः सुग्रीवादिभिः। इदमिति। चिरगृहीतत्वात् चिरधृतत्वात्। इतरत्तनस्तमुत्तरीयंय
थापादाशवर्णयुक्तं यथा श्रीमत् इदमिदानीं धार्यमाणं तथा वर्णतया श्रीमत्। नूनमितियोजना। इयमिति। इयंरामस्य प्रियासती महिषीति कृत्वा प्रनष्टापि अस्यरामस्य
मनसः सकाशात् न प्रणश्यति सदानुचिंतयतीत्यर्थः। इयमिति कारुण्यादि भिश्चतुर्भिर्वल्कते परितप्यते सेयमिति संबंधः। कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति
स्त्रीति। स्त्री प्रनष्टेति कारुण्यात्। आपत्काले स्त्रियोरक्षणीया स्तन्नकृतमिति कारुण्यात् परितप्यते। आश्रितेत्यानृशंस्यतः आनृशंस्यमक्रूरत्वं आश्रितसंरक्षकस्वभावत्वमि
तियावत्। तस्मादाश्रिता न रक्षितेति परितप्यते। पत्नी नष्टेति शोकेन आत्मार्द्धभूतपत्नीनाशाज्जातइति शोकेन परितप्यते। प्रियेति। मदनेन प्रिया नष्टेति मदनेन परितप्यत
इतियोजना। अथ सीतारामयोरन्योन्याभिरूप्यानुगुण्यमाह। अस्याइति। अस्याः सीतायाः। यथा यथाविधं रूपं अंगप्रत्यंगसौष्ठवं तथाविधमेव रामस्याभिरूप्यं रामस्य यथा

श्यामानि चिरयुक्तत्वात्तथा संस्थानवंति च। तान्येवैतानि मन्येहं यानि रामोन्वकीर्तयत्।४३। तत्रयान्यवहीनानि तान्यहं नोपलक्षये। यान्यस्या नावहीनानि तानीमानि
नसंशयः।४४। पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभं। उत्तरीयं नगासक्तं तदा दृष्टं प्लवंगमैः।४५। भूषणानि च मुख्यानि दृष्टानि धरणीतले। अनयैवापविद्धानि स्वनवंति महां
ति च।४६। इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरं। तथाहि नूनं तद्वर्णं तथा श्रीमद्यथेतरत्।४७। इयं कनकवर्णांगी रामस्य महिषी प्रिया। प्रनष्टापि सती यस्य मनसो न प्र
णश्यति।४८। इयं सा यत्कृते रामश्चतुर्भिः परितप्यते। कारुण्येनानृशंस्येन शोकेन मदनेन च।४९। स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः। पत्नी नष्टेति शोकेन प्रि
येति मदनेन च।५०। अस्या देव्या यथा रूपमंगप्रत्यंगसौष्ठवं। रामस्य च यथा रूपं तस्येयमसितेक्षणा।५१। अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितं। तेनेयं स च धर्मा
त्मा मुहूर्तमपि जीवति।५२। दुष्करं कृतवान्रामो हीनो यदनया प्रभुः। धारयत्यात्मनो देहं न शोकेनावसीदति।५३। दुष्करं कुरुते रामो य इमां मत्तकाशिनीं। सीतां वि
ना महाबाहुर्मुहूर्तमपि जीवति।५४। एवं सीतां तदा दृष्ट्वा हृष्टः पवनसंभवः। जगाम मनसा रामं प्रशशंस च तं प्रभुं।५५। ।सुंदरकांडे पंचदशः सर्गः। । ॥

विधं रूपं तथाविधमेव अस्या रूपं अतः इयमसितेक्षणा तस्य योग्येति शेषः। अथानयोरन्योन्यानुरागमाह। अस्या इति। अस्याः सीतायाः मनस्तस्मिन् रामे प्रतिष्ठितं तस्य चा
स्यां प्रतिष्ठितं तेन हेतुना दयं स च जीवतीति संबंधः। सीताविरहेण रामस्य शरीराकार्श्यं प्राणधारणं च विचित्रमित्याह। दुष्करमिति। श्लोकद्वयेन मत्तकाशिनी। वरारोहा
वरारोहा मत्तकाशिनीत्यमरः। रामस्य हन्तां सीतायाः अप्युपलक्षणं। सापि तं विना जीवतीति चित्रमेवेत्यर्थः। एवमिति। एवं सीतां मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरा राम २७
यणत्वादि पातिव्रत्यादि धर्मयुक्तां सीतां दृष्ट्वा हृष्टः सन्मनसा रामं जगाम सस्मार तं प्रभुं बुद्धिस्थं रामं प्रशशंस च पुनः आश्रुपयुक्तपतिव्रतामर्थं निश्चलदर्शनात् भाग्यवान् रामः इत्य
स्तौषीदितिभावः॥ ॥इतिरामायणे त० पंचदशः सर्गः॥ ॥ ॥ ॥ ॥ ॥

प्रशस्येति। प्रशस्तव्यां प्रशंसितव्यां मन्यते। सीतामाश्रित्य सीतामुद्दिश्य गुरुविनीतस्य गुरुभिर्विनीतस्य गुरुप्रियायाम् प्रियायाः सीतायाः प्रियदुःखार्त्तः कालो दुरतिक्रमो हि स्मिक
लजगद्ध्वंकरामलक्ष्मणा गुणायाः सीतायाः ईदृशं दुःखं प्राप्यत अतः कालो दुरतिक्रम एवेत्यर्थः। व्यवसायज्ञा। अभिप्रायज्ञा। पराक्रमज्ञेत्यर्थः। तुल्यशीलवयोवृत्तां।
रामानुरूपस्वभाववयश्चारित्रां तुल्याभिजनलक्षणां। अभिजनं। कुलं लक्षणं सामुद्रिकोक्तं। अस्या हेतोः। अनया हेतुनेत्यर्थः। अस्या निमित्त इति सप्तम्यर्थे षष्ठी। अस्या

प्रशस्यस्तु प्रशस्तव्यां सीतां तां हरिपुंगवः। गुणाभिरामं रामं च पुनश्चिंतापरोभवत्॥ १॥ समुद्भूतमिव व्यालावाप्य पर्याकुलेक्षणः। सीतामाश्रित्य तेजस्वी हनू
मान्विललाप ह॥ २॥ मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया। यदि सीतापि दुःखार्त्ता कालो हि दुरतिक्रमः॥ ३॥ रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः। ना
त्यर्थं क्षुभ्यते देवी गंगेव जलदागमे॥ ४॥ तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणां। राघवोर्हति वैदेहीं तं चेयमसितेक्षणा॥ ५॥ तां दृष्ट्वा नवहेमाभां लोककांता
मिव श्रियं। जगाम मनसा रामं वचनं चेदमब्रवीत्॥ ६॥ अस्या हेतोर्विशालाक्ष्या हतो वाली महाबलः। रावणप्रतिमो वीर्ये कबंधश्च निपातितः॥ ७॥ विराधश्च हतः
संख्ये राक्षसो भीमविक्रमः। वने रामेण विक्रम्य महेंद्रेणेव शंबरः॥ ८॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां। निहतानि जनस्थाने शरैरग्निशिखोपमैः॥ ९॥
खरश्च निहतः संख्ये त्रिशिराश्च निपातितः। दूषणश्च महातेजा रामेण विदितात्मना॥ १०॥ ऐश्वर्यं वानराणां दुर्लभं वालिपालितं। अस्या निमित्ते सुग्रीवः प्राप्त
वान्लोकसत्कृतं॥ ११॥ सागरश्च मया क्रांतः श्रीमान्नदनदीपतिः। अस्या हेतोर्विशालाक्ष्याः पुरी चेयं निरीक्षिता॥ १२॥ यदि रामः समुद्रांतां मेदिनीं परिवर्तयेत्। अस्याः
कृते जगच्चापि युक्तमित्येव मे मतिः॥ १३॥ राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा। त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलां॥ १४॥ इयं सा धर्मशीलस्य मैथि
लस्य महात्मनः। सुता जनकराजस्य सीता भर्तृदृढव्रता॥ १५॥ उत्थिता मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते। पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः॥ १६॥ विक्रांत
स्यार्यशीलस्य संयुगेष्वनिवर्तिनः। स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो मनस्विनः॥ १७॥ धर्मज्ञस्य कृतज्ञस्य विदितात्मनः। इयं सा दयिता भार्या राक्षसीवशमागता॥ १८॥

निमित्तभूतायां सत्यामित्यर्थः। यदीति। रामः मेदिनीं किं च जगच्च सर्वलोकानपीत्यर्थः। अस्याः कृते सीतार्थं परिवर्तयेद्यदि युक्तमित्येव मे मतिरिति संबंधः। राज्यमिति। राज्यं त्रिषु
लोकेष्वासीता उत्कृष्टा वा इति विचार्यमाणे सती निशेषः। कलां लेशं। भर्तृदृढव्रता। पतिव्रता॥ १९॥ ॥ ॥

रा॰सुं॰ भर्तृस्नेहबलात्कृता। भर्तृस्नेहबलाज्जीवतीत्यर्थः। यातनां। तीव्रवेदनां। अनर्थानामभागिनी। आपदां अनर्हा। प्रपं चार्थं पानीयशालां। कामभोगैः काम्यंत इति कामाः तेषु
२८ ते भोगाः स्रक्चंदनादयः तैः। नेति। राक्षस्यः। राक्षसीः। एकस्थहृदया एकाग्रचित्ता दुष्करमिति। प्रभुः रामः। अनया हीनः सन्। आत्मनो देहं धारयतीति। शोकेन नावसीदतीति नि
चयत। एतद्दुष्करं कुरुत इति संबंधः। इमामिति। ममापि किमुत परमदयालो रामस्येति भावः। क्षितेरिव क्षमा यस्याः सा क्षितिक्षमा। अस्या इति। अशोकाः शोकजनया

सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता। अचिंतयित्वा दुःखानि प्रविष्टा निर्जनं वनं॥१९॥ संतुष्टा फलमूलेन भर्तृशुश्रूषणे रता। या परां भजते प्रीतिं वनेपि
भवने यथा॥२०॥ सेयं कनकवर्णांगी नित्यं सुस्मितभाषिणी। सहते यातनामेतामनर्थानामभागिनी॥२१॥ इमां तु शीलसंपन्नां द्रष्टुमर्हति राघवः। रावणेन
प्रमथितां प्रपामिव पिपासितः॥२२॥ अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति। राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीं॥२३॥ कामभोगैः परित्यक्ता हीना बंधु
जनेन च। धारयत्यात्मनो देहं तत्समागमकांक्षिणी॥२४॥ नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान्। एकस्थहृदया नूनं राममेवानुपश्यति॥२५॥ भर्ता नाम
परं नार्या भूषणं भूषणादपि। एषा हि रहिता तेन शोभनार्हा न शोभते॥२६॥ दुष्करं कुरुते रामो हीनो यदनया प्रभुः। धारयत्यात्मनो देहं न दुःखेनावसीदति॥२७॥ इमा
मसितकेशांतां शतपत्रनिभेक्षणां। सुखार्हां दुःखितां ज्ञात्वा ममापि व्यथितं मनः॥२८॥ क्षितिक्षमा पुष्करसंनिभाक्षी या रक्षिता राघवलक्ष्मणाभ्यां। सा राक्षसीभिर्वि
कृतेक्षणाभिः संरक्ष्यते संप्रति वृक्षमूले॥२९॥ हिमहतनलिनीव नष्टशोभा व्यसनपरंपरया निपीड्यमाना। सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रप
न्ना॥३०॥ अस्या हि पुष्पावनताग्रशाखाः शोकं दृढं वै जनयंत्यशोकाः। हिमव्यपायेन च मंदरश्मिरभ्युत्थितो नैकसहस्ररश्मिः॥३१॥ इत्येवमर्थं कपिरन्ववेक्ष्य
सीतेयमित्येव निविष्टबुद्धिः। संश्रित्य तस्मिन्निषसाद वृक्षे बली हरीणामृषभस्तरस्वी॥३२॥ ॥ ॥इत्यार्षे रामायणे सुंदरकांडे षोडशः सर्गः॥ ॥ ततः कुमुदषंडाभो नि
र्मलो निर्मलः स्वयं। प्रजगाम नभश्चंद्रो हंसो नीलमिवोदकं॥१॥ साचिव्यमिव कुर्वन्सः प्रभया निर्मलप्रभः। चंद्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजं॥२॥ स ददर्श
ततः सीतां पूर्णचंद्रनिभाननां। शोकभारैरिव न्यस्तां भारैर्नावमिवार्णवे॥३॥ ॥ ॥ ॥

ति। हिमव्यपायेन। नैकसहस्ररश्मिः मंदरश्मिश्च अतीव्ररश्मिः सीतांशुरिति यावत्। अभ्युत्थितः सन्। शोकं जनयतीति शेषः॥ ॥इति श्रीमहेश्वरतीर्थीये सुंदरकांडे षोड राम
शः सर्गः॥ ॥ ततः इति। नभः प्रजगाम। आकाशं प्राप्तः। स इति। शोकभारैर्न्यस्तामिव। अधोनीतामिव। निमज्जमानामित्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥क॥ २८

मस्त्र कोष्ठ्यासनासिका। ऊर्ध्वमुखनासिका। अतिकायोन्नतमांगी। अतिकायमहदुन्नतमांगयस्याः सा। नतुदीर्घशिरोग्रीवा। अस्थूलदीर्घकंठी मित्यर्थः। केशकंबलधा
रिणी। कंबलाः श्वकेशाः। केशकंबलाः। तान्धारयितुं शीलमस्याः सेति तथा। लंबकपोलललाटा। लंबे कपोलललाटे यस्याः सा। तुंबुकोष्ठी। तुंबुके ओष्ठे यस्याः सा। कु

दिह्यमानो वैदेही हनूमान्मारुतात्मजः। ससर्दर्श विदूरस्था राक्षसीर्घोरदर्शनाः॥ ४ ॥ एककर्णामिककर्णाश्च कर्णप्रावरणांस्तथा। अकर्णीशंकुकर्णीश्च मस्त्रको
ष्ठ्यासनासिकाः॥ ५ ॥ अतिकायोन्नतमांगी च तनुदीर्घशिरोधराः। ध्वस्तकेशी तथाकेशी केशकंबलधारिणीः॥ ६ ॥ लंबकर्णललाटा च लंबोदरपयोधरा। लंबोष्ठी
तुंबुकोष्ठी च लंबास्या लंबजानुका॥ ह्रस्वादीर्घा च कुब्जा च विकटा वामना तथा। करालाभुग्नवक्त्रा च पिंगाक्षी विकृतानना॥ ७ ॥ विकृताः पिंगलाः कालीः क्रो
धनाः कलहप्रियाः। कालायसमहाशूलकूटमुद्गरधारिणीः॥ ८ ॥ वराहमृगशार्दूलमहिषाजशिवामुखीः। गजोष्ट्रशिववक्त्राश्च निखातशिरसोऽपराः॥ १० ॥ ए
कहस्तैकपादाश्च खरकर्ण्यश्वकर्णिकाः। गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः॥ ११ ॥ अनासा अतिनासाश्च तिर्यङ्नासाविनासिकाः। गजसन्निभना
साश्च ललाटोच्छ्वासनासिकाः॥ १२ ॥ हस्तिपादा महापादा गोपादाः पादचूलिकाः। अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः॥ १३ ॥ अतिमात्रास्यनेत्राश्च दीर्घजि
ह्वानखास्तथा। अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः॥ १४ ॥ हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः। शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः॥ १५ ॥
करालाधूम्रकेशीश्च राक्षसीर्विकृताननाः। पिबंति सततं पानं सुरामांससदाप्रियाः॥ १६ ॥ मांसशोणितदिग्धांगीर्मांसशोणितभोजनाः। ता ददर्श कपिश्रेष्ठो रोम
हर्षणदर्शनाः॥ १७ ॥ स्कंधवंतमुपासीनाः परिवार्य वनस्पतिं। तस्याधस्ताच्च तां देवीं राजपुत्रीमनिंदितां॥ १८ ॥ लक्षयामास लक्ष्मीवान्हनूमाञ्जनकात्मजां। निष्प्र
भां शोकसंतप्तां मलसंकुलमूर्धजां॥ १९ ॥ क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव। चारित्र्यव्यपदेशाढ्यां भर्तृदर्शनदुर्गतां॥ २० ॥ भूषणैरुत्तमैर्हीनां भर्तृवात्स
ल्यभूषितां। राक्षसाधिपसंरुद्धां बंधुभिश्च विनाकृतां॥ २१ ॥ वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव। चंद्ररेखां पयोदांते शारदाभ्रैरिवावृतां॥ २२ ॥ क्लिष्टरूपामसंस्पर्शा
(दयुक्तामिव वल्लकीं॥ ॥
ब्जा। स्थूलगुमती करला। दंतुरा। पिंगला। हरिमित्यंततस्य सर्वेणासंबंधः। विकृताः इत्यस्य स्त्रीकानंतकमेकं वाक्यं। निखातशिरसः। प्राचां तर्वेदिशिरसः।
पादकचूलिकाः। पादे चूडाः शिखा यासां ताः। राक्षसीर्विकृताननाः इत्यत्र अपराः इति शेषः। अतो नपौनरुक्त्यं तस्याधस्तादित्यारभ्य वल्लकीमिवेत्यंतमेकं वाक्यं क्षीणेति। च्युतां दिवः इति शे
षः। चारित्र्यव्यपदेशाढ्यां। पातिव्रत्यव्रतसंपन्नां। भर्तृदर्शनदुर्गतां। भर्तृदर्शनहीनां। पयो
दांते। वर्षांते। असंस्पर्शात्। उद्वर्तनादिसंस्काराभावात्। अयुक्ता मनारोपितंत्री॥ ८ ॥

सतामित्यादिश्लोकद्वयमेकंवाक्यं। राक्षसीवशे। अयुक्तां। अयोग्यां। शोकसागरमाक्रांतां। तत्रमग्नां। सग्रहां। क्रूरग्रहाविष्टां। लतामकुसुमामिव। आभरणपरिहारादिति भावः।
वसुधालंकृताःस्वभावरमणीयेत्यर्थः। विभाति। नभातीति चेतिस्वभावसौंदर्यादसत्का राद्वेतिभावः। अत्रतां। नामिति तच्छब्दावृत्त्यातत्तदवस्थाभेदस्यवर्णितत्वादपौनरुक्त्यं॥ ॥

संतापपरितप्तेयुक्तामयुक्तांराक्षसीवशे। अशोकवनिकामध्येशोकसागरमाक्रांतां॥२४॥ ताभिःपरिवृतांतत्रसग्रहामिवरोहिणीं। ददर्शहनुमान्देवींलतामकुसुमा
मिव॥२५॥ सामलेनचदिग्धांगीवपुषाचाप्यलंकृता। मृणालीपंकदिग्धेवविभातिनविभाति॥२६॥ मलिनेनतुवस्त्रेणपरिक्लिष्टेनभामिनी। संवृतांमृगशावाक्षीं
ददर्शहनुमान्कपिः॥२७॥ तांदेवींदीनवदनामदीनांभर्तृदर्शने। रक्षितांस्वेनशीलेनसीतामसितलोचनां॥२८॥ तांदृष्ट्वाहनुमान्सीतांमृगशावनिभेक्षणां। मृ
गकन्यामिवत्रस्तांवीक्षमाणांसमंततः॥२९॥ दहंतीमिवनिश्वासैर्वृक्षान्पल्लवधारिणः। संघातमिवशोकानांदुःखस्योर्मिमिवोत्थितां॥३०॥ तांक्षमांसुविभक्तांगीं
विनाभरणशोभिनीं। प्रहर्षमतुलंलेभेमारुतिःप्रेक्ष्यमैथिलीं॥३१॥ हर्षजानितथाश्रूणितांदृष्ट्वामदिरेक्षणां। मुमोचहनुमांस्तत्रनमश्चक्रेचराघवं॥३२॥ नमस्कृ
त्वाचरामायलक्ष्मणायचवीर्यवान्। सीतादर्शनसंहृष्टोहनुमान्संवृतोभवत्॥३३॥ ॥ ॥इत्यार्षेरामायणेसुंदरकांडेपंचदशःसर्गः॥ ॥ तथाविप्रेक्षमाणस्यवनं
पुष्पितपादपं। विचिन्वतश्चवैदेहींकिंचिच्छेषानिशाभवत्॥१॥ षडंगवेदविदुषांक्रतुप्रवरयाजिनां। शुश्राव ब्रह्मघोषांश्चविरात्रेब्रह्मराक्षसां॥२॥ अथमंगलवा
दित्रैःशब्दैःश्रोत्रमनोहरैः। प्राबोध्यतमहाबाहुर्दशग्रीवोमहाबलः॥३॥ विबुध्यतुयथाकालंराक्षसेंद्रःप्रतापवान्। स्रस्तमाल्यांबरधरोवैदेहीमन्वचिंतयत्॥४॥ भृशंनि
युक्तस्तस्यांचमदनेनमदोत्कटः। नसतंराक्षसःकामंशशाकात्मनिगूहितुं॥५॥ ससर्वाभरणैर्युक्तोबिभ्रच्छ्रियमनुत्तमां। तांनगैर्विविधैर्जुष्टांसर्वपुष्पफलोपगैः॥६॥
वृतांपुष्करिणीभिश्चनानापुष्पोपशोभितां। सदामदैश्चविहगैर्विचित्रैःपरमाद्भुतैः॥७॥ ईहामृगैश्चविविधैर्वृतांदृष्टिमनोहरैः। वीथीःसंप्रेक्षमाणश्चमणिकांचनतो
रणाः॥८॥ नानामृगगणाकीर्णांफलैःप्रपतितैर्वृतां। अशोकवनिकामेवप्राविशत्संततद्रुमां॥९॥ ॥ ॥

॥ ॥इतिश्रीमहेश्वरतीर्थीयेसुंदरकांडेपंचदशःसर्गः॥ ॥ षडंगेति। षडंगानिशिक्षादीनि। विरात्रेइति विरात्रे निर्गते ... ब्रह्मराक्षसां
ब्राह्मणत्वविशिष्टराक्षसानां। भृशमिति। नियुक्तःप्रेरितः। वस्तुतस्तुमदनेनसर्वमपिमदोत्कटोजनस्तस्यांसीतायांनियुक्तः। नितरांयुक्तः। विनीत इत्यर्थः। अतएवराक्षसः। तेन

समाप्तिनिद्रांहित्वाशोकवनिकां॥२९॥

अंगनेति। अनुव्रतत्वं अनुभावः। प्रदीपिकाः दीपिकाः कांचनाः। कांचनरूपेण घटिताः। दीपिकाः कांचनैर्भृंगारैः कनककलशैः भृंगाराः दृश्यन्ते। कुसुमसदृशजलपात्राणि गृहीत्वा काचिदिति। पानस्य पूर्णपात्रेण पूर्णमात्रेण दृष्टिवत्कीनाः। संपन्नमंसदृष्टियोगाः कंदर्पेति। अपविद्धशयनं तत्कंदर्पं मिव स्थितं

अंगनाशतमावृत्तं तं जंतमनुव्रजत्। महेन्द्रमिव पौलोम्यः देवगंधर्वयोषितः॥ १० दीपिकाः कांचनीः काश्चित्तास्तत्र पृष्ठतः। बालव्यजनहस्ताश्च ता लङ्घंतानिचापराः॥ ११ कांचनैरपि भृंगारैर्जह्रुः सलिलमग्रतः। मंडलाग्रानसींश्चैव गृह्य चान्याः पृष्ठतो ययुः॥ १२ काचिद्रत्नमयीं पात्रीं पूर्णां पानस्य भाजनीं। दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना॥ १३ राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभं। सौवर्णदंडमपरा गृहीत्वा पृष्ठतो ययौ॥ १४ निद्रामदपरीताक्ष्यो रावणस्योत्तमस्त्रियः। अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव॥ १५ व्याविद्धहारकेयूराः समामृदितवर्णकाः। समागलितकेशान्ताः सस्वेदवदनाम्बुजाः॥ १६ घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः। स्वेदक्लिष्टांगकुसुमाः सुमाल्याकुलमूर्धजाः॥ १७ प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः। बहुमानाच्च कामाच्च प्रियभार्यास्तमन्वयुः॥ १८ स च कामपराधीनः पतिस्तासां महाबलः। सीतासक्तमना मंदं मदांचितगतिर्ययौ॥ १९ ततः कांचीनिनादं च नूपुराणां च निस्वनं। शुश्राव परमस्त्रीणां स कपिर्मारुतात्मजः॥ २० तं चाप्रतिमकर्माणमचिंत्यबलपौरुषं। द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः॥ २१ दीपिकाभिरनेकाभिः समन्तादवभासितं। गंधतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः॥ २२ कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणं। समक्षमिव कंदर्पमपविद्धशरासनं॥ २३ मथितामृतफेनाभमरजो वस्त्रमुत्तमं। सलीलमनुकर्षंतं विमुक्तं सक्तमंगदे॥ २४ तं पत्रविटपे लीनः पत्रपुष्पघनावृतः। समीपमुपसंक्रान्तं निध्यातुमुपचक्रमे॥ २५ अवेक्षमाणश्च ततो ददर्श कपिकुंजरः। रूपयौवनसंपन्ना रावणस्य वरस्त्रियः॥ २६ ताभिः परिवृतो राजा सुरूपाभिर्महायशाः। तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनं॥ २७ क्षीबो विचित्राभरणः शंकुकर्णो महाबलः। तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः॥ २८ वृतः परमनारीभिस्ताराभिरिव चंद्रमाः। तं ददर्श महातेजास्तेजोवंतं महाकपिः॥ २९ रावणोऽयं महाबाहुरिति संचिंत्य वानरः। सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे॥ ३० अवप्लुतो महातेजा हनुमान्मारुतात्मजः। स तथाप्युग्रतेजाः सन्निर्धूतस्तस्य तेजसा॥ ३१ पत्रगुह्यांतरे सक्तो मतिमान्संवृतोऽभवत्। स तामसितकेशान्तां सुश्रोणीं संहतस्तनीं॥ ३२ दिदृक्षुरसितापांगीमुपावर्तत रावणः॥ ३३ सुंदरकांडे अष्टादशः सर्गः॥ ॥

मथितेति सलीलमनुकर्षंतमिति पाठः। विमुक्तं स्वस्थानाच्चलितं। तमिति। पत्रविटपे पत्रबहुलविटपे। निध्यातुं ईक्षितुं। प्रमदावनं प्रमदानां वनं प्रमदावनं। क्षी

बोऽत्र मः। रावण इति। अवकृत्य ततः। रावणरूपचेष्टितावलोकनार्थं अवप्लुत इत्यर्थः। पत्रगुह्यान्तरे। पत्रगूढप्रदेशे इति सुंदरकांडे अष्टादशः सर्गः॥ ॥

तस्मिन्नित्यादि श्लोकद्वयमेकं वाक्यं। तस्मिन्नेव काले आगमनकालएव तत्र रावणांतितो दृष्ट्वा तत्र इदं देशएव दृष्ट्वा। ततः दर्शनानंतरं प्रावेपतेति संबंधः। सन्नांशीर्णनावं॥
संशितव्रतामतिनीतां प्रव्रतां। मलमंडनविचित्रांगीं। मलमेव मंडनं तेन विचित्रांगीं। कर्बुरगात्रीं तां दृष्ट्वा विनिपूर्वेण संबंधः। संकल्पहयसंयुक्तैः। संकल्पाः एवमेवं करिष्या
मीति विचाराः। तएव हयाः। तत्संयुक्तैर्मनोरथैः रामस्य समीपं याती। मलमेव मंडनं तेन विचित्रांगी। कर्बुरगात्री तां दृष्ट्वा पूर्वोपगता मिवस्थितां आविष्टां मणिमन्त्रा

तस्मिन्नेव ततः काले राजपुत्री त्वनिंदिता। रूपयौवनसंपन्नं भूषणोत्तमभूषितं ॥१॥ ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपं। प्रावेपत वरारोहा प्रवाते कदलीयथा २
ऊरुभ्यामुदरं छाद्य बाहुभ्यां च पयोधरौ। उपविष्टा विशालाक्षी रुदती वरवर्णिनी ॥३॥ दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः। ददर्श दीनां दुःखार्तां नावं सन्ना
मिवार्णवे ॥४॥ असंवृतायामासीनां धरण्यां संशितव्रतां। छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥५॥ मलमंडनचित्रांगीं मंडनार्हाममंडितां। मृणाली पंकदिग्धे
व विभाति न विभाति च ॥६॥ समीपं राजसिंहस्य रामस्य विदितात्मनः। संकल्पहयसंयुक्तैर्यांतीमिव मनोरथैः ॥७॥ शुष्यंतीं रुदतीमेकां ध्यानशोकपरायणां। दुः
खस्यांतमपश्यंतीं रामां राममनुव्रतां ॥८॥ वेष्टमानामथाविष्टां पन्नगेंद्रवधूमिव। धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥९॥ वृत्तशीलकुले जातामाचार
वति धार्मिके। पुनः संस्कारमापन्नां जातामिव च दुष्कुले ॥१०॥ सन्नामिव महाकीर्तिं श्रद्धामिव विमानितां। प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ॥११॥ आय
तीमिव विध्वस्तामाज्ञां प्रतिहतामिव। दीप्तामिव दिशं काले पूजामपहृतामिव ॥१२॥ पौर्णमासीमिव निशां राहुग्रस्तेंदुमंडलां। पद्मिनीमिव विध्वस्तां हतशूरां च
मूमिव ॥१३॥ प्रभामिव तमोध्वस्तामुपक्षीणामिवापगां। वेदीमिव परामृष्टां शांतामग्निशिखामिव ॥१४॥ उत्कृत्तपर्णकमलां वित्रासितविहंगमां। हस्तिहस्तप
रामृष्टामाकुलामिव पद्मिनीं ॥१५॥ अभूतेनापवादेन कीर्तिं निपतितामिव। आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥१६॥ पत्याहतजयाहीनां नक्षत्रपंक्तिं निशा
मिव। सुकुमारीं सुजातांगीं रत्नगर्भगृहोचितां ॥१७॥ तप्यमानामिवोष्णेन मृणालीमचिरोद्धृतां। गृहीतामालितां स्कंधे यूथपेन विनाकृतां ॥१८॥ निश्वसंतीं सुदुः
खार्तां गजराजवधूमिव। एकया दीर्घया वेण्या शोभमानामयत्नतः ॥१९॥ नीलया नीरदापाये वनराज्या महीमिव। उपवासेन शोकेन ध्यानेन च भयेन च ॥२०॥

दृ गिरि भिक्षुतां धूप्यमानां। संतप्यमानां। इत्येति। वृत्तशीलकुले जातां। वृत्तमर्यादानुल्लंघनं शीलं सत्स्वभावः। आचारवति। विहितकर्मानुष्ठानवति। दुष्कुले संस्कारमापन्नां। दुष्कु
ले पाणिग्रहणलक्षणसंस्कारं प्राप्तां। अतएव दुष्कुले पुनर्जातामिव विवाहलक्षणद्वितीयजन्मगतां। सत्कुलप्रसूतां दुष्कुलादागतामित्यर्थः। स्त्रीणां विवाहस्योपनयनस्था
नत्वात्तद्वद्वितीयं जन्मेति भावः। सन्नां क्षीणां। विमानितामनादृतां। आयतीं आगामि फलं। दीप्तां दह्यमानां। काले उत्पातकाले। परामृष्टां अपवित्ररूपहतां। उत्कृ
त्तपर्णकमलां। उत्कृत्तपत्रपद्मां। वित्रासितां। रोधम्लानादिना निर्जलीकृतां। पत्या जयया। उद्धृतं नाथेन परिशोधनेन। आलितां। बद्धां॥ ॥ ॥

[illegible]

आयाचमानामिति। प्रांजलिं रघुमुख्यस्य कर्तुः दशग्रीवविषयकपराभवं भावेन मनसा देवतामायाचमानामिव प्रार्थयंतीमित्येतिसंबंधः ॥ ॥ इति श्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदी
पिकायां सुंदरकांडे एकोनविंशः सर्गः ॥ ॥ ॥ स इति। साकारैः साभिप्रायैः। न्यदर्शयत् आत्मानं दर्शितवान्। न्यदर्शयत स्वाभिप्रायमिति शेषः। मामिति। अदर्शनं अदृश्यत्वं। भयादिव नेतुं। नायश्रुडा। वक्ष्य
तक्षा। पुत्रसमभूतत्दर्शनविषये भयादिकं नोचितमिति भावः। किंतु कामयेति। वक्ष्य तक्षा। त्वां कामये ईश्वरीत्वेनेति शेषः। अतो मां बहु मन्यस्व। किंच नेहेति। मनुष्या गत्यभावात्त्वद्
यकर्त्तार इति शेषः। वक्ष्य तक्षा। सर्वैश्वर्यौ त्वत्क्तनकृत्वापि भयशंकेति भावः। यद्यपि परस्त्रीमिमर्शः स्वधर्मस्तथापि नाहं त्वामकामयमानां स्प्रक्ष्यामीत्याह। स्वधर्म इत्यादि श्लोकद्वये
न। कामं अत्यर्थं यथाकामं यथेष्टं मे शरीरे कामः तवेति शेषः। प्रवर्ततामिति भावः। स्वधर्मः इत्यादिश्लोकद्वयस्य वास्तवार्थस्तु। कामुकस्त्वं न विश्वसनीय इत्यत आ

आयाचमानां दुःखार्तां प्रांजलिं देवतामिव। भावेन रघुमुख्यस्य दशग्रीवपराभवं ॥३१॥ समीक्षमाणां रुदतीमनिंदितां सुपक्ष्मताम्रायतशुक्ललोचनां। अनुव्रतां राममतीव
मैथिलीं प्रलोभयामास वधाय रावणः ॥३२॥ ॥ ॥ इत्यार्षे रामायणे सुंदरकांडे एकोनविंशः सर्गः ॥ ॥ ॥ स तां परिवृतां दीनां निरानंदां तपस्विनीं। साकारैर्मधुरैर्वाक्यैर्न्य
दर्शयत रावणः ॥१॥ मां दृष्ट्वा नागनासोरु गूहमाना स्तनोदरं। अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥२॥ कामये त्वां विशालाक्षि बहु मन्यस्व मां प्रिये। सर्वांगगुणसंप
न्ने सर्वलोकमनोहरे ॥३॥ नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः। व्यपसर्पतु ते सीते भयं मत्तः समुत्थितं ॥४॥ स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः। गमनं वा परस्त्रीणां
हरणं संप्रमथ्य वा ॥५॥ एवं चैवमकामां त्वां न च स्प्रक्ष्यामि मैथिलि। कामं कामः शरीरे मे यथाकामं प्रवर्ततां ॥६॥ देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये। प्रणयस्व च तत
त्त्वेन मैवं भूः शोकलालसा ॥७॥ एकवेणी धराशय्या ध्यानं मलिनमंबरं। अस्थानेप्युपवासश्च नैतान्यौपयिकानि ते ॥८॥ विचित्राणि च माल्यानि चंदनान्यगरूणि च। विवि
धानि च वासांसि दिव्यान्याभरणानि च ॥९॥ महार्हाणि च पानानि शयनान्यासनानि च। गीतं नृत्यं च वाद्यं च लभ मां प्राप्य मैथिलि ॥१०॥ ॥ ॥

हा। स्वधर्म इत्यादि। यद्यपि रक्षसां परस्त्रीपहरणादि स्वधर्मः स्वभावः मे शरीरे कामं अत्यर्थं यथाकामं यथेष्टं कामः प्रवर्ततां नाम मम मन्मथविकारोस्तु नाम तथाप्येतत्सर्वमसंष्ठ
देवतायां त्वयि न घटत इति शेषः। अत एव अकामां मयि स्पृहारहितां। यद्वा अकामां विष्णुकामां त्वां न च स्प्रक्ष्यामि त्वदीयाज्ञां विना स्प्रष्टुं कर्तुमपि बिभेमीति शेषः। देवी
ति। प्रणयस्व प्रसीद। धराशय्या भूशयनं। नौपयिकानि न युक्तानि विचित्राणीत्यादि स्पष्टोर्थः। वक्ष्य तक्षा। विचित्राणि श्लोकद्वयमेकं वाक्यं। मां प्राप्य भर्तृत्वेनेति शेषः।
माल्यादीनि लभ अनुभवेति संबंधः॥ ॥ ॥ ॥ ॥

स्त्रीरत्नमिति। मां प्राप्य हि प्राप्यापि कथं भूषणादीनामनर्हास्य इति संबंधः। इदमिति। यदिदं ते जातं यौवनं तद्ध्यनिवर्त्ति अतिक्रमणं [illegible] यती तं न पुनरेति अतो भुंक्ष्व भोगानिति
शेषः। त्वत्सूज्ञा त्वां मदीयमायुर्गच्छतीति विद्यति। इदं तव इति तत्तव भृत्यस्य ममेति शेषः। यौवनदार्ढ्यावस्थायात् यतो भृत्यस्य ममायुर्व्यर्थं गच्छति अतो मम तव भूजार्थं मनु ज्ञा
देहीति शेषः। त्वामिति। नातिवर्त्तेत नहुभ्येत। कः पुमानतिवर्त्तेति पाठे न कोऽप्यतिक्रामेत इत्यर्थः। वक्ता तस्का। मद्द्वारा धनेन तव बुद्धिः कथं स्यादत आह। त्वामिति। त्वां लक्ष्मीमिता
लक्ष्मीर्भवा विष्णुरिति वक्ष्यमाणत्वात्। समासाद्य साक्षात्पिता महोऽपि नातिवर्त्तेत अनाराधितुं न शक्नुयात्। पुमान्को वाऽतिवर्त्ततेत्यर्थः। यद्यदिति। गात्रे अवयवविशे
षे तस्मिंस्तस्मिन् अवयवविशेषवत्तु निबध्यते इष्टदेवतायास्तव दर्शनस्य मुक्तिसाधनत्वादिति भावः। भवेति प्रश्नतार्थं स्पष्टः। वक्ता तस्का। भवेति हे मैथिलि भार्याभयाको

स्त्रीरत्नमसि मे वंशः कुरु गात्रेषु भूषणं। मां प्राप्य हि कथं वा स्यास्त्वमनर्हा सुविग्रहे ॥११॥ इदं ते चारु संजातं यौवनं ह्यतिवर्त्तते। यदतीतं पुनर्नैति स्रोतः स्रोतस्विनामि
व ॥१२॥ त्वां कृत्वोपरतं मन्ये रूपकर्त्ता स विश्वसृक्। नहि रूपोपमा ह्यन्या तवास्ति शुभदर्शने ॥१३॥ त्वां समासाद्य वैदेहि रूपयौवनशालिनीं। कः पुमानातिवर्त्तेत
साक्षादपि पितामहः ॥१४॥ यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने। तस्मिंस्तस्मिन् पृथुश्रोणि चक्षुर्मम निबध्यते ॥१५॥ भव मैथिलि भार्या मे मोहमेतं विसर्जय।
बह्वीनामुत्तमस्त्रीणां ममाग्रमहिषी भव ॥१६॥ लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि मे। तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥ विजित्य पृथिवीं सर्वां नाना
नगरमालिनीं। जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥१८॥ नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत्। पश्य मे सुमहद्वीर्यमप्रतिद्वंद्वमाहवे ॥१९॥ अस
कृत्संयुगे भग्ना मया विमृदितध्वजाः। अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥२०॥ इच्छया क्रियतामद्य प्रतिकर्म तवोत्तमं। सप्रभाण्यवसज्जंतां तवांगे भूष
णानि हि ॥२१॥ साधु पश्यामि ते रूपं संयुक्तं प्रतिकर्मणा। प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥२२॥ भुंक्ष्व भोगान्यथाकामं पिब भीरु रमस्व च। यथेष्टं च प्रय
च्छ त्वं पृथिवीं वा धनानि वा ॥२३॥ ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च। मत्प्रसादाल्ललंत्याश्च लभंतां बांधवास्तव ॥२४॥ ॥ ॥ ॥

[illegible] भव त्वं मोहं मयि शत्रुत्वशंकां विसर्जय। मे मत्त उत्तमस्त्रीणां मम या अग्रमहिषी मंदोदरी तस्या अपि मम त्वं भव ईश्वरीति शेषः। लोकेभ्य इत्यस्य वाक्यस्य वार्थः इष्टदेव
तायै देव्यै [illegible] आत्मसमर्पणं करोति लोकेभ्य इति श्लोकद्वयेन। अहमित्यनेनात्मसमर्पणं रत्नानीत्यादिनात्मीयसमर्पणमिति विज्ञेयं इच्छेति। वक्ता तस्का। मां लक्ष्मी
संपदमित्यर्थः। प्रतिकर्म प्रसाधनमलंकरणमित्यर्थः। प्रतिकर्मेति। दाक्षिण्येन मयीति शेषः। मत्प्रसादादिति ललंता॰ मं ता॰ वक्ता तस्का। मत्प्रसादात् मत्तो मयि प्रसादोऽनुग्रहः।
तस्मात्तव ललंत्याः मत्याः तस्या बांधवा ध्वरमंतामिति संबंधः॥ ॥२४॥ ॥ ॥ ॥

आद्विमित्यादीनां॥वास्तवार्थस्तु स रामाहं ते विलसत्पतत्स्वच्छंदिदृक्षिमां रामेण सह संयोजयेत् त्वत्पाशकथनाहं संपदाद्यर्थी किं तु मोक्षकामी अतो यावन्मोक्षं लतपारा क्षं नतपजा
मीत्यभिप्रायेण॥आद्विममेत्यादिश्लोकचतुष्टयेन॥हे हनुमन् गो मम आद्यादिकं पश्यन् निर्जितविजयः स्वतःसिद्धविजय इत्यर्थः॥वनगोचरः॥वनजलगोचरनिवासस्थानं यस्य सः
नारायण इत्यर्थः॥अत एव गतःश्रीः गता प्राप्ता श्रीर्लक्ष्मीर्येन॥अत एव व्रती भक्तसंरक्षणव्रतशीलः॥अत एव पितृवाक्यपालनाय स्थंडिलशायीयः स मम अचरिवासमेत्ति च
हःची स्वासोऽरहितेन पीतांबरधारिणेत्यर्थः॥एतादृशेन तेन रामेण सह वाव्य स्वानि विद्यमाने स्वयं धर्म्यानं किमपि करिष्यामीति शंके मन्ये॥अतो जीवति मयि मती ति
शेषः॥रामस्त्वा द्रष्टुमपि नोपलप्स्यते न च मम महत्वात्त्वां राघवः प्राप्तुमर्हतीति मद्ध्यानं तत्र रामस्त्वां द्रष्टुमप्युपलप्स्यते प्राप्तुमप्यर्हतीति भावः॥हिरण्यकशपोः कीर्त्ति॥इद्रह

ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशस्विनि। किं करिष्यसि रामेण सुभगे चीरवाससा॥२५॥ निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः। व्रती स्थंडिलशायी च शंके जीवति
वा न वा॥२६॥ न हि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते। पुरो बलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृतां॥२७॥ न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः। हिरण्यकशिपुः कीर्त्ति
मिंद्रहस्तगतामिव॥२८॥ चारुस्मिते चारुदति चारुनेत्रे विलासिनि। मनो हरसि मे भीरु सुपर्णः पन्नगं यथा॥२९॥ क्लिष्टकौशेयवसनां तन्वीमप्यनलंकृतां। त्वां दृष्ट्वा
स्वेषु दारेषु रतिं नोपलभाम्यहं॥३०॥ अंतःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः। यावंत्यो मम सर्वासामैश्वर्यं कुरु जानकि॥३१॥ मम ह्यसितकेशांते त्रैलोक्यप्रवराः
स्त्रियः। तास्त्वां परिचरिष्यंति श्रियमप्सरसो यथा॥३२॥ यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च। तानि लोकांश्च सुश्रोणि मां च भुंक्ष्व यथासुखं॥३३॥ न रामस्तपसा देवि
न
न बलेन न विक्रमैः। न धनेन मया तुल्यस्तेजसा यशसापि वा॥३४॥ पिब विहर रमस्व भुंक्ष्व भोगान् धननिचयं प्रदिशामि मेदिनीं च। मयि लल ललने यथासुखं त्वं त्वयि
च समेत्य ललंतु बांधवास्ते॥३५॥ कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि। कनकविमलहारभूषितांगी विहर मया सह भीरु काननानि॥३६॥ ॥
इत्यार्षे रामायणे सुंदरकांडे विंशः सर्गः॥ ॥ ॥ ॥

स्तगतामिवेति चैवमर्थः दृष्टांतः पुरा किलेंद्रो हिरण्यकशिपोर्भार्यां हृत्वा नारदमुखेन प्रार्थितस्तस्मै पुनः प्रददादिति भगवतेक
यावत्ति तथा च मा यी हरणमेव कीर्त्तिहरणमिति भावः॥क्लिष्टकौशेयेत्यस्य वास्तवार्थस्तु त्वां मम इष्टदेवतां दृष्ट्वा स्वेषु धनेषु दारेषु च रतिं नोपलभामहे इष्टदेवताया स्तव दर्शन
मात्रेणानंदपूर्णो हि सर्वतो निवृत्तोऽस्मीति भावः॥अंतःपुरेति॥ऐश्वर्यमाधिपत्यं न राम इत्यस्य वास्तवार्थस्तु रामस्तपआदिना मया तुल्यो न भवति॥किं तु॥निरवधिकषड्गुणैश्वर्य
संपन्नो भगवान् श्रीरामः मत्तोऽप्यधिक एवेति भावः॥पिबेति॥पिब मधु इति शेषः॥मयि लल रमस्व वस्तुतस्तु मयि स्थिते सति लल॥कुसुमितेति॥मया सह॥वस्तुतस्तु॥सह एक देव
मया सेवर्द्धितानीति शेषः॥काननानि॥विहर॥ ॥ ॥इति श्रीमहेश्वरतीर्थीयेसुंदरकांडे विंशः सर्गः॥ ॥ ॥ ॥ ॥

डुःखार्त्तेत्यादि। तृणमंतरतः कृत्वा रावणस्य साक्षात्संभाषणानर्हत्वात् तृणव्यवधानकरणं प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थं शुचिस्मितेति वस्तुस्वभावव
र्णनं। निवर्त्तयेति। स्वजने स्वीयभार्यादिजने। सिद्धिं मुक्तिं। अकार्यमिति। एकपत्न्याः एकः पतिर्यस्यास्तया पतिव्रतयेत्यर्थः। कुलं भर्तृकुलं। पुण्यं पवित्रं एवमिति पृष्ठतः कृत्वा
पराङ्मुखेत्यर्थः। नाहमिति। साधुधर्मव्रतं। साधुधर्मं। साधूनां धर्मं। साधुव्रतं। साधूनां व्रतं च कृतस्य। नाहमिति। अहं तव त्वया भार्या भर्त्तुं योग्या न। किंतु। परभार्या। परेण रामेण भा
र्या भर्त्तव्या। यथेति। यथा तव निजदाराणां शुद्धिरिष्टा एवमन्येषामपीत्यात्मदृष्टांतादेव निश्चित्य त्वमपि परदारनिस्पृहः स्वदारनिरतो भवेत्यर्थः। अतुष्टमिति। अतुष्टं अत एव निकृ

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः। आर्त्ता दीनस्वरा दीना प्रत्युवाच ततः शनैः॥१॥ दुःखार्त्ता रुदती सीता वेपमाना तपस्विनी। चिंतयंती वरारोहा पतिमेव पतिव्रता॥२॥
तृणमंतरतः कृत्वा प्रत्युवाच शुचिस्मिता। निवर्त्तय मनो मत्तः स्वजने क्रियतां मनः॥३॥ न मां प्रार्थयितुं युक्तस्त्वं सिद्धिमिव पापकृत्। अकार्यं न मया कार्यमेकपत्न्या विगर्हि
तं॥४॥ कुलं संप्राप्तया पुण्यं कुले महति जातया। एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी॥५॥ रावणं पृष्ठतः कृत्वा भूयो वचनमब्रवीत्। नाहमौपयिकी भार्या परभार्या सती
तव। साधुधर्ममवेक्षस्व साधु साधुव्रतं चर। यथा तव तथान्येषां दारा रक्ष्या निशाचर॥७॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यतां। अतुष्टं स्वेषु दारेषु चपलं चलितें
द्रियं॥८॥ नयंति निकृतिप्रज्ञं परदाराः पराभवं। इह संतो न वा संति सतो वा नानुवर्त्तसे॥९॥ यथा हि विपरीता ते बुद्धिराचारवर्जिता। वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विच
क्षणैः॥१०॥ राक्षसानामभावाय त्वं वा न प्रतिपद्यसे। अकृतात्मानमासाद्य राजानमनये रतं॥११॥ समृद्धानि विनश्यंति राष्ट्राणि नगराणि च। तथेयं त्वां समासाद्य लं
का रत्नौघसंकुला॥१२॥ अपराधात्तवैकस्य न चिराद्विनशिष्यति। स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः॥१३॥ अभिनंदंति भूतानि विनाशे पापकर्मणः। एवं त्वां पाप
कर्माणं वक्ष्यंति निकृता जनाः॥१४॥ दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः। शक्या लोभयितुं नाहमैश्वर्येण धनेन वा॥१५॥ अनन्या राघवेणाहं भास्करेण प्रभा यथा।
उपधाय भुजं तस्य लोकनाथस्य सत्कृतं॥१६॥

तौ शाठ्ये प्रज्ञा यस्य तं। पराभवं आयुरैश्वर्यादिक्षयरूपं। इहेत्यादि श्लोकद्वयमेकं वाक्यं। इह संतो न संति वा। सतो नानुव
र्त्तसे। विद्यमानानपि तान् धर्मजिज्ञासया नानुवर्त्तसे वा। मिथ्या प्रणीतात्मा। मिथ्या विनीतात्मा। त्वं विचक्षणैः। विद्वद्भिः उक्तं पथ्यं वचः। राक्षसानामभावाय न प्रतिपद्यसे वा। कारो
षि वा। तथा हि अत एव तव बुद्धिः। आचारवर्जिता। विहिताचारविमुखी विपरीता निषिद्धाचारपरेति योजना। स्वकृतैरिति। स्वकृतैरपराधैः। रावणेति संबोधनं। रौद्रः दिष्ट्या
व्यसनं प्राप्त इति च हृष्टा इति संबंधः। रावणोक्तप्रलोभनवाक्यानां उत्तरमाह। शक्येति। ऐश्वर्येण। आः पुनर्नियंतृत्वेन। उपधाय शिरोपधानं कृत्वा॥१६॥ ॥ ॥

अहमिति। व्रतस्नातस्य विद्या व्रतस्नातस्य विद्येव संगतेव विदितेव वा सा इति। समानय। संगमय। वने वाशितया सार्धं करेण्वेव गजाधिपमिति। वने वाशितां वशां करेणुं गजाधिपे
न सार्धमिति। विभक्तिविपरिणामेन योज्यं। अन्यथा विरोधात्। मित्रमिति। स्थानं पुरीं स्वपताकां वा समिच्छता इत्यर्थः। अथ चा घोरं वधं बहुविधपीडाकरं वधं मे अनिच्छता वा
त्वया पुरुषर्षभो रामः मित्रं कर्तुमौपयिको योग्य इत्यर्थः। सापराधं मां शरणागतमात्रेण कथं रक्षिष्यतीति शङ्कां निवर्तयन्नाह। विदित इति। निर्यातयितुं प्रत्यर्पयितुं। एवमिति। मामि
त्युक्तं चेति। मां रघूत्तमे संप्रदाय दत्वा स्थिताय इति शेषः। वर्जयेदिति। उत्सृष्टं इन्द्रमुक्तं। वज्रं कालस्त्वद्विधं वर्जयेत्। संक्रुद्धो राघवस्तु न वर्जयेत्। रामस्येति। महास्वनं महानादं।

कथं नामोपधास्यामि भुजमन्यस्य कस्यचित्। अहमौपयिकी भार्या तस्यैव वसुधापतेः॥ १७॥ व्रतस्नातस्य विप्रस्य विद्येव विदितात्मनः। साधु रावण रामेण मां समानय दुः-
खिता॥ १८॥ वने वाशितया सार्द्धं करेण्वेव गजाधिपं। मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता॥ १९॥ वधं चानिच्छता घोरं त्वयासौ पुरुषर्षभः। विदितः स हि धर्मज्ञः शरणा-
गतवत्सलः॥ २०॥ तेन मैत्री भवतु ते यदि जीवितुमिच्छसि। प्रसादयस्व त्वं चैनं शरणागतवत्सलं॥ २१॥ मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि। एवं हि ते भवेत् स्वस्ति संप्रदाय
रघूत्तमे॥ २२॥ अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण। वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरं॥ २३॥ त्वद्विधं न तु संक्रुद्धो लोकनाथः स राघवः। रामस्य धनुषः शब्दं श्रोष्यसि
त्वं महास्वनं॥ २४॥ शतक्रतुविसृष्टस्य निर्घोषमशनेरिव। इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः॥ २५॥ इषवो निपतिष्यन्ति रामलक्ष्मणलक्षिताः। रक्षांसि परिनिघ्न-
न्तः पुर्यामस्यां समन्ततः॥ २६॥ असंपातं करिष्यन्ति पतन्तः कङ्कवाससः। राक्षसेन्द्रमहासर्पान् स रामगरुडो महान्॥ २७॥ उद्धरिष्यति वेगेन वैनतेय इवोरगान्। अपनेष्यति मां
भर्ता त्वत्तः शीघ्रमरिंदमः॥ २८॥ असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः। जनस्थाने हतस्थाने निहते रक्षसां बले॥ २९॥ अशक्तेन त्वया रक्षः कृतमेतदसा-
धु वै। आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः॥ ३०॥ गोचरं गतयोर्भ्रात्रोरपनीता त्वयाधम। न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया॥ ३१॥ शक्यं संदर्शने स्थातुं शुना शा-
र्दूलयोरिव। तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरं॥ ३२॥ वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य विग्रहः। क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह॥ ३३॥ तोयमल्पमिवादित्यः
प्राणानादास्यते शरैः॥ ॥

नादेन। मकरश्चिह्नं धर्मः। रामलक्ष्मणलक्षिताः रामलक्ष्मणनामाङ्काः। असंपातं अनवकाशं न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघव इत्यस्योत्त-
माह। अपनेष्यतीति। जनस्थानस्थानमिति। एतत् युद्धं विना चौर्येण अपहरणं। गोचरं गतयोः मायामृगरूपमिन्द्रियार्थं प्रति गतयोः। तस्येति। तस्य ते युद्धासमर्थतया चोरस्ते बलवता-
भ्यां रामलक्ष्मणाभ्यां सह विग्रहे युद्धे सति युगग्रहणं युगग्रहणं युद्धजयः अस्थिरं। अत्र भावः। वृत्रस्यैकस्य बाहोः इन्द्रबाहुभ्यां इन्द्रस्य बाहुभ्यां सह विग्रहे सति। विग्रह इव ज-
जय इव वृत्रस्यैकेन बाहुना इन्द्रस्य द्वाभ्यां बाहुभ्यां इव एकेन त्वया तयोर्जयो न शक्य इत्यर्थः॥ ॥ ॥ ॥

यथायथाप्रियंवक्तापरिभूतस्तथातथा ५

गिरिमिति।कुवेरस्यगिरिंगन्धमादनं।अपयायस्वपक्रामपुरीमितिपाठेकुवेरस्यपुरीत्येतदुपरितनलोकानामुपलक्षणं।वरुणस्यसभामित्यनेनअधस्तनलोकानामुपलक्षणं।
त्वदृष्ट्याअपरुषवचनंवदंतंरावणंसुदृशप्रतीत्यर्थोक्तानांपरुषवाक्यानामभिप्रायमाह।रावणेनदेवींप्रतितत्वदृष्ट्यासाम्यरूपाण्येववाक्यान्युक्तानियद्यपितथापिवाह्यदृष्ट्याप
रुषवाक्यानीवप्रतीयमानत्वेनदेव्यापितत्वदृष्टिंसंगोप्यवाह्यदृष्टिमनुसृत्यैवपरुषवाक्यैरेवतत्प्रत्युत्तरमाहेति॥ इतिश्रीरामायणेतत्त्वदीपिकायांसुंदरकांडेएकविंशःसर्गः
सीताया इत्यस्यवास्तवार्थस्तुराक्षसाधिपःसीतायाःपरुषंश्रुत्वाएवंविप्रियवचनंश्रुत्वाप्रत्युवाचेतिसंबंधः।सांत्वयिताअनुनेतावश्यःवशगःअतःसन्नियच्छतिनिगृह्णातिहीडव
तःधावतःअश्वानिवमार्गमितिशेषः।उक्तंतत्कलत्वयीहृदेवतायांसमुत्थितःकामःइच्छासमुत्पन्नामे।किरिसर्थःमेकोधंराहृमजातेममसह्यदाविद्यमानेनेजकोधकोप्रशव्हन
कामश्चोधाद्रिपडुभिरुच्यतेतत्सतिविद्यतीतिसवधः।वामइतिमनुष्याणांकामःवामःप्रतिकूलःयस्मिञ्जनेकामोनिवध्यतेतस्मिञ्जनेप्रिरुणायितस्मिञ्जनेअनुक्रोशश्च
स्नेहश्चजायतेकिलेतियोजना।मिथ्याप्रव्रजितेरताकपटप्रव्रजितेरामेसक्ता।एतस्मादित्यादिश्लोकद्वयस्यवास्तवार्थस्तु।नन्वमद्धेयुक्ताघातकश्चतनसंभाष्यइत्यत्रा

गिरिंकुवेरस्यगतोथवालयंसभांगतोवावरुणस्यराज्ञः।असंशयंदाशरथेर्नमोक्ष्यसेमहाद्रुमःकालहतोशनेरिव॥२६॥ इत्यार्षेरामायणेएकविंशःसर्गः॥ सीताया
वचनंश्रुत्वापरुषंराक्षसेश्वरः।प्रत्युवाचततःसीतांविप्रियंप्रियदर्शनां॥१॥यथायथासांत्वयितावश्यःस्त्रीणांतथातथा।२॥सन्नियच्छतिमेक्रोधस्त्वयिकामःसमुत्थि
तः।द्रवतोमार्गमासाद्यहयानिवसुसारथिः॥३॥वामःकामोमनुष्याणांयस्मिन्किलनवध्यते।जनेतस्मिंस्त्वनुक्रोशःस्नेहश्चकिलजायते॥४॥एतस्मात्कारणान्नत्वां
घातयामिवरानने।वधार्हामवमानार्हांमिथ्याप्रव्रजितेरतां॥५॥परुषाणीहिवाक्यानियानियानिब्रवीषिमां।तेषुतेषुवधोयुक्तस्तवमैथिलिदारुणः॥६॥द्वौमा
सौरक्षितव्यौमेयोवधिस्तेमयाकृतः।ततःशयनमारोहममत्वंवरवर्णिनि॥७॥द्वाभ्यामूर्ध्वंतुमासाभ्यांभर्तारंमामनिच्छतीं।ममत्वांप्रातराशार्थमालभंतेमहानसे॥८॥

हारतस्मादिति।एतस्मात्कारणात्त्वइत्यत्रकारणात्।प्रव्राजितेमत्वामिनिरामइतिशेषः।रतां।त्वांममेष्टदेवतांनघातयामिवधार्हामवमानार्हामन्यामपिस्त्रियंघातया
मीतिसिद्ध्यतिमंवधःपरुषाणीति।तेवमांत्वदीयस्तुत्वंमामित्यर्थः।यानियानिपरुषवाक्यानिब्रवीषितेषुतेषुतेभ्यःहेतुभ्यःराक्षसाणिवधोयुक्तःममेतिशेषः।द्वौमासावितिमया
योवधिःकृतःश्रूयतांमैथिलीमहाकवेमासान्द्वादशभामिनी।त्वारणकांडेद्वौमासौतत्रावशिष्टौ।द्वौमासौमेमयारक्षितव्यौपरिपालिनीयौतनतदनत्यकारात्ममशय
नमारोहेतियोजना।द्वाभ्यामिति।प्रातराशार्थमित्यत्रप्रातःशब्देनमासद्वयसमाप्त्यनंतरप्रातःकालउच्यते।पतिवियोगदुःखितानिद्राहाररहितासत्याह।द्वौमासावित्यादि
श्लोकद्वयेन।हेमलक्ष्मीप्रीतिमयायोवधिःकृतःमासान्द्वादशभामिनीप्रतीक्ष्येतियत्समयःप्रार्थितःतन्मध्येअतःपरंरक्षितव्यौप्रतिज्ञागोप्यौद्वौमासाववशिष्टौमामा
सौकर्द्धेन।ततःतदनंतरंतेनतवभर्तारंममममदीयरामंप्राप्नुहीतिचमन्यसेप्राप्स्यसइत्यर्थः।त्वांप्रातराश्यइतिशेषः।ममममहानसेप्रातराशार्थमालभंतेपसूपकृतानुभक्षयेतिशेषः।श्री

द्वौमासौरक्षितव्यौमे ॥ ८ ॥

एवमुक्तेत्यादिश्लोकत्रयस्तवा ताद्यार्थस्तु। क्रोधसंरंभसंयुक्ते त्यनेन राक्षसस्य भावो वर्णितः। तामित्यस्य वायु वार्थस्तत श्रमानामिति। तामसं तथा प्रतीतिरिति भावः। श्रेष्ठप्रका
रैः। श्रेष्ठभागादित्यपसंज्ञाभिर्नेन वक्रैर्वक्रानेच संज्ञाभिः हंत्तमोडार्यग वितांहंत्र पातिव्रत्यं शौंडीर्यं वलपातिव्रत्यबलमविंतामित्यर्थः। हननमिति। तेत्तवनिश्रेयसिस्थि

एवमुक्तातुवैदेहीं रावणोराक्षसाधिपः। क्रोधसंरंभसंयुक्तः सीतामुत्तरमब्रवीत ॥९॥ तांतदुपमानां संप्रेक्ष्य राक्षसेंद्रेण जानकी। दिवा वर्धकन्यायत्ता विधेर्डुविषुवे
ह्वाणाः ॥१०॥ श्रेष्ठप्रकारैरपराने वैवक्रैस्तथापराः। सीतामाश्वासयामासुस्तर्जितां तेन राक्षसाः ॥११॥ ताभिराश्वासिता सीता रावणं राक्षसाधिपं। उवाचात्महि
तं वाक्यं हत्तशौंडीर्यगर्वितं ॥१२॥ नूनं तेन जनः कश्चिदस्ति निःश्रेयसे स्थितः। निवारयति यो न त्वां कर्मणोस्माद्विगर्हितात् ॥१३॥ मांहि धर्मात्मनः पत्नीं शचीमि
व शचीपतेः। त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसापि यः ॥१४॥ राक्षसाधम रामस्य भार्याममिततेजसः। उक्त्वा न तियत्पापं क्वागतस्तस्य मोक्ष्यसे ॥१५॥ यथा हस्ति
श्वमातंगाः शशश्च सहितो वने। तथा द्विरद्वद्रामस्त्वं नीव शश वत्स्मृतः ॥१६॥ सत्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे। चक्षुषो र्विषयं तस्य न तावदुपगच्छसि
॥१७॥ इमे ते नयने क्रूरे विवेके कृष्णपिंगले। क्षितौ न पतिते कस्मान्मामनार्य निरीक्षते ॥१८॥ तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च। कथं व्याहरतो मां ते जिह्वा पा
पनशीर्यते ॥१९॥ असंदेशात्तु रामस्य तपसश्चानुपालनात्। नत्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा ॥२०॥ नापहर्तुमहं शक्या तस्य रामस्य धीमतः। विधिस्तव व
धार्थाय विहितो नात्र संशयः ॥२१॥ शूरेण धनदभ्रात्रा बलैः समुदितेन च। अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतं ॥२२॥ सीताया वचनं श्रुत्वा रावणो राक्षसाधि
पः। विवृत्य नयने क्रूरे जानकीमन्ववेक्षत ॥२३॥ नीलजीमूतसंकाशो महाभुजशिरोधरः। सिंहसत्वगतिः श्रीमान्दीप्तजिह्वोग्रलोचनः ॥२४॥ शिलाग्रमुकुटः प्रां
शुश्चित्रमाल्यानुलेपनः। रक्तमाल्यांवरधरस्तप्तांगदविभूषणः ॥२५॥

तः कश्चिज्जनो नास्ति यः। अस्माद्विगर्हितात्कर्मणः त्वां निवारयति सच नास्तीत्युत्रमितियोजना। तवदुष्टप्रापको निष्टचारकश्च नास्तीति भावः। राक्षसाधिपेति। नस्यतस्मात्तस्य
मिति। उपगच्छसि व्याप्तययेनश्नुतेलट्। असंदेशादिति रामस्यासंदेशाज्ञामाज्ञाभावात्तपसः। पातिव्रत्यतपसः। भस्मार्ह। भस्मीकरणार्हे। कुर्मि। करोमि नेति। रामस्याहंशा
मसंबंधिन्यहं विधिः विधानं मदपहरणरूपं विहितः दैवेनेतिशेषः। अपोह्य मायायाद्दूरगच्छमनायान्यत्र नित्वा ॥२५॥

श्रोणीति। श्रोणीसूत्रेण रशनागुणेन मेचकेन इंद्रनीलनद्धत्वात् मेचकत्वं नयेनेति श्लोकः केषुचित्कोशेषु नास्तीति कल्पान व्याख्यातः। एकाक्षीमिति द्विरुपादानं व्यक्ति
भेदात्। प्रतिलोमेति। प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः सामदानादिभेदनैः। सामदानरूपैर्वकभेदनैः। मयेति। कृपणायेति च्छेदः। कृपणाया पतिव्रतया सीतया

श्रोणीसूत्रेण महता मेचकेन विराजितः। अमृतोत्पादने नद्धो भुजंगेनेव मंदरः॥२६॥ द्वाभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः। शुशुभे चलसंकाशः शृंगाभ्यां
मिव मंदरः॥२७॥ तरुणादित्यवर्णाभ्यां कुंडलाभ्यां विभूषितः। रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः॥२८॥ स कल्पवृक्षप्रतिमो वसंत इव मूर्तिमान्। श्मशा
नचैत्यप्रतिमो भूषितोपि भयंकरः॥२९॥ अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः। उवाच रावणः सीतां भुजग इव निश्वसन्॥३०॥ अनयेनाभिसंपन्नमर्थहीन
मनुव्रते। नाशयाम्यहमद्य त्वां सूर्यः संध्यामिवौजसा॥३१॥ इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः। संदिदेश ततः सर्वा राक्षसीर्घोरदर्शनाः॥३२॥ एकाक्षीमे
ककर्णीं च कर्णप्रावरणां तथा। गोकर्णीं हस्तिकर्णीं च लंबकर्णीमकर्णिकां॥३३॥ हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकां। एकाक्षीमेकपादीं च पृथुपादी
मपादिकां॥३४॥ अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीं। अतिमात्रास्यनेत्रां च दीर्घजिह्वामजिह्विकां॥३५॥ अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीं। यथा म
द्वशगा सीता क्षिप्रं भवति जानकी॥३६॥ तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च। प्रतिलोमानुलोमैश्च सामदानादिभेदनैः॥३७॥ आवर्जयत वैदेहीं दंडस्योद्यम
नेन च। इति प्रतिसमादिश्य राक्षसेंद्रः पुनः पुनः। काममन्युपरीतात्मा जानकीं पर्यतर्जयत्। उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी॥३९॥ परिष्वज्य दशग्रीवमि
दं वचनमब्रवीत्। मया क्रीड महाराज सीतया किं तवानया॥४०॥ विवर्णया कृपणया मानुष्या राक्षसेश्वर। नूनमस्या महाराज न देवा भोगसत्तमान्॥४१॥ विदधत्य
मरश्रेष्ठ तव बाहुबलार्जितान्। अकामां कामयानस्य शरीरमुपतप्यते॥४२॥ इच्छंतीं कामयानस्य प्रीतिर्भवति शोभना। एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली
॥४३॥ प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत। प्रस्थितः स दशग्रीवः कंपयन्निव मेदिनीं॥४४॥ ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनं। देवगंधर्वकन्याश्च नागक
न्याश्च सर्वतः॥४५॥ परिवार्य दशग्रीवं विविशुस्तं गृहोत्तमं। स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः। विहाय सीतां मदनेन मोहितः स्वमेव वेश्म
प्रविवेश वीर्यवान्॥४६॥ इत्यार्षे रामायणे सुंदरकांडे द्वाविंशः सर्गः॥ ॥ अष्टादशेह्नि वर्तमानकथा समाप्ता॥ ॥ ॥

किं करिष्यसि अमानुष्ये निच्छेदः। अमानुष्या अतएव विवर्णया मानुष्या स्त्रिया विलक्षणवर्णया तव भवान् यत्पर्थः। मया सह क्रीडेति संबंधः [illegible] नमिति। भोगसत्तमान् उत्तमभोगान् एव मिति।

[illegible] रामायणे [illegible] सुंदरकांडव्याख्याने द्वाविंशः सर्गः॥ २२॥

अस्मिन्सर्गद्वयेपिविद्यमानभार्याशब्दस्यवाच्यवार्थ्यक्तभार्याभिर्भर्तव्याभार्यात्वंभर्तव्यत्वमित्यर्थः।प्रजापतीनामिति।मानसोविरंचेर्मिरसोपुलस्त्यपुलस्त्यक्रतुरितिषड्प्रजा
पतयःतेषांचचतुर्थःपुलस्त्यः।प्रियामिति।सर्वासांमध्येबहुमतांप्रियांभार्यांमंदोदरींत्यक्त्वात्वामुपैष्यतीतिसंबंधः।यस्येति।यस्यभयात्तस्यनतिष्ठसेवशइतिशेषः।

इत्युक्त्वामैथिलींराजारावणःशत्रुरावणः।संदिश्यचततःसर्वाराक्षसीर्निर्जगामह॥१॥निष्क्रांतेराक्षसेंद्रेतुपुनरंतःपुरंगते।राक्षस्योभीमरूपास्ताःसीतांसमभिद्रु
द्रुवुः॥२॥ततःसीतामुपागम्यराक्षस्यःक्रोधमूर्छिताः।परंपरुषयावाचाराक्षस्यइदमब्रुवन्॥३॥पौलस्त्यस्यवरिष्ठस्यरावणस्यमहात्मनः।दशग्रीवस्यभार्यात्वंसीतेन
बहुमन्यसे॥४॥ततस्त्वेकजटानामराक्षसीवाक्यमब्रवीत्।आमंत्र्यक्रोधताम्राक्षीसीतांकरतलोदरीं॥५॥प्रजापतीनांषण्णांतुचतुर्थोयःप्रजापतिः।मानसोब्रह्मणः
पुत्रःपुलस्त्यइतिविश्रुतः॥६॥पुलस्त्यस्यतुतेजस्वीमहर्षिर्मानसःसुतः।नाम्नासविश्रवानामप्रजापतिसमप्रभः॥७॥तस्यपुत्रोविशालाक्षिरावणःशत्रुरावणः।तस्य
त्वंराक्षसेंद्रस्यभार्याभवितुमर्हसि॥८॥मयोक्तंचारुसर्वांगिवाक्यंकिंनानुमन्यसे।ततोहरिजटानामराक्षसीक्रोधमूर्छिता।भर्त्सयमानातत्सुघोरमिदंवचनमब्रवी
त्॥९॥विवृत्यनयनेकोपान्मार्जारसदृशेक्षणा।येनदेवास्त्रयस्त्रिंशद्देवराजश्चनिर्जितः॥१०॥वीर्योत्सिक्तस्यशूरस्यसंग्रामेष्वनिवर्तिनः।बलिनोवीर्ययुक्तस्यभार्या
त्वंकिंनलप्स्यसे।प्रियांबहुमतांभार्यांत्यक्त्वाराजामहाबलः॥१२॥सर्वासांचमहाभागांत्वामुपैष्यतिरावणः।अन्यातुविकटानामराक्षसीवाक्यमब्रवीत्॥१३॥अस
कृद्देवतायुद्धेनागगंधर्वदानवाः।निर्जितास्समरेयेनसतेपार्श्वमुपागतः॥१४॥समृद्धंस्त्रीसहस्रेणनानारत्नोपशोभितं।अंतःपुरंसमुत्सृज्यत्वामुपैष्यतिरावणः॥१५॥
तस्यसर्वसमृद्धस्यरावणस्यमहात्मनः।किमर्थंराक्षसेंद्रस्यभार्यात्वंनेच्छसेधमे॥१६॥ततस्तुदुर्मुखीनामराक्षसीवाक्यमब्रवीत्।यस्यसूर्योनतपतिभीतोयस्यचमारु
तः॥१७॥नवातिस्मायतापांगेकिंत्वंतस्यनतिष्ठसि।पुष्पवृष्टिंचतरवोमुमुचुर्यस्यवैभयात्॥१८॥शैलाश्चसुभ्रूपानीयंजलदाश्चयदेच्छति।तस्यनैरृतराजस्यराजरा
जस्यभामिनि॥१९॥किंत्वंनकुरुषेबुद्धिंभार्यार्थेरावणस्यहि।साधुतेतत्त्वतोदेविनिश्चितंसाधुभामिनि॥२०॥गृहाणसुस्मितेवाक्यमन्यथानभविष्यसि॥ इत्या
र्षेरामायणेसुंदरकांडेत्रयोविंशःसर्गः॥ ॥

तस्मैनतिष्ठसइतिवार्थः।साध्वीति।साधुकथितंसाधुगृहाणेतिसंबंधः॥ ॥इतिश्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदी
पिकायांसुंदरकांडेत्रयोविंशःसर्गः॥ ॥ ॥ ॥

मानुषीति। प्रत्याहरेति वर्त्तय न त्वं जातु भविष्यसि रामस्येति शेषः। मानुषीत्यस्य वाक्यस्यार्थस्तु मानुषी त्वं मानुषस्य मानुषावतारस्य रामस्य भार्यात्वमनुमन्यसे तद्युक्तं अतः रामात् म-
नो न प्रत्याहर। त्वं जातु भविष्यसि रामस्येति शेषः। मानुषीति। राज्याद्भ्रष्टं पितृवाक्यपरिपालनाय त्यक्तराज्यमित्यर्थः। असिद्धार्थो अश्चासौ सिद्धार्थश्च असिद्धार्थः। तं सिद्धसर्वप्रयो-

ततः सीतां समभ्यस्ता राक्षस्यो विकृताननाः। परुषाः परुषानार्य ऊचुस्ता वाक्यमप्रियं ॥१॥ किं त्वमंतःपुरे सीते सर्वभूतमनोहरे। महार्हशयनोपेते न वासमनुमन्यसे
॥२॥ मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे। प्रत्याहर मनो रामान्न त्वं जातु भविष्यसि ॥३॥ त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरं। भर्तारमुपसंगम्य विहरस्व यथासुखं
॥४॥ मानुषी मानुषं तं तु राममिच्छसि शोभने। राज्याद्भ्रष्टमसिद्धार्थं विक्लवं त्वमनिंदिते ॥५॥ राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा। नेत्राभ्यामश्रुपूर्णाभ्यामिदं वच-
नमब्रवीत् ॥६॥ यदिदं लोकविद्विष्टमुदाहरथ संगताः। नैतन्मनसि वाक्यं मे किल्बिषं प्रतितिष्ठति ॥७॥ न मानुषी राक्षसस्य भार्या भवितुमर्हति। कामं खादत मां सर्वा न
करिष्यामि वो वचः ॥८॥ दीनो वा राज्यहीनो वा यो मे भर्त्ता स मे गुरुः। तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥९॥ यथा शचि महाभागा शक्रं समनुतिष्ठति। अरुंधती
वसिष्ठं च रोहिणी शशिनं यथा ॥१०॥ लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा। सावित्री सत्यवंतं च कपिलं श्रीमती यथा ॥११॥ सौदासं मदयंती च केशिनी सगरं
यथा। नैषधं दमयंती च भैमी पतिमनुव्रता ॥१२॥ तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता। सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्छिताः ॥१३॥ भर्त्सयंति स्म परुषैर्वाक्यै-
रावणचोदिताः। अवलीनः स निर्वाक्यो हनूमान् छिंशुपाद्रुमे ॥१४॥ सीतां संतर्जयंतीस्ता राक्षसीरशृणोत्कपिः। तामतिक्रम्य संरब्धा वेपमानां समंततः ॥१५॥ भृशं सं-
लिलिहुर्दीप्तान्प्रालंबदशनच्छदान्। ऊचुः परमसंक्रुद्धाः प्रगृह्याशु परश्वधान् ॥१६॥ नेयमर्हति भर्त्तारं रावणं राक्षसाधिपं। सा भर्त्स्यमाना भीमाभी राक्षसीभिर्वरान-
ना ॥१७॥ सा बाष्पमपमार्जंती शिंशुपां तामुपागमत्। ततस्तां शिंशुपां सीता राक्षसीभिः समावृता ॥१८॥ अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता। तां कृशां दीनव-
दनां मलिनांबरवासिनीं ॥१९॥ भर्त्सयांचक्रिरे भीमा राक्षस्यस्ताः समंततः ॥ ॥ ॥ ॥ ॥ ॥

जनं विक्लवमित्यर्थः। विक्लवं दयालुं। राक्षसीनामिति। नेत्राभ्यामुपलक्षिता यदिति। किल्बिषं किल्बिषविषयं चेति। प्रायो भर्त्तव्यातं नित्यमित्यादि। अत्र चानिर्दुर्दशा स्व-
पि दृढव्रतत्वद्योतनाय नानाविधानेकसाध्वीनिदर्शनेनोपन्यास इत्यनुसंधेयं। अवलीन इति। तर्जयंतीरशृणोत् राक्षसीनां तर्जनवाक्यान्यशृणोदित्यर्थः। ऊचुरिति।
नेयमर्हतीत्यूचुरिति संबंधः। सेति। सा भर्त्स्यमाना अभूदिति शेषः। सेति। सा ताः हनूमदधिष्ठितां शिंशुपां उपागमदिति योजना॥ ॥ ॥ ॥ राम ॥

तत इति। निर्णतोदरी। कृशोदरी। सीतेति। अतिकृतं अतिमात्राचरणं। परितुष्टेति मानुषो विधिः कृतः मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतं किंत्व एतावता अलमित्यर्थः। व
स्तवार्थे परितुष्टास्मीत्यादि श्लोकत्रयं कुलकं। अस्यार्थः। हे मैथिलि मानुषं मनुष्यधर्मं भयं त्यक्त्वा रावयतीति रावणः। रावणं दशाननं तथा पिङ्गपणं भर्तारं श्रियते शुश्रूषादि
नात्मनि नमिति भर्तीश्चत्यः। तं आश्रय रावणं भृत्यत्वेन अंगीकुर्वित्यर्थः। विक्रान्तादिगुणयुक्तं रामं च भजेति संबंधः। दिव्येति। अद्येति। अग्नेः स्वाहा इन्द्रस्य शचीयथा तथा अद्य
प्रभृति लोकानामीश्वरी भवेति संबंधः। दिव्याङ्गरागेत्यादि श्लोकत्रयं कुलकं। तस्य वास्तवार्थस्तु हे वैदेहि गतायुषा प्राप्तायुषा रामेण आसंगमो भविष्यतीति शेषः। तेन कृप

ततस्तां विनता नाम राक्षसी भीमदर्शना। अब्रवीत्कुपिताकारा कराली निर्णतोदरी ॥२०॥ सीते पर्याप्तमेतावद्भर्तुः स्नेहः प्रदर्शितः। सर्वत्रातिकृतं भद्रे व्यसनायो
पकल्पते परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः। ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥२२॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसां। विक्रान्तं रूपवन्तं च सुरे
शमिव वासवं ॥२३॥ दक्षिणं त्यागशीलं च सर्वस्य प्रियवादिनं। मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय ॥२४॥ दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता। अद्य
प्रभृति लोकानां सर्वेषामीश्वरी भव ॥२५॥ अग्नेः स्वाहा यथा देवी शचीवेन्द्रस्य शोभने। किं ते रामेण वैदेहि कृपणेन गतायुषा ॥२६॥ एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि
अस्मिन्मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयं ॥२७॥ अन्या तु विकटा नाम लम्बमानपयोधरा। अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य गर्जती। बहून्यप्रियरूपाणि वचना
नि सुदुर्मते। अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥२९॥ न च नः कुरुषे वाक्यं हितं कालपुरस्कृतं। आनीतासि समुद्रस्य पारमन्यैर्दुरासदं ॥३०॥ रावणान्तः
पुरे घोरे प्रविष्टा चासि मैथिलि। रावणस्य गृहे रुद्धा अस्माभिस्तु सुरक्षिता ॥३१॥ न त्वां शक्तः परित्रातुमपि साक्षात्पुरंदरः। कुरुष्व हितवादिन्या वचनं मम मैथिलि
॥३२॥ अलमश्रुनिपातेन त्यज शोकमनर्थकं। भज प्रीतिं प्रहर्षं च त्यजन्ती नित्यदैन्यतां ॥३३॥ ॥ ॥

णेन कार्पण्येनेत्यर्थः। किं माह कि त्व अग्नेः स्वाहा इन्द्रस्य शचीव यथा अद्यप्रभृति दिव्याङ्गरागा धात्रा सती सर्वेषामस्मदादीनां लोकानां च ईश्वरी भव मे मया उक्तमेतद्वाक्यं न क
रिष्यसि यदि तर्हि त्वामुद्दिश्य अस्मिन्मुहूर्ते सर्वा वयं भक्षयिष्यामहे विघ्नमिति शेषः। सुदुर्मते वक्तव्यं सुदुष्टेष्वपि मतिः। अनुग्राहिका यस्याः सा कालपुरस्कृतं कालोचितं त
त्वमिति तत्त्वं सहेत्यर्थः। अलमश्रुनिपातेनेत्यपि पाठः। प्रीतिं स्नेहप्रहर्षमानंद नित्यदैन्यतां निरन्तरदैन्यत्वं ॥३३॥ ॥ ॥

सीतेत्यस्य वास्तवार्थस्तु राज्ञस्तु राजेन यत्किंचिदुक्तमिति शेषः। सह। सहत्वपरस्मैपदमार्षं। यथा सुखं क्रीडा तन्हेतुः। जानासि हीति। उद्यानानीत्यस्य वास्तवार्थस्तु राज्ञस्तु र
जेन सह एकदा संवर्द्धितानीति शेषः। उद्यानानि च रावणं भर्त्तारं भृत्यत्वेन भजस्व अंगीकुर्वित्यर्थः। उत्पाद्य वा। उत्पाद्यैव वा इमामिति। दोहदः। इच्छाय कस्त्वीहिमित्यादिना दोहद
स्य स्वरूपं कथयति। यकृन्नाम हृदयस्य दक्षिणभागस्थो मांसविशेषः। प्लीहा हृदयस्य वामभागस्थो मांसविशेषः। क्रोड। भुजांतरं वक्षः। गोस्तु वाक्यानि मांसयुक्तमस्थि हृ
दयोपरि स्थितमांसविशेषो वा। अथोत्पीडमिति पाठे उत्पीडं प्लीहोपरि स्थितमांसं हृदयस्य बंधनं नाडीवं धनसहितं मुकुलाकारं हृत्पद्माख्यं मांसविशेषः। ततश्चान्पिंड
कान्मांसखंडान्। निकुंभिला नाम लंकायाः पश्चिमभागवर्त्तिनी काचन शक्तिः। रोदिति। अयतदत्त। सुरसुतोपमा देवकन्यकोपमा। स्त्रीसहस्राणीति मते तारभ्य सीस

सीतेत्युक्तमराजेन सह क्रीडा यथा सुखं। जानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवं ॥३४॥ यावद्वनेतत्त्वातिक्रामेत्तावत्तद्बहुमवाप्नुहि। उद्यानानि च रम्याणि पर्वतोप
वनानि च ॥३५॥ सहाराज्ञमराजेन रमस्व मदिरेक्षणे। स्त्रीसहस्राणि ते सम्यग्वशे स्यास्युः तिसुंदरि ॥३६॥ रावणं भज भर्त्तारं भर्त्तारं सर्वरक्षसां। उत्पाद्य वा तह्वदयं भक्षयिष्या
मि मैथिलि ॥३७॥ यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि। ततश्चंडोदरी नाम राक्षसी क्रूरदर्शना ॥३८॥ भ्रामयंती महाशूलमिदं वचनमब्रवीत्। इमां हरिणलोलाक्षीं त्रा
सोत्कंपपयोधरां ॥३९॥ रावणेन हृतां दृष्ट्वा दोहदो मे महानभूत्। यकृत्प्लीहमहत्क्रोडं हृदयस्यास्य बंधनं ॥३९॥ आंत्राण्यपि तथा शीर्षं खादेयमिति मे मतिः। ततः प्रघसा
नाम राक्षसी वाक्यमब्रवीत् ॥४०॥ कंठमस्याः प्रशमाया पीडयामः किमास्यते। निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ॥४१॥ नात्र कश्चन संदेहः प्रवारते निखवहुति
ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥४२॥ विशस्येमां ततः सर्वान् समान्कुरुत पिंडकान्। विभजाम ततः सर्वा विवादो मे न रोचते ॥४३॥ पेयमानीयतां क्षिप्रमा
ल्यानि विविधानि च। ततः शूर्पणखी नाम राक्षसी वाक्यमब्रवीत् ॥४४॥ अजामुख्या यदुक्तं वै तदेव मम रोचते। सुरा चानीयतां शीघ्रं सर्वशोकविनाशिनी ॥४५॥ मानु
षमांसमास्वाद्य नृत्यामोथ निकुंभिलां। एवं निर्भर्त्स्यमाना सा सीता सुरसुतोपमा ॥४६॥ राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य प्ररोदिति ॥४७॥ इत्याद्यैर्नामापीत्यसुरकारेण

समाप्तिपर्यंतमस्य वास्तवार्थस्तु। रावणं भर्त्तारं भज स्वपत्नीत्वेनांगीकुर्वीत्यर्थः। उत्पाद्येति हे मैथिलि तत्त्वं मे व्याहृतं वाक्यं रावणं भर्त्तारं [illegible] अंगीकार्षि तदा का [illegible] यथावन्न करि
ष्यसि [illegible] नाम हृदयस्य [illegible] भक्षयिष्यामीति [illegible] सीता सुदृशी [illegible] यथा [illegible] नोचेत् [illegible] भूमी [illegible] वजल्पा मान्याः। ततश्चंडोदरीना
मित्यादिना [illegible] निकुंभिला [illegible] ततश्चंडोदरीनामित्यादि [illegible] वाक्यं [illegible] त्वं [illegible] स्पाम [illegible] शेषः। येनांपरु
चेदं [illegible] विकाय [illegible] सीता [illegible] निवादेय मिति। मम [illegible] चंडोदरीनाम [illegible] वधा [illegible] वाक्यं। [illegible] शमाया प्र
या [illegible] पिंडयामः। अमानुषी [illegible] अमानुषी विकाय नाम राक्षसी। ततस्त्वजामुखी [illegible] वाक्यं। ६

तथातामिति।मनस्विनीपतिव्रत्येदृढमनाः।नेतिकामयथेदं।सीताविलापस्यवाल्मवार्थस्कंध्रीरामवियोगेनघोरराक्षसपुरावस्थानेनचविरूपराक्षसीसमागमेनचवि
विधप्रलापादिकमितिज्ञेयं।अस्मिन्कांडेयत्रयत्रसीताप्रलापस्तत्रतत्रएवमेवऊहनीयः।वेपतइति।कोकैः।वृकैः।सात्विति।अशोकस्यविपुलांशाखां।वामवलंब्यहनुमद
धिष्ठितशिंशपामूलंप्राप्तायाःसीतायाःअशोकशाखावलंबनाभिधानात्।अशोकशाखाःशिंशपाशाखाश्चसंमिलिताःवर्त्ततइत्यवगम्यते।सेति।राक्षसीनां।राक्षसीभ्यः।वेपं

तथातासांवदंतीनांपरुषंदारुणंबहु।राक्षसीनामसौम्यानांरुरोदजनकात्मजा॥१॥एवमुक्तातुवैदेहीराक्षसीभिर्मनस्विनी।उवाचपरमत्रस्ताबाष्पगद्गदयागिरा॥२॥
नमानुषीराक्षसस्यभार्याभवितुमर्हति।कामंखादतमांसर्वानकरिष्यामिवोवचः॥३॥साराक्षसीमध्यगतासीतासुरसुतोपमा।नशर्मलेभेशोकार्त्तारावणेनचतर्जि
ता॥४॥वेपतेस्माधिकंसीताविशंतीवांगमात्मनः।वनेयूथपरिभ्रष्टामृगीकोकैरिवार्दिता॥५॥सात्वशोकस्यविपुलांशाखामालंब्यपुष्पितां।चिंतयामासशोकेनभर्त्ता
रंभग्नमानसा॥६॥सास्नापयंतीविपुलौस्तनौनेत्रजलस्रवैः।चिंतयंतीनशोकस्यतदांतमधिगच्छति॥७॥सानिश्वसंतीदुःखार्त्ताशोकोपहतचेतना।आर्त्तास्यसृजदश्रू
णिमैथिलीविललापह॥८॥हारामेतिचदुःखार्त्ताहापुनर्लक्ष्मणेतिच।हाश्वश्रूर्ममकौसल्येहासुमित्रेतिभामिनी॥९॥लोकप्रवादःसत्योयंपंडितैःसमुदाहृतः।अ
कालेदुर्लभोमृत्युःस्त्रियावापुरुषस्यवा॥१०॥यत्राहमाभिःक्रूराभिराक्षसीभिरिहार्दिता।जीवामिहीनारामेणमुहूर्त्तमपिदुःखिता॥११॥सावेपमानापतिताप्रवातेक
दलीयथा।राक्षसीनांभयत्रस्ताविषण्णवदनाभवत्॥१२॥तस्याःसादीर्घविपुलावेपंत्याःसीतयातथा।ददृशेकंपिनीवेणीव्यालीवपरिसर्पती॥१३॥एषाल्पपुण्याकृप
णाविनशिष्याम्यनाथवत्।समुद्रमध्येनौःपूर्णावायुवेगैरिवाहता॥१४॥भर्त्तारंतमपश्यंतीराक्षसीवशमागता।सीदामिनखलुशोकेनकूलंतोयहतंयथा॥१५॥तंपद्म
दलपत्राक्षंसिंहविक्रांतगामिनं।धन्याःपश्यंतियेनाथंकृतज्ञंप्रियवादिनं॥१६॥सर्वथातेनहीनायारामेणविदितात्मना।तीक्ष्णंविषमिवास्वाद्यदुर्लभंममजीवितं॥१७॥

वेपंत्याःसीतयेत्यत्रषष्ठ्यर्थेतृतीया।परिसर्पतीपरिसर्पंती।हासुमित्रेत्यत्रएकाराभावश्चार्षः।लोकप्रवादइत्यादिश्लोकद्वयमेकंवाक्यं।दुर्लभइत्यत्रइतिकरणंद्रष्टव्यं।यत्रय
तःएषेति।पूर्णापदार्थैः।तमिति।पद्मदलपत्राक्षं।दलतीति।दलंविकसितपद्मं।तस्यपत्रमिवाक्षिणीविकसितपद्मपत्राक्षमित्यर्थः॥ ॥ ॥ ॥

जीवितमिति। रक्षंत्या रक्ष्यमाणायेत्यर्थः। धिगिति। छंदेनेच्छया॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे पंचविंशः सर्गः॥ ॥ ॥उन्मत्तेवेत्यत्र विशेष्टेव प्रमत्तेव मदकरद्रव्यसेव-
नात्। प्रकर्षेणामत्तेव। भ्रांतचित्तेवाव्यामूढचित्तेव। उपावृत्ता किशोरी वडवा भूमिपतनोदनार्थं विचेष्टिता वडवेव राघवेतिप्रमत्तस्यान्वनवहितस्य प्रत्याख्यातेनिराकरणे। छिन्ने

कीदृशं तु महापापं मया देहांतरे कृतं येनेदं प्राप्यते घोरं मया दुःखं सुदारुणं॥१८॥ जीवितं त्यक्तुमिच्छामिच्छामि शोकेन महता वृता। राक्षसीभिश्च रक्षंत्या रामो
नासाद्यते मया॥१९॥ धिगस्तु खलु मानुष्यं धिगस्तु परवश्यतां। न शक्यं यत्परित्यक्तुमात्मछंदेन जीवितं॥२०॥ इत्यार्षे रामायणे सुंदरकांडे पंचविंशः सर्गः॥ ॥
प्रसक्ताश्रुमुखी त्वेवं ब्रुवंती जनकात्मजा। अधोगतमुखी बाला विलप्तुमुपचक्रमे॥१॥ उन्मत्तेव प्रमत्तेव भ्रांतचित्तेव शोचती। उपवृत्ता किशोरीव विचेष्टंती म-
हीतले॥२॥ राघवस्याप्रमत्तस्य रक्षसा कामरूपिणा। रावणेन प्रमथ्याहमानीता क्रोशती बलात्॥३॥ राक्षसीवशमापन्ना भर्त्स्यमाना सुदारुणं। चिंतयंती सुदुःखार्ता नाहं
जीवितुमुत्सहे। न हि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः। वसंत्या राक्षसीमध्ये विना रामं महारथं॥५॥ अश्मसारमिदं नूनमथवाप्यजरामरं। हृदयं मम येनेदं न दुःखेन
विशीर्यते॥६॥ धिङ्मामनार्यामसतीं याहं तेन विना कृता। मुहूर्तमपि रक्षामि जीवितं पापजीविता॥७॥ का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना। भर्तारं सागरांताया
वसुधायाः प्रियंवदं। भिद्यतां भक्ष्यतां वापि शरीरं विसृजाम्यहं। न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता॥९॥ चरणेनापि सव्येन न स्पृशेयं निशाचरं। रावणं किं पु-
नरहं कामयेयं विगर्हितं॥१०॥ प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलं। यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति॥११॥ छिन्ना भिन्ना विभक्ता वा दीप्ते वाग्नौ प्रदीपि-
ता। रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरं॥१२॥ ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः। सद्वृत्तो निरनुक्रोशः शंके मद्भाग्यसंक्षयात्॥१३॥ राक्षसानां जनस्थाने
सहस्राणि चतुर्दश। एकेनैव निरस्तानि स मां किं नाभिपद्यते॥१४॥ निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा। समर्थः खलु मे भर्ता रावणं हंतुमाहवे॥१५॥ विराधो दं-
डकारण्ये येन राक्षसपुंगवः। रणे रामेण निहतः स मां किं नाभ्युपपद्यते॥१६॥ कामं मध्ये समुद्रस्य लंकेयं दुष्प्रधर्षणा। न तु राघवबाणानां गतिरोधीह विद्यते॥१७॥ किं नु तत्का-
रणं येन रामो दृढपराक्रमः। रक्षसापहृतां भार्यामिष्टां नाभ्युपपद्यते॥१८॥ इहस्थां मां न जानीते शंके लक्ष्मणपूर्वजः। जानन्नपि हि तेजस्वी धर्षणां मर्षयिष्यति॥१९॥

ति। छिन्ना लूना। भिन्ना विदारिता। विभक्ता शीर्णावयवा। तदिति प्राज्ञत्वादिगुणो रामः मद्भाग्यसंक्षयान्निरनुक्रोश इति शंका इति संबंधः। इहस्थामिति। मर्षयिष्यतीत्यत्र काकुः। तु संबंधे

हतामिति।मांतदाभ्यवपद्यतामनेोवनार्थमागतेनरावणाद्वंद्वेरावणायुद्धे।ततइति।यथाअहमेवंरुदत्यस्मितथातासांगृहेगृहेरुदंत्योराक्षस्योभूयोऽश्रयिष्ठंभविष्यतीत्यर्थः।अ
चिरेणेति।कुतःदुष्प्रस्थानंदुर्मार्गविवर्त्तनं।कालैर्विपर्ययंनाशमाख्यातियहिनामेतिसरामः।मांरावणस्यनिवेशनेवर्त्तमानांजानीयाद्यदितर्हिलंकारामसायकैर्निर्दिग्धाभवि

हतेतियोभिगत्वामांराघवायनिवेदयेत्।हन्तराजोहिमहरोरावणेननिपातितः॥१९॥हतंकामंमहत्तेनमांतदाभ्यवपद्यता।तिष्ठतारावणाद्वंद्वेवृद्धेनापिजटायुषा।यदि
मामिहजानीयाद्वर्त्तमानांसराघवः।अद्यबाणैरभिक्रुद्धःकुर्याल्लोकमराक्षसं॥२१॥विधमेच्चपुरींलंकांशोषयेच्चमहोदधिं।रावणस्यावनीचस्यकीर्तिंनामचनाशयेत्॥२२॥
ततोनिहतनाथानांराक्षसीनांगृहेगृहे।यथाहमेवंरुदतीतथाभूयोनसंशयः॥२३॥अन्विष्यरक्षसांलंकांकुर्याद्रामःसलक्ष्मणः।नहितेनापिशत्रुर्दृष्टोमुहूर्तमपिजीवति
॥२४॥चिंताधूमाकुलपथागृध्रमंडलमंडिता।अचिरेणैवकालेनश्मशानसदृशीभवेत्॥२५॥अचिरेणैवकालेनप्राप्स्याम्येवमनोरथं।दुष्प्रस्थानोयमाख्यातिसर्वे
षांवोविपर्ययं॥२६॥यादृशानीहदृश्यंतेलंकायामशुभानितु।अचिरेणैवकालेनभविष्यतिहतप्रभा॥२७॥नूनंकालहतेपापेरावणेराक्षसाधिपे।शोषयिष्यतिदुर्धर्षः
प्रमदाविधवायथा।पुण्योत्सवसमुद्धाचनष्टभर्त्रीसराक्षसा।भविष्यतिपुरीलंकानष्टभर्त्रीयथांगना॥२८॥नूनंराक्षसकन्यानांरुदतीनांगृहेगृहे।श्रोष्यामिनचिरा
द्दुःखार्त्तानामिहध्वनिं॥३०॥सांधकाराहतद्योताहतराक्षसपुंगवा।भविष्यतिपुरीलंकानिर्दग्धारामसायकैः॥३१॥यदिनामसशूरोमांरामोरक्तांतलोचनः।जानीया
द्वर्त्तमानांरावणस्यनिवेशने॥३२॥अनेनतुनृशंसेनरावणेनाधमेनमे।समयोयस्तुनिर्दिष्टस्तस्यकालोयमागतः॥३३॥अकार्यंयेनजानंतिनैर्ऋताः
पापचारिणः।अधर्मात्तुमहोत्पातोभविष्यतिहिसांप्रतं॥३४॥ ॥ ॥ ॥ ॥

ष्यतीतिपूर्वेणसंबंधः।तर्हिजितंत्वयेत्याशंक्यसत्यंकिंतुततःप्रागेवमामयंमारयिष्यतीत्याह।अनेनेत्यादिश्लोकत्रयेण।समयःमासान्द्वादशभामिनीत्युक्तसमयः
।ननुविभीषिकामात्रमेतत्।कथमकार्यंकरिष्यतीत्यतआह।अकार्यमिति।येपापकारिणोनैर्ऋताःअधर्माद्धेतोरकार्यंनजानंतितैर्महोत्पातः।मद्वधरूपमहाननर्थः।सोऽत्र
भविष्यतीति॥ ॥ ॥

एतदेव विवृणोति। नैत इति। तदेवं महावीरस्य मेऽप्यनुरक्तस्य रामस्य ममानन्वेषणे कारणं मज्जीवनापरिज्ञानं वास्य विपन्निर्वा तात्विकवैराग्यं वा। प्रवासदोषान्मयि प्रेमनाशो वा।
मामिकगुणहीनता वा मद्भाग्यविपर्ययो वेति षट्कारणान्युत्प्रेक्षते। नाजानादित्यादिना श्लोकषट्केन। अथ वा न हीत्यादि मा ईश्लोकमेकं वाक्यं। धर्मकामस्य न तु कामप
रस्य परमात्मनः आत्मारामस्येत्यर्थः। अथ रामगुणाभिज्ञतया प्रेमनाशपक्षस्तत्रासंभावित इति स्वयमेवाह। दृश्यमान इति। केषांचिद्दृश्यमाने वस्तुनीति शेषः। सौहृदं
या भवति तथा प्रीतिर्भवेत्। अपश्यतः अदृश्यमाने सति प्रीतिर्न भवेत्कुतः कृतघ्नाः नाशयन्ति प्रीतिमिति शेषः। रामस्तु न नाशयतीति संबंधः। यद्वा। सौहृदं स्नेहमपश्यतः।

नैते धर्मं विजानंति राक्षसाः पिशिताशनाः। क्रव्यं मां प्रातराशार्थे राक्षसः कल्पयिष्यति॥ ३५॥ साहं कथं करिष्यामि तं विना प्रियदर्शनं। रामं रक्तांतनयनमपश्यंती सुदुःखि
ता॥ यदि कश्चित्प्रदाता मे विषस्याद्य भवेदिह। क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना॥ ३७॥ नाजानाज्जीवतीं रामः स मां लक्ष्मणपूर्वजः। जानंतौ तौ न कुर्यातां नोर्व्यां
हि परिमार्गणं॥ ३८॥ नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः। देवलोकमितो यातस्त्यक्त्वा देहं महीतले। धन्या देवाः सगंधर्वाः सिद्धाश्च परमर्षयः। मम पश्यंति ये वीरं
रामं राजीवलोचनं। अथ वा न हि तस्यार्थो धर्मकामस्य धीमतः। मया रामस्य राजर्षेर्भार्यया परमात्मनः॥ ४१॥ दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यपश्यतः। नाशयंति कृतघ्ना
स्तु न रामो नाशयिष्यति॥ ४२॥ किं नु मे न गुणाः केचित्किं वा भाग्यक्षयो हि मे। याहं सीता वरार्हेण हीना रामेण भामिनी ४३ श्रेयो मे जीवितान्मर्तुं विहीनाया महात्मना।
रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात्॥ ४४॥ अथ वा न्यस्तशस्त्रौ तौ वने मूलफलाशनौ। भ्रातरौ हि नरश्रेष्ठौ चरंतौ वनगोचरौ॥ ४५॥ अथ वा राक्षसेंद्रेण रावणे
न दुरात्मना। छद्मना घातितौ शूरौ भ्रातरौ रामलक्ष्मणौ। साहमेवंविधे काले मर्तुमिच्छामि सर्वथा। न हि मे विहितो मृत्युरस्मिन्दुःखेऽपि वर्तति॥ ४७॥ धन्याः खलु म
हात्मानो मुनयः सत्यसंमताः। जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये॥ ४८॥ प्रियान्न संभवेद्दुःखमप्रियादधिकं भवेत्। ताभ्यां हि ये वियुज्यंते नमस्तेषां महात्म
नां॥ ४९॥ साहं त्यक्ता प्रियेणेह रामेण विदितात्मना। प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशं॥ ५०॥ इत्यार्षे रामायणे सुंदरकांडे षड्विंशः सर्गः॥ ॥ ॥

पुंसः दृश्यमानेऽपि सुहृदीति शेषः। प्रीतिर्न भवेत्किमुत अदृश्यमाने। कुतः कृतघ्ना नाशयंति सौहृदमित्यनुकर्षः। कृतज्ञो रामस्तु न नाशयतीति संबंधः। अथासिदवस्थायां
स्वकर्तव्यमाह। श्रेय इति। मर्तुं श्रेयः मरणमेव श्रेय इत्यर्थः। धन्या इति। प्रियाप्रिये इष्टानिष्टे प्रियात् इष्टविषयात् दुःखं न संभवेत् किंतु सुखं भवेत्। अप्रियादनभि
मतात् दुःखं अधिकं भयं भवेत्। ताभ्यां प्रियाप्रियरूपविषयजन्यसुखभयाभ्यामित्यर्थः॥ ॥ ॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे षड्विंशः सर्गः॥ ॥ ॥ राम॥

रावणश्चेति। करवीरकृतस्रज इत्येतद्बहुविशेषणं। तदलमिति। अभियाचामहे अभयमिति शेषः। याचध्वं अभयमिति शेषः। अभयवचनकारणमाह। राघवादिति॥ ॥ ॥

रावणश्च मया दृष्टः क्षितौ तैलसमुक्षितः। रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः॥३७॥ विमानात्पुष्पकादद्य रावणः पतितो भुवि। कृष्यमाणः स्त्रिया दृष्टो मुंडः
कृष्णांबरावृतः॥३८॥ रथेन खरयुक्तेन रक्तमाल्यानुलेपनः। पिबंस्तैलं हसन्नृत्यन्भ्रांतचित्ताकुलेंद्रियः॥३९॥ गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थि
तः। पुनरेव मया दृष्टो रावणो राक्षसेश्वरः॥४०॥ पतितोऽवाक्शिरा भूमौ गर्दभाद्भयमोहितः। सहसोत्थाय संभ्रांतो भयार्तो मदविह्वलः॥४१॥ उन्मत्त इव
दिग्वासा दुर्वाक्यं प्रलपन्बहु। दुर्गंधं दुःसहं घोरं तिमिरं नरकोपमं॥४१॥ मलपंकं प्रविश्याशु मग्नस्तत्र स रावणः। कंठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासि
नी॥४३॥ काली कर्दमलिप्तांगी दिशं याम्यां प्रकर्षति। एवं तत्र मया दृष्टः कुंभकर्णो निशाचरः॥४४॥ प्रयातो दक्षिणामाशां प्रविष्टः कर्दमह्रदं। रावणस्य सुताः
॥४५॥ वराहेण दशग्रीवः शिंशुमारेण चेंद्रजित्। उष्ट्रेण कुंभकर्णश्च प्रयाता दक्षिणां दिशं॥४६॥ एकस्तत्र मया दृष्टः श्वेतछत्रो विभीषणः। चतुर्भिः सचिवैः
सार्धं विहायसमुपस्थितः॥४७॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः। शंखदुंदुभिनिर्घोषैर्नृत्यगीतैरलंकृतः॥४८॥ आरुह्य मेघसंकाशं मेघस्तनि
तनिस्वनं। चतुर्दंतं गजं दिव्यमास्ते तत्र विभीषणः॥४९॥ समाजश्च महातेजा गीतवादित्रनिस्वनः। पिबतां रक्तमाल्यानां रक्षसां रक्तवाससां॥५०॥ लं
का चेयं पुरी रम्या सवाजिरथसंकुला। सागरे पतिता दृष्टा भग्नगोपुरतोरणा॥५१॥ पीत्वा तैलं प्रमत्ताश्च प्रहसंत्यो महास्वनाः। लंकायां भस्मरूक्षायां स
र्वा राक्षसयोषितः॥५२॥ कुंभकर्णादयश्चेमे सर्वे राक्षसपुंगवाः। रक्तनीला संगृह्य प्रविष्टा गोमयह्रदे॥५३॥ अपगच्छत पश्यध्वं सीतामाप्स राघवः। त
दलं क्रूरवाक्यैर्वः सांत्वमेवाभिधीयतां॥५४॥ अभियाचाम वैदेहीमेतद्धि मम रोचते। यस्यामेवंविधः स्वप्नो दुःखितायाः प्रदृश्यते॥५५॥ सा दुःखैर्बहुभि
र्मुक्ता प्रियं प्राप्नोत्यनुत्तमं। भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया॥५६॥ राघवाद्धि भयं घोरं राक्षसानामुपस्थितं॥ चस्तुदुःखिता॥ ताः सर्वा विहता
शा निरुद्यमाः॥५७॥ परिक्षिप्य समस्तास्ता निद्रावशमुपागताः। तास्त्वेवं प्रसुप्तास्तु सीता भर्तृहिते रता॥५८॥ विलप्य करुणं दीना प्रशुशोच सुदुःखि
ता। तासां मध्यात्समुत्थाय त्रिजटा वाक्यमब्रवीत्॥५९॥

सु० अर्थसिद्धिं। प्रयोजनसिद्धिं। कुत इत्यत आह। राक्षसेंद्रेति। राक्षसेंद्रविनाशराघवविजयरूपं महत्प्रियं श्रोतुं एतत्स्वप्नदर्शनं। अस्या निमित्तभूतमिति संबंधः। न केवलं स्वप्नद
४० र्शनमेवास्याः शुभावेदकं। किंतु। प्रत्यक्षदर्शनमपि बह्वस्तीत्यासर्गसमाप्तेराह। अपि चेत्यादिना। अंगेषु विरूपं लक्षणं नोपलक्ष्यत इति संबंधः। छायेति। छाया वैगुण्य
कांतिवैकल्यं। वैवर्ण्यमिति यावत्। तावन्मात्रमुपलक्ष्यत इत्यनुकृष्यते। एतावतैव। अदुःखार्हा। दुःखानर्हा। प्रत्युत विहायसमुपस्थितां दिव्यभोगार्हां। इमां दृष्ट्वा दुःखमुप

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा। अलमेषा परित्रातुं राक्षस्यो महतो भयात्॥६०॥ अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थितां। राक्षसेंद्रविनाशं
च विजयं राघवस्य च॥६१॥ निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियं। दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतं॥६२॥ अपि चास्या विशालाक्ष्या न किंचिदुपलक्ष
ये विरूपमपि चांगेषु सुसूक्ष्ममपि लक्षणं॥६३॥ छाया वैगुण्यमात्रं तु शंके दुःखमुपस्थितं। अदुःखार्हामिमां देवीं विहायसमुपस्थितां॥६४॥ ईषच्च हृषि
तो वाक्षि दक्षिणः। अकस्मादेव वैदेह्या बाहुरेकः प्रकंपते॥६५॥ करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः। वेपमानः सूचयति राघवं पुरतः स्थितं॥६६॥
पक्षी च शाखानिलयं प्रविष्टः पुनः पुनश्चोत्तमसांत्ववादी। सुस्वागतां वाचमुदीरयानः पुनः पुनश्चोदयतीव हृष्टः॥६७॥ ततः सा ह्रीमती बाला भर्तुर्वि
जयहर्षिता। अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः॥ ॥ इति श्री सुंदरकांडे सप्तविंशः सर्गः॥ ॥ सा राक्षसेंद्रस्य वचो निशम्य तद्रावणस्याप्रिय
मप्रियार्ता। सीता वितत्रास यथा वनांते सिंहाभिपन्ना गजराजकन्या॥१॥ सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च। कांतारमध्ये विज
ने विसृष्टा बालेव कन्या विललाप सीता॥२॥ सत्यं बतेदं प्रवदंति लोके नाकालमृत्युर्भवतीति संतः। यत्राहमेवं परिभर्त्स्यमाना जीवामि किंचित्क्षण
मप्यपुण्या॥३॥ सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे। विदीर्यते यन्न सहस्रधाद्य वज्राहतं शृंगमिवाचलस्य॥४॥ ॥ ॥ ॥ ॥

स्थितं प्राप्तमिति शंके मन्य इत्यर्थः। ईषदिति। हृषितो वा हृषित इव। पक्षीति। पक्षी शाखानिलयं शाखास्थनीडं प्रविष्टः। उत्तमसांत्ववादी उत्तमशांतस्वरवादी। राम०
सुस्वागतां सुष्ठु शोभनमागतां मित्येवंरूपां वाचमुदीरयानः उच्चरन् पुनः पुनश्चोदयतीव शोभनप्राप्तं प्रस्फुटं ब्रूहीति सीतां पुनः पुनः प्रेरयतीवेत्यर्थ ४०
ः। इति महेश्वरतीर्थीये सुंदरकांडे सप्तविंशः सर्गः॥ ॥ सत्यमिति। यत्र। यतः॥ ॥ ॥१॥ ॥

आत्महनने दोषस्यादित्यत आह॥ नैवेति। अत्र आत्महनने मम दोषं दोषः नास्ति। कुतः वध्याहमिति॥ आत्महननाभावेपि मम रावणात्कार्तकाडमेरणस्य दुर्वारत्वाद्दोषाभावो
क्तिरिति भावः। ननु दुर्मरणाभावाय रावणानुकूलत्वं आप्यतामत आह। भावमिति। भावं चित्तं मंत्रं वदे। अद्विजाय शूद्राय। स्त्रीणां च भिचारान्मरणमेव वरं जालाकी
त्रिकरडानाष्वादारीनाममभावादिति भावः। तथाप्यात्मघातस्यापि दोषत्वात्साहममयुक्तमित्याशंक्य मत्यं विचित्रवधाद्बिभेमीत्याशयेनाह। नूनमिति। लोकनाथे रामे
अनागच्छति सति मा सह्याद्दर्वाग्निति शेषः। गर्भस्थजंतोः प्रतस्येति शेषः। अंगानि शल्यकृंतः नापित इव राक्षसेंद्रः मम जीवं त्यारवांगानि छेत्स्यतीति संबंधः। दुःखमिति। चि

नैवास्ति नूनं मम दोषमत्र वध्याहमस्याप्रियदर्शनस्य। भावं न चास्याहमनुप्रदातुमलं द्विजो मंत्रमिवाद्विजाय॥५॥ नूनं ममांगान्यचिरादनार्यः शस्त्रैः शितैश्छेत्स्यति राक्षसेंद्रः। तस्मि
न्ननागच्छति लोकनाथे गर्भस्थजंतोरिव शल्यकृंतः॥६॥ दुःखं बतेदं मम दुःखितायामासौ चिराया अभिगमिष्यतो द्वौ। बद्धस्य वध्यस्य यथा निशांते राजापराधादिव तस्करस्य॥७॥
हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्या। एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मंदवाता॥८॥ तरस्विनौ धारयता मृगस्य सत्वेन रूपं मनुजेंद्रपुत्रौ। नूनं
विशस्तौ मम कारणात्तौ सिंहर्षभौ द्वाविव वैद्युतेन॥९॥ नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीं। यत्रार्यपुत्रं विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च॥१०॥ हा
हा राम सत्यव्रत दीर्घबाहो हा पूर्णचंद्रप्रतिमानवक्त्र। हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानां॥११॥ अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे। प
तिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणां॥१२॥ मोघं हि धर्मश्चरितो मयायं तथैकपत्नीत्वमिदं निरर्थं। या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा॥१३॥
पितुर्निर्देशं नियमेन कृत्वा व्रतान्निवृत्तश्चरितव्रतश्च। स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः संरंस्यसे वीतभयः कृतार्थः॥१४॥ अहं तु राम त्वयि जातकामा चिरं विनाशाय निब
द्धभावा। मोघं चरित्वाथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितमल्पभाग्या॥१५॥ सा जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वापि। विषस्य दाता न तु मेस्ति कश्चिच्छस्त्र

राय दुःखितायाम मम इदमेव दुःखं यथा द्वौ मासौ विवक्षितौ तावप्यभिगमिष्यतो वर्तेते। राजापचाराद्ध्रस्य निशांते प्रातःकाले। वध्यस्य तस्करस्य यथा। स्य वा वेश्मनि राक्षसस्य॥१६॥ ॥ ॥
थायाहं दुःखं ताहक्षमागतमित्यर्थः। हा राम इति। मंदवाता। मंदो वातो यस्याः सा तथा। तरस्विनाविति। मृगस्य मायामृगस्य रूपं धारयता सत्वेन जंतुना वैद्युदग्निना। नूनमिति
मृगरूपधारी कालः कर्त्ता लुलुभे लोभयामास यत्र यस्मिन्काले विससर्ज यत्र अदज अनन्यदेवत्वं पत्येकदेवतात्वं कृतमुपकृतं॥१६॥

सुं० शोकाभितप्तेत्यादि सार्द्धश्लोकमेकं वाक्यं। शोकाभितप्ता सीता बहुधा विचिंत्य वेण्युद्ग्रथनं वेणीं गृहीत्वा वेण्युद्ग्रथनेन उद्बंधनं कृत्वा यमस्य मूलं गमिष्यामीति नगस्य शाखां गृहीत्वा उपस्थिता अवस्थि
४१ तेति संबंधः। तस्या इति सार्द्धमेकं वाक्यं। शोकानिमित्तानि शुभसूचकानीत्यर्थः। धैर्यार्जितानि धैर्यसंपादकानीत्यर्थः। पुरापि सिद्धान्युपलक्षितानि पूर्वमपि लब्धसंवादत्वेन दृष्टानि॥ ॥ ॥इतिश्री
महेश्वरतीर्थविरचितायां रामायणतत्त्वदीपिकायां सुंदरकांडे अष्टाविंशः सर्गः॥ तस्या इति। अरालानीव क्राणि। पक्ष्माणि। अक्षिरोमाणि। राज्या पंक्त्यावृतं पक्ष्म। क्लिलो म्रिकिंजल्केत्यमरः। वक्त्रं क्र

इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरंती। प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद॥१७॥ शोकाभितप्ता बहुधा विचिंत्य सीताथ वेण्युद्ग्रथनं गृहीत्वा। उद्बध्य वे
ण्युद्ग्रथनेन शीघ्रं अहं गमिष्यामि यमस्य मूलं॥१८॥ उपस्थिता सा मृदुसर्वगात्री शाखां गृहीत्वाथ नगस्य तस्य तस्यास्तु रामं प्रविचिंतयंत्या रामानुजं स्वं च कुलं शुभांग्याः॥१९॥ शो
कानिमित्तानि तदा बहूनि धैर्यार्जितानि प्रवराणि लोके। प्रादुर्निमित्तानि तदा बभूवुः पुरापि सिद्धान्युपलक्षितानि॥२०॥ सुंदरकांडे अष्टाविंशः सर्गः॥ ॥तथागतां तां व्यथितां व्यपेतहर्षां परि
दीनमानसां। शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपजीविनः॥१॥ तस्याः शुभं वाममरालपक्ष्मराज्यावृतं कृष्णविशालशुक्लं। प्रास्पंदतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभि
ताम्रं॥२॥ भुजश्च चार्वंचितवृत्तपीनः परार्ध्यकालागरुचंदनार्हः। अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु॥३॥ गजेंद्रहस्तप्रतिमश्च पीनस्तयोः संगतयोः सु
जातः। प्रस्पंदमानः पुनः पुरूरस्या रामं पुरस्तात्स्थितमाचचक्षे॥४॥ शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवामलाक्ष्याः। वासः स्थितायाः शिखराग्रदंत्याः किंचि
त्परिस्रंसत चारुदंत्याः॥५॥ एतैर्निमित्तैरपरैश्च सुभ्रूः संचोदिता प्रागपि साधु सिद्धैः। वातातपक्लांतमिव प्रणष्टं वर्षेण बीजं प्रतिसंजहर्ष॥६॥ तस्याः पुनर्बिंब
फलोपमोष्ठं स्वक्षिभ्रुकेशांतमरालपक्ष्म। वक्त्रं बभासे स्मितशुक्लदंष्ट्रं राहोर्मुखाच्चंद्र इव प्रमुक्तः॥७॥ सा वीतशोका व्यपनीततंद्रा शांतज्वरा हर्षविबु
द्धसत्वा। अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ॥८॥ इत्यार्षे० एकोनत्रिंशः सर्गः॥ ॥ ॥

विशालविशालशुक्लं मध्ये कृष्णं सर्वतो विशालं शुक्लं च। अभिताम्रं। अभितस्ताम्रं प्रांतरक्तमित्यर्थः। गजेंद्रेति। द्वयोर्मध्ये ऊरुः वामः इत्यनुषज्यते। शिखराग्रदंत्याः। शिखराकाराग्रदंतायाः। वासः परिस्रं
सतापर्यस्रंसत। तस्या इति। स्मितशुक्लदंष्ट्रं पंक्तिवद्धधवलदंतमित्यर्थः। सेति। व्यपनीततंद्रा निरस्तजाड्या हर्षविबुद्धसत्वा हर्षेण विकसितचित्ता सा सीता वदनेन कर्त्रा अशोभत। शुक्ले शुक्ल राम०
पक्षे॥ ॥ ॥इति श्रीमहेश्वरतीर्थीये सुंदरकांडे एकोनत्रिंशः सर्गः॥ ॥ ४१

हनूमानिति। विश्रांतः विगतव्यापारः। सीतायास्त्रिजटायाः संवादं श्रुत्वा इति शेषः। चिंतां चिंतयामास। चिंतां प्रकारेऽर्थः। चारेणेति। इदं वक्ष्यमाणं युक्तं न्याय्यं। अहमिति। आश्वासयामि आ
श्वासयिष्यामि। मयेति। समाश्वासयितुं न्याय्यः सीतासंदेशकथनेनेति शेषः। रामश्चेति शेषः। रामश्चेति। सीता किमब्रवीदित्यत्रेति करणं द्रष्टव्यं। यदि चेति। भर्त्तारं सुग्रीवमुद्योजयिष्यामि

हनूमानपि विश्रांतः सर्वं शुश्राव तत्त्वतः। सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जितं॥१॥ अवेक्षमाणस्तां देवीं देवतामिव नंदने। ततो बहुविधां चिंतां चिंतयामास वानरः॥२॥ यां कपीनां
सहस्राणि सुबहून्ययुतानि च। दिक्षु सर्वासु मार्गंते सेयमासादिता मया॥३॥ चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता। गूढेन चरता तावदवेक्षितमिदं मया॥४॥ राक्षसानां विशे
षश्च पुरी चेयमवेक्षिता। राक्षसाधिपतेरस्य प्रभावो रावणस्य च॥५॥ युक्तं तस्याप्रमेयस्य सर्वसत्त्वदयावतः। समाश्वासयितुं भार्यां पतिदर्शनकांक्षिणीं॥६॥ अहमाश्वासयाम्येनां पूर्णचं
द्रनिभाननां। अदृष्टदुःखां दुःखस्य न ह्यंतमधिगच्छतीं॥७॥ यदि ह्यहमिमां देवीं शोकोपहतचेतनां। अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत्॥८॥ गते हि मयि तत्रेयं
राजपुत्री यशस्विनी। परित्राणमपश्यंती जानकी जीवितं त्यजेत्॥९॥ मया च स महाबाहुः पूर्णचंद्रनिभाननः। समाश्वासयितुं युक्तः सीतादर्शनलालसः॥१०॥ निशाच
रीणां प्रत्यक्षमक्षमं चाभिभाषणं। कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहं॥११॥ अनेन रात्रिशेषेण यदि नाश्वास्यते मया। सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितं॥१२॥ रा
मश्च यदि पृच्छेन्मां किं मां सीताब्रवीद्वचः। किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमां॥१३॥ सीतासंदेशरहितं मामितस्त्वरया गतं। निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा।
॥१४॥ यदि चोद्योजयिष्यामि भर्त्तारं रामकारणात्। व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति॥१५॥ अंतरं त्वहमासाद्य राक्षसीनामिह स्थितः। शनैराश्वासयिष्यामि
संतापबहुलामिमां॥१६॥ अहं ह्यतितनुश्चैव वानरश्च विशेषतः। वाचं चोदाहरिष्यामि मानुषीमिह संस्कृतां॥१७॥ यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतां। रावणं मन्यमा
नां मां सीता भीता भविष्यति॥१८॥ वानरस्य विशेषेण कथं स्यादभिभाषणं। अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत्॥१९॥ मया सांत्वयितुं शक्या नान्यथेयमनिंदिता।

उद्योगं करिष्यामि। तस्य सुग्रीवस्यागमनं व्यर्थं। तदागमनपर्यंतं देव्याः प्राणानवस्थानादिति भावः। अंतरमवकाशं तासामनवधानसमयमित्यर्थः। अहमिति। अतितनुः सू
क्ष्मः। संस्कृतां गीर्वाणीं गीर्वाणभाषया व्यवहारे दोषमाशंक्य मानुषभाषयैव व्यवहर्त्तव्यमिति निश्चिनोति। यदि वाचमित्यादि श्लोकद्वयेन॥ ॥

सु० मानुषभाषया संभाषणेपि दोषोस्तीति विचारयति। सेयमिति। रूपं वानररूपं। भाषितं मानुषरूपेणा भाषितं च। ततइति। जानानां नामन्वाना। शब्दं आर्त्तेर्रवं कुर्यात्। उशाखाः। उपशाखा
४२ तः इति। उद्विग्नकारिणाः उद्वेगकारिणाः। मामिति। मां वा गृह्णीयुः मम ग्रहणं भवेद्यदि इयं च सीता अगृहीतार्था स्यात्। अविदितरामवृत्तांता स्यादिति संबंधः। उद्देशेति। उद्देशे प्रदेशे।
नष्टमार्गे अदृष्टमार्गे। विशस्त इति। कार्यसाधने सीतादर्शननिवेदनरूपकार्यकरणे कामम् इति। पारं द्रष्टुं न शक्ष्यामि युद्धश्रांतत्वादिति भावः। असत्यानीति। असत्या निअनि

सेयमालोक्य मे रूपं जानकी भाषितं तथा ॥२०॥ रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति। ततो जातपरित्रासा शब्दं कुर्यान्मनस्विनी। जानाना मां विशालाक्षी रावणं कामरूपि
णं। सीतया च कृते शब्दे सहसा राक्षसीगणः ॥२२॥ नानाप्रहरणो घोरः समेयादन्तकोपमः। ततो मां संपरिक्षिप्य सर्वतो विक्रतानं ॥२३॥ वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलं। गृह्य
शाखाः प्रशाखाश्च स्कंधांश्चोत्तमशाखिनः ॥२४॥ दृष्ट्वा च परिधावंतं भवेयुर्भयशंकिताः। मम रूपं च संप्रेक्ष्य वने विचरतो महत् ॥२५॥ राक्षस्यो भयवित्रस्ता भवेयुर्विकृतस्वराः। तत
कुर्युः समाह्वानं राक्षस्यो रक्षसामपि ॥२६॥ राक्षसेंद्रनियुक्तानां राक्षसेंद्रनिवेशने। ते शूलशरनिस्त्रिंशविविधायुधपाणयः ॥२७॥ आपतेयुर्विमर्देस्मिन्वेगेनोद्विग्नकारिणः
संरुद्धस्तैस्तु परितो विधमे रक्षसं बलं ॥२८॥ मां वा गृह्णीयुराप्लुत्य बहवः शीघ्रकारिणः। स्यादियं चागृहीतार्था मम च ग्रहणं भवेत् ॥२९॥ हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजां
। विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदं। उद्देशे नष्टमार्गेस्मिन्राक्षसैः परिवारिते। सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥३१॥ विशस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे। नान्यं पश्या
मि रामस्य सहायं कार्यसाधने ॥३२॥ विमृशंश्च न पश्यामि यो हते मयि वानरः। शतयोजनविस्तीर्णं लंघयेत महोदधिं ॥३३॥ कामं हंतुं समर्थोस्मि सहस्राण्यपि रक्षसां। न तु शक्ष्याम्यहं प्रा
प्तुं परं पारं महोदधेः ॥३४॥ असत्यानि च युद्धानि संशयो मे न रोचते। कश्च निःसंशयं कार्यं कुर्यात्प्राज्ञः ससंशयं। एष दोषो महान्हि स्यान्मम सीताभिभाषणे। प्राणत्यागश्च वैदेह्या
भवेदनभिभाषणे ॥३६॥ भूताश्चार्था विरुध्यंति देशकालविरोधिताः। विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥३७॥ ॥ ॥ ॥ ॥ ॥

च्चित जयापजयानीत्यर्थः। संशयः। संशयितोर्थः। संशयरूपकार्यकारी। मूढ इत्याशयेनाह। कइति। कः प्राज्ञः संशयं कार्यं निःसंशयः निर्विकारः सन्कुर्यात्। एष इति। एषः पूर्वो राम०
क्तजयापजययोः संशयरूपदोषः अनभिभाषणे राममंदेशानिवेदने। भूता इति। भूताः स्वार्थाः निष्पन्ना अप्यर्थाः। विक्लवमविवेकिनं दूतमासाद्य देशकालविरोधिताः संतः विपद्यते ४२
नश्यंति। अयुक्तदेशायुक्तकालप्रयुक्तत्वादिति भावः॥ ॥

अर्थानर्थांतरइति। अर्थानर्थांतरेकार्याकार्यविषयेनिश्चितापिस्वामिनामचिवैःसहनिश्चितापिबुद्धिः। अत्रविक्लवेहतमामदीयेन्यनुपद्यते। नशोभते अकिंचित्करामवतीत्यर्थः। ए
तदेवोपपादयति। घातयंतीति। आगुक्तहतदोषास्वस्मिन्यथानस्युस्तथाकर्तव्यमित्याहनेति। कार्यं। स्वामिकार्यं। विक्लवेबुद्धिहीनता। ममकथंनभवेत्। समुद्रस्यलंघनंकथं
नुदृष्टावोसमभवेत्तथाकर्तव्यमितिविशेषः। कथमिति। शृणुयान्नीनेतिशेषः। इतीति। मतिंचकारसीतासंभाषणीयायंनिश्चितवानित्यर्थः। तदेवाह। नाममिति। स्ववंधुं। स्वस्याःदेया
वंधुंनुकीर्तयनुहेतोपात्तवत्ययः। अनुकीर्त्तनाईतोः। तेनासुद्वेजयिष्यामिमद्दर्शनमंतरेणरामसंकीर्त्तनेनैवत्रनुद्विग्नांकरिष्यामीत्यर्थः। तद्बंधुगमानसांसचासौवंधु

अर्थानर्थांतरेबुद्धिर्निश्चितापिनशोभते। घातयंतिहिकार्याणिदूताःपंडितमानिनः॥३७॥ नविनश्येदिदंकार्यंविक्लवंनकथंमम। लंघनंचसमुद्रस्यकथंनुनवृथाभवेत्
॥३९॥ कथंनुखलुवाक्यंमेशृणुयान्नोद्विजेतच। इतिसंचिंत्यहनुमांश्चकारमतिमान्मतिं॥४०॥ राममक्लिष्टकर्माणंस्वबंधुमनुकीर्तयन्। नैनामुद्वेजयिष्यामि
तद्बंधुगतमानसां॥४१॥ इक्ष्वाकूणांवरिष्ठस्यरामस्यविदितात्मनः। शुभानिधर्मयुक्तानिवचनानिसमर्पयन्॥४२॥ श्रावयिष्यामिसर्वाणिमधुरांप्रब्रुवन्गिरं। श्रद्धास्यतिय
थाहीयंतथासर्वंसमादधे॥४३॥ इतिसबहुविधंमहानुभावोजगतिपतेःप्रमदामवेक्षमाणः। मधुरमवितथंजगादवाक्यंद्रुमविटपांतरमास्थितोहनूमान्॥४४॥
॥ ॥इत्यार्षेरामायणेसुंदरकांडेत्रिंशःसर्गः॥ ॥ ॥एवंबहुविधांचिंतांचिंतयित्वामहाकपिः। संश्रवेमधुरंवाक्यंवैदेह्याव्याजहारह॥१॥ राजादशरथोनामरथकुं
जरवाजिमान्। पुण्यशीलोमहाकीर्त्तिरिक्ष्वाकूणांमहायशाः॥२॥ अहिंसारतिरक्षुद्रोघृणीसत्यपराक्रमः। मुख्यस्येक्ष्वाकुवंशस्यलक्ष्मीवाँल्लक्ष्मिवर्द्धनः
॥३॥ पार्थिवव्यंजनैर्युक्तःपृथुश्रीःपार्थिवर्षभः। पृथिव्यांचतुरंतायांविश्रुतःसुखदःसुखी॥४॥ राजर्षीणांगुणश्रेष्ठस्तपसाचर्षिभिःसमः। चक्रवर्तिकुलेजातः
पुरंदरसमोबले॥५॥ तस्यपुत्रःप्रियोज्येष्ठस्ताराधिपनिभाननः। रामोनामविशेषज्ञःश्रेष्ठःसर्वधनुष्मतां॥६॥ रक्षितास्वस्यवृत्तस्यस्वजनस्यापिरक्षिता। रक्षिताजीव
लोकस्यधर्मस्यचपरंतपः॥७॥ तस्यासत्याभिसंधस्यवृद्धस्यवचनात्पितुः। सभार्यःसहचभ्रात्रावीरःप्रव्राजितोवनं॥८॥ तेनतत्रमहारण्येमृगयांपरिधावता
राक्षसानिहताःशूराःबहवःकामरूपिणः॥९॥ जनस्थानवधंश्रुत्वाहतौचखरदूषणौ। ततस्त्वमर्षापहृताजानकीरावणेनतु॥१०॥ वंचयित्वावनेरामंमृगरू
पेणमायया। समार्गमाणस्तांदेवींरामःसीतामनिंदितां॥११॥ ॥ ॥

अतद्बंधुःरामःतंगतंमानसंयस्याःसातां। इतीति। गंजेतीपतेःदीर्घभावआर्षः। जगादमनसा॥ ॥ ॥इति।
श्रीमहेश्वरतीर्थीयेसुंदरकांडेत्रिंशःसर्गः॥ ॥ ॥एवमिति। चिंतांचिंतयित्वा। चिंतांकृत्वाकर्तव्यमर्थंनिश्चित्येत्यर्थः। संश्रवे। संश्रवणे। मधुरंवैदेह्याःवैदेहीतिमित्तं। घृणी। स
म्यक्श्रूयतेस्मिन्निति संश्रवः। तस्मिन्समीपदेशेयत्रोक्तंसीतेवशृणुयात्तत्रान्यइत्यर्थः। पार्थिवव्यंजनैःपार्थिवलक्षणैः। तस्येति। सत्याभिसंधस्य। सत्यसंकल्पस्य। मृगरू

यथेति। यथारूपां। यादृग्रूपां। यादृशवर्णां। यथालक्ष्मी यादृशलक्ष्मीकां राघवस्य राघवात्। अत्रोपमेति स्थितां नूनं मेया मा सादिते त्यर्थः॥ ॥ ॥ इति श्रीमहेश्वरतीर्थविरचितायां सुंदरकांडे एकत्रिंशः सर्गः॥ ॥ ॥ त
तइति। चलितमानसा अधरितिशेषः। वेष्टिता र्जुनवस्त्रां तं संवेष्टितधवलवस्त्रस्वरूपां। येन ता वेष्टितमर्जुनं धवलं वस्त्रं यस्य सः वेष्टितार्जुनवस्त्रः तं। सेति। ददर्शी विशेषतो दर्शनत्यर्थः। सेति।
अथ सस्मा त्वने मित्रं सुग्रीवं नाम वानरं। ततः स वालिनं हत्वा रामः परपुरंजयः॥ २२॥ प्रायच्छत्कपिराज्यं तु सुग्रीवाय महात्मने। सुग्रीवेणाभिसंदिष्टा हरयः कामरूपिणः॥ २३॥ दिक्षु
सर्वासु तां देवीं विचिन्वंति सहस्रशः। अहं संपातिवचनाच्छतयोजनमायतं॥ २४॥ तस्या हेतोर्विशालाक्ष्याः समुद्रं वेगवान्प्लुतः। यथारूपां यथावर्णां यथालक्ष्मीं विनिश्चितां॥ २५॥
अश्रौषं राघवस्याहं सेयमासादिता मया। विररामैवमुक्त्वासौ वाचं वानरपुंगवः २६ जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता॥ ततः सा वक्रकेशांता सुकेशी केशसंवृतं॥ २७॥ उन्नम्य व ३४
दनं भीरुः शिंशुपामन्ववैक्षत॥ निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य॥ स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरंती॥ २८॥ सा तिर्यगूर्ध्वं च तथाप्यधस्ता
न्निरीक्षमाणा तमचिंत्यबुद्धिं। ददर्श पिंगाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थं॥ २९॥ इत्यार्षे रामायणे सुंदरकांडे एकत्रिंशः सर्गः॥ ॥ ॥ ततः शाखांतरलीनं दृष्ट्वा॥
३५ चलितमानसा। वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिंगलं॥ १॥ सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनं फुल्लाशोकोत्कराभासं तप्तचामीकरेक्षणं॥ २॥ सातं दृष्ट्वा हरिश्रेष्ठं विनी
विनीतवदुपस्थितं। मैथिली चिंतयामास विस्मयं परमं गता॥ ३॥ अहो भीममिदं सत्वं वानरस्य दुरासदं। दुर्निरीक्ष्यमिदं ज्ञात्वा पुनरेव मुमोह सा॥ ४॥ विललाप भृशं सीता करुणं भयमोहिता। राम रामे
ति दुःखार्ता लक्ष्मणेति च भामिनी॥ ५॥ रुरोद सहसा सीता मंदं मंदस्वरा सती॥ सा थ दृष्ट्वा हरिश्रेष्ठं विनीतवदुपागतं। मैथिली चिंतयामास स्वप्नोऽयमिति भामिनी॥ सा वीक्षमाणा पृथु
भुग्नवक्त्रं शाखामृगेंद्रस्य यथोक्तकारं। ददर्श पिंगप्रवरं महार्हं वातात्मजं बुद्धिमतां वरिष्ठं॥ ७॥ सा तं समीक्ष्यैव भृशं विसंज्ञा गतासुकल्पेव बभूव सीता। चिरेण संज्ञां प्रतिलभ्य चैव वि चि स्व
तयामास विशालनेत्रा॥ ८॥ स्वप्नो मयायं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः। स्वस्त्यस्तु रामाय स लक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः॥ १०॥ स्वप्नोऽपि नायं नहि॥
मेऽस्ति निद्रा शोकेन दुःखेन च पीडितायाः। सुखं हि मे नास्ति यतोऽस्मि हीना तेनेंदुपूर्णप्रतिमाननेन॥ ११॥ रामेति रामेति सदैव बुद्ध्या विचिंत्य वाचा ब्रुवती तमेव। तस्यानुरूपां च
कथां तमर्थमेवं प्रपश्यामि तथा शृणोमि॥ १२
शेषतो ददर्शेत्यर्थः। सेति। वीक्षमाणा दृष्ट्वा कंपरा कस्य स्फुतवपुः किमिति शंकया परितो वीक्षमाणेत्यर्थः। शाखामृगेंद्रस्य सुग्रीवस्य यथोक्तकारं [illegible] प्रतिमानने
न पूर्णेंदुप्रतिमाननेन। रामेति रामेति सदैव बुद्ध्या विचिंत्य तमेव राममेव वाचा ब्रुवती तस्यानुरूपां हितां तस्य चाभिवदनस्य रामानुरूपां [illegible] एव रामः
प्रपश्यामि तं च प्रकारेणैव जानामीति [illegible]॥ १२

उक्तमर्थं विवृणोति मनोरथः स्यादिति। बुध्या चिंतया मिथ्या वितर्कयामि मनोरथो न भवतीति विचारयामि किं कारणमिति चेत् तत्र सदा मनोरथस्य स्वरूपं रूप्यते ज्ञाप्यते नेनेति रूपं ज्ञापकं नास्ति हि व्यक्तः। अथवा
नरः सुव्यक्तरूपश्चायं वानरः दृश्यते तस्मान्मनोरथो न संभवतीत्यर्थः॥ ॥इति श्री महेश्वरतीर्थीये सुंदरकांडे द्वात्रिंशः सर्गः॥ ३२॥ ॥स इति। कृपणः दीनः सीतां दृष्ट्वा स्वयं कृपणोऽयमर्थः। अत्र वाक्यसी
तिंडाज्ञा ब्रह्मदारब्रह्मवरणाज्जन्यभयादृतं तत्र यात्मना प्रणायसीतैकशरणत्वेनोपकृणाच्च सीता हनूमतो रक्षमवसत्। हः स ज्ञापइत्यनुसंधेयं। अस्यार्थविशेषं [illegible] शः अमोऽर्थं आह। अहं हनूमानेव
ततः सा हिता सर्वाङ्गत्याह्निता। वक्ष्यमाणत्वादिति। अथ लिंगैरेव सीतेति निश्चित्यापि तथैव वाचा विधिनं तुं अज्ञानतिव पृच्छति। कासीत्यादिना। इयं त्वं कासि। [illegible] भवतीति कस्यसे

अहं हि तस्याद्य मनोभवेन संपीडितो नद्गतसर्वभावः। विचिंतयंती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥१३॥ मनोरथः स्यादिति चिंतयामि तथापि बुध्यापि वितर्कयामि। किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं मां ॥१४॥ नमोऽस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय। अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथास्तु नान्यथा ॥१५॥ इत्यार्षे
सुंदरकांडे द्वात्रिंशः सर्गः॥ ॥ सोऽवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः। विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥१॥ तामब्रवीन्महातेजा हनूमान्मारुतात्मजः। शिरस्यंजलिमाधाय सीतां मधुरया गिरा ॥२॥ कानु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि। द्रुमस्य शाखामालंब्य तिष्ठसि त्वमनिंदिते ॥३॥ किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजं। पुंडरीकपलाशाभ्यां विप्रकीर्णमिवोदकं ॥४॥ सुराणामसुराणां वा नागगंधर्वरक्षसां। यक्षाणां किंनराणां वा का त्वं भवसि शोभने ॥५॥ का त्वं भवसि रुद्राणां मरुतां वा वरानने। वसूनां वा वरारोहे देवता प्रतिभासि मे ॥६॥ किंनु चंद्रमसा हीना पतिता विबुधालयात्। रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणान्विता ॥७॥ का त्वं भवसि कल्याणि त्वमनिंदितलोचने। कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे ॥८॥ वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुंधती। कोनु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे ॥९॥ अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि। रोदनादतिनिश्वासाद्भूमिसंस्पर्शनादपि ॥१०॥ न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात्। व्यंजनानि हि ते यानि लक्षणानि च लक्षये ॥११॥ महिषी भूमिपालस्य राजकन्यासि मे मता। रावणेन जनस्थानाद्बलादपहृता यदि ॥१२॥ ॥ ॥

वंदितीभवसीत्यर्थः। का त्वं भवसि कल्याणि त्वमनिंदितलोचने। हे कल्याणि त्वं का। अनिंदितालोचने। हे कल्याणि त्वं का। अनिंदिलोचने त्वं का भवसीति वाक्यभेदेन
सुष्ठुश्रुपोः प्रयोगः तज्जिज्ञासातिशयद्योतनार्थः। च सिष्ठं कोपयित्वेत्यन्न पतिता विबुधालयादित्यनुषंगः। कोन्विति। अमुं लोकं। परलोकं गतं त्वमनुशोचसि किं। यं कंच
न वा। भूमिति शेषः। व्यंजनानि संस्थानविशेषविशिष्टतया उन्नमस्त्रीत्वं व्यंजकानि स्तनजघनादीनि लक्षणानि भाग्यावेदकसुरेखादीनीति ॥१२॥

सु० यथेति। यथायाद्दृशं मेति। द्रुमाश्रितं। द्रुममवलाश्रितं। सोवतीर्य द्रुमादिति। पूर्वमुक्तत्वात्। सांत्वचनामेति नामशब्दः प्रसिद्धौ। समा द्वादशेत्यत्र अन्ययव समा इति शेषः। न पिबेयमिति मम भोजन
४४ मित्यत्र अथमार्थी षष्ठी। यदीति। वाक्यं त्वदुक्तं सर्वं करिष्यामीति शपथपूर्वमुक्तमिव मिथ्यर्थः। मद्गृति गुरुकरीया। निवासं सीत्यर्थः। निवयमिति। पुराज्यहृष्टमिति छेदः। जीवितानुग्रहं जी।

सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः। यथा हि तव वैदेह्या रूपं चाप्रतिमानुषं ॥२३॥ तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवं। सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता ॥२४॥ उ
वाच वाक्यं वैदेही हनुमंतं द्रुमाश्रिते। पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः ॥२५॥ स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः। दुहिता जनकस्याहं वैदेहस्य महात्मनः
॥२६॥ सीता च नाम नाम्नाहं भार्या रामस्य धीमतः। समा द्वादश तत्राहं राघवस्य निवेशने ॥२७॥ भुंजाना मानुषान्भोगान्सर्वकामसमृद्धिनी। ततस्त्रयोदशे वर्षे राज्ये
नेक्ष्वाकुनंदनं ॥२८॥ अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे। तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥२९॥ कैकेयी नाम भर्तारं देवी वचनमब्रवीत्। न पिबेयं न खादे
यं प्रत्यहं मम भोजनं ॥३०॥ एष मे जीवितस्यांतो रामो यद्यभिषिच्यते। यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ॥३१॥ तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः। स
राजा सत्यवाग्देव्या वरदानमनुस्मरन् ॥३२॥ मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियं। ततस्तु स्थविरो राजा सत्यधर्मे व्यवस्थितः ॥३३॥ ज्येष्ठं यशस्विनं पुत्रं रुदन्
राज्यमयाचत। स पितुर्वचनं श्रीमानभिषेकात्परं प्रियं ॥३४॥ मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान्। दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतं ॥३५॥ अ
पि जीवितहेतोर्हि रामः सत्यपराक्रमः। स विहायोत्तरीयाणि महार्हाणि महायशाः ॥३६॥ विसृज्य मनसा राज्यं जनन्यै मां समादिशत्। साहं तस्याग्रतः शी
घ्रं प्रस्थिता वनचारिणी ॥३७॥ न हि मे तेन हीनाया वासः स्वर्गेपि रोचते। प्रागेव तु महाभागः सौमित्रिर्मित्रनंदनः ॥३८॥ पूर्वजस्यानुयात्रार्थे कुशचीरैरलंकृ
तः। ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ॥३९॥ प्रविष्टाः स्म पुरा दृष्टं वनं गंभीरदर्शनं। वसतो दंडकारण्ये तस्याहममितौजसः ॥४०॥ रक्षसापहृता भार्या रावणेन दुरात्मना। द्वौ
मासौ तेन मे कालो जीवितानुग्रहः कृतः ॥४१॥ ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितं ॥४२॥ ॥ ॥ इत्यार्षे रामायणे सुंदरकांडे त्रयस्त्रिंशः सर्गः ॥ ॥ तस्यास्तद्वचनं श्रुत्वा राम०
हनुमान्हरियूथपः। दुःखाद्दुःखाभिभूताया: सांत्वमुत्तरमब्रवीत् ॥१॥ ॥ ॥ ॥ ॥श्रीश्रीश्रीश्रीश्री॥ ॥ ॥ ४४

विनाभ्यनुज्ञातव्यामि। जीवितं रावणोत्याजकेमतीति भावः॥ ॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे [illegible] सर्गः ॥ [illegible] दुःखाभिभूतायाः। सांत्वं दुःखाभिभूताया इत्यर्थः॥ ॥ ॥

अहमिति। तवागतः समीपमिति शेषः। प्रीतिसंहृष्टसर्वाङ्गी पुलकितसर्वगात्री जीति तत्र हा विदुःखवाङ्कल्पे प्रियामदर्शनजन्यापाशयाकं क्रोडीकृत्य प्रदत्ता जीवन फल स्य लब्धवान् तत्सर्वाविष्टेनी गाथा श्लोको ति कल्याणीति। जी
वन्तं नरं वर्षशतादपि। वर्षशतमध्येवा आनन्द एती ति दयं लौकिकी गाथा जनवाक्यमिमां प्रतिकल्याणी सत्यार्थी अति भाति दने ति संबंधः। वेनेति हर्षोत्पत्तये ति। समागमे तेतस्मिन् हनूमति नयोक ल्याणीव
तेतस्मिन् हनूमति तया कल्याणी वृत्तत्या दिव्य दत्या देव्या अद्भुता प्रीतिरुत्पादितेति संबंधः। तस्या इति। समीपमुपक्रम्य अगं तुमिति शेषः। रामकुशलकथनेन संजात विश्वासापि रावणमायाबाहुल्यं स्मृत्वा पुन

अहं रामस्य संदेशाद्देवि दूतस्तवागतः। वैदेहि कुशली रामः त्वां च कौशलमब्रवीत् ॥३॥ यो ब्राह्ममस्त्रं वेदांश्च वेदवेदविदां वरः। भर्ता दाशरथी रामो देवि कौशलमब्रवीत् ॥४॥ लक्ष्मणश्च महातेजा भर्तुस्ते नुच
रः प्रियः। कृतवान् शोकसंतप्तः शिरसा ते भिवादनं ॥५॥ सा तयोः कुशलं देवी निशम्य नरसिंहयोः। प्रीतिसंहृष्टसर्वाङ्गी हनूमन्तमथाब्रवीत् ॥६॥ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा। एति जीवन्तमानं
दो नरं वर्षशतादपि ॥७॥ तयोः समागमे तस्मिन् प्रीतिरुत्पादिताद्भुता। परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥८॥ तस्यास्तद्वचनं श्रुत्वा हनूमान्मारुतात्मजः। सीतायाः शोकदीनायाः समीपमुपच
क्रमे ॥९॥ यथा यथा समीपं स हनूमानुपसर्पति। तथा तथा रावणं सा तं सीता परिशंकते ॥१०॥ अहो धिक्कृतमिदं कथितं हि यदस्य मे। रूपान्तरमुपागम्य स एवायं हि रावणः ॥११॥ तामशोकस्य
शाखां सा विमुक्ता शोकसंकर्शिता। तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥१२॥ हनूमानपि दुःखार्तां तां दृष्ट्वा भयमोहितां। अवंदत महाबाहुस्ततस्तां जनकात्मजां ॥१३॥ सा चैनं भयसंत्रस्ता
भूयो नैनमुदैक्षत। तं दृष्ट्वा वंदमानं च सीता शशिनिभानना। अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥१४॥ मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयं। उत्पादयसि [redacted] मे भूय एव मां भूयः संतापं
सोमतं १६ अथवा नैतदेवं हि यन्मया परिदर्शितं मनसो हितं न शोभनं ॥१५॥ स्वं परित्यज्य रूपं यः परिव्राजकरूपवान्। जनस्थाने मया दृष्टस्त्वं स एवासि रावणः ॥१६॥ उपवासकृशां दी
नां कामरूप निशाचर। संतापयसि मां भूयः संतापं न तु शोभनं ॥१७॥ अथवा नैतदेवं हि यन्मया परिशंकितं। मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥१८॥ यदि रामस्य दूतस्त्वमागतो भद्र
मस्तु ते। पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे ॥१९॥ गुणान् रामस्य कथय प्रियस्य मम वानर। चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥२०॥ ॥ ॥२॥ ॥श्री॥ ॥ ॥ ॥२॥ ॥

रविश्वसंत्याह। अहो इति। मे अस्य पुरतः स्वकथितं कथनं तदुष्कृतं अनुचितं कृतं इदमनालोच्य कथनं धिक् धिक्। अहो इति खेदे खेदहेतुमाह। रूपान्तरमिति यः पूर्वं मायया मामपाहृतवान् स एवायं रावणः
रूपान्तरमुपागम्य वर्तत इति शेषः। तामिति। अशोकस्य। अशोकवनस्य शिंशुपावृक्षस्येत्यर्थः। एवं रावणदोषात्पाह नूनं तं रावणमाशंक्य तद्दर्शनजनित मनःप्रसादमालोच्य तां शंकां निराच
ष्टे। अथवेति। मया यत्परिशंकितं एतन्नैवं हि नैव मेव। कुतः मनस इति ॥२१॥ ॥ ॥ ॥

सुं० ४५

इह रामस्तागमनमसत्यं तत्संभावितमिति मत्वा पुनर्बंधशंकिते। अहो इत्यादिना। एवं यथार्थस्वप्नपक्षो निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते किन्न्वित्यादि। चित्तमोहः निरंतररामध्यानजनित तत्प्रेषितहनुमद्दर्शनसंभाव
णादिविषयो भ्रमः। वातमतिष्कउपवासादिप्रयुक्तधातुक्षोभजातविकाररूपो भ्रम इत्यर्थः। उन्मादजो विकारः। उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः। मृगतृष्णिका सर्वशरीरिसाधारणो देशकालविशेष
जन्यस्वाप्नदोषभ्रम इत्यर्थः। बाधराहित्येन भ्रमचतुष्टयपक्षं निराचष्टे। अथवेति। अयं वानरस्तज्ज्ञापणादिप्रतिभासः। उन्मादो न भवति मोहोप्युन्मादलक्षणः। उन्मादलक्षणं यस्य मोहस्य सतथोक्तः। अतः उन्मादनि

अहो स्वप्नस्य सुखता याहमेवं चिराहृता। प्रेषितं नाम पश्यामि राघवेण वनौकसं॥२०॥ स्वप्नेपि यद्यहं वीरं राघवं सहलक्ष्मणं। पश्येयं नावसीदेयं स्वप्नोपि मम मत्सरी॥२१॥ नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वान
रं॥ न शक्योभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम॥२२॥ किन्नु स्याच्चित्तमोहोयं भवेद्वातगतिस्त्वियं। उन्मादजोपि विकारो वा स्यादियं मृगतृष्णिका॥२३॥ अथवा नायमुन्मादो मोहोप्युन्मादलक्षणः। संबुध्ये
चाहमात्मानमिमं चापि वनौकसं॥२४॥ इत्येवं बहुधा सीता संप्रधार्य बलाबलं। रक्षसां कामरूपत्वान्मेने तां राक्षसाधिपं॥२५॥ एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा। न प्रतिव्या
जहाराथ वानरं जनकात्मजा॥२६॥ सीताया निश्चितं बुद्ध्वा हनूमान्मारुतात्मजः। श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयत्॥२७॥ आदित्य इव तेजस्वी लोककांतः शशी यथा। राजा सर्वस्य लोकस्य देवो वैश्रवणो
यथा॥२८॥ विक्रमेणोदितः श्रीमान्यथा विष्णुर्महायशाः। सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा॥२९॥ रूपवान्सुभगः श्रीमान्कंदर्प इव मूर्तिमान्। स्थानक्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः॥३०॥
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः। अपकृष्याश्रमपदान्मृगरूपेण राघवं॥३१॥ शून्ये येनापनीतासि तस्य द्रक्ष्यसि यत्फलं। अचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान्॥३२॥ रोषप्रमुक्तैरिषु
भिर्ज्वलद्भिरिव पावकैः॥ ॥श्रीकृष्णायनमः॥ ॥

राकरणे नैव मोहोपि निराकृतः। उन्मादमोहयोर्निराकरणे चित्तमोहमृगतृष्णिकयोर्निराकरणं कृतमिति द्रष्टव्यं सर्वेपि पक्षा उन्मादच्छाया एव भ्रमत्वाविशेषादिति भावः। कुतः। अतआह। संबुध्य इति। यतः अह
मात्मानं इमं वनौकसं चापि संबुध्ये सम्यग्जानामि निर्बाधं जानामीत्यर्थः। इत्येवमिति। बलाबलं। बलं रक्षसां कामरूपधारणं बलं बलं रामदूतस्यापि वानरस्यागमनसामर्थ्यं अबलं संप्रधार्येत्यर्थः। मे
ने संप्रहर्षयत। संप्राहर्षयत्। स्थानक्रोधः स्थाने योग्यविषये क्रोधो यस्य सः। बाह्विति। यस्य बाहुच्छायामवष्टब्धः आश्रितः लोकः। तं राघवं मृगरूपेण आश्रमपदादपकृष्य शून्ये येन रावणेनापनीतासि राम० ४५
तस्य रावणस्य यत्फलं मरणरूपं तद्द्रक्ष्यसीति योजना॥ ॥

नाहमस्मि तथेति। नाहं मायावानरोऽस्मीत्यर्थः ॥ ४० ॥ ॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे चतुस्त्रिंशः सर्गः ॥ ॥ यानीति। लिंगानि चिह्नानि। संस्थानमवयवसंनिवेशः। रूपमाकारः। जानंनीति वेतत्याम्
चेति मां राम इतरहत इति जानंती सती दिष्ट्या मज्जाम्यवशेन परिपृच्छसीति योजना। लक्षितानि। त्वया दृष्टानि मे मनः। रूपदाक्षिण्यसंपन्नः। रूपमित्येतद्विग्रहगुणानामुपलक्षणं प्रस्तुत इत्यने

तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ॥ ३३ ॥ त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत्। लक्ष्मणश्च महातेजाः सुमित्रानंदवर्धनः ॥ ३४ ॥ अभिवाद्य महाबाहुः स त्वां कौ
शलमब्रवीत्। रामस्य च सखा देवि सुग्रीवो नाम वानरः ॥ ३५ ॥ राजा वानरमुख्यानां स त्वां कौशलमब्रवीत्। नित्यं स्मरति ते रामः ससुग्रीवः सलक्ष्मणः ॥ ३६ ॥ दिष्ट्या जीवसि वैदेहि राक्षसी
वशमागता। नचिराद्द्रक्ष्यसे रामं लक्ष्मणं च महारथं ॥ ३७ ॥ मध्ये वानरकोटीनां सुग्रीवं चामितौजसं। अहं सुग्रीवसचिवो हनूमान्नाम वानरः। प्रविष्टो नगरीं लंकां लंघयित्वा महोदधिं। कृत्वा
मूर्ध्नि पदं न्यस्य रावणस्य दुरात्मनः ॥ ३९ ॥ त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमं। नाहमस्मि तथा देवि यथा मामवगच्छसि ॥ ४० ॥ विशंका त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥ ॥
॥ ॥ इत्यार्षे रामायणे सुंदरकांडे चतुस्त्रिंशः सर्गः ॥ ॥ तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात्। उवाच वचनं सांत्वमिदं मधुरया गिरा ॥ १ ॥ क्व ते रामेण संसर्गः
कथं जानासि लक्ष्मणं। वानराणां नराणां च कथमासीत्समागमः ॥ २ ॥ यानि रामस्य लिंगानि लक्ष्मणस्य च वानर। तानि भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥ ३ ॥ कीदृशं तस्य
संस्थानं रूपं तस्य च कीदृशं। कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥ एवमुक्तस्तु वैदेह्या हनूमान्मारुतात्मजः। ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥ जानंती बत
दिष्ट्या मां वैदेहि परिपृच्छसि। भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥ यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै। लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥ ७ ॥ रा
मः कमलपत्राक्षः पूर्णचंद्रनिभाननः। रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥ ८ ॥ तेजसादित्यसंकाशः क्षमया पृथिवीसमः। बृहस्पतिसमो बुद्ध्या यशसा वासवो
पमः ॥ ९ ॥ रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता। रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः। सत्यधर्मरतः श्रीमान्संग्रहानुग्रहे रतः ॥ १० ॥ रामो भामिनि लोकस्य चातुर्वर्ण्यस्य
रक्षिता। मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥ ११ ॥ अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रतोदितः। साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणां ॥ १२ ॥ ॥ ॥ ॥ ॥

न गुणानामुत्पत्तिविशिष्टत्वमवगम्यते संग्रहेणोक्तान्गुणान्विवृणोतीति तेजसेत्यादिना। अर्चितः सद्भिरिति शेषः। ब्रह्मचर्यव्रतेनोदितः। तत्राप्रसिद्ध इत्यर्थः। प्रचारज्ञः। प्रयोगज्ञः।

स्तं० ४६

यजुर्वेदविनीतः तस्मिन्निरत इति त्यर्थः ॥ पूर्वमात्मगुणानभिधायेदानीं विग्रहगुणानाह ॥ विपुलांस इत्यादिना ॥ समः अन्यूनानतिरिक्तदेहप्रमाणः ॥ त्रिस्थिर इत्यादि ॥ त्रिस्थिरः त्रिषुस्था
नेषु स्थिरः ॥ तदुक्तं ॥ उरश्च मणिबंधश्च मुष्टिश्च नृपते स्थिरा इति ॥ त्रिःप्रलंबः त्रिषु प्रलंबः ॥ तदुक्तं ॥ प्रलंबा यस्य सव्यनी च यो मुष्कवाहवइति ॥ उक्तं वृषणांत्रिसमग्रत्तः सुसः मः ॥ तदुक्तं ॥ के
शाग्रं वृषणौ जानु समं यस्य स भूपतिरिति ॥ त्रिषु चोन्नतः ॥ तदुक्तं ॥ नाभ्यंतः कुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेदिति ॥ त्रिताम्रः त्रिषु ताम्रः ॥ तदुक्तं ॥ नेत्रांतेन खपाण्योस्तले स्तांम्र त्रिषु भिः
स्वरवीति ॥ त्रिषु स्निग्धः ॥ तदुक्तं ॥ स्निग्धा भवंति येषां पादरेखाः शिरोरुहाः ॥ तथा लिंगमणिस्तेषां महाभाग्यं विनिर्दिशेदिति ॥ त्रिषु गंभीरः ॥ तदुक्तं ॥ स्वरे सत्वे च नाभौ च गंभीरस्त्रिषु शस्य
त इति ॥ त्रिवलीवान् ॥ उदरे कंठे वा वलित्रयवान् ॥ स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ताः ॥ न चातिदीर्घा च तथांगुला च ग्रीवा च दीर्घा भवती ह वन्या इतिच्यवननः ॥
च्चीणयवानना ति विस्तृता ति यस्य सः ॥ तदुक्तं ॥ पीनोपचित निमग्नैः क्षितिपतयः चुचुकैः स्तनैः सुखितः ॥ स्निग्धा निम्नाग्ररेखा धनिनां तद्व्यत्ययेन निस्वानामिति ॥ चतुर्दंष्ट्राः चत्वा रि

राजनीत्यां विनीतश्च ब्राह्मणानामुपासिता ॥ ज्ञानवान् शीलसंपन्नो विनीतश्च परंतपः ॥ १३ ॥ यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ॥ धनुर्वेदे च वेदे च वेदांगेषु च निष्ठितः ॥ १४
विपुलांसो महाबाहुः कंबुग्रीवः शुभाननः ॥ गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः ॥ १५ ॥ दुंदुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ॥ समः समविभक्तांगो वर्णं श्यामं समाश्रितः ॥
॥ १६ ॥ त्रिःस्थिरस्त्रिःप्रलंबश्च त्रिसमस्त्रिषु चोन्नतः ॥ त्रिताम्रस्त्रिषु च स्निग्धो गंभीरस्त्रिषु नित्यशः ॥ १७ ॥ त्रिवलीवांस्त्र्यवनतश्चतुर्व्यंगस्त्रिशीर्षवान् ॥ चतुष्कलश्चतुर्लेखश्चतुष्कि
ष्कुश्चतुःसमः ॥ १८ ॥ ॥ ॥

र्थ्यः ॥ तिह्रस्वा ति यस्य सः ॥ तदुक्तं ॥ ग्रीवा प्रजननं पृष्ठं ह्रस्वं जंघा च पूज्यत इति ॥ त्रिशीर्षवान् ॥ आवर्तत्रययुक्त शीर्षवानित्यर्थः ॥ तदुक्तं ॥ आवर्तत्रयं दक्षिणं यस्य शिरः क्षितिपतिं मन्ये तं ह्य इ
ति ॥ चतुष्कलः चतस्रः कला यस्य सः ॥ चतस्रः कला श्चित्वा रो वेदाः ॥ अत्र कला शब्देन तत्वा त्रिमच कां गुष्ठमूलगता श्चतस्रो रेखा उच्यंते ॥ तदुक्तं ॥ मूले गुष्ठस्य वेदानां [illegible] वा
एका द्वे वाथवा यो गरेखाश्चेया द्विजन्मनामिति ॥ चतुर्लेखः ललाटे पदयोः पाण्यो श्चतस्रो रेखा यस्य सः ॥ ललाटे यस्य सः ॥ ललाटे यस्य दृश्यंते [illegible] रेखाः ॥ शतवर्षा
स्तस्यायुर्विंशतिस्तथेति ॥ यस्य पादतले वज्रध्वजवज्रांकुशोपमाः रेखाः सम्यक् प्रजायंते समस्तं [illegible] दिशति ॥ पाण्यो श्चतस्रो रेखा यस्य [illegible] राइति ॥ चतु
ष्किष्कुः ॥ चत्वारः किष्कवः प्रमाणं यस्य सः ॥ तथोक्तं ॥ किष्कुश्च [illegible] ॥ चतुःसमः ॥ तदुक्तं ॥ बाहु जानु [illegible] च
त्वार्यथ समानि [illegible] ति ॥ ॥ श्रीकृष्णाय नमः ॥ ॥

राम० ४६

चतुर्दश समप्रमाणा चतुर्दशांगद्वंद्वयुक्त इत्यर्थः। तदुक्तं। भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चुचुके। कर्पूरे मणिबंधौ च जानुनी वृषणौ करौ। पादौ स्फिचौ ज्ञेयः समः पतिरिति। स्फि
चौ। पृष्ठे। बाह्वे। कर्णेत्ति भ्रूश्च नासाः तोष्ठौ स्कंधजत्रु पाणिपादौ कपोलस्तनौ तु स्फिचौ द्वे वा चतुर्दशेति। समाः स्युः परिषंते कश्चिह्नोपचितत्वाथेति। चतुर्दंष्ट्रः दंतपंक्तिद्वयेच निपा
र्श्वचतस्रश्चतस्रो दंष्ट्रा दंतविशेषा यस्य स तथोक्तः। यद्वा दंतपंक्तिद्वयं। दंतपंक्तिद्वयोपि मध्यदंतचतुष्कमभितो द्वौ द्वौ दंतविशेषा दंष्ट्राभिधीयंते। चतुर्गतिः चतसृणां सिंहशार्दूलगजवृषभाणां ग
तिरिव गतिर्यस्य सः। महौष्ठहनुनासश्च ओष्ठश्च हनुश्च भुजौ वक्षस्तुमदिंवफलारुणामांसलत्वं। हनोस्तु परिपूर्णतां मांसलत्वं तत्वां नासिका या दीर्घत्वं उच्चत्वं। तदुक्तं। बिंबोष्ठी
वक्षस्थलोपमा धरो मांसलोरुविरविंबरूपश्च। पूर्णांगो मलहनुश्च भुजमिप स्तनुभिपस्थंग तुंडरू चिराक्षि तिस्रश्चेति। तुंडमिति नासिकोच्यते। पंचस्निग्धः पंच स्निग्धाः। तदुक्तं। वाग
ऋन त्वग्लोमानि त्वचा तिचेति। अष्टवंशवान् अष्टौ वंशा आयता यस्य संतीत्यष्टवंशवान्। तदुक्तं। बाहू चनलकौ चा पृष्ठं जंघे चेत्यष्टवंशका इति। नलकौ अंगुली। दशपद्मः दशपद्माकारा अव
यवा यस्य सः तथोक्तः। तदुक्तं। उरःस्तनेत्रास्य जिह्वोष्ठतालुस्तननखौ करौ पादौ चेत्यदशपद्मानि पद्माकाराणि यस्य चेति। दशहस्तः। तदुक्तं। शिरो ललाटश्रवणौ ग्रीवा वक्षश्च हस्तयोः। उदरं

चतुर्दशसमद्वंद्वश्चतुर्दंष्ट्रश्चतुर्गतिः। महौष्ठहनुनासश्च पंचस्निग्धोऽष्टवंशवान्॥१९॥ दशपद्मो दशहस्तस्त्रिव्याप्तो द्विशुक्लवान्। षडुन्नतो नवतनुस्त्रिभिर्व्याप्तोऽतिराघवः॥२०॥
सत्यधर्मरतः श्रीमान्निग्रहानुग्रहेश्वरः। देशकालविभागज्ञः संग्रहानुग्रहेक्षतः॥२१॥ ख्यातावास्य च हैमातुः सौमित्रिरपराजितः। अनुकारेण रूपेण गुणैश्चैव तथाविधः॥२२॥ ता
वुभौ नरशार्दूलौ दर्शनमधुरत्वकौ। विविधं [illegible] महीकांतं स्वामिभिः सह संगतौ॥ ॥२३॥ ॥ ॥ ॥ ॥ ॥ श्रीकृष्णायनमः॥ ॥ ॥

पाणिपादौ च पृष्ठं दशहस्तं तिचेति। त्रिभिर्व्याप्तः। त्रिभिर्व्याप्तस्थ्य स्याने जसायशायाशाश्रियेति। द्विशुक्लवान्। द्वौ शुक्लौ द्वौ मातृपितृवंशौ यस्य सः। तदुक्तं। द्वौ शुद्धौ द्वौ शौतस्य भोशु
द्धौ वंशौ मातुः पितुस्तथेति। षडुन्नतः। तदुक्तं। कक्षकुक्षिस्तनवक्षघ्राणस्कंधौ ललाटिका। सर्वभूतेषु निर्दिष्टा उन्नताः षट् शुभप्रदा इति। नवतनुः नवसु स्थानेषु तनुः। तदुक्तं। सू
क्ष्माण्यंगुलिपर्वाणि केशरोमनखत्वचः। शोफस्पर्शौ सूक्ष्मानि येन नरा दीर्घजीविनः। अस्कंदिताः ग्रास्तत्त्रयं। सौख्यसुभगत्वं च मतं तं विधं सुखाह्वकः। स्वल्पावुद्धिश्च येन नरः स सुखी
भवेदिति। त्रिभिर्व्याप्तोतीति। त्रिभिः पूर्वाह्नापराह्नमध्याह्नैः कालैः धर्मार्थकामाना नो नित्यं पुनिष्ठति त्रिभिर्व्याप्तोति। तदुक्तं वाह्ने धर्मार्थ कामाः कालेषु त्रिषु यस्य तत्र
स्थिता इति। नव। त्रिभिः त्रिषु चोन्नतः। त्रिषु स्निग्धः। त्रिभिर्व्याप्तः इत्युक्तं प्राक्। इह तु चतुः समः षडुन्नतः पंचस्निग्धः त्रिभिर्व्याप्तोऽतीत्युच्यते। सत्यं। तेन भेदमाश्रित्योक्तत्वाद्दोषः।
अन्येषामप्येवं विधानां सकलशास्त्रोक्तमहापुरुषलक्षणानां एकः सकलगुणारामो रामः एवं लक्ष्मणमिति सूचनाय। संग्रहानुग्रह इति संग्रहमार्जनं। अनुग्रहः फलादानं। ग्र
तेति। हैमातुः हेमाभोरपत्यं पुमान् हैमातुः॥ ॥ ॥

सुं० ४१

न्यामिति मृगपतितं सुग्रीवमब्रवीत् पितरं नाम सत्ता हितिशेषः स्वयमिति। परिचर्यामहे। परिचर्यामहे। एकृत्वा आस्महे तिष्ठामहे इति पाणिना विन्यस्य दृष्टं तत्त्व मार्गी। पश्यतस्तानि। तान्याभरणानि शो
त्वामेवमार्गमाणौ तौ विचरंतौ वनस्थली। दृष्ट्वा तु दृष्ट्वा पतितं रत्नजैनावरोपितं ॥२४॥ ऋष्यमूकस्य पृष्ठे तु बहुपादपसंकुले। भ्रातुर्भयार्त्तमासीनं सुग्रीवं मयदर्शिनं ज्ञानं सुग्रीवं सत्य
संगरं परिचर्यामहे राज्यात्पूर्वजेनावरोपितं ॥२६॥ ततस्तौ वीरसमन्मत्तौ भुजश्च वरपाणिनौ। अथ स्वमुपयातौ कस्य शैलस्य पार्श्वदेशमुपागतौ ॥२७॥ ततो हृष्टमानस्त्वाद्यो ॥
सुग्रीववचनात्स भूत्विनौ वानरर्षभः। अभिज्ञातो गिरिस्तस्य शिखरं भयमोहितः ॥२८॥ ततः शाखिवितीवितावानरेंद्रो व्यवस्थितः। ततोसमीपे मामेवप्रेषयामास सत्वरं ॥२९॥
तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू। रूपलक्षणसंपन्नौ कृतांजलिरुपस्थितः ॥३०॥ तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ। पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ
॥३१॥ निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने॥ तयोरन्योन्यसंभाषाद्भृशं प्रीतिरजायत ॥३२॥ ततस्तौ कीर्तिसंपन्नौ हरीश्वरनरेश्वरौ ॥३३॥ ततः सांत्वयामासस्तु॥
ग्रीवं लक्ष्मणाग्रजः स्त्रीहेतोर्वालिना भ्रात्रा निरस्तः पुरुतेजसा ॥३४॥ ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः॥ लक्ष्मणो वानरेंद्राय सुग्रीवाय न्यवेद॥
यत ॥३५॥ स श्रुत्वा वानरेंद्रस्तु लक्ष्मणेनेरितं वचः। तदासीन्निष्प्रभोत्यर्थं ग्रहग्रस्त इवांशुमान् ॥३६॥ ततस्त्वद्गात्रशोभीनि रक्षसा ह्रियमाणया। यान्याभर॥
णजालानि पातितानि महीतले ॥३७॥ तानि सर्वाणि रामाय आनीय हरियूथपाः। संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव। तानि रामाय दत्तानि॥
नि मयैवोपहृतानि च। स्वनवंत्यवकीर्णानि तस्मिन्विहतचेतसि ॥३९॥ तानि सर्वाणि यानि कृत्वा बहुविधं तव। तेन देवप्रकाशेन देवेन परिदेवितं ॥४०॥
पश्यतस्तानि रुदतः ताम्यतश्च पुनः पुनः। प्रादीपयन्दाशरथेस्तानि शोकहुताशनं ॥४२॥ शयितं च चिरं तेन दुःखार्तेन महात्मना। मयापि विविधैर्वाक्यैः
कृच्छ्रादुत्थापितः पुनः ॥४३॥ तानि दृष्ट्वा महार्हाणि दर्शयित्वा मुहुर्मुहुः॥ राघवः सहसौमित्रिः सुग्रीवे संन्यवेशयत् ॥४४॥ स त्वाददर्शनादार्ये राघवः
परितप्यते। महता ज्वलता नित्यमग्निनेवाग्निपर्वतः॥ त्वत्कृते तमनिद्रा च शोकश्चिंता च राघवं। तापयंति महात्मानमग्न्यगारमिवाग्नयः॥ ४५ तवाद
र्शनशोकेन राघवः प्रविचाल्यते। महता भूमिकंपेन महानिव शिलोच्चयः ॥४६॥ काननानि सुरम्याणि नदीः [illegible] प्रस्रवणानि च। चरन् रतिमनासाद्य त्वामपश्य
न्नामरणाणि शोकं कृतो प्राणं प्रापयन्निति संशयः॥ तवेति [illegible] आस्या वा सपर्वतः॥ ॥४४॥ ॥ ॥ श्री रामाय नमः

१५ततोदृष्ट्वा१
न्नृपात्मजे ४७ स त्वामनुजशार्दूलं क्षिप्रं प्राप्स्यति राघवः। समित्रबांधवं हत्वा रावणं जनकात्मजे ४८ ॥

राम ४१

ततइति। सुग्रीववचनादुग्राः सुग्रीवाज्ञाभीता इत्यर्थः ॥५४॥ तेषामिति। विप्रनष्टानां बिलनिर्गमनमार्गा[illegible]नामित्यर्थः। ततइति का[illegible] सुग्रीवक[illegible]मास [illegible]। कपिराज

सहितौ रामसुग्रीवावुभावकुरुतां तदा ॥ समयं वालिनं हंतुं तव चान्वेषणं प्रति ॥५०॥ ततस्ताभ्यां कुमाराभ्यां वाराभ्यां स हरीश्वरः। किष्किंधां समुपागम्य वाली युधि निपातितः ॥५१॥ ततो निहत्य तरसा रामो वालिनमाहवे। सर्वेषां हरिसंघानां सुग्रीवमकरोत्पतिं। रामसुग्रीवयोरैक्यं देव्येवं समजायत। हनूमंतं च मां विद्धि तयोर्दूतमुपागतं ॥५२॥ स्वराज्यं प्राप्य सुग्रीवः समानीय महाकपीन् ॥५३॥ त्वदर्थं प्रेषयामास दिशो दश महाबलान्। आदिष्टा वानरेंद्रेण सुग्रीवेण महौजसा। अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीं। ततस्ते ॥ मार्गमाणा वै सुग्रीववचनातुराः ॥५५॥ चरंति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ अंगदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः ॥५६॥ प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः। तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे ॥५७॥ भृशं शोकपरीतानामहोरात्रगणा गताः। ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च ॥५८॥ भयाच्च कपिराजस्य प्राणांस्त्यक्तुं व्यवस्थिताः। विचित्य गिरिदुर्गाणि नदीप्रस्रवणानि च ॥५९॥ अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं व्यवस्थिताः। दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुंगवान् ॥६०॥ भृशं शोकार्णवे मग्नः पर्यदेवयदंगदः। तव नाशं च वैदेहि वालिनश्च तथा वधं ॥६१॥ प्रायोपवेशमस्माकं मरणं च जटायुषः। तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षतां ॥६२॥ कार्यहेतोरिहायातः शकुनिर्वीर्यवान्महान्। गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥६३॥ श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत्। यवीयान्केन मे भ्राता हतः क्व च विनाशितः ॥६४॥ एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥ अंगदोऽकथयत्तस्य जनस्थाने महद्वधं ॥६५॥ रक्षसा भीमरूपेण त्वामुद्दिश्य यथातथं ॥ जटायोस्तु वधं श्रुत्वा दुःखितः सोऽरुणात्मजः ॥६६॥ त्वामाह स वरारोहे वसंतीं रावणालये। तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्धनं ॥६७॥ अंगदप्रमुखाः सर्वे ततः संप्रस्थितास्ततः। विंध्यादुत्थाय संप्राप्ताः सागरस्यांतमुत्तमं ॥६८॥ त्वद्दर्शने कृतोत्साहा हृष्टास्तुष्टाः प्लवंगमाः ॥ अंगदप्रमुखाः सर्वे वेलोपांतमुपागताः ॥६९॥

स्यात् कपिराजात्। दृष्ट्वेत्यादि सार्द्धमेकं वाक्यं। अत्र द्वितीयांतानां दृष्ट्वा पर्यदेवयदिति संबंधः। तेषामिति। स्वामिसंदेशात्। मासादूर्ध्वमनागतानां वध एवेति सुग्रीववचनात्। मुमूर्षतां मर्तुं ॥६२॥

दिष्ट्याहमिति । तवाभिगमशंसनात् । वनसमीपप्राप्तिशंसनात् । तवाभिगमशंसनादिति पाठे । नवदर्शनशंसनात् । बुध्यस्व पवनात्मजमिति । पवनात्मजत्वं न प्रतिपादितं । वानरस्य तव प
वनात्मजत्वं कथमित्याकांक्षायामाह । कौरज इत्यादिना । गच्छति । अगच्छत् । दिष्टः । आदिष्टः । नियुक्तः । शंबसादनं । शंबसादन इति कश्चिदसुरः । उद्धरत् । उदहरत् । अवधारितार्थः । ह

चिंतां जग्मुः पुनर्दीनाः त्वद्दर्शनसमुत्सुकाः । अथाहं हरिसैन्यानां सागरं दृश्य सीदतां ॥ ७० ॥ व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः । लंकायाश्चापि मया रात्रौ प्रविष्टा राक्षसाकुला ॥ ७२ ॥ रावणश्च
मया दृष्टस्त्वं च शोकनिपीडिता । एतत्ते सर्वमाख्यातं यथावृत्तमनिंदिते । अभिभाषस्व मां देवि दूतो दाशरथेरहं । त्वां तु रामकृतोद्योगं त्वन्निमित्तमिहागतं ॥ ७३ ॥ सुग्रीवसचिवं देवि बु
ध्यस्व पवनात्मजं । कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः ॥ ७४ ॥ गुरोराराधने युक्तो लक्ष्मणः शुभलक्षणः । तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥ ७५ ॥ अहमेकस्तु संप्राप्तः
सुग्रीववचनादिह । मयेयमसहायेन चरता कामरूपिणा ॥ ७६ ॥ दक्षिणा दिगनुक्रांता त्वन्मार्गविचयैषिणा । दिष्ट्याहं हरिसैन्यानां त्वन्नाशमनुशोचतां ॥ ७७ ॥ अप
नेष्यामि संतापं तवाभिगमशंसनात् । दिष्ट्या हि न मम व्यर्थं सागरस्येह लंघनं ॥ ७८ ॥ प्राप्स्याम्यहमिदं दिष्ट्या त्वद्दर्शनकृतं यशः । राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥ ७९ ॥
सपुत्रबांधवं हत्वा रावणं राक्षसाधिपं । कौरजो नाम वैदेहि गिरीणामुत्तमो गिरिः ॥ ८० ॥ ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ॥ स च देवर्षिभिर्दिष्टः पिता मम
महाकपिः ॥ ८१ ॥ तीर्थे नदीपतेः पुण्ये शंबसादनमुद्धरत् । तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ॥ ८२ ॥ हनूमानिति विख्यातो लोके स्वेनैव कर्मणा ॥ विश्वासार्थं तु वैदेहि भर्तुरुक्ता म
या गुणाः ॥ ८३ ॥ अचिराद्राघवो देवि त्वामितो नयितानघे । एवं विश्वासिता सीता हेतुभिः शोककर्शिता ॥ ८४ ॥ उपपन्नैरभिज्ञानैर्दूतं तमवगच्छति । अतुलं च गता हर्षं प्रहर्षेण तु जानकी ॥ ८५ ॥
नेत्राभ्यां वक्रपक्ष्माभ्यां मुमोचानंदजं जलं ॥ चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणं ॥ ८६ ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ हनूमंतं कपिं व्यक्तं मन्यते नान्यथेति सा ॥ ८७ ॥
अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनां ॥ एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि ॥ ८८ ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहं ॥ हतेऽसुरे संयति शंबसादने कपिप्रवीरेण म
हर्षिचोदनात् । ततोऽस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ३५ ॥ ॥ इत्यार्षे रामायणे सुंदरकांडे पंचत्रिंशः सर्गः ॥ राम॰

रिणः हरेः क्षेत्रे तत्पत्न्यां केसरिण इत्यर्थः । नैतानेतां । एवमिति । अवगच्छति । अवागच्छत् । मन्यते । अमन्यत । देवि नियुक्तार्थकरणे त्वमाश्वसिहि ... स्वमहात्म्यमाह । ह ४८
तेऽसुर इति ॥ इति श्रीमहेश्वरतीर्थविरचितायां तत्त्वदीपिकायां सुंदरकांडे पंचत्रिंशः सर्गः ॥

संदेशकथनादिना देवीं विश्वास्य अभिज्ञानांगुलीयकप्रदानेनापि दृढं विश्वासयितुं वानरोहमित्यादि ॥ ततः क्षीणदुःखफलाया ते हर्षं कथयेत्यर्थः । अर्हसीति । पद्यपीत्पवग्रा
णीं मया समभिभाषितुं अर्हसि यद्यपि अर्हस्येवेत्यर्थः । कुतः विदितात्मना रामेण प्रेषित इति संबंधः । यद्वा अप्यवधारणे यदि एव स्माहितात्मना रामेण प्रेषितः

भूय एव महातेजा हनूमान्पवनात्मजः ॥ अब्रवीत्प्रश्रितं वाक्यं सीतां प्रत्ययकारणात् ॥१॥ वानरोहं महाभागे दूतो रामस्य धीमतः । रामनामांकितं चेदं पश्य देव्यंगुलीयकं
॥२॥ प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना । समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥३॥ गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणं । भर्तारमिव संप्राप्ता जानकी मु
दिताभवत् ॥४॥ चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणं । अशोभत विशालाक्ष्याः राहुमुक्त इवोडुराट् ॥५॥ ततः सा ह्रीमती बाला भर्तुः संदेशहर्षिता । परितुष्टा प्रियं कृत्वा प्र
शशंस महाकपिं ॥६॥ विक्रांतस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ॥ येनेदं राक्षसपदं त्वयैकेन प्रधर्षितं । शतयोजनविस्तीर्णः सागरो मकरालयः ॥ विक्र
मश्लाघनीयेन क्रमता गोष्पदीकृतः ॥८॥ नहि त्वां प्राकृतं मन्ये वानरं वानरर्षभ । यस्य ते नास्ति संत्रासो रावणादपि संभ्रमः ॥९॥ अर्हसे च कपिश्रेष्ठ मया समभिभाषि
तुं । यद्यसि प्रेषितस्तेन रामेण विदितात्मना ॥१०॥ प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितं । पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥११॥ दिष्ट्या स कुशली रामो धर्मात्मा
सत्यवत्सलः । लक्ष्मणश्च महातेजाः सुमित्रानंदवर्धनः ॥१२॥ कुशली यदि काकुत्स्थः किं नु सागरमेखलां । महीं दहति कोपेन युगांताग्निरिवोत्थितः ॥१३॥
अथवा शक्तिमंतौ तौ सुरामेण विदितात्म मपि निग्रहे । ममैव तु न दुःखानामस्ति मन्ये विपर्ययः ॥ सुतः ॥१४॥ कच्चिच्च व्यथते रामः कच्चिन्न परितप्यते ॥ उत्त
उ राणि च कार्याणि कुरुषोत्तमः ॥ अथवा शक्तिमंतौ न कच्चिन्न दीनः संभ्रांतः कार्येषु च न मुह्यति । कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥१६॥
द्विविधं त्रिविधोपायमुपायमपि सेवते । विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परंतपः ॥१७॥ कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते । कच्चित्कल्याणमि
त्रैश्च मित्रैश्चापि पुरस्कृतः ॥१८॥ कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः । कच्चित्पुरुषकारं च दैवं च प्रतिराघवः ॥२०॥ कच्चिन्न विगतस्नेहो

तस्मान्मया समभिभाषितुं अर्हस्येवेति संबंधः । उत्तराणि च कार्याणि पुरुषकारान् द्विविधमिति सुहृत्परंतप रामः । विजिगीषुः सन् त्रिविधोपायं सामदानभेदद
रूपमुपायं उपायमपि दंडोपायमपि मित्रेषु च कारादमित्रेषु च द्विविधं यथा भवति तथा सेवते । धवित् मित्रेषु सामदाने । अमित्रेषु भेददंडौ चेत्येवं विभज्य प्रयुक्तो कच्चित् ॥ १०

विवासान्मयि राघवः । कच्चिन्मां व्यसनादस्मा
विचिंतितराघवः ॥ १०॥

स्खलोनामिति। अनुचितएवअस्मेनोचितः उत्तरंदुःखमुत्तरमष्टंदुःखंमामविभिन्नेनेति। शोकेनराघवदूति। पतिष्यतइतिशेषः। हेमहो समानवर्णहेमवत्स्पृहणीयवर्णमि
त्यर्थः। धर्मोपदेशाद्धर्मोहृष्टेनधर्मघद्दिष्यतिपावात्। राज्यत्यागात्। वाव्यथामनस्खलनं। अरण्यसंचारात्। क्षितिःसीताणादसंचाराद्धोकः। यस्यनोस्तिसः हृदयेवैपर्कयेरेवि
कञ्चिदितिसंबंधः। इदानींधेर्यकारणेकिंकारणामित्याशंक्यमद्वियोगस्वकारणमित्याशयेनाह। नचास्येति। अस्यरामस्यअस्मिन्समयेमताचस्नेहान्मनोवि
शिष्टानामयानसमाचनयथाअहमास्मितथापिताचनभवतीत्यर्थः। अतएवस्वप्नमिदानयनोघोगवानीइतिवेतिरामार्थयुक्तंरामएवाभिधेयः। तथाच
मत्वामिति। शचीपुरंदरइवेति। अनुदृतोताशचीपुरंदरः। कंचित्का॥।

सभावोभीरुचिरोनित्यमसत्वोनामन्दचिताः। इःखमुत्तरमासाद्यकच्चिद्धात्मेननंदति॥ २१॥ कौसल्यायाश्चकच्चिद्वितमित्रायास्तथैवच। अभीक्ष्णंश्रूयतेक
च्चित्कुशलंभरतस्यच॥ २२॥ मन्निमित्तेनमानार्हः कच्चिच्छोकेनराघवः। कच्चिन्नान्यमनारामः कच्चिन्मांतारयिष्यति॥ २३॥ कच्चिदक्षौहिणींभीमांभरतोभ्रातृवत्सलः।
ध्वजिनींमन्त्रिभिर्गुप्तांप्रेषयिष्यतिमत्कृते॥ २४॥ वानराधिपतिःश्रीमान्सुग्रीवः कच्चिदेष्यति। मत्कृतेहरिभिर्वीरैर्वृतोदन्तनखायुधैः॥ २५॥ कच्चिच्चलक्ष्मणःशू
रःसुमित्रानन्दवर्धनः। अस्त्रविच्छरजालेनराक्षसान्विधमिष्यति॥ २६॥ रौद्रेणकच्चिदस्त्रेणरामेणनिहतंरणे। द्रक्ष्याम्यल्पेनकालेनरावणंससुहृज्जनम्॥ २७॥ क
च्चिन्नतद्धेमसमानवर्णंतस्याननंपद्मसमानगन्धि। मयाविनाशुष्यतिशोकदीनंजलक्षयेपद्ममिवातपेन॥ २८॥ धर्मापदेशात्त्यजतश्चराज्यंमांचाप्यरण्यंनयतः
पदातिं। नासीद्व्यथायस्यनभीर्नशोकःकच्चित्सधैर्यंहृदयेकरोति॥ २९॥ नचास्यमातानपितानचान्यःस्नेहाद्विशिष्टोस्तिमयासमोवा। तावद्ध्यहंदूतजिजीविषेयं
यावत्प्रवृत्तिंशृणुयांप्रियस्य॥ ३०॥ इतीवदेवीवचनंमहार्थंतंवानरेन्द्रंमधुरार्थमुक्त्वा। श्रोतुंपुनस्तस्यवचोभिरामंरामार्थयुक्तंविररामरामा॥ ३१॥ सीतायावचनंश्रु
त्वामारुतिर्भीमविक्रमः। शिरस्यञ्जलिमाधायवाक्यमुत्तरमब्रवीत्॥ ३२॥ नत्वामिहस्थांजानीतेरामःकमललोचनः। तेनत्वांनानयत्याशुशचीमिवपुरंदरः॥ ३३॥ श्रुत्वैव
तुवचोमह्यंक्षिप्रमेष्यतिराघवः। चमूंप्रकर्षन्महतींहर्यृक्षगणसंकुलाम्॥ ३४॥ विष्टम्भयित्वाबाणौघैरक्षोभ्यंवरुणालयम्। करिष्यतिपुरींलङ्कांकाकुत्स्थःशान्तराक्षसाम्॥
॥ ३५॥ तत्रयद्यन्तरामृत्युर्यदिदेवाःसहासुराः। स्थास्यन्तिपथिरामस्यसतानपिवधिष्यति॥ ३६॥

लमविज्ञायततोज्ञात्वायथाश्रुतेनीतवान्नतद्विदित्यर्थः। श्रुत्वेति। मह्यममवचिष्टंभयित्वाबद्धेत्यर्थः। ततिनितत्त्वदानयनात्प्रकालेन्द्रादयदिश्अंतरापथिरामस्यस्थास्यतिदे
वायदिस्थास्यन्तिविघ्नकारित्वेनेतिशेषः। तानपिवधिष्यतीतियोजना॥ ३६॥।॥ ॥ ।।

स्वोक्तार्थे देवविश्वासार्थं चोपजीव्यनिवासफलमूलादिनाशपृथक्करोति। ददुरिणेति। दर्दुरे गां पर्वतनायशगामस्य मुखं सकाशि अभिनर्थे दर्दुरादिनाशपो। विश्वासयामीति श्लोक
त्रयस्य संबंधः॥ नागराजस्येरावतस्यानागस्य छायेति पाठे स्वर्गापरीत्यर्थः। न मां सामिति। वन्यं मूलफलादि। कं स्तु विहितं परिग्राह्यं तेन आरण्यकशास्त्रचोदितं। भक्तं अश्नाति पंचमे।
पंचानामन्नानां पूरणं वानप्रस्थाहि मूलफलादिकं पंचधा कृत्वा देवपि अतिथि भूतेभ्यस्तत्र गानूदत्वायं चंमेस्वयं भुंक्तेपंचमकालसिद्धं। पंचममितिवा॥ प्रातः संगवमध्यान्हापरा
ह्णसायाह्न पंचमकालेषु चतुर्थेषु भोजनकालानतीत्य पंचमकाले भुंक्ते इत्यर्थः। यद्वा। षोडशाहारापवातिन इत्युक्तत्वानप्रस्थभोज्यस्य पंचमांशं भुंक्ते। अनेनरामस्याल्पाहारतोक्ता॥ ९८
तवादर्शनजेनार्थेः शोकेन स परिप्लुतः। न शर्मलभते रामः सिंहार्दित इव द्विपः॥ ३७॥ मंदरेण यतेदेविशपे मूलफलेन च मालयेन च विंध्येन मेरुणा दर्दुरेण च॥ ३८॥ यथा॥
स्तु नयनं नवनगु विबोधं चारुकुंडलं। मुखं ते द्रक्ष्यसि रामस्य पूर्णचंद्रमिवोदितं॥ ३९॥ क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ। शतक्रतुमिवासीनं नागपृष्ठस्य मूर्धनि॥ ४०॥
न मांसं राघवो भुंक्ते न चापि मधु सेवते। वन्यं सुविहितं नित्यं भक्तमश्नाति पंचमं॥ ४१॥ नैव दंशान्न मशकान्न कीटान्न सरीसृपान्॥ राघवोऽपनयेद्गात्रात्त्वद्गतेनान्तरात्मना॥ ४२॥
नित्यं ध्यानपरो रामो नित्यं शोकपरायणः। नान्यच्चिंतयते किंचित्स तु कामवशं गतः॥ ४३॥ अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः। सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते॥ ४४॥
दृष्ट्वा फलं वा पुष्पं वा यद्वान्यत्स्त्रीमनोहरं॥ बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते॥ ४५॥ स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः॥ दृढव्रतो राजसुतो महात्मा।
तवैव लाभाय कृतप्रयत्नः॥ ४६॥ सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका। शरन्मुखे साम्बुदशेषचंद्रा निशेव वैदेहसुता बभूव॥ ४७॥ इत्यार्षे रामाय॥
णे सुंदरकांडे षड्त्रिंशः सर्गः॥ ॥ सा सीता वचनं श्रुत्वा पूर्णचंद्रनिभानना। हनूमंतमुवाचेदं धर्मार्थसहितं वचः॥ १॥ अमृतं विषसंपृक्तं त्वया वानर भाषितं। यच्च नान्यमना॥
रामो यच्च शोकपरायणः॥ २॥ ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे। रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति॥ ३॥ विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम। सौमित्रिं
मां च रामं च व्यसनैः पश्य मोहितान्॥ ४॥ शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति। प्लवमानः परिश्रान्तो हतनौः सागरे यथा॥ ५॥ राक्षसानां वधं कृत्वा सूदयित्वा च रावणं। ल
ंकामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः॥ ६॥ स वाच्यः संत्वरस्वेति यावदेव न पूर्यते। अयं संवत्सरः कालस्तावद्धि मम जीवितं॥ ७॥ वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगम॥ राव
अतीवकालेषु इति। अपि ... स्वकथं चित्तमोपीति संबंधः। सा रामेति। रामसंकीर्तनवीतशोका अतिद्रः सततं राम इत्युक्तः। रामसंकीर्तनेन वीतशोका। न मांसं राघवो भुंक्त इत्या
द्युक्तशोकात्सासंबद्धशेषचंद्रो यस्याः सा साम्बुदशेषचंद्रा प्रकाशाविद्धः साप्रकाशायुक्ता निशेव बभूवेत्यर्थः॥ इति श्रीम॰ षड्त्रिंशः सर्गः॥ ऐश्वर्ये इति। कृतांतो दैवं। असंहार्यः अनिवार्यः
५ कोनहेतुना। समानशो ५१

बिभीषणेनेति। निर्यातनं प्रत्यर्पणं॥ तत्र निर्यातनं प्रति असंशयमिति। मतिः प्राप्स्यते कृतः। अंतरात्मेति। गुणानेवाह। अर्थात् सह इति। लोकांतरेषु कार्येषु स्थैर्यं। आयतः
उत्साहः पौरुषं तादृक्कार्यकरणं सत्वं बलं। आनृशंस्यमक्रौर्यं विक्रमः शौर्यं प्रभावः शक्तिः। चतुर्दशेति। तस्य तस्मात्। नेति। तुलयितुं चालयितुं समुद्रलंघनपूर्वकं देवीप्र

बिभीषणेन च भ्रात्रा मम निर्यातनं प्रति ॥ अनुनीतः प्रयत्नेन न च तत्कुरुते मतिं ॥९॥ मम प्रतिप्रदानं हि रावणस्य न रोचते। रावणं मार्गते संख्ये मृत्युः कालवशं गतं ॥१०॥ ज्येष्ठा
कन्यानला नाम बिभीषणसुता कपे। तया ममेदमाख्यातं मात्रा प्रहितया स्वयं ॥१२॥ अविंध्यो नाम मेधावी विद्वान् राक्षसपुंगवः। धृतिमान् शीलवान् वृद्धो रावणस्य च संमतः
॥ रामात्क्षयमनुप्राप्तं रक्षसां प्रत्यवेदयत। न च तस्य स दुष्टात्मा शृणोति वचनं हितं ॥१३॥ आशंसेयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः। अंतरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गु
णाः। उत्साहः पौरुषं सत्वमानृशंस्यं कृतज्ञता। विक्रमश्च प्रभावश्च संति वानर राघवे ॥१५॥ चतुर्दशसहस्राणि राक्षसानां जघान यः। जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य
नोद्विजेत ॥१६॥ न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः। अहं तस्यानुभावज्ञा शक्रस्येव पुलोमजा ॥१७॥ शरजालांशुमाञ्छूरः कपे रामदिवाकरः। शत्रुरक्षोमयं तोयं
उपशोषं नयिष्यति ॥१८॥ इति संजल्पमानां तां रामार्थे शोककर्षितां। अश्रुसंपूर्णवदनामुवाच हनुमान्कपिः ॥१९॥ श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः। चमूं
प्रकर्षन्महतीं हर्यृक्षगणसंकुलां ॥२०॥ अथवा मोचयिष्यामि त्वामद्यैव सरावणात्। अस्माद्दुःखादुपारोह मम पृष्ठमनिंदिते ॥२१॥ त्वां तु पृष्ठगतां कृ
त्वा संतरिष्यामि सागरं। शक्तिरस्ति हि मे वोढुं लंकामपि सरावणां ॥२२॥ अहं प्रस्रवणस्थाय राघवायाद्य मैथिली। प्रापयिष्यामि शक्राय हव्यं हुतमिवान
लः ॥२३॥ द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणं। व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥२४॥ त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलं। पुरंदरमिवा
सीनं नागराजस्य मूर्धनि ॥२५॥ पृष्ठमारोह मे देवि मा विकांक्षस्व शोभने। योगमन्विच्छ रामेण शशांकेनेव रोहिणी ॥ पौलोमीव महेंद्रेण सूर्येणेव सुवर्चला
मत्पृष्ठमधिरोह त्वं तराकाशमहार्णवौ ॥ नहि मे संप्रयातस्य त्वामितो नयतोंगने। अनुगंतुं गतिं शक्ताः सर्वे लंकानिवासिनः ॥२८॥ यथैवाहमिह प्राप्तस्तथैवाह
मसंशयं। यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसं। मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भुतं। हर्षविस्मितसर्वांगी हनुमंतमथाब्रवीत् ॥३०॥ हनुमन्दूरमध्वा
नं कथं मां वोढुमिच्छसि। तदेव लघु ते मन्ये कपित्वं हरिश्रेष्ठ॰ यूथप ॥३१॥ कथं चाल्पशरीरस्त्वं मामितो नेतुमिच्छसि। सकाशं मानवेंद्रस्य भर्तुर्मे प्लवगर्षभ ॥३२॥ ॥

यत्नोत्तस्य महती शक्तिरस्तीति देवी आसयति त्वां हीति। मा विकांक्षस्व मा पेक्षिष्ठा इत्यर्थः। कथयंतीति। मत्पृष्ठमधिरुह्य महार्णवमाकाशं च ... यथा चमह कथयंतीव संभाषमाणेव
वत्राकाशमहार्णवौ तरेति संबंधः। तथा अनुगंतुं गतिमनुगंतुं शक्ता भिन्नी इति भावः। मैथिलीति। हर्षविस्मितसर्वांगी हर्षेण पुलकितसर्वांगीत्यर्थः ॥ ॥ श्रीकृष्णाय नमः

सइति। पादपात्पादपमूलात् शरीरवृद्ध्या नवेगाहृतशाखो भग्नशाखो मेनाराक्षसा मोक्षामन्तीति। मत्ता अस्मत्रापहृतवान्नित्यर्थः। अस्मतो व्यवतस्थे अग्रपुरोदेशे। तदिति। विकांक्षया अपे
क्षया। अत्र इदं स्थैर्यं। अहमिति। सागरं सागरोल्लंघनमुद्दिश्येत्यर्थः। उपर्युपरिवेगेन कृतस्ते पृष्ठात् आकाशमापन्ना अहं भयात्प्रपतेयमिति संबंधः। नचेति। कलत्रवति त्वय्य

सीतायावचनं श्रुत्वा हनूमान्मारुतात्मजः। चिंतयामास लक्ष्मीवान्वाक्यं परिभवीकृतं ॥३३॥ नमेजानातिसत्वंवा प्रभावंवासितेक्षणा। तस्मात्पश्यतुवैदेही यद्रूपंममकामत
॥३४॥ इतिसंचिंत्यहनुमांस्तदा प्लवगसत्तमः। दर्शयामासवैदेह्याः स्वरूपमरिमर्दनः ॥३५॥ सतस्मात्पादपाद्धीमानाप्लुत्यप्लवगर्षभः। ततोवर्द्धितुमारेभे सीताप्रत्ययका
रणात् ॥३६॥ मेरुमंदरसंकाशो बभौदीप्तानलप्रभः। अग्रतोव्यवतस्थेच सीतायावानरर्षभः ॥३७॥ हरिःपर्वतसंकाशस्ताम्रवक्त्रोमहाबलः। वज्रदंष्ट्रनखोभीमो वैदेहीमिद
मब्रवीत् ॥३८॥ सपर्वतवनोद्देशां साट्टप्राकारतोरणां। लंकामिमांसनाथांवा नयितुंशक्तिरस्तिमे ॥३९॥ तदवस्थाप्यतांबुद्धिरलंदेविविकांक्षया। विशोकंकुरुवैदेहि रा
घवंसहलक्ष्मणं ॥४०॥ तंदृष्ट्वाचलसंकाशमुवाचजनकात्मजा। पद्मपत्रविशालाक्षी मारुतस्यौरसंसुतं ॥४१॥ तवसत्वंबलंचैव विजानामिमहाकपे। वायोरिवगतिंचापि
तेजश्चाग्नेरिवाद्भुतं ॥४२॥ प्राकृतोन्यःकथंचेमां भूमिमागंतुमर्हति। उदधेरप्रमेयस्य पारंवानरपुंगव ॥४३॥ जानामिगमनेशक्तिं नयनेचापितेमम। अवश्यंसंप्रधार्या
शुकार्यसिद्धिरिहात्मनः ॥४४॥ अयुक्तंतुकपिश्रेष्ठ मयागंतुंत्वयासह। वायुवेगसवेगस्य वेगोमांमोहयेत्तव ॥४५॥ अहमाकाशमासक्तात्तूपर्युपरिसागरं। प्रपतेयं
हितेपृष्ठाद्भयाद्वेगेनगच्छतः ॥४६॥ पतितासागरेचाहं तिमिनक्रझषाकुले। भवेयमाशुविवशा यादसामन्नमुत्तमं ॥४७॥ नाहंशक्ष्येत्वयासार्द्धं गंतुंशत्रुविमर्दन। कल
त्रवतिसंदेहस्त्वय्यपिस्यादसंशयं ॥४८॥ ह्रियमाणांतुमांदृष्ट्वा राक्षसाभीमविक्रमाः। अनुगच्छेयुरादिष्टा रावणेनदुरात्मना ॥४९॥ तैस्त्वंपरिवृतःशूलमुद्गरपाणिभि
ः। भवेस्त्वंसंशयंप्राप्तो मयावीरकलत्रवान् ॥५०॥ सायुधाबहवोव्योम्नि राक्षसास्त्वंनिरायुधः। कथंशक्ष्यसिसंयातुं मांचैवपरिरक्षितुं ॥५१॥ युध्यमानस्यरक्षोभि
स्ततस्तैःक्रूरकर्मभिः। प्रपतेयंहितेपृष्ठाद्भयार्ताकपिसत्तम ॥५२॥ अथरक्षांसिभीमानि महांतिबलवंतिच। कथंचित्सांपरायेत्वां जयेयुःकपिसत्तम॥ ॥५३॥

तित्वय्यपिसंदेहः प्राणसंदेहः। तैरिति। तैःपरिवृतो भवेः संशयंप्राप्तो भवेरितिवा काकुभेदेन युध्यतो निर्वाहकलत्रवान् रक्षणभारवानित्यर्थः। तथापि साहसकरणंन
कर्तव्यमित्याशयेनाह। युध्यमानस्येत्यादि श्लोकद्वयेन ॥५३॥

सुं·
५२

तत्रपतनपक्षे अनर्थमाह। अथवेति तेष्वादितिशेषः। पराजयपक्षे अनर्थमाह। मांवेति। पराजयं संभावयति। अव्यवस्थौहीति। अथमाभूतां पतनपराजयोरन्यतर
र्जनैरेवमेमरणांस्यादित्याह। अहंवेति। इदानीं हनूमतः सर्वशक्तिमंगीकृत्य युक्त्यंतरमाह। काममितिशब्दो निहतैरितिशेषः। पराजयपक्षे दोषांतरमाह। अथचेति। संहते
गूढप्रदेशे आसीत। समुद्रलंघनादिप्रयत्नः किमत्र हितमतआह। त्वयेति। ममताशारशेनयोनेकैवलेत्वदारंभवैकल्यं दुरंतोमहाननर्थस्स्यादित्याशयेनाह। मयीत्यादिना। राघ
वस्यजीवितं मयिआयत्तं मज्जीविताधीनजीवितमित्यर्थः। राजकुलस्य। सुग्रीवकुलस्य। ताविति। प्राणासंग्रहे। प्राणासर्वेषां। ननुरावणांगसंस्पर्शः केथंस्यादित्यतआ

अथवायुध्यमानस्यपतेयंविपुरवस्यते। पतितांवगृहीत्वामांनयेयुः पापराक्षसाः॥५४॥ मांवाहरेयुसंरक्षाविशसेयुरथापिवा। अव्यवस्थौहिदृश्येतेयुद्धेजयपराज
यौ॥५५॥ अहंवापिविपद्येयं रक्षोभिरभिलर्जिता। तत्वापत्वोहरिश्रेष्ठभवेन्निःफलएवतु॥५६॥ कामंत्वमपियर्याप्तोनिहंतुंसर्वराक्षसान्॥ राघवस्ययशोहीयेत्वयाश
स्तेस्तुराक्षसैः॥५७॥ अथवारापरक्षोभिस्यसेयुःसंहतेहिमां। यत्रतेनाभिजानीयुर्हरयोनापिराघवः॥५८॥ आरंभस्तुमदर्थोयंततस्तवनिरर्थकः। त्वयाहिसहराम
स्यमहानागमनेगुणाः॥५९॥ मयिजीवितमायत्तंराघवस्यामितौजसः। भ्रातृणांचमहाबाहोतवराजकुलस्यच॥६०॥ तौनिराशौमदर्थंचशोकसंतापकर्शितौ। सह
सर्वैर्हरिभिस्त्यक्षतः। प्राणासंग्रहं॥६१॥ भर्तृभक्तिंपुरस्कृत्यरामादन्यस्यवानर। मयापुनःपुमान्न्सोनयुक्तस्पृष्टुमात्मना॥६२॥ यदहंगात्रसंस्पर्शंरावणस्यगताबला
त्। अनीशाकिंकरिष्यामिविनाथाविवशासती॥६३॥ यदिरामोदशग्रीवमिहहत्वासराक्षसं। मामितोगृह्यगच्छेततत्तस्यसदृशंभवेत्॥६४॥ श्रुताहिदृष्टाहिमयापराक्र
मामहात्मनस्तस्यरणावमर्दिनः। नदेवगंधर्वभुजंगराक्षसाभवंतिरामेणसमाहिसंयुगे। समीक्ष्यतंसंयतिचित्रकार्मुकंमहाबलंवासवतुल्यविक्रमं। सलक्ष्मणंकोविष
हेतराघवंहुताशनंदीप्तमिवानिलेरितं॥६५॥ सलक्ष्मणंराघवमाजिमर्दनंदिशागजंमत्तमिवव्यवस्थितं। सहेतकोवानरमुख्यसंयुगेयुगांतसूर्यप्रतिमंशरार्चिषं
॥६६॥ समेहरिश्रेष्ठसलक्ष्मणंपतिंसयूथपंक्षिप्रमिहोपपादय। चिरायरामंप्रतिशोककर्शितांकुरुष्वमांवानरवीरहर्षितां॥६७॥ इत्यार्षेरामायणेवाल्मीकीयेसुंदरकांडे...

...विलग्नत्वात्। अहोभर्तेति। यस्मात्कारणात्भर्तृभक्तिंपुरस्कृत्य। भर्तृभक्त्यालक्षणांप्रख्यापितवती तस्माद्रावणस्यगात्रसंस्पर्शंबलाद्धृतेतिसंबंधः। हासीतेलक्ष्मणेतिमां
...कृत्वा। गमनेनर्थशंकया भर्तृभक्त्यालक्षणप्रख्यापनात्। प्राप्तोयमनर्थोनस्वकामकृतइतिभावः। अनीशास्वयंकिंवित्कर्तुमशक्नुवती। विचेष्टा। विनाथा। दिशःत
...हितनाथेत्यर्थः। अथयदिसिद्धौतमाविष्करोति। यदितिराक्षसवधेनरावणवधपूर्वकंमत्साध्यतांरामस्यसदृशं स्वमसुखेनमत्प्रापणंअनुचितमितिभावः।
...मेकार्यंताह। श्रुताहीतिमइति। हेहरिश्रेष्ठसलक्ष्मणंपतिंमिहोपपादय इहानयेत्यर्थः। चिराय। चिरकालंशोककर्शितां इतिश्रीमहेश्वरतीर्थविरचि

राम
५२

युक्तरूपं युक्ततमं । प्रशंसायां रूपप्रत्ययः स्त्रीस्वभावस्य भीरुत्वादेः साध्वीनां पतिव्रतानां विनयस्य च तत्रस्य सदृशं संभवे योग्यं समर्थं अत्र कद्दयेन विश्लेषो ति स्त्रीत्वमित्यादिना ।
विस्तीर्णामपि मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं तरितुं स्त्रीत्वं न समर्थं हि स्त्री न समर्थेत्यर्थः । अयं द्वा । हीनमित्यन्तस्त्रीत्वहेतुः न समर्थमिति लिंगव्यत्ययश्चार्षः ।
स्त्रीभूता त्वं सागरं व्यतिवर्तितुं न समर्था हीत्यर्थः । स्त्रीणां भीरुस्वभावत्वात्तत्स्वरूपत्वमेवेति भावः । सागरस्य निवर्त्तितुमिति पाठे । सागरस्य पारं गन्तुं योजनेनायतं आयतेति विस्तीर्णां
मपि मामधिष्ठाय निवर्तयितुं तु [illegible] तु स्त्रीत्वं न समर्थं नेन समर्थेति योजना । कारणैः त्वदुःखकारणैः त्वदुःसहेतन्नः स्थूलत्वर्थः । श्रोष्यत इति चेष्टितं उद्वंधनादिकं मम अग्रतः भाषितं

ततः स कपिशार्दूलस्तेन वाक्येन तोषितः । सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥१॥ युक्तरूपं त्वया देवि भाषितं शुभदर्शने । सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य
च ॥२॥ स्त्रीत्वं न तु समर्थं हि सागरं व्यतिवर्तितुं । मामधिष्ठाय विस्तीर्णं शतयोजनमायतं ॥३॥ द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते । रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥
॥४॥ एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः । का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशं ॥५॥ श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः । चेष्टितं यत्त्वया देवि भाषितं मम चाग्र
तः ॥६॥ कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया । स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितं ॥७॥ लंकाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः । सामर्थ्यादात्मनश्चैव मयैतत्समु
दीरितं ॥८॥ इच्छामि त्वां समानेतुमद्यैव रघुबंधुना । गुरुस्नेहेन भक्त्या च नान्यथा समुदाहृतं ॥९॥ यदि नोत्सहसे यातुं मया सार्धमनिंदिते । अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि यत्
॥१०॥ एवमुक्ता हनुमता सीता सुरसुतोपमा । उवाच वचनं मंदं बाष्पप्रग्रथिताक्षरं ॥११॥ इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियं । शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे तदा ॥१२॥ ता
पसाश्रमवासिन्याः प्राज्यमूलफलोदके । तस्मिन्सिद्धाश्रमे देशे मंदाकिन्या ह्यदूरतः ॥१३॥ तस्योपवनषंडेषु नानापुष्पसुगंधिषु । विहृत्य सलिलक्लिन्ना तवांके समुपाविशं

रावणांतर्गतीकृत्य कथितं च । इच्छामीति । रघुबंधुना रघुसगोत्रेण रामेण त्वां समानेतुं संगममयितुमिच्छामीत्युदाहृतमेतत् । गुरुस्नेहेन अन्यथा नेति संबंधः । इदमित्यादिश्लोक
द्वयमेकं वाक्यं । चित्रकूटस्य पादे । चित्रकूटस्य समीपपर्वते पूर्वोत्तरे ईशान्यकोणे मंदाकिन्या ह्यदूरतः सिद्धाश्रमे प्राज्यं बहुबहुमूलफलोदकं तस्मिन्देशे वर्तंतं तापसाश्र
मवासिन्यां मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियं प्रति त्वं ब्रूया इति योजना । तस्येति । तवांके समुपाविशमिति । ननु हनूमंतमुद्दिश्याभिज्ञानं वक्तुमुपक्रांता देवी रामं सं
बोध्य किमर्थं कथयतीति चेत्सत्यं मत्यमभिज्ञानं वक्तुमुपक्रांता त्वामेवाभिमुखीकृत्य एवमुक्तवती पारारि तिहनूमता रामायवाचयितुमिति न दोषः ॥ ॥

सु॰
५२

ततइति। पर्यतुंडयत। पर्यखंडयत्। स्तनांतरइति शेषः। उत्कर्षंतीमिति पक्षिणा वसने स्रस्यमाने सति रशनामुत्कर्षंत्या मा द्रष्टमाणायां मयि क्रुद्धायां सत्यां ततस्तदा त
या त्वहं रक्षमीति संबंधः। भक्ष्यगृद्धेनेति। भक्ष्यगृद्धेन भक्ष्यलोलुपेन। दारिता विदारिता। तामुपागता। पुनरुत्संगमाविशमित्येतावन्मां काकोत्वा रणार्थं त्वं कादुत्थानं त्वनुधा

ततो मांस समासाद्य कोवायसः। पर्यतुंडयत तामहं लोष्टमुद्यम्य वारयामि स्म वायसं। २५। दारयन्स च मां काकस्तत्रैव परिलीयते। न चाप्युपारमन्मांसाद्भक्षार्थी बलिभो
जनः। २६। उत्कर्षंत्यां च रशनां क्रुद्धायां मयि पक्षिणि। स्रस्यमाने च वसने ततो दृष्टा त्वया त्वहं। २७। त्वया विहसिता चाहं क्रुद्धा संलज्जिता तदा। भक्ष्यगृद्धेन काकेन दारिता
त्वामुपागता। २८। आसीनस्य च ते श्रांता पुनरुत्संगमाविशं। क्रुध्यंती च प्रहृष्टेन त्वयाहं परिसांत्विता। २९। बाष्पपूर्णमुखी मंदं चक्षुषी परिमार्जती। लक्षिताहं त्वया ना
थ वायसेन प्रकोपिता। २०। परिश्रमात्प्रसुप्ता च राघवांकेप्यहं चिरं। पर्यायेण प्रसुप्तश्च ममांके भरताग्रज। २१। स तत्र पुनरेवाथ वायसः समुपागमत्। ततः सुप्तप्र
बुद्धां मां राघवांकात्समुत्थितां। वायसः समुपागम्य विददार स्तनांतरे। पुनःपुनरथोत्पत्य विददार स मां भृशं। २३। ततः समुत्थितो रामो मुक्तैः शोणितबिंदुभिः। वायसेन
ततस्तेन बलवत्क्लिश्यमानया। २४। मया प्रबोधितः श्रीमान्सुखसुप्तः परंतपः। स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा। २५। आशीविष इव क्रुद्धः श्वसन्वाक्यमभाष
त। केन ते नागनासोरु विक्षतं वै स्तनांतरं। २६। कः क्रीडति सरोषेण पंचवक्त्रेण भोगिना। वीक्षमाणस्ततस्तं वै वायसं समवैक्षत। २७। नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमु
खं स्थितं। पुत्रः किल स शक्रस्य वायसः पततां वरः। २८। धरांतरगतः शीघ्रं पवनस्य गतौ समः। ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः। २९। वायसे कृतवान्क्रू
रां मतिं मतिमतां वरः। स दर्भं संस्तराद्गृह्य ब्राह्मेणास्त्रेण योजयत। ३०। स दीप्त इव कालाग्निर्जज्वालाभिमुखो द्वि
जं। स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति। ३१। ततस्तु वायसं दर्भः सोंबरेनुजगाम ह। अनुसृष्टस्तदा काको जगाम विविधां गतिं। ३२। लोककामस्तु मं लोकं सर्वं वै
विचचार ह। स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः। ३३। त्रीँल्लोकान्संपरिक्रम्य तमेव शरणं गतः। स तं निपतितं भूमौ शरण्यः शरणागतं। ३४। वधार्हमपि काकु
त्स्थः कृपया पर्यपालयत्। न शर्म लब्ध्वा लोकेषु तमेव शरणं गतं। ३५। परिद्यूनं विषण्णं च स तमायांतमब्रवीत्। मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यतां। ३६। ततस्त
स्याक्षि काकस्य हिनस्ति स्म स दक्षिणं। दत्वा तु दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः। ३७। स रामाय नमस्कृत्वा राज्ञे दशरथाय च। विसृष्टस्तेन रामेण प्रतिपेदे स्वमालयं। ३८।

तनं वरेत्याहृतमित्यवगम्यते। पुत्र इति। धरांतरगतः भूमिंप्राप्तः। समः इति। दर्भं संस्तरात् गृहीत्वा योजयत। अयोजयत्। द्विजं काकमनुसृष्टः। अनुसृतः। ५२
काकामरिष्टकजनाकं ही परिद्यूनं परितप्तं। मोघमिति। उच्यतामिति प्रश्नानंतरं। हिनस्ति स्म स्तरक्षिणामिति। वचनात्स्वयं कृतेन दक्षिणाक्षि काकेन दत्तमित्यवग

एवंहनुमते रामैकसंवेद्यमभिज्ञानमभिधाय दुःखावेशाद् ममेव बुद्धिस्थं संबोध्य सोपालंभं प्रार्थयते। मत्कृते त्वारिश्मोकवहुष्टयेन। पत्नीमामहरत्तं रावणं कस्मान्न
मसे उपेक्षसे इत्यर्थः। मङ्गति। सत्वमान् शंसन्नक्षोभ्यो। जानामीति। अपरपारं। दूरपारं। अप्राप्यगुणसीमानं तमित्येति। संभ्रमः त्वरा यद्यपि शिलावितिसंगता वितिशेषः। उप

मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितं। कस्माद्यो मांहरेत्त्वत्तः क्षमसे तं महीपते॥ ३९॥ स कुरुष्व महोत्साहं कृपां मयि नरर्षभ। त्वया नाथवती नाथ ह्यनाथा इव दृश्य
ते॥ ४०॥ आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः। जानामि त्वां महावीर्यं महोत्साहं महाबलं॥ ४१॥ अपारपारमक्षोभ्यं गांभीर्ये सागरोपमं॥ ४१॥ भर्तारं ससमुद्राया धर
ण्याः वासवोपमं॥ एवमस्त्रविदां श्रेष्ठः सत्ववान् बलवानपि॥ ४२॥ किमर्थमस्त्रं रक्षःसु न योजयति राघवः। न नागा नापि गंधर्वा नासुरा न मरुद्गणाः॥ ४३॥ रा
मस्य समरे वेगं शक्ताः प्रतिसमाधितुं। तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः॥ ४४॥ किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान्। भ्रातुरादेशमादाय लक्ष्मणो वा प
रंतपः॥ ४५॥ कस्य हेतोर्न मां वीरः परित्राति महाबलः। यदि तौ पुरुषव्याघ्रौ वाय्विंद्रसमतेजसौ॥ ४६॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः। ममैव दुष्कृतं किंचिन्महद
स्ति न संशयः॥ ४७॥ समर्थावपि तौ यन्मां नावेक्षेते परंतपौ॥ वैदेह्यावचनं श्रुत्वा करुणं साश्रुभाषितं॥ ४८॥ अथाब्रवीन्महातेजा हनूमान् हरियूथपः। त्वच्छोकविमुखो रामो
देवि सत्येन ते शपे॥ ४९॥ रामे दुःखाभिपन्ने च लक्ष्मणः परितप्यते। कथंचिद्भवती दृष्टा न कालः परिशोचितुं॥ ५०॥ इमं मुहूर्तं दुःखानां द्रक्ष्यस्यंतमनिंदिते। तावुभौ पुरुषव
्याघ्रौ राजपुत्रौ महाबलौ॥ ५१॥ त्वद्दर्शनकृतोत्साहौ लंकां भस्मीकरिष्यतः। हत्वा च समरे क्रूरं रावणं सहबांधवं॥ ५२॥ राघवस्त्वां विशालाक्षि स्वां पुरीं प्रतिनेष्यति। ब्रू
हि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः॥ ५३॥ सुग्रीवो वापि तेजस्वी हरयो वा समागताः। इत्युक्तवति तस्मिंश्च सीता पुनरथाब्रवीत्॥ ५४॥ कौसल्या लोकभर्तारं सुषुवे
यद्राघवं वा मनस्विनी। तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय॥ ५५॥ विसृज्य सर्वरत्नानि प्रिया याश्च वरासनाः। ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभं॥ ५६॥ पि
तरं वापि संमान्याभिप्रसाद्य च। अनुप्रव्राजितो रामं सुमित्रा येन सुप्रजा॥ ५७॥ आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमं। अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने
५८ सिंहस्कंधो महाबाहुर्मनस्वी प्रियदर्शनः। पितृवद्वर्त्तते रामे मातृवन्मां समाचरन्॥ ५९॥ ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः। वृद्धोपसेवी लक्ष्मीवान् शक्तो

हेतोउपेक्षेते ममेति। किंचित्किमपि। त्वदिति। त्वच्छोकविमुखः। त्वद्विश्लेषशोकेन स्वशरीरस्याणोपि पराङ्मुखः त्वदेकमनाः। न वहुभाषितं ॥ ६०॥
नाइत्यर्थः। कथंचिदिति। इदं मुहूर्तं अस्मिन्मुहूर्ते। स्रजश्चेत्यादि। पृथिव्यामिति दुर्लभमित्यत्र तत्के साहेष्वयोऽं। अनुव्रजतो राममित्यत्र सइतिशेषः। सिंहस्कं

सु०
५३

नियुक्तेति। यस्यां धुरि येयं लक्ष्मणो नियुक्तस्तेन वहन्तीं तां धुरं रामः उद्वहति। यं दृष्ट्वेति। राघवः यं दृष्ट्वा वृत्तं मनीतं आर्यं दशरथं नाद्य स्मरेत्। पितृवत्तस्य करुणत्वात् पितरं न स्मरतीति
भावः। यथेति। दुःखरूपकरो भवेत्स लक्ष्मणः स यावत् कृत्वा भूयतिशेषत्वमिति। कार्यनिर्योगे। कार्ये समुद्यते प्रमाणं यस्य सः। अपकं। पुतः। अतः। राघवः मप्रियतरो भवेदिति सः। स्वेंधः। ऊ
र्ध्वं मासात्तु जीवेयमिति। रावणान्न मासमुद्गात्वविषमपि न सहिष्ये इति भावः। राघवो नेति। निहत्वाति रक्षोगणं पातालादिविति कौशिकमिति। कौशिकी रेवेंद्र श्रीयं पुरा किल ह
त वधार्थं दृष्ट्वा प्रति भूतमेवं सलक्ष्मी पातालं प्रविष्टा रेवपार्थितो भगवानारिनारायणः पातालाद्दुत्थाप्य पुनरिंद्राय श्रियं प्रायच्छदिति पौराणिकी कथा वानुसंधेया प्रतिद
त्ये ति। मणिरत्नं मणिश्रेष्ठं। अंगुल्या योजयामास स्वांगुल्यां स्वधारामकृतः मणेरविष्ठानस्य हेमपुष्पस्य केशप्रवेशार्थं यत्रकंकंतत्र अंगुलिप्रवेशं यदित्यर्थः। नत्वन्तरान्नीहनूमन्तः स्व
राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे। मतः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ॥ २१ ॥ नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान्। यं दृष्ट्वा राघवो नैव वृत्तमार्यमनु
स्मरेत् ॥ २२ ॥ स ममार्थाय कुशलं वक्तव्यो वचनान्मम। मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ २३ ॥ यथा स हरिश्रेष्ठ दुःखक्षयकरो भवेत्। त्वमस्मिन्कार्यनिर्योगे प्रमा
णं हरियूथप ॥ २४ ॥ राघवस्त्वत्समारंभान्मयि यत्नपरो भवेत्। इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ॥ २५ ॥ जीवितं धारयिष्यामि मासं दशरथात्मज। ऊर्ध्वं मासान्न जीवेयं
सत्येनाहं ब्रवीमि ते ॥ २६ ॥ रावणेनोपरुद्धां मां निकृत्या पापकर्मणा। त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीं ॥ २७ ॥ ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभं। प्रदेयो राघ
वायेति सीता हनुमते ददौ ॥ २८ ॥ प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमं। अंगुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च। सीतां प्र
दक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ३० ॥ हर्षेण महता युक्तः सीतादर्शनजेन सः। हृदयेन गतो रामं शरीरेण तु विष्ठितः ॥ ३१ ॥ मणिवरमुपगृह्य तं महार्हं जनकनृपात्म
जया धृतं प्रभावात्। गिरिरिव पवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ३२ ॥ इति मत्स्ये रूपको उदाश्च त्रयस्त्रिंशः सर्गः ॥ मणिं दत्त्वा ततः सीता हनूमंतमथाब्रवीत्। अ
भिज्ञानमभिज्ञातमेतद्रामस्य धीमतः ॥ १ ॥ मणिं दृष्ट्वा तु रामो वै त्रयाणां संस्मरिष्यति। वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥ स भूयस्त्वं समुत्साहे चोदितो हरिस
त्तम। अस्मिन्कार्यसमारंभे प्रचिंतय यदुत्तरं ॥ ३ ॥
अस्मिन्कार्यविवरेहतुन्मा पश्चनुज्ञामंजनमेव समंजसमतआहात नहीति। असम्हनूमतो भुजः स्वस्थो पिन प्राभवत् तमा। अस्मिन्कार्यसमर्भे प्रचिंतयद्दत्तरं ॥ ३ ॥
दन्तलक्ष्मा निक्षत्तत्र न प्राविश दित्यर्थः। न प्राभवद्दुत्तरं इति। प्रतिषेधस्य प्रसक्तिपूर्वकत्वात् सतक्तेः सत्त्वरूप एव संभवात् उत्तप्रतिषेधेन देवेप्रदर्शितमहद्रूपं विहाय सत्त्व
रूपं गृहीत्वा निलयं सतेमणिं च मिति पवनावना धूतमुक्तं महावातकंपविक्षिप्तः। प्रतिसंक्रमं प्रतिप्रयाणं प्रपेदे प्राप्तवान्॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे
त्रयस्त्रिंशः सर्गः ॥ मणिमिति। मणिं दत्त्वा रामस्य एतत्स्य अभिज्ञानमभिज्ञानं मित्य बुवीरि तिलेखः। मणिं दृष्ट्वेति। त्रयाणां संस्मरिष्यति। त्रयाणामिति कर्मणि षष्ठी। प
शिरदत्ता जननी च मम जननी चैवं मणिं दशरथस्य सन्निधौ जनकहस्ता रामप्रयत्नमिति सुमाता यामस्यैवं तत्रवती अतो मम जननी दशरथं मां च स्मरिष्यतीत्यर्थः ॥ ॥ ॥ ॥

राम
५३

त्वमिति। कार्यनियोगे कार्यसंघटने प्रमाणं अवस्थापकः। यथेति दुःखांबुसंरोधात्दुःखमेवांबु तेनेनेत्वंबुसंरोधो जललक्षितः दुःखसागरादित्यर्थः। समाधातुं उद्धर्तुमित्यर्थः। तत इति।
तत्स्नेहान्वितं। आत्मनियोगार्हस्नेहः तेनान्वितं रामस्य स्वविषयस्नेहस्वकार्यकमिति यावत्। वाक्यं हनुमतो वचनं अनुमानयन्ती संमानयंती अब्रवीदिति पूर्वे

त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम। तस्य चिंतयतो यत्नो दुःखक्षयकरो भवेत्॥४॥ हनूमन्यत्नमास्थाय दुःखक्षयकरो भव। तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः॥५
शिरसा वंद्य वैदेहीं गमनायोपचक्रमे। ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजं ६ बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत्। कुशलं हनुमन्ब्रूयाः सहितौ रामलक्ष्मणौ ७
सुग्रीवं च सहामात्यं सर्वान्वृद्धांश्च वानरान्। ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितं। यथा च स महाबाहुर्मां तारयति राघवः। अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि॥९॥ जी
वंतीं मां यथा रामः संभावयति कीर्तिमान्। तत्त्वया हनुमन्वाच्यं वाचा धर्ममवाप्नुहि॥१०॥ नित्यमुत्साहयुक्ताश्च वाचः श्रुत्वा मयेरिताः। वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये॥
॥११॥ मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः। पराक्रमविधिं वीरो विधिवत्संविधास्यति॥१२॥ सीतायास्तद्वचः श्रुत्वा हनूमान्मारुतात्मजः। शिरस्यंजलिमाधाय वाक्यमुत्तरमब्रवी
त्॥१३॥ क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः। यस्ते युधि विजित्यारीन्शोकं व्यपनयिष्यति॥१४॥ नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा। यस्तस्य क्षिपतो
बाणान्स्थातुमुत्सहतेऽग्रतः॥१५॥ अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमं। स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः॥१६॥ स हि सागरपर्यंतां महीं शासितुमर्हति। त्वन्निमि
त्तो हि रामस्य जयो जनकनंदिनि॥१७॥ तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितं। जानकी बहु मेनेऽथ वचनं चेदमब्रवीत्॥१८ ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः।
भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत्॥१९॥ यदि वा मन्यसे वीर वसैकाहमरिंदम। कस्मिंश्चित्संवृते देशे विश्रांतः श्वो गमिष्यसि॥२०॥ मम चाप्यल्पभाग्यायाः सान्नि
ध्यात्तव वानर। अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत्॥२१॥ गते हि हरिशार्दूले पुनरागमनाय तु। प्राणानामपि संदेहो मम स्यान्नात्र संशयः॥२२॥ तवादर्शनजः शो
को भूयो मां परितापयेत्। दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर॥२३॥ अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः। सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर॥२४॥ कथं नु खलु
दुष्पारं तरिष्यंति महोदधिं। तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ॥२५॥ त्रयाणामेव भूतानां सागरस्यास्य लंघने। शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा॥२६॥ तत्र

ताम्बंधः। यदीति। एकाहं वस। तेन किं कस्मिंश्चिदिति मम इति चेत्तत्राह आगमिष्यसि चेदित्यर्थः। तवेति। दुःखाद्दुःखपरामृष्टां अतिदुःखं प्राप्तामित्यर्थः। दुःखाद्दुःखपरामृष्टामिति
पाठे दुःखं मा दीपयन्नग्निरिव परितापयेदिति संबंधः। अयमिति। संदेहवसमाणाः तिष्ठतीव ममाग्रतः मूर्तीभूत इति शेषः। हर्यृक्षेषु विषये संदेहमेवाह। कथं नित्य[illegible]
रिति। तदिति। कार्यनियोगे। कार्यसंघटने। समाधानमुपायं इत्यर्थः ॥ ॥

सु० ५४

मारुतात्मजा रिनामन्त्रा गमनमहमेव सर्वं साधयिष्यामीत्यत आह। काममिति। अस्य कार्यस्य रावणादिवधपूर्वकमन्त्रोरूपस्य कामं पर्याप्तः। शक्तः। एवं चेद्बलोदयः स्यादिति सम्
ङ्किः तेन देवयशस्करः न नु ममेति भावः। तर्हि तत्र किं प्रयासकरमत आह। बलैरिति। मां गृहीत्वेति शेषः। यायाद्गमदिति शेषः। एतद्रामस्यापि यशस्करमित्याह। शरैरिति। तस्मिति।

काममस्य त्वमेवैकः कार्यस्य परिसाधने। पर्याप्तः परवीरघ्न यशस्यस्ते बलोदय॥ २८ ॥ बलैः समग्रैर्यदि मां रावणं जित्य संयुगे। विजयी स्वपुरं यायात्तत्तु मे स्याद्यशस्करं॥ २९ ॥
शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः। मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत्॥ ३० ॥ तद्यथा तस्य विक्रांतमनुरूपं महात्मनः। भवेदाहवशूरस्य तथा त्वमुपपादय॥ ३१ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितं। निशम्य हनुमांच्छेषं वाक्यमुत्तरमब्रवीत्॥ ३२ ॥ देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः। सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चय
॥ ३३ ॥ स वानरसहस्राणां कोटीभिरभिसंवृतः। क्षिप्रमेष्यति वैदेही राक्षसानां निबर्हणः॥ ३४ ॥ तस्य विक्रमसंपन्नाः सत्त्ववंतो महाबलाः। मनःसंकल्पसंपाता निदेशे हर
यः स्थिताः॥ ३५ ॥ येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः। न च कर्मसु सीदंति महत्स्वमिततेजसः॥ ३६ ॥ असकृत्तैर्महोत्साहैः ससागरधराधरा। प्रदक्षिणीकृता भूमिर्वा
युमार्गानुसारिभिः॥ ३७ ॥ मद्विशिष्टाश्च तुल्याश्च संति तत्र वनौकसः। मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ॥ ३८ ॥ अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः। न हि प्र
कृष्टाः प्रेष्यंते प्रेष्यंते हीतरे जनाः॥ ३९ ॥ तदलं परितापेन देवि शोको व्यपैतु ते। एकोत्पातेन वै लंकामेष्यंति हरियूथपाः॥ ४० ॥ मम पृष्ठगतौ तौ च चंद्रसूर्याविवोदितौ।
त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः॥ ४१ ॥ तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ। आगम्य नगरीं लंकां सायकैर्विधमिष्यतः॥ ४२ ॥ सगणं रावणं हत्वा राघवो
रघुनंदनः। त्वामादाय वरारोहे स्वपुरीं प्रतियास्यति॥ ४३ ॥ तदाश्वसिहि भद्रं ते भव त्वं कालकांक्षिणी। न चिराद्द्रक्ष्यसे रामं प्रज्वलंतमिवानलं॥ ४४ ॥ निहते राक्षसेंद्रे च स
पुत्रामात्यबांधवे। त्वं समेष्यसि रामेण शशांकेनेव रोहिणी॥ ४५ ॥ क्षिप्रमेष्यसि शोकस्य परं पारं क्षमे स्थिति। रावणं चैव रामेण निहतं द्रक्ष्यसेऽचिरात्॥ ४६ ॥ एवमाश्वास्य वैदेहीं
हनूमान्मारुतात्मजः। गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत्॥ ४७ ॥ तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवं। लक्ष्मणं च धनुष्पाणिं लंकाद्वारमुपस्थितं॥ ४८ ॥ नखदं
ष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान्। वानरान्वारणेंद्राभान्क्षिप्रं द्रक्ष्यसि संगतान्॥ ४९ ॥ शैलांबुदनिकाशानां लंकामलयसानुषु। नर्दतां कपिमुख्यानामचिरा
च्छ्रोष्यसि स्वनं॥ ५० ॥ स तु मर्मणि घोरेण ताडितो मन्मथेषुणा। न शर्म लभते रामः सिंहार्दित इव द्विपः॥ ५१ ॥ अलं ते देवि शोकेन मा भूत्ते मनसोऽप्रियं। शचीव भर्त्रा
शक्रेण पत्या नाथवती ह्यसि॥ ५२ ॥ रामाद्विशिष्टः कोऽन्योस्ति कश्चित्सौमित्रिणा समः। अग्निमारुतकल्पौ तौ भ्रातरौ तव संश्रयौ॥ ५३ ॥ नास्मिंश्चिरं वत्स्यसि देवि दे
शे रक्षोगणैरध्युषितेऽतिरौद्रे। न ते चिरादागमनं प्रियस्य क्षमस्व मत्संगमकालमात्रं॥ ५४ ॥ इति सुंदरकांडे एकोनचत्वारिंशः सर्गः॥ ॥ ॥ ॥ ॥ ॥ ॥

। विक्रांतं विक्रमः। तदिति। अर्थोपहितं अर्थयुक्तं संहितं। परस्परसंगतं हेतुसहितं। युक्तियुक्तं शेषं प्रागनुक्तं। मनःसंकल्पसंपाताः मनोवेगसदृशवेगा वृत्तद्रत्थं।
॥ तदिति। एकोत्पातेन। एकप्लुतेन। तौ दिति। कालकांक्षिणी भवद्दिवसगणनायां तत्परा भव। शैलांबुदेत्यादि पूर्यान्यनेकेशब्दस्थानेरुसीत्तत्तु पगाः। नास्मिन्निति। म

राम० ५४

अभिज्ञानांतरं दातुमाह अभिज्ञानमित्यादिना । एकाक्षिशातनीं इषीकामिषीकां उपेक्षामनुतिलके पुलके मनःशिलायास्तिलकः त्वया गंडपार्श्वे निवेशितः किल । तस्मात्स्मर्तुमर्ह
सीत्यभिज्ञानं रामस्मरणाय दत्तं भवतीति योजना । असह्यानि लभंते तस्य प्राशयाद्यो इति द्विवचनं त्वत्कृते त्वद्विषये तिरस्कारं सहे । अस्मिन्मुहूर्ते मिति । उत्पातकृतोत्साहं ।

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः । उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥१॥ त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर । अर्धसंजातसस्येव वृष्टिं प्राप्य वसुंध
रा ॥२॥ यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्षितैः । संस्पृशेयं समासक्ता तथा कुरु दयां मयि ॥३॥ अभिज्ञानं च रामस्य दद्या हरिगणोत्तम । क्षिप्तामिषीकां काकस्य को
पादेकाक्षिशातनीं ॥४॥ मनःशिलायास्तिलको गंडपार्श्वे निवेशितः । त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि । स वीर्यवान् तं किल स्मर्तुमर्हसि ॥५॥ रावणेन हृतां सीतां कथं मा
मनुमन्यसे । वसंतीं रक्षसां मध्ये महेंद्रवरुणोपम ॥६॥ एष चूडामणिर्दिव्यो मया सुपरिरक्षितः । तां दृष्ट्वेव प्रहृष्यामि व्यसने तु महोदये ॥७॥ एष निर्यातितः श्रीमान्मया ते
वारिसंभवः । अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥८॥ असह्यानि च दुःखानि वाचश्च हृदयच्छिदः । राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहं ॥९॥ धारयिष्यामि
मासं तु जीवितं शत्रुसूदन । मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥१०॥ घोरो राक्षसराजोऽयं दृष्टिश्च न सुखा मयि । त्वां च श्रुत्वा विपद्यंतं न जीवेयमहं क्षणं ॥११॥ वैदे
ह्या वचनं श्रुत्वा करुणं साश्रुभाषितं । अथाब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥१२॥ त्वच्छोकविमुखो रामो देवि सत्येन ते शपे । रामे शोकाभिभूते च लक्ष्मणः परितप्य
ते ॥१३॥ दृष्टा कथंचिद्भवती न कालः परिशोचितुं । इदं मुहूर्तं दुःखानामंतं द्रक्ष्यसि भामिनि ॥१४॥ तावुभौ पुरुषव्याघ्रौ राजपुत्रावनिंदितौ । त्वद्दर्शनकृतोत्साहौ लंकां
भस्मीकरिष्यतः ॥१५॥ हत्वा तु समरे घोरं रावणं सहबांधवैः । राघवस्त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यति ॥१६॥ यत्तु रामो विजानीयादभिज्ञानमनिंदिते । प्रीतिसंज
ननं तस्य भूयस्त्वं दातुमर्हसि ॥१७॥ साब्रवीद्दत्तमेवेह मयाभिज्ञानमुत्तमं । एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणं ॥१८॥ श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति । स तं म
णिवरं गृह्य श्रीमान्प्लवगसत्तमः ॥१९॥ प्रणम्य शिरसा देवीं गमनायोपचक्रमे । तमुत्पातकृतोत्साहमवेक्ष्य हरिपुंगवं ॥२०॥ वर्धमानं महावेगमुवाच जनकात्मजा । अ
श्रुपूर्णमुखी दीना बाष्पसंदिग्धया गिरा ॥२१॥ हनुमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ । सुग्रीवं च सहामात्यं सर्वान्ब्रूयास्त्वनामयं ॥२२॥ यथा च स महाबाहुर्मां तारय
ति राघवः । अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ॥२३॥ इमं च शोकं मामतीव वेगं रक्षोभिरेभिः परिभर्त्सनं च । ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरि
प्रवीर ॥२४॥ स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः । तदल्पशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥२५॥ इत्यार्षे रामायणे सुंदरकांडे च
। उत्पाते कृतमनेन कृतोत्साहां स राजपुत्र्या इति अल्पशेषमल्पावशिष्टं । प्रसमीक्ष्य विचार्य ॥ ॥ इति रामायणतत्त्वदीपिकायां चत्वारिंशः सर्गः ॥ ॥ ॥ ॥

चिंताप्रकारमेवाह। अल्पशेषमित्यादि। कपीश्वरालयमित्यंतेन। इयमिह कार्यं देविदर्शनं परबलादि परिहृत्य नैवेति तत्र देवदर्शनस्य महतः प्रधानकृतस्य नियमनं त्वा

सु० ५५ रितरस्य तानुषंगिकत्वात्स्वल्पशेषत्वमित्यभिप्रायः। तत्र निष्पन्नांशः शेषपति। दृष्टेयमिति। उत्तरनिष्पन्नानुपायान्निश्चीयते त्रीनिति। इह राक्षसबलेशवणात्त्र्यपरि

ज्ञानस्यैककार्ये त्रीनुपायान् सामदानभेदानतिक्रम्य चतुर्थो दृश्यते। साधनतया दंडो दृश्यते। उपपत्तिपूर्वकमेतदेव विवृणोति। न साममेति। अनुपसाममप्रयोगःप्र

लापकत्वं तेन शूरे क्षिप्ताशयेनाहारकृक्षिति। उपाय जयावकाशस्थिता। विस्ताशोकसर्वं बलवतः पथ्यमिति वत्सवोतिशायि बलपराक्रममस्यमम पराजयप्रसंगए

वनास्तीत्यभिप्रायेणाह। पराक्रमइति। उक्तसामाद्युपायमुपसंहरति। नवेति। विनिश्चयः। उपायः। तथापि पराक्रमे किंकारणमत आह। हनतेति। हेतुः प्रवीराःमुख्या

सचवाग्निः प्रशस्तास्त्रिगाभिध्यन्नूर्जितस्तया। तस्माद्देशादपक्रम्य चिंतयामास वानरः॥१॥ अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा। त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते॥२॥ न साम रक्षःसु गुणाय कल्पते न दानमर्थोपचितेषु वर्तते॥ न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते॥३॥ न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते। हतप्रवीरास्तु रणे हि राक्षसाः कथंचिदीयुर्यदिहाद्यमार्दवं॥४॥ कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत्॥५॥ पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति॥५॥ नह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः। यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने॥६॥ इहैव तावत्कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयं। परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृशासनं॥७॥ कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैः सह॥ ॥ ॥

एषां ते हतप्रवीराः। यतः कतिपयवशेषाणामार्दवमीयुः अतः पराक्रम एव रोचत इत्यर्थः। अधिगम्य तु वैदेहीं निलयं रावणस्य च। इत्यनुज्ञातव्यतिरिक्तकार्यकर

णोरोपमाशंक्य परिहरति। कार्य इति। कार्ये कर्तव्ये कर्मणि बहूनि कार्याणि। नहीति। स्वल्पस्यापि कर्मणः एको हेतुः साधको न भवति किमुत महतः कर्म

णा इति भावः। यो हीति। अर्थं कार्यं बहुधा बहूपायसाध्यं वेद। ननु स्वामिना निर्दिष्टं सीतादर्शनं कृतमेव अनन्तरं सुग्रीवसन्निधौ भविष्यतीत्यत आह। इहैवेति। प

रात्मसंमर्दविशेषतत्त्वविदहं परस्यात्मनश्च संमर्दं युद्धतारतम्यं तस्य तत्त्ववित् कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततो म राम ५५

म भर्तृशासनं सीतादर्शनं रावणनिलयसम्यक्परिज्ञानविषयं शासनं तावत्साकल्येन कृतं स्यात्। अन्यथा राक्षसबलाबले कीदृशमिति भर्त्रा पृष्टो निरु

त्तरः स्यामिति भावः। कथंन्विति। युद्धं सुखागतं सुखेन प्राप्तं भवेत् तथा कर्तव्यमिति शेषः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

युद्धस्य फलमाह। तथैवेत्यादिना सार्द्धेन। तथैव खलु युद्धकरतो खलु दशाननः। आत्मबलं स्वपक्षबलं मां च सारवत्। सम्मानयेत् सम्यक्परिच्छिंद्यात। सबलप्रयायि
नं समैर्मंत्रिः हृदि स्थितमतं तत्त्वतनिश्चयं। अहमिति। हरीश्वरालयमित्यत्र इति शेषः। दृष्ट्वा तत्र [illegible] मासेति श्लोकः सवेषः। सा विह्वलेति। प्रमदावनस्यांतःपुर
विहारवनस्येत्यर्थः। स्मारेत देवप्रमदावनमंतःपुरोचितमित्यमरः। आयो संज्ञा छंदसो बहुलमिति बहुलग्रहणात् रनियतोऽल्पस्वः। [illegible] एव दशास्यप्रमदावनस्य

तथैव खल्वात्मबलं च सारवत्सम्मानयेन्मां च रणे दशाननः ॥८॥ ततः समासाद्य रणे दशाननं समंत्रिवर्गं सबलप्रयायिनं। हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाहमि
तः पुनर्व्रजे ॥९॥ इदमस्य नृशंसस्य नंदनोपममुत्तमं। वनं नेत्रमनःकांतं नानाद्रुमलतायुतं ॥१०॥ इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः। अस्मिन्भग्ने ततः कोपं करिष्य
ति स रावणः ॥११॥ ततो महत्साश्वमहारथद्विपं बलं समानेष्यति राक्षसाधिपः। त्रिशूलकालायसपट्टसायुधं ततो महद्युद्धमिदं भविष्यति ॥१२॥ अहं तु तैः संयति चं
डविक्रमैः समेत्य रक्षोभिरसंगविक्रमः। निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि हरीश्वरालयं ॥१३॥ ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः। ऊरुवेगेन महता
द्रुमान्क्षेप्तुमथारभत् ॥१४॥ ततस्तु हनुमान्वीरो बभंज प्रमदावनं। मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतं ॥१५॥ तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः। चूर्णितैः पर्व
ताग्रैश्च बभूवाप्रियदर्शनं ॥१६॥ नानाशकुंतविरुतैः प्रभिन्नैः सलिलाशयैः। ताम्रैः किसलयैः क्लांतैः क्लांतद्रुमलतायुतं ॥१७॥ न बभौ तद्वनं तत्र दावानलहतं यथा।
व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥१८॥ लतागृहैश्चित्रगृहैश्च सादितैर्व्यालैर्मृगैरार्तरवैश्च पक्षिभिः। शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्व
नं ॥१९॥ सा विह्वलाशोकलताप्रताना वनस्थली शोकलताप्रताना। जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥२०॥ स तस्य कृत्वार्थपतेर्महाकपिर्मह
द्व्यलीकं मनसो महात्मनः। युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥२१॥ इत्यार्षे रामायणे सुंदरकांडे एकचत्वारिंशः सर्गः ॥ ततः पक्षि
निनादेन वृक्षभंगस्वनेन च। बभूवुस्त्राससंभ्रांताः सर्वे लंकानिवासिनः ॥१॥ विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षिणः। रक्षसां च निमित्तानि घोराणि प्रतिपेदि
रे ॥२॥ ततो गतायां निद्रायां राक्षस्यो विकृताननाः। तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिं ॥३॥ स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः। चकार सुमहद्रूपं राक्षसीनां भया

दशास्यप्रमदानां स्त्रीणां भोगसंवर्धनद्वारा अवनस्य रक्षकस्य अशोकलताप्रताना अशोकलतासमूहा वनस्थली तरुगुल्मलताजलाशयादिभिः पूर्णा भूमिः कपे
र्बलात् शोकलताप्रताना शोच्यत इति शोकः। शोच्यलताप्रताना जातेति योजना। स इति। अर्थपतेः रावणस्य व्यलीकमप्रियं ॥ इति श्रीमहेश्वरतीर्थविरचितरा
मायणतत्त्वदीपिकायां सुंदरकांडे एकचत्वारिंशः सर्गः ॥ ॥

सुं०

कोयमिति। उत शब्दो वार्थे संवादो वा कथं कृतइति। पप्रच्छुरिति पूर्वेणासंबंधः। आचक्ष्वेति। त्वयासंवादं किंकृतवान् किमुद्दिश्य संवादं कृतवान्। आचक्ष्वेति। पप्रच्छुरिति पूर्वे
णासंबंधः। अथेति। कागतिः। क उपायः सुपमिति यो यं यद्वा करिष्यति तद्रूपमेव जानीतेति संबंधः। अहमिति। अस्य अहमाद्गीतास्मिनतत्रेति। उद्देशः प्रदेशः। तस्यो प्रेति

५६

ततस्तं गिरिसंकाशं अतिकायं महामतिं। राक्षसो वानरं दृष्ट्वा एष कुर्जनकात्मजां ॥५॥ कोयंकस्य कुतोवा यं किंनिमित्त मिहागतः। कथंत्वयानेन पुनः संवादः कृत
इत्युत ॥६॥ आवत्स्वनो विशालाक्षि मा भूत्तेसुभगे भयं। संवादममितायांगे त्वया किंकृतवानयं ॥७॥ अब्रवीत्तयासाध्वी सीता सर्वांगशोभना। रक्षसां कामरू
पाणां विज्ञाने मम कागतिः ॥८॥ यूयमेव हि जानीत यो यं यद्वा करिष्यति। अहिरेव ह्यहेः पादान्विजानाति न संशयः ॥९॥ अहमप्यस्य भीतास्मि नैनं जानामि कोन्व
यं। वेद्मि राक्षसमेवैनं कामरूपिणमागतं ॥१०॥ वैदेह्यावचनं श्रुत्वा राक्षस्यो विद्रुतास्तदा। स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुं ॥१२॥ रावणस्य समीपेत
राक्षस्यो विकृताननाः। विरूपं वानरं भीममाख्यातुमुपचक्रमुः ॥१३॥ अशोकवनिकामध्ये राजन्भीमवपुः कपिः। सीतयाकृतसंवारस्तिष्ठत्यमितविक्रमः। र
(शोकवनिकामध्ये राजन्भीम) न चतंजानकी सीता हरिंहरिणलोचना। अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥१४॥ वासवस्य भवेद्दूतो वैश्रवणस्य वा प्रेषि
तोवापि रामेणासीतान्वेषणकारणात् ॥१५॥ तेन त्वद्भुतरूपेण यत्तत्तव मनोहरं। नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनं ॥१६॥ नतत्र कश्चिदुद्देशो यस्तेन नवि
नाशितः। यत्र सा जानकी सीता सतेन नविनाशितः ॥१७॥ जानकीरक्षणार्थं वा श्रमाद्वा नोपलक्ष्यते। अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता १८ चारुप
ल्लवपत्राढ्यं यं सीता स्वयमास्थिता। प्रवृद्धः शिंशपावृक्षः सच तेनाभिरक्षितः ॥१९॥ तस्योग्ररूपस्योग्रं त्वं दंडमाज्ञातुमर्हसि। सीता संभाषिता येन वनं ते
नविनाशितं ॥२०॥ मनः परिगृहीतां तां तव रक्षोगणेश्वर। कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥२१॥ राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वर
ः। हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥२२॥ तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिंदवः। दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिंदवः ॥२३॥ आत्मनः स
दृशान्शूरान्किंकरान्नाम राक्षसान्। व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥२४॥ तेषामशीतिसाहस्रं किंकराणां तरस्विनां। निर्ययुर्भवनात्तस्मात्कूट
मुद्गरपाणयः ॥२५॥ महोदरा महादंष्ट्रा घोररूपा महाबलाः। युद्धाभिमनसः सर्वे हनूमद्ग्रहणोन्मुखाः ॥२६॥ ॥ ॥ ॥

।आज्ञातमाज्ञापयितं सीतयासहसंभाषणमस्यअपराधत्वं साधयंति। मनः परिगृहीतामिति। राजपत्नीमहसंभाषणं। पुंसोपराधइतिभावः। व्यादिदेश
ःकिंकराः। कियंतइत्यतआह। तेषामिति। निर्ययुरित्यायुक्तरशेषः ॥२६॥ ॥ ॥

राम

५६

तेकपंदिमिति। अवस्थितं युद्धाय संनद्धं॥ तदिति। कांचनैर्गदैः कांचनभूषणैः॥ तस्येति। आस्फोटितशब्देन क्ष्वेलाशब्देन सानुनादिना प्रतिध्वनिना। उन्नं तोरणं रुद्ध्वा हिः
स्वस्थानपार्श्वे स्वामिनं स्तौति जयतीति। मिषतां पश्यतां। अनादरे षष्ठी। तस्येति। सन्नादशब्देन सन्नादजनितशब्देन आस्फोटितशब्देन जनितप्रतिध्वनिनेत्यर्थः। स्वा

तेकपींद्रं समासाद्य तोरणस्थमवस्थितं। अभिपेतुर्महावेगाः पतंगा इव पावकं॥२७॥ तेगदाभिर्विचित्राभिः परिघैः कांचनांगदैः। आजघ्नुर्वानरश्रेष्ठं शरैश्चानिस
न्निभैः॥२८॥ मुद्गरैः पट्टिशैः शूलैः प्रासतोमरशक्तयः। परिवार्य हनूमंतं सहसा तस्थुरग्रतः॥२९॥ हनूमानपि तेजस्वी श्रीमान्पर्वतसन्निभः। क्षितावाविध्य लांगू
लं ननाद च महास्वनं॥३०॥ स भूत्वा तु महाकायो हनूमान्मारुतात्मजः। धृष्टमास्फोटयामास लंकां शब्देन पूरयन्॥३१॥ तस्यास्फोटितशब्देन महता सानुनादिना। पे
तुर्विहंगा गगनादुच्चैश्चेदमघोषयत्॥३२॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः॥३३॥ दासोहं कोसलेंद्रस्य रामस्या
क्लिष्टकर्मणः। हनूमान्शत्रुसैन्यानां निहंता मारुतात्मजः॥३४॥ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्। शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः॥३५॥ अर्दयित्वा
पुरीं लंकां अभिवाद्य च मैथिलीं। समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसां॥३६॥ तस्य सन्नादशब्देन ते भवन्भयशंकिताः। ददृशुश्च हनूमंतं संध्यामेघमिवोन्न
तं॥३७॥ स तं परिघमादाय जघान रजनीचरान्॥ सपंन्नेकांक्षी(पुनर्वीरस्तोरणं समुपस्थितः॥ ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः॥४०॥ निहतान्किं
करान्सर्वान्रावणाय न्यवेदयन्॥४१॥ स राक्षसानां निहतं महाबलं निशम्य राजा परिवृत्तलोचनः। किंकरान्हत्वा हनूमान्ध्यानमास्थितः। वनं भग्नं मया चैत्य
प्रासादो न विनाशितः॥ समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयं॥४२॥ इत्यार्षे रामायणे सुंदरकांडे द्विचत्वारिंशः सर्गः॥ एकोनविंशोद्विवर्तमानक
पसमाप्ता॥ ॥ ततः स किं+ वनं भग्नं मया चैत्यप्रासादो न विनाशितः॥१॥ तस्मात्प्रासादमप्येवमिमं विध्वंसयाम्यहं॥ इति संचिंत्य मनसा हनूमान्दर्शयन्बलं॥
चैत्यप्रासादमाप्लुत्य मेरुशृंगमिवोन्नतं। आरुरोह हरिश्रेष्ठो हनूमान्पवनात्मजः॥३॥ आरुह्य गिरिसंकाशं प्रासादं हरियूथपः। बभौ स सुमहातेजाः प्रतिसूर्य इवो
दितः॥४॥ स प्रधृष्य च दुर्धर्षं चैत्यप्रासादमुत्तमं। हनूमान्प्रज्वलन्लक्ष्म्या पारियात्रोपमोभवत् ॥५॥ + गमिवादाय स्फुरंतं विनतासुतः॥४०॥ विचचारांबरे वीरः परि
+ गृह्य च मारुतिः॥ स हत्वा राक्षसान्वीरः किंकरान्मारुतात्मजः॥४१॥ युद्धा॥ +

भीमैरिति। प्रहरणैरभिपेतुः आयुधैः प्रहरन्नित्यर्थः। सपन्नगमिति। परिघस्त्वेतत्र परिघः कर्म॥ ॥ सुंदरकांडे द्विचत्वारिंशः सर्गः॥ ततइति। पवनात्मजः। भीमं रूपं समास्थि
तः। आस्थितवान्॥ ॥

प्रासादस्येति। महांतस्य महोग्रस्य अत्युन्नतशिखरस्येत्यर्थः। महोन्नतस्येति वा पाठः। तत्रेति तत्र भ्रामितस्तंभसंतानतरसंघट्टनेनाग्निरभूदित्यर्थः। राक्षसरक्षा

स भूत्वा तु महाकायः प्रभाववान् मारुतात्मजः। धृष्टमास्फोटयामास लंकां शब्देन पूरयन्॥६॥ तस्यास्फोटितशब्देन महता श्रोत्रघातिना। पेतुर्विहंगमास्तत्र चैत्य
पालाश्च मोहिताः॥७॥ अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः॥८॥ दासोहं कोसलेंद्रस्य रामस्याक्लिष्टकर्मणः। हनुमा
ञ्छत्रुसैन्यानां निहंता मारुतात्मजः॥९॥ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्। शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः॥१०॥ अर्दयित्वा पुरीं लंकामभिवाद्य च मै
थिलीं। समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसां॥११॥ एवमुक्त्वा महाकायश्चैत्यस्थो हरियूथपः। ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयं॥१२॥ तेन शब्देन महता
चैत्यपालाः शतं ययुः। गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान्॥१३॥ विसृजंतो महाकायं मारुतिं पर्यवारयन्। ते गदाभिर्विचित्राभिः परिघैः कांच
नांगदैः॥१४॥ आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः। आवर्त इव गंगायास्तोयस्य विपुलो महान्॥१५॥ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः। ततो वातात्म
जः क्रुद्धो भीमरूपं समाश्रितः॥१६॥ प्रासादस्य महांतस्य स्तंभं हेमपरिष्कृतं। उत्पाटयित्वा वेगेन हनूमान्मारुतात्मजः॥१७॥ ततस्तं भ्रामयामास शतधारं महाबलः
। तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत॥१८॥ दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः। स राक्षसशतं हत्वा वज्रेणेंद्र इवासुरान्॥१९॥ अंतरिक्षे स्थितः श्रीमान्
इदं वचनमब्रवीत्। मादृशानां सहस्राणि विसृष्टानि महात्मनां॥२०॥ बलिनां वानरेंद्राणां सुग्रीववशवर्तिनां। अटंति वसुधां कृत्स्नां वयमन्ये च वानराः॥२१॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः। केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः॥२२॥ संति चौघबलाः केचित्केचिद्वायुबलोपमाः। अप्रमेयबलाः केचि
त्तत्रासन्हरियूथपाः॥२३॥ ईदृग्विधैस्तु हरिभिर्वृतो दंतनखायुधैः। शतैः शतसहस्रैश्च कोटीभिरयुतैरपि॥२४॥ आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः।
नेयमस्ति पुरी लंका न यूयं न च रावणः॥२५॥ यस्मादिक्ष्वाकुवीरेण बद्धं वैरं महात्मना॥२६॥ ॥ इत्यार्षे रामायणे सुंदरकांडे त्रिचत्वारिंशः सर्गः॥ संदिष्टो
राक्षसेंद्रेण प्रहस्तस्य सुतो बली। जंबुमाली महादंष्ट्रो निर्जगाम धनुर्धरः॥१॥ रक्तमाल्यांबरधरः स्रग्वी रुचिरकुंडलः। महान्विवृत्तनयनश्चंडः समरदुर्जय
ः॥२॥ धनुः शक्रधनुःप्रख्यं महद्रुचिरसायकं। विस्फारयानो वेगेन वज्राशनिसमस्वनं॥३॥ तस्य विस्फारघोषेण धनुषो महता दिशः। प्रदिशश्च दिशश्चैव
सहसा समपूर्यत॥४॥ रथेन खरयुक्तेन तमागतमुदीक्ष्य सः। हनूमान्वेगसंपन्नो जहर्ष च ननाद च॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

निर्विदारयितुं। मादृशानामित्यादि। संतीति। ओघबलाः ओघसंख्यासंख्यातगजबलाः। इति श्रीमहेश्वरतीर्थीये सुंदरकांडे त्रिचत्वारिंशः सर्गः॥

तमिति।तोरणविटंकस्थं।तोरणंकपोतपालिकास्थं।विटंकोनामतोरणस्तंभयोरुपरितिर्यङ्निहितदारु।ततस्येति।भुजेरक्तोबुजं।वेदनबिंदुभिः।तस्येति।नाम्नाःरथे
नसयुक्तेनेत्युक्तंस्वच्छंदेनखराउच्यते॥ इतिश्रीमहेश्वरतीर्थविरचितरामायणतत्वदीपिकायांसुंदरकांडेचतुश्चत्वारिंशःसर्गः॥ ततइति।समग्रीवचेसः।अभि

तंतोरणविटंकस्थंहनूमंतंमहाकपिं।जंबुमालीमहाबाहुर्विव्याधनिशितैःशरैः॥६॥अर्धचंद्रेणवदनेशिरस्येकेनकर्णिना।बाह्वोर्विव्याधनाराचैर्दशभिस्तंकपी
श्वरं॥७॥तस्यतच्छुशुभेताम्रंशरेणाभिहतंमुखं।शरदीवांबुजंफुल्लंविद्धंभास्कररश्मिना॥८॥तत्तस्यरक्तंरक्तेनरंजितंशुशुभेमुखं।यथाकाशेमहापद्मंसिक्तंचंदन
बिंदुभिः॥९॥चुकोपबाणाभिहतोराक्षसस्यमहाकपिः।ततःपार्श्वेतिविपुलांददर्शमहतींशिलां।तरसातांसमुत्पाट्यचिक्षेपबलवद्बली।तांशरैर्दशभिःक्रुद्धस्ता
डयामासराक्षसः॥११॥विपन्नंकर्मतद्दृष्ट्वाहनूमांश्चंडविक्रमः।सालंविपुलमुत्पाट्यभ्रामयामासवीर्यवान्॥१२॥भ्रामयंतंकपिंदृष्ट्वासालवृक्षंमहाबलं।चि
क्षेपसुबहून्बाणान्जंबुमालीमहाबलः॥१३॥सालंचतुर्भिश्चिच्छेदवानरंपंचभिर्भुजे।उरस्येकेनबाणेनदशभिस्तुस्तनांतरे॥१४॥सशरैःपूरिततनुःक्रोधेनमहता
वृतः।तमेवपरिघंगृह्यभ्रामयामासवेगितः॥१५॥अतिवेगोतिवेगेनभ्रामयित्वामहोत्कटः।परिघंपातयामाससंजंबुमालेर्महोरसि॥१६॥तस्यचैवशिरोनास्तिन
बाहूनजानुनी।नधनुर्नरथोनाश्वास्तत्रादृश्यंतनेषवः॥१७॥सहतस्तरसातेनजंबुमालिर्महारथः।पपातनिहतोभूमौचूर्णितांगइवद्रुमः॥१८॥जंबुमालिंच
निहतंकिंकरांश्चमहाबलान्।चुक्रोधरावणःश्रुत्वाक्रोधसंरक्तलोचनः॥१९॥सरोषसंवर्तितताम्रलोचनःप्रहस्तपुत्रेनिहतेमहाबले।अमात्यपुत्रानतिवी
र्यविक्रमान्समादिदेशाशुनिशाचरेश्वरः॥२०॥इत्यार्षेरामायणेसुंदरकांडेचतुश्चत्वारिंशःसर्गः॥ ततस्तेराक्षसेंद्रेणचोदितामंत्रिणःसुताः।निर्ययुर्भ
वनात्तस्मात्सप्तसप्ताचिर्वर्चसः॥१॥महाबलपरीवाराधनुष्मंतोमहाबलाः।कृतास्त्रास्त्रविदांश्रेष्ठाःपरस्परजयैषिणः॥२॥हेमजालपरिक्षिप्तैर्ध्वजवद्भिःपता
किभिः।तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः॥३॥तप्तकांचनचित्राणिचापान्यमितविक्रमाः।विस्फारयंतःसंहृष्टास्तडिद्वंतइवांबुदाः॥४॥जनन्यस्तु
ततस्तेषांविदित्वाकिंकरान्हतान्।बभूवुःशोकसंभ्रांताःसबांधवसुहृज्जनाः॥५॥तेपरस्परसंघर्षात्तप्तकांचनभूषणाः।अभिपेतुर्हनूमंतंतोरणस्थमव
स्थितं॥६॥सृजंतोबाणवृष्टिंतेरथगर्जितनिःस्वनाः।वृष्टिमंतइवांभोदाविचेरुर्नैर्ऋताम्बुदाः॥७॥अवकीर्णस्ततस्ताभिर्हनूमान्शरवृष्टिभिः।अभवत्संवृ
वर्चसः।महाबलेति।कृतास्त्राःअस्त्रविदांश्रेष्ठाः।कृतास्त्राःशिक्षितास्त्राःअस्त्रविदांवरश्रेष्ठाः।परस्परज॰ ताकारःशैलराडिववृष्टिभिः॥८॥
येषिणः।अहमहमिकयापरस्परोत्कर्षापेक्षयाइत्यर्थः॥ ॥

वनेदुरितानीडोरथावयवविशेषः ॥ इति श्रीसुंदरकांडे पंचचत्वारिंशः सर्गः ॥ हतानीति । संवृताकारः गूढाकारः अंतः संजातशंकइत्यर्थः । उत्क्रमं मतिं
धैर्यं यो विदितइति अन्यक्त्समणा प्रकारेण कपिः शास्यतां यत्नैः यतमानैः । अप्रमत्तैरिति यावत् किंचात्र देशकालविरुद्धं कर्म न कार्यमित्याह । कर्मचेति देशकालविरो

सशरान्वंचयामासतेषामाप्लुवरः कपिः । रथवेगांश्चवीराणांविचरन्विमलेंबरे ॥ १९ ॥ सतैः क्रीडन्धनुष्मद्भिर्व्योम्निवीरः प्रकाशते । धनुष्मद्भिर्यथा मेघैर्मारुत
ः प्रभुरंबरे ॥ २० ॥ सकृत्वा निनदं घोरं त्रासयंस्तां महाचमूं । चकार हनुमान्वेगं तेषु रक्षःसु वीर्यवान् ॥ २१ ॥ तलेनाभ्यहनत्कांश्चित्पादैः कांश्चित्परंतपः । मुष्टिभिश्चाहन
त्कांश्चिन्नखैः कांश्चिद्व्यदारयत् प्रममाथ रथ्यांश्चिदूरुभ्यामपरान्कपिः । केचित्तस्यैव नादेन तत्रैव पतिता भुवि ॥ २३ ॥ ततस्तेष्ववसन्नेषु भूमौ निपतितेषु च
॥ तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितं ॥ २४ ॥ विनेदुर्विस्वरं नागा निपेतुर्भुवि वाजिनः । भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाभवद्रथैः ॥ २५ ॥ स्रवता रुधिरेणाथ स्रवं
तो दर्शिताः पथि । विविधैः स्वरैर्लंका ननाद विकृतं तदा ॥ २६ ॥ स तान्प्रवृद्धान्विनिहत्य राक्षसान्महाबलश्चंडपराक्रमः कपिः । युयुत्सुरन्यैः पुनरेव रा
क्षसैस्तदेव वीरोऽभिजगाम तोरणं ॥ २७ ॥ इत्यार्षे रामायणे सुंदरकांडे पंचचत्वारिंशः सर्गः ॥ हतान्मंत्रिसुतान्बुद्ध्वा वानरेण महात्मना । रावणः संवृताका
रश्चकार मतिमान्मतिं ॥ १ ॥ स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसं । प्रघसं भासकर्णं च पंच सेनाग्रनायकान् ॥ २ ॥ संदिदेश दशग्रीवो वीरान्नयविशारदान् । हनु
मद्ग्रहणेऽव्यग्रान्वायुवेगसमान्युधि ॥ ३ ॥ यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः । सवाजिरथमातंगाः स कपिः शास्यतामिति ॥ ४ ॥ यत्तैश्च खलु भाव्यं स्या
त्तमासाद्य वनालयं । कर्म चापि समाधेयं देशकालाविरोधितं ५ न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् । सर्वथा तन्महद्भूतं महाबलपरिग्रहं ॥ ६ ॥ भवेदिंद्रे
ण वा सृष्टमस्मदर्थं तपोबलात् । सनागयक्षगंधर्वदेवासुरमहर्षयः ॥ ७ ॥ युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः । तैरवश्यं विधातव्यं व्यलीकं किंचि
देव नः ॥ ८ ॥ तदेव नात्र संदेहः प्रसह्य परिगृह्यतां ॥

धिनं देशकालविरोधीत्यर्थः । आर्षो लिंगविभक्तिव्यत्ययः । कर्म समाधेयं परिहर्तव्यं देशकालाविरोधिनमिति पाठे । समाधेयं कर्तव्यं । अत्र हेतुमाह । नहीति
सर्वथेति इंद्रेणावेति वाशब्दादन्येन वेत्यर्थः । अस्मदर्थं अस्मन्निग्रहार्थं । अत्र हेतुः । सनागेत्यादि श्लोकद्वयमेकं वाक्यं । परिगृह्यतां कपिरिति शेषः ॥

वीइति।गायत्र्यास्त्वत्रर्द्दशाक्षरं तावमात्रमित्यस्य श्लोकस्य एकादशाक्षरेण वीइत्यनेन संगृह्णाति।नावमान्यो भवद्भिश्च हरिर्वीरपराक्रमः।दृष्टा हि हरयः पूर्वं मया वि
पुलविक्रमाः नैवेति।नैवतेषामित्यादौ हीनशङ्को नत्र सहस्रवर्द्धदृक्शङ्को व्याहन्तव्यः तथा देवेयोजना।हनूमतो भीमा गतिः तेजश्चारिकं यथा तथा तेषां वाल्मारी

॥अत्र गायत्र्या वी॥ ॥नावमान्यो भवद्भिश्च कपिर्वीरपराक्रमः।दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः॥२०॥वाली च सह सुग्रीवो जाम्बवांश्च महाबलः।
नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः॥२१॥नैव तेषां गतिर्भीमा न तेजो न पराक्रमः।न गतिर्न बलोत्साहो न रूपपरिकल्पने॥२२॥महत्सत्त्वमिदं ज्ञेयं कपि
रूपं व्यवस्थितं प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः॥२३॥कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः।भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे॥२३॥
तथापि तु नयज्ञेन जयमाकांक्षता रणे।आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चंचला॥२४॥ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः।समुत्पेतुर्महावेगा हुताश
समतेजसः॥२५॥रथैर्मत्तैश्च नागैश्च वाजिभिश्च महाजवैः।शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः॥२६॥ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिं।रश्मि
मंतमिवोद्यंतं स्वतेजोरश्मिमालिनं॥२७॥तोरणस्थं महावेगं महासत्त्वं महाबलं।महामतिं महोत्साहं महाकायं महाभुजं॥२८॥तं समीक्ष्यैव ते सर्वे दिक्षु सर्
वास्ववस्थिताः।तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः॥२९॥तस्य पंचायसास्तीक्ष्णाः सिताः पीतमुखाः शराः।शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः
॥३०॥स तैः पंचभिराविद्धः शरैः शिरसि वानरः।उत्पपात नदन्व्योम्नि दिशो दश विनादयन्॥३१॥ततस्तु दुर्धरो वीरः सरथः सज्जकार्मुकः।किरन्शरशतै
स्तीक्ष्णैरभिपेदे महाबलः॥३२॥स कपिर्वारयामास तं व्योम्नि शरवर्षिणं।वृष्टिमंतं पयोदांते पयोदमिव मारुतः॥३३॥अर्द्यमानस्ततस्तेन दुर्धरेणानिला
त्मजः।चकार निनदं भूयो व्यवर्धत च वेगवान्॥३४॥स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः।निपपात महावेगो विद्युद्राशिर्गिराविव॥३५॥ततः समथित्ता
ष्टाश्वं रथं भग्नाक्षकूबरं।विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः॥३६॥तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि।तौ जातरोषौ दुर्धर्षावुत्पेततुररिंदमौ॥३७॥
स ताभ्यां सहसोत्पत्य विष्ठितो विमलेंबरे।मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः॥३८॥तयोर्वेगवतोर्वेगं निहत्य स महाबलः।निपपात पुनर्भूमौ
नांनात्तीनियोजनारूपपरिकल्पनं यथेप्सितरूपपरिग्रहणं।तस्येति तौ तीक्ष्णाः मर्महिं।सुपर्णइव वेगितः॥३९॥स सालवृक्षमासाद्य समुत्पाट्य च वानरः।तावुभौ राक्षसौ
दः पीतमुखाः पीतानि पीतरुधिराणि मुखानि शल्याभिये षां ते तथा शत्रुशोणितरंजिताइत्यर्थः।उत्पलपत्राभाः तदुक्तिः सदृशमिति।विद्युद्राशिः अशनि संघ
शनिसंघातः एकतः स्ववस्थिताइत्यन्वयः।एकत्रस्थिता विमर्थः॥२९॥ ॥

किष्किंधाटी: ५४

सुं० ५९ विकृतगात्रैरुपलक्षितः ॥ ततद्ति ॥ ध्वजिनीं तस्तानीन्सेनापतीन् । परिगृह्य आश्रित्य स्थित इति शेषः । कृतक्षणः लब्धावसरः ॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे षट्चत्वा-
रिंशः सर्गः ॥ सतस्येति ॥ द्विजातिमुख्यैः हविषा उदीरितः पावक इवेति संबंधः ॥ ततो महदित्यादिश्लोको क्रमेवार्थं प्रयं वयति । ततस्तप इत्यादिश्लोकत्रये तापतः संग्रह

ततस्तां स्त्रीन्हतान्ज्ञात्वा वानरेण तरस्विना । अभिपेदे महावेगः प्रहस्य प्रघसो वली ॥ २० ॥ भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् । एकतः कपिशार्दू-
लं यशस्विनमवस्थितौ ॥ २१ ॥ पट्टिसेन शितायेण प्रघसः प्रत्ययोधयत् । भासकर्णश्च शूलेन राक्षसः कपिकुंजरं ॥ २२ ॥ स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः । अभ-
वद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ २३ ॥ समुत्पाट्य गिरेः शृंगं समृगव्यालपादपं । जघान हनुमान्वीरो राक्षसौ कपिकुंजरः ॥ २४ ॥ गिरिशृंगसुनिष्पिष्टौ तिलशस्तौ व-
भूवतुः । ततस्तेष्ववसन्नेषु सेनापतिषु पंचसु ॥ २५ ॥ बलं तदवशेषं तु नाशयामास वानरः । अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथै रथान् । स कपिर्नाशयामास सह-
स्राक्ष इवासुरान् ॥ २६ ॥ हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः । हतैश्च राक्षसैर्भूमी रुद्धमार्गा समंततः ॥ २७ ॥ ततः कपिस्तान्ध्वजिनीपतीन्रणे निहत्य वीरान्सब-
लान्सवाहनान् । तदेव वीरः परिगृह्य तोरणं कृतक्षणः कालइव प्रजाक्षये ॥ २८ ॥ इत्यार्षे रामायणे सुंदरकांडे षट्चत्वारिंशः सर्गः ॥ ॥ सेनापतीन्पंच स तु प्रम-
थितान्हनूमता सानुचरान्सवाहनान् । निशम्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताग्रे ॥ १ ॥ स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्कांचनचित्र-
कार्मुकः । समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥ ततो महान्बालदिवाकरप्रभं प्रतप्तजांबूनदजालसंततं । रथं समास्थाय य-
यौ स वीर्यवान्महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥ ततस्तपःसंग्रहसंचयार्जितं प्रतप्तजांबूनदजालचित्रितं । पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्व-
वरैः सुयोजितं ॥ ४ ॥ सुरासुराधृष्यमसंगचारिणं तडित्प्रभं व्योमचरं समाहितं । सतूणमष्टासिनिबद्धबंधुरं यथाक्रमावेशितशक्तितोमरं ॥ ५ ॥ विराजमानं
प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा । दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥ स पूरयन्खं च महीं च साचलां तुरं-
गमातंगमहारथस्वनैः । बलैः समेतैः सहितोरणस्थितं समर्थमासीनमुपागमत्कपिं ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

संचयार्जितं तपोनुष्ठानसमूहसंपादितं समाहितं सज्जीकृतं । सतूणमिति । अष्टासिनिबद्धबंधुरं अष्टाभिरसिभिः निबद्धं अत एव बंधुरं सुंदरं परिपूर्ण- राम ५९
वस्तुना समग्रसमरोपकरणेन सहेमदाम्ना शशिसूर्यवर्चसा हेमदाम्ना विराजमानं रथमास्थितो निर्जगामेति संबंधः । दिवाकराभमित्यादि पुनरुक्तं तेन रविप्र-
भत्वमितस्यानुस्मरणार्थं ॥ ॥

सतमितिहरीकृताःसिंहदृष्टिः। ततइति। स्वाशुपराक्रमःनीलोपोरूपःसमागतः। संप्रहारः। प्रहासेति। अरूपुद्रुतमणेहर्षो रिपवाभावातदेशांतस्थोऽपिस्वर्यःस्त
द्रुतानततोपतिभावः। सततस्येतिसमाधिसंयोगाद्विमोक्षतत्ववित्समाधिः। लक्ष्येदृष्टिः। संयोगः। शरसंधानं विमोक्षः। तद्विसर्गः। तेषां तत्ववित्तेषुविशारदइत्यर्थः। ततइ

सतंसमाद्रहरिहरीकृतोयुगांतकालाग्निमिवप्रजाक्षये। अवस्थितंविस्मयजातसंभ्रमं संप्रेक्षतासौवहुमानचक्षुषा ८ ॥ सतस्यवेगंचकपेर्महात्मनः पराक्रमेणा
रिपुपार्थिवात्मजः। विचारयन्स्वंवलमप्रमेयंवलोयुगक्षयेसूर्यइवाभिवर्द्धते ९ सजातमन्युःप्रसमीक्ष्यविक्रमंस्थितःस्थिरःसंयतिदुर्निवारणं। समाहितात्माह
नुमंतमाहवेप्रचोदयामासशितैःशरैस्त्रिभिः ॥१०॥ ततःकपिस्तंप्रसमीक्ष्यगर्वितंजितश्रमंशत्रुपराजयोचितं। अवैक्षताक्षःसमुदीर्णमानसंसवाणपाणिःप्रगृही
तकार्मुकः ॥११॥ सहेमनिष्कांगदचारुकुंडलःसमाससादाशुपराक्रमःकपिं। तयोर्वभूवाप्रतिमःसमागमःसुरासुराणामपिसंभ्रमप्रदः ॥१२॥ ररास भूमिर्न त
तापभानुमान्ववौनवायुःप्रचचालचाचलः। कपेःकुमारस्यचवीक्ष्यसंयुगंननादचद्यौरुदधिश्चचुक्षुभे ॥१३॥ सतस्यवीरःसुमुखान्पतत्रिणःसुवर्णपुंखान्सविषा
निवोरगान्। समाधिसंयोगविमोक्षतत्वविच्छरानथत्रीन्कपिमूर्ध्न्यपातयत् ॥१४॥ ततःशरैर्मूर्ध्निसमंनिपातितैःक्षरन्नसृग्दिग्धविवृत्तलोचनः। नवोदितादित्यनि
भःशरांशुमान्व्यराजतादित्यइवांशुमालिकः ॥१५॥ ततस्तुवंगाधिपमंत्रिसत्तमःसमीक्ष्यतंराजवरात्मजोरणे। उदग्रचित्रायुधचित्रकार्मुकंजहर्षचापूर्यतचा
हवोन्मुखः ॥१६॥ समंदराग्रस्थइवांशुमालीक्रोधविवृद्धकोपोवलवीर्यसंयुतः। कुमारमक्षंसवलंसवाहनंददाहनेत्राग्निमरीचिभिस्तदा ॥१७॥ ततःसवाणासन
चित्रकार्मुकःशरप्रवर्षोयुधिराक्षसांवुदः। शरान्मुमोचाशुहरीश्वराचलेवलाहकोवृष्टिमिवाचलोत्तमे ॥१८॥ कपिस्ततस्तंरणचंडविक्रमंप्रवृद्धतेजोवलवीर्य
सायकं। कुमारमक्षंप्रसमीक्ष्यसंयुगेननादहर्षाद्घनतुल्यनिस्वनः ॥१९॥ सवालभावाद्युधिवीर्यदर्पितःप्रवृद्धमन्युःक्षतजोपमेक्षणः। समाससादाप्रतिमंरण
णेकपिंगजोमहाकूपमिवावृतंतृणैः ॥२०॥ सतेनवाणैःप्रसभंनिपातितैश्चकारनादंघननादनिस्वनः। समुत्पपाताशुनभःसमारुतिर्भुजोरुविक्षेपणघोरद
र्शनः ॥२०॥ समुत्पतंतंसमभिद्रवद्वलीसराक्षसानांप्रवरःप्रतापवान्। रथीरथिश्रेष्ठतमःकिरन्शरैःपयोधरःशैलमिवाश्मवृष्टिभि ॥२१॥ सतान्शरांस्तस्यहरि
र्विमोक्षयन्चचारवीरःपथिवायुसेविते। शरांतरेमारुतवद्विनिष्पतन्मनोजवःसंयतिभीमविक्रमः ॥२२॥ ॥ ॥

तिश्चापूर्यतव्यवर्द्धतसइतिमंदराग्रस्थःउन्नतराययगोमंदाग्रेमध्याह्नकालिनःसूर्यइत्यर्थः। ततइति। वाणासनचित्रकार्मुकःवाणानामासनंवाणासनंशिंपाचित्रकार्मु
कंयस्यसतथोक्तः। वाणासनवक्रकार्मुकइत्यपिपाठः ॥ ॥

सुं
९०

तमितिष्वासस्तर्णांते आदार्यतं अवालवदिति प्रमापणे। हननेऽत्र मतिं समाहितः अवहितः अतिसहः अतिसहिष्णुः। इतीति। स्वकर्मयोगं विधायसक-
र्तव्यचिंतां कृत्वा पूर्वमश्वान्हत्वा पश्चाद् इमं हनिष्यामीति निश्चित्येत्यर्थः। सतस्मे तिविवर्त्तेनेरयणा ति षु संचरन्तमनेहयान्हयानान्तरइति प्रभग्ननीडः प्रभग्नरथ-

तमाहृबास्यसनमाहवोल्लुखंखमास्तर्णांतं विविधैः शरोत्तमैः। अवेक्ष्य तां स बहुमानवत्कृपाजगाम चिंतां सवमारुतात्मजः॥ २३॥ ततः शरैर्भिन्नभुजांत-
रः कपिः कुमारवीर्येण महात्मना नदन्। महाभुजः कर्मविशेषतत्त्ववित् विचिंतयामास रणे पराक्रमं॥ २४॥ अवालवद्वालदिवाकरप्रभः करोत्ययं कर्म महान्म-
हाबलः। न चास्य सर्वाहवकर्मशालिनः प्रमापणे मे मतिरत्र जायते॥ २५॥ अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे। असंशयं कर्मगुणोदया-
दयं सनागयक्षैर्मुनिभिश्च पूजितः॥ २६॥ पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखाग्रतः स्थितः। पराक्रमो ह्यस्य मनांसि कंपयेत् सुरासुराणामपि
शीघ्रकारिणः॥ २७॥ न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते। प्रमापणं त्वस्य ममाद्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः॥ २८॥ इति प्रवेगं
तु परस्य तर्कयन् स्वकर्मयोगं च विधाय वीर्यवान्। चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे महात्मनः॥ २९॥ स तस्य तानष्टवरान्महाहयान्समाहिता-
न्भारसहान्विवर्तने। जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः॥ ३०॥ ततस्तलेनाभिहतो महारथः स तस्य पिंगाधिपमंत्रिनंदनः। प्रभ-
ग्ननीडः परिमुक्तकूबरः पपात भूमौ हतवाजिरंबरात्॥ ३१॥ स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन्। तपोऽभियोगादृषिरुग्रवीर्यवा-
न्विहाय देहं मरुतामिवालयं॥ ३२॥ ततः कपिस्तं विचरंतमंबरे पतत्रिराजानिलसिद्धसेविते। समेत्य तं मारुततुल्यविक्रमः करेण जग्राह च पादयोर्दृढं॥
३३ स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवांडजेश्वरः। मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः॥ ३४॥ स भग्नबाहूरुकटी-
शिरोधरः क्षरन्नसृङ्निर्मथितास्थिलोचनः। संभिन्नसंधिः प्रविकीर्णबंधनो हतः क्षितौ वायुसुतेन राक्षसः॥ ३५॥ महाकपिर्भूमितले निपीड्य तं चकार रक्षो-
ऽधिपतेर्महद्भयं। महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सयक्षपन्नगैः॥ ३६॥ सुरैश्च सेंद्रैर्भृशजातविस्मयैर्हते कुमारे स कपिर्निरीक्षितः।
निहत्य तं वज्रिसुतोपमप्रभं कुमारमक्षं क्षतजोपमेक्षणं॥ ३७॥ तदेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये॥ ३८॥ इत्यार्षे रामायणे सुंदर राम ९०
गत्रैः कूबरः युगंधरः। स तमिति मरुतामालयमुत्पतन्नृषिरिव बभूवेति शेषः। महर्षिभिरिति चक्रचरैः ज्योतिश्चक्रचरैः॥ कांडे सप्तचत्वारिंशः सर्गः॥ ॥ ॥
वर्त्तिभिः। वज्रिसुतः इंद्रसुतः॥ ॥ ॥ इति श्रीसुंदरकांडे सप्तचत्वारिंशः सर्गः॥ ॥ ॥

तवेति। तवास्त्रबलमासाद्य आभिमुख्येन स्थित्वा सुरेश्वरसमाश्रिताश्च न शेकुः। नेति। कश्चिदपि न गतश्रमो न सर्वे प्राप्तश्रमा इत्यर्थः। नतेस्मीति। हे समरेषु कर्मणा पराक्रमेण
ते अशक्यं नास्ति मतिपूर्वं मंत्रणो बुद्धिपूर्वकविचारे ते अकार्यमकार्यविषये ज्ञानं नास्ति मोहः। त्रिषु कर्मणां सम्पृक्त्वं न इति संग्रहा लोकाः तेषु त्रिषु ते अस्त्रबलं स्वभावविक्रम
लेच योनवेरसकृच्छ्रित्रा अस्ति सर्वे ज्ञाने नीत्यर्थः। ममेति। रणापमर्दे रणसंकरविषये मम मनस्त्वां समासाद्य चिंतयित्वा निश्चितार्थं निश्चितविजयम् ...
पारं न गच्छतीत्यर्थः। नहीति। अरिनिषूदन त्वयि मे यः सार उत्कर्षप्रत्ययः स तेषु नास्ति वहीति योजना। इदमिति। इदं किं करोम्यहं तु मे संतमारकं ...
बलं शारीरं प्रभावं माहात्म्यं पराक्रमं पौरुषं। बलेति। अस्त्रविदां वरिष्ठ। शांतशत्रौ त्वयि गते इतो निर्गते सति इह देहे हनूमत्समीपं प्राप्ते सति बलावमर्दः सेनानाशः
ततस्तु रक्षोधिपतिर्महात्मा हनूमता तेन हते कुमारे। मनः समाधाय सदेवकल्पं समादिदेशेंद्रजितं सरोषं॥१॥ त्वमस्त्रभृत्सु बलवान्वरिष्ठः सुरासुराणामपि शोककर्ता॥
सुरेषु सेंद्रेषु च दृष्टकर्मा पितामहाराधनसंचितास्त्रः॥२॥ तवास्त्रबलमासाद्य नासुरा न मरुद्गणाः। न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः॥३॥ न कश्चित्त्रिषु लोकेषु संयु
गे न गतश्रमः। भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः॥४॥ देशकालप्रधानस्त्वमेव मतिसत्तम॥५॥ न तेस्त्यशक्यं समरेषु कर्मणा न ते स्वकार्ये मतिपूर्वमंत्रणे नास्ति क
श्चित्त्रिषु संग्रहेषु वै न वेद यस्तेस्त्रबलं बलं च ते॥६॥ मयानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे। न त्वां समासाद्य रणावमर्दने मनः श्रमं गच्छति निश्चितार्थे
॥७॥ निहताः किंकराः सर्वे जंबुमाली च राक्षसः। अमात्यपुत्रा वीराश्च पंच तपसो बलेन च ने पराक्रमश्चास्त्रबलेन संयुगे। न त्वां समासाद्य रणावमर्द्दिनं मनः श्रमं गच्छति
निश्चितार्थे॥७॥ निहताः किंकराः सर्वे जंबुमाली च राक्षसः। अमात्यपुत्रा वीराश्च पंच सेनाग्रनायकाः॥८॥ बलानि सुसमृद्धानि साश्वनागरथानि च। सहोदरस्ते दयितः
कुमारोऽक्षश्च सूदितः॥९॥ न हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन॥१०॥ इदं च दृष्ट्वा निहतं महद्बलं कपेः प्रभावं च पराक्रमं च। त्वमात्मनश्चापि निरीक्ष्य सारं कुरुष्व वेगं स्व
बलानुरूपं॥११॥ बलावमर्दस्त्वयि संनिकृष्टे यथा गते शाम्यति शांतशत्रौ। तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रभृतां वरिष्ठ॥१२॥ न वीर सेना गणशो च्यवंति
घाः ज्ञात्पत्तिसेनाक्षयो यथा न स्यात्तथा आत्मबलं परं च समीक्ष्य समारभस्व सेनाना॥ न वज्रमादाय विशालसारं। न मारुतस्यास्ति गतिप्रमाणं न चाग्निकल्पः करणेन हंतुं १३
शा पूर्वमेव शत्रुसंहारं कुर्वित्यर्थः। नवायं सेनाभिजेतुं शक्य उत्साहः। न वीरेति। हे वीर गणशो विगणानश्च च्यवतीति गणशो करहनूमानतस्मिन्निभिन्ने सेनाभावे तिनरहं
तिगणशो च्यवंतीति पाठे सद्यशोऽपि सेनानाशं ति तत्र हेतुः। नेति। मारुतस्य मारुते गतिप्रमाणं गतेः परसेनाक्रमणार्थे गमनस्य प्रमाणं परिज्ञानं नास्ति मारुतेः सर्वरि
मामनशीले तथा कश्यादि ज्ञापणागत्य सेनां प्रहरिष्यतीति न ज्ञायत इति भावः। यद्वा। अस्य हनूमतो गतिप्रमाणं मारुतस्य वायोरपि नास्ति ततोऽप्यधिक इत्यर्थः। किंच
। अग्निकल्पः। अग्निसदृशः अतएव करणेन मुष्ट्यादिना हंतुं न शक्य इति शेषः। अतः वज्रं। वज्रप्रायमप्यायुधं। अलसारं कुरु धारं। नदारायनविशरणं नप्रविश॥

सु. नर्हि किंकर्तव्यमित्यत आह । तमेवमिति । तमर्थं पूर्वोक्तमर्थं । एवं प्रसमीक्ष्य उक्तप्रकारेणानिरूप्य स्वकर्मसाम्यात्स्वकार्यैकत्वाद्धेतोः समाहितात्मा समाहितमनाः स महाकपिर्महा
६१ वीर्यं धनुष्मद्वीर्यं स्मरन्नप्रकृतेयथा भवति तथा कर्मसमारभस्व बुद्धेतियोजना । नखल्विति । अहेलां सप्रेषयामीति यत्तद्यं मतिर्न श्रेष्ठा खलु नोचितेत्यर्थः । इयं मतिः तत्स्वप
ता विषयामतिः राजनीतिरूपधर्माणां । क्षमस्वतस्तनुष्ठातुः क्षत्रियस्य वमता उचितेत्यर्थः । नानेति । हे अरिंदम संग्रामेनानाशस्त्रैर्वैशारद्यं सामर्थ्यं तवास्तीति शेषः । अत

तमेवमर्थं प्रसमीक्ष्य सम्यक्स्वकर्मसाम्याद्धि समाहितात्मा । स्मरंश्च दिव्यं धनुषोस्यवीर्यं व्रजत्विलंकर्म समारभस्व ॥१४॥ न खल्वियं मतिश्रेष्ठ यत्त्वां संप्रेषयाम्यहं । इयं
च राजधर्माणां क्षत्रियस्य मतिर्मता ॥१५॥ नानाशस्त्रैश्च संग्रामे वैशारद्यमरिंदम । अवश्यमेव योद्धव्यं काम्यश्च विजयो रणे ॥१६॥ ततः पितुस्तद्वचनं निशाम्य प्रदक्षिणं र
क्षःसुतः प्रभावः ॥ चकार भर्तारमदीनसत्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥१७॥ ततस्तैः स्वगणैरिष्टैरिंद्रजित्प्रतिपूजितः । युद्धोद्धतः कृतोत्साहः संग्राममभ्यपद्यत ॥१८॥
श्रीमान्पद्मपलाशाक्षो राक्षसाधिपतेः सुतः । निर्जगाम महातेजाः समुद्र इव पर्वसु ॥१९॥ स पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः । रथं समा
युक्तमसह्यवेगं समारुरोहेंद्रजिदिंद्रकल्पः ॥२०॥ स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्रविदां वरः । रथेनाभिययौ क्षिप्रं हनूमान्यत्र सोऽभवत् ॥२१॥ स तस्य रथनिर्घोषं ज्यास्वनं का
र्मुकस्य च । निशम्य हरिवीरोऽसौ संप्रहृष्टतरोऽभवत् ॥२२॥ सुमहच्चापमादाय शितशल्यांश्च सायकान् । हनूमंतमभिप्रेत्य जगाम रणपंडितः ॥२३॥ तस्मिंस्ततः संयति जा
तहर्षे रणाय निर्गच्छति बाणपाणौ । दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा बहुधा विनेदुः ॥२४॥ समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः । नभः स
माहृत्य च पक्षिसंघा विनेदुरुच्चैः परमं प्रहृष्टाः ॥२५॥ आयांतं सरथं दृष्ट्वा तूर्णमिंद्रजितं कपिः । विननाद महानादं व्यवर्द्धत च वेगवान् ॥२६॥ इंद्रजित्तु रथं दिव्यमास्थि
तश्चित्रकार्मुकः । धनुर्विस्फारयामास तडिदूर्जितनिःस्वनं ॥२७॥ ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशंकौ । कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरें
द्राविव बद्धवैरौ ॥२८॥ स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य । शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितुरप्रमेये ॥२९॥ ततः शरानायततीक्ष्णशा
वेगान्सुपत्रिणः कांचनचित्रपुंखान् । मुमोच वीरः परवीरहंता सुसंनतान्वज्रसमानवेगान् ॥३०॥ स तस्य तत्स्यंदननिःस्वनं च मृदंगभेरीपटहस्वनं च । विकृष्य राम

अवश्यमेव योद्धव्यं रणे विजयः काम्यः प्रार्थनीय एव । तत इति रक्षःसुतः प्रभावः रक्षःसुतारेवाः ।त। मानस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥३१॥ ६१
रक्षःसुतप्रभावः । स इति । पक्षिराजोपमतुल्यवेगैः । पक्षिराजोपमैः तुल्यवेगैः । अश्वमोत्तम... श्चतुर्भिः ... हिमपक्षिभिः समागता इति । चक्रचराः ज्योतिश्च
क्रसंचारिणः । इंद्रजिदिति । तडिदूर्जितनिःस्वनं तडित्स्फूर्जितनिःस्वनं तडिद्वेनाशनिरुच्यते । ततः इति सुपत्रिणः प्रशस्तपक्षाः ॥ ॥

शराणामिति। अनिलस्य अनलसवेधनप्रसिद्धस्य तस्य इंद्रजित अनलस्य सर्वग्रहं लक्ष्यसंग्रहणं लक्ष्यविषयदृष्टिमिति यावत्। मोघयन्नावितथीकुर्वन्नामोहयन्निति पाठे विपर्यसयन्। व्यवृद्धे तेन संबंधः। अंतरं रंध्रं। ततस्त्विति। अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यं अभेत्ते। हनुमति विहन्यमाने स्वयमेव शरैरमोघैस्तु च मानेस्मतिः शरैर विहन्यमाने मतीत्यर्थः। हतेति। त्वया त्वकर्मकर्त्तरि लङ्। शान्तात्मेति। समाधिं स योगं समाहितात्मा समाधीयतइति समाधिः। लक्ष्ये तस्मिन्न मोघं शरसंधाने च समाहितात्मा। अप्रमत्तचित्त। लक्ष्यसंधानशरसंधानदत्तचित्त इत्यर्थः। शरेष्वमोघेष्वपि पाठः। ततइति। राक्षसराजसूनुः तस्य कपेः अवध्यतां। समीक्ष्य निग्रहार्थं बंधनार्थं। कथं निगच्छेदिति।। निश्चितां

शराणामंतरेष्वाशु व्यवर्त्तत महाकपिः। हरिस्तस्याभिलक्षस्य मोघयन्लक्ष्यसंग्रहं ॥३३॥ शराणामग्रतस्तस्य पुनः समभिवर्त्तत। प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥३३॥ तावुभौ वेगसंपन्नौ रणकर्मविशारदौ। सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमं ॥३४॥ हनूमतो वेद न राक्षसोंतरं न मारुतिस्तस्य महात्मनोंतरं। परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥३५॥ ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु। जगाम चिंतां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥३६॥ ततो मतिं राक्षसराजसूनुश्चकार तस्मिन् हरिवीरमुख्ये। अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थं ॥३७॥ ततः पैतामहं वीरः सोस्त्रमस्त्रविदांवरः। संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥३८॥ अवध्योयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित्। निजग्राह महाबाहुर्मारुतात्मजमिंद्रजित् ॥३९॥ तेन बद्धस्ततोस्त्रेण राक्षसेन स वानरः। अभवन्निर्विचेष्टश्च पपात च महीतले ॥४०॥ ततोथ बुद्धा स तदस्त्रबंधं प्रभोः प्रभावाद्विगतात्मवेगः। पितामहानुग्रहमात्मनश्च विचिंतयामास हरिप्रवीरः ॥४१॥ ततः स्वायंभुवैर्मंत्रैर्ब्रह्मास्त्रमभिमंत्रितं। हनूमांश्चिंतयामास वरदानं पितामहात् ॥४२॥ न मेस्य बंधस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात्। इत्येवमेवं विहितोस्त्रबंधो मयात्मयोनेरनुवर्तितव्यः ॥४३॥ स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च। विमोक्षशक्तिं परिचिंत्य पितामहाज्ञामनुवर्त्तते स्म ॥४४॥ अस्त्रेणापि हि बद्धस्य भयं मम न जायते। पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च ॥४५॥ ग्रहणे चापि रक्षोभिर्महान्मे गुणदर्शनः। राक्षसेंद्रेण संवादस्तस्माद्गृह्णंतु मां परे ॥४६॥ स निश्चितार्थः परवीरहंता समीक्ष्यकारी विनिवृत्तचेष्टः। परैः प्रसह्याभिगतैर्निगृह्य ननाद तैस्तैः परिभर्त्स्यमानः ॥४७॥ ततस्तं राक्षसा दृष्ट्वा निर्विचेष्ट

च्छेदिति तस्मिन् हरिवीरमुख्ये मतिं चकारेति संबंधः। अवध्य इति। जग्राह बबंध। ततइति। ब्रह्मास्त्रमभिमंत्रितं। मरिंदमं बबंधुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥४८॥ विदित्वेति शेषः। अथेति। इदमपि प्रापानुवादपूर्वकं स्वकर्तव्यमाह। नमइति। लोकगुरोः प्रभावादस्य बंधस्य विमोक्षणे मम शक्तिर्नास्ति। एवमस्त्रं एवं विहितः इत्जिता अनेन प्रकारेणोक्तः। ततः। आत्मयोनेरस्त्रबंधः मया अनुवर्तितव्य इत्यन्वयः। अस्त्रेणेति। पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च किमास्ति भयमस्य प्रकृत्य

४८

सुं. सऽइति।सः हनूमान्राक्षसेंद्रःकौतूहलात्मांद्रष्टुंव्यवस्येदिति निश्चितार्थःसन्बंधनादिकंरोचयामासेतिसंबंधः।अथेंद्रजिदिति।इंद्रजित्द्रुमचीरबद्धंअतएवास्त्र
६२ स्त्रेणविमुक्तंविचार्यअनेनाशाणावल्कादिना।बद्धोहनूमानस्त्रबंधमनुवर्त्ततेअस्त्रेणबद्धवदवर्त्ततेइत्यपिविचार्यचिंतांजगामेतिसंबंधः।अथात्मानमुपालभते।अ
होइतिमहत्कर्ममहास्त्रेणहनुमद्बंधनकर्मराक्षसैर्निरर्थकंकृतंकुतःमंत्रगतिःनशक्याद्ब्रह्मास्त्रमेवधारणामशक्यामित्यर्थः।नचपुनःकर्त्तुंशक्यामित्याह।पुनश्च

सरोचयामासपरैश्चबंधनंप्रसह्यवीरैरभिनिग्रहंच।कौतूहलान्मांयदिराक्षसेंद्रोद्रष्टुंव्यवस्येदितिनिश्चितार्थः॥४९॥सबद्धस्तेनवल्केनविमुक्तोस्त्रेणवीर्यवा
न्।अस्त्रबंधःसचान्यंहिनबंधमनुवर्तते॥५०॥अथेंद्रजित्तंद्रुमचीरबद्धंविचार्यवीरःकपिसत्तमंतं।विमुक्तमस्त्रेणजगामचिंतांनान्येनबद्धोह्यनुवर्त्ततेस्त्रं॥५१॥
अहोमहत्कर्मकृतंनिरर्थंनराक्षसैर्मंत्रगतिर्विमृष्टा।पुनश्चनास्त्रेविहतेस्त्रमन्यत्प्रवर्त्ततेसंशयिताःस्मसर्वे॥५२॥अस्त्रेणहनुमान्मुक्तोनात्मानमवबुध्यत।
कृष्यमाणस्तुरक्षोभिस्तैश्चबंधैर्निपीडितः॥५३॥हन्यमानस्ततःक्रूरैराक्षसैःकाष्ठमुष्टिभिः।समीपंराक्षसेंद्रस्यप्राकृष्यतसवानरः॥५४॥अथेंद्रजित्तंप्रस
मीक्ष्यमुक्तमस्त्रेणबद्धंद्रुमचीरवल्कैः।व्यदर्शयत्तत्रमहाबलंतंहरिप्रवीरंसगणायराज्ञे॥५५॥तंमत्तमिवमातंगंबद्धंकपिसत्तमामितिवापरे।राक्षसास्तत्र
संहृष्टाःपरस्परमथाब्रुवन्॥५६॥अतीत्यमार्गंसहसामहात्मासतत्ररक्षोधिपपादमूले।ददर्शराज्ञःपरिवारवृद्धान्गृहंमहारत्नविभूषितंच॥५७॥सददर्शम
४वरोत्तमं।राक्षसाराक्षसेंद्रायरावणायन्यवेदयन्॥५८॥कोयंकस्यकुतोवापिकिंकार्यंकोव्यपाश्रयः।इतिराक्षसवीराणांतत्रसंजज्ञिरेकथाः॥५९॥हन्यतांदह्यतांवापिभ४
हातेजारावणाःकिंपिसत्तमे।रक्षोभिर्विकृताकारैःकृष्यमाणमितस्ततः॥६०॥राक्षसाधिपतिंवापिददर्शकपिसत्तमः।तेजोबलसमायुक्तंतपंतमिवभा
स्करं॥६१॥सरोषसंवर्त्तितताम्रदृष्टिर्दशाननस्तंकपिमन्ववेक्ष्य।अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तंप्रतिमुख्यमंत्रीन्॥६२॥यथाक्रमंतैःसकपिश्चपृ
ष्टःकार्यार्थमर्थस्यचमूलमादौ।निवेदयामासहरीश्वरस्यदूतःसकाशादहमागतोस्मि॥६३॥इत्यार्षेरामायणेवाल्मीकीयेसुंदरकांडेएचत्वारिंशःसर्गः

ति।नप्रवर्त्ततेप्रयुक्तंब्रह्मास्त्रंपुनरपिप्रभवतीत्यर्थः।अतःसंशयिताःस्मसर्वेइतिचिंतांजगामेतिपूर्वेणासंबंधः।कोयमिति।अत्ररावणापुरःकोव्यपाश्रयःकोवा राम
व्यपाश्रयः।अतीत्येति।परिवारवृद्धान्अमात्यवृद्धान्यथाक्रममिति।कार्यार्थं।कर्तव्यार्थं।अर्थस्यचमूलं।अर्थस्यकारणंकार्यप्रतिपेषयितारमितिमा ६२
वत।पृष्टःसन्आहतःसन्।अहमागतोस्मीतिनिवेदयामासेतिसंबंधः॥इतिश्रीमहेश्वरतीर्थीयेसुंदरकांडेएवत्वारिंशःसर्गः॥४८॥ ॥ ॥ ॥ ॥ ॥

सइति। कर्मणातस्यविस्मितः। स्वयंसिंहासनात्स्खलितएवतस्माद्बंधनकर्मणाविस्मितइत्यर्थः। वज्रइतिवज्रसंयोगसंयुक्तैः वज्रकीलेनसंबद्धैः। आमरसौभ्राजमानमि
त्यनुषंगः। भक्तिभिः कल्पनाभिः रचनाविशेषैः। मंत्रिभिरितिमंत्रिभिः धुडिमहापार्श्वसचिवैः कार्यसहायसचिवैः। यद्यधर्मइति। अयंअधर्मः। शिवनाद्धतोधर्मः। नस्यात्तर्हिसुरपुरंरक्षेत्

सतस्यकर्मणातत्रविस्मितोभीमविक्रमः। हनूमान्क्रोधताम्राक्षोरक्षोधिपमवैक्षत॥१॥ भ्राजमानंमहार्हेणकांचनेनविराजता। मुक्ताजालवृतेनाथमुकुटेनमहाद्युतिं॥२॥
वज्रसंयोगसंयोगसंयुक्तैर्महार्हमणिविग्रहैः। हैमैराभरणैश्चित्रैर्मनसेवप्रकल्पितैः॥३॥ महार्हक्षौमसंवीतंरक्तचंदनरूषितं। स्वनुलिप्तंविचित्राभिर्विविधाभिश्चभक्तिभिः
॥४॥ विविक्तैर्दर्शनीयैश्चरक्ताक्षैर्भीमदर्शनैः। दीप्ततीक्ष्णमहादंष्ट्रैःप्रलंबदशनच्छदैः॥५॥ शिरोभिर्दशभिर्वीरंभ्राजमानंमहौजसं। नानाव्यालसमाकीर्णैःशिखरैरिवमं
दरं॥६॥ नीलांजनचयप्रख्यंहारेणोरसिराजता। पूर्णचंद्राभवक्त्रेणसबलाकमिवांबुदं॥७॥ बाहुभिर्बद्धकेयूरैश्चंदनोत्तमरूषितैः। भ्राजमानांगदैःपीनैःपंचशीर्षैरिवो
रगैः॥८॥ महतिस्फाटिकेचित्रेरत्नसंयोगचित्रिते। उत्तमास्तरणास्तीर्णेसूपविष्टंवरासने॥९॥ अलंकृताभिरत्यर्थंप्रमदाभिःसमंततः। वालव्यजनहस्ताभिरारात्समुप
सेवितं॥१०॥ दुर्धरेणप्रहस्तेनमहापार्श्वेनरक्षसा। मंत्रिभिर्मंत्रतत्वज्ञैर्निकुंभेनचमंत्रिणा॥११॥ उपोपविष्टंरक्षोभिश्चतुर्भिर्बलदर्पितैः। कृत्स्नःपरिवृतोलोकश्चतुर्भिरिव
सागरैः॥१२॥ मंत्रिभिर्मंत्रतत्वज्ञैरन्यैश्चशुभदर्शिभिः। अन्वास्यमानंसचिवैःसुरैरिवसुरेश्वरं॥१३॥ अपश्यद्राक्षसपतिंहनूमानतितेजसं। विष्ठितंमेरुशिखरेसतोयमिव
तोयदं॥१४॥ सतैःसंपीड्यमानोपिरक्षोभिर्भीमविक्रमैः। विस्मयंपरमंगत्वारक्षोधिपमवैक्षत॥१५॥ भ्राजमानंततोदृष्ट्वा
हनूमान्राक्षसेश्वरं। मनसाचिंतयामासतेजसातस्यमोहितः॥१६॥ अहोरूपमहोधैर्यमहोसत्वमहोद्युतिः। अहोराक्षसराजस्यसर्वलक्षणयुक्तता॥१७॥ यद्यध
र्मोनबलवान्स्यादयंराक्षसेश्वरः। स्यादयंसुरलोकस्यसशक्रस्यापिरक्षिता॥१८॥ अस्यक्रूरैर्नृशंसैश्चकर्मभिर्लोककुत्सितैः। सर्वेबिभ्यतिखल्वस्माल्लोकाःसाम
रदानवाः॥१९॥ अयंह्युत्सहतेक्रुद्धःकर्तुमेकार्णवंजगत्। इतिचिंतांबहुविधामकरोन्मतिमान्कपिः॥२०॥ दृष्ट्वाराक्षसराजस्यप्रभावममितौजसः॥२१॥ इत्यार्षे
रामायणेवाल्मीकीयेसुंदरकांडेएकोनपंचाशःसर्गः॥४९॥

रः। बलवान्स्यात्। सशक्रस्यसुरलोकस्यरक्षितापिस्यादितिसंबंधः। अस्येति। क्रूरैःभीषणैः। नृशंसैःपरद्रोहावशशीलैः। तेनापूर्वोक्तेनाधर्मेणाच॥ इतिसुंदर
रकांडेएकोनपंचाशःसर्गः॥

सु॰ ६३

सोयमिति। बाणो बलिसुर इति दध्याविति पूर्वेणासंबंधः। दुरात्मेति। कुतः कस्माद्देशादागतः किं वास्य कारणं। अस्मत्कोपाप्रेरकः। मत्पुरीमिति। इहस्थेति शेषः। आ
यो वेति। यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेणासंबंधः। अथवा यन्निमित्तस्त इति पाठे बहुव्रीहिः। दर्शन इति। राक्षसेंद्रस्य तवेति शेषः। दर्शने

समुद्वीक्ष्य महाबाहुः पिंगाक्षं पुरतः स्थितं। रोषेण महताविष्टो रावणो लोकरावणः॥१॥ शंकाहृतात्मा दध्यौ स कपींद्रं तेजसावृतं। किमेष भगवान्नंदी भवेत्साक्षादि
हागतः॥२॥ येन शप्तोस्मि कैलासे मया प्रहसिते पुरा। सोयं वा नरमूर्तिः स्यात्किंस्विद्बाणोपि वासुरः॥३॥ स राजा रोषताम्राक्षः प्रहस्तं मंत्रिसत्तमं। कालयुक्तमुवाचेदं
वचो विपुलमर्थवत्॥४॥ दुरात्मा पृछ्यतामेषः कुतः किं वास्य कारणं। वनभंगे च कोस्यार्थो राक्षसीनां च तर्जने॥५॥ मत्पुरीमप्रधृष्यां वै गमने किं प्रयोजनं। आ
योधने वा किं कार्यं पृछ्यतामेष दुर्मतिः॥६॥ रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत्। समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे॥७॥ यदि तावत्त्वमिंद्रेण प्रेषितो
(विजयकांक्षिणा। न हि ते वानरं ते) रावणालयं। तत्त्वमाख्याहि मा ते भूद्भयं वानर मोक्ष्यसे॥८॥ यदि वैश्रवणस्य त्वं यमस्य वरुणस्य वा। कपिरूपमिमं कृत्वा
प्रविष्टो नः पुरीमिमां॥९॥ विष्णुना प्रेषितो रावणालयं। तत्त्वमाख्याहि मा ते भूद्भयं वा वापि दूतो विजयकांक्षिणा। न हि ते वानरं तेजो रूपमात्रं तु वानरं॥१०॥ तत्त्व
तः कथयस्वाद्य ततो वानर मोक्ष्यसे। अनृतं वदतश्चापि दुर्लभं तव जीवितं॥११॥ अथवा यन्निमित्तं ते प्रवेशो रावणालये। एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरं॥१२॥
अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा। धनदेन न मे सख्यं विष्णुना नास्मि चोदितः॥१३॥ जातिरेव मम त्वेषा वानरोहमिहागतः। दर्शने राक्षसेंद्रस्य तदिदं दु
र्लभं मया॥१४॥ वनं राक्षसराजस्य दर्शनार्थे विनाशितं। ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकांक्षिणः॥१५॥ रक्षणार्थं च देहस्य प्रतियुद्धं मया रणे। अस्त्रपाशैर्न
शक्योहं बद्धुं देवासुरैरपि॥१६॥ इतोहमिति विज्ञेयो राघवस्यामितौजसः। श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो॥१७॥ इत्यार्षे रामायणे सुंदरकांडे पंचाशः
सर्गः

दुर्लभमिति राक्षसेंद्रस्य तद्दर्शनार्थं तदिदं वनं नाशितमिति संबंधः। तत इति प्रतियुद्धाः प्रहताः। ननु त्वमस्त्रबंधभावे किमिति बद्धः सेनाबद्धः। तत्राह पीयस
इत्यत आह राजानमिति। अस्त्रविमुक्तोपि कार्यवशात्बुद्धिपूर्वकमेवाहमेभिः पीडितेनत्यामाक्षिकिलकरामिति भावः॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे पं
चाशः सर्गः॥॥

राम ६३

अहमिति। वालिराघवयोः सखित्वसंबंधत्वात्। भ्रातेति। कुशलमब्रुवीत्। अप्राक्षीदित्यर्थः। समादेशं संदेशरूपं वाक्यमिति। इहामुत्राधिकारं तेनानुष्ठितं तत्सुग्रीवसंदेशमि
त्याकांक्षायां पन्मयोच्यते तत्संदेशादित्याशयेन हनूमान्स्वयमेव सर्वं संदिशति राजा दशरथ इत्यादि [illegible] विज्ञानपूर्वकं वालीतिमौलि
तेन निहतः इति रामो लक्ष्मणश्च प्रतिपादित इति ज्ञेयं। तद्भवानिति। दृष्टधर्मार्थः। धर्मार्थशास्त्रपारदृश्वा। तपःकृतपरिग्रहः। कृततपःपरिग्रहः। कृततपःपरिग्रहः। [illegible]

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः। वाक्यमर्थवदव्यग्रस्तमुवाच दशाननं॥१॥ अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयं। राक्षसेंद्र हरीशस्त्वां भ्राता कुशलमब्रवीत्॥ भ्रा
तुः शृणु समादेशं सुग्रीवस्य महात्मनः। धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमं॥३॥ राजा दशरथो नाम रथकुंजरवाजिमान्। पितेव बंधुर्लोकस्य सुरेश्वरसमद्युतिः॥४॥
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः। पितुर्निदेशान्निष्क्रांतः प्रविष्टो दंडकावनं॥५॥ लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया। रामो नाम महातेजा धर्म्यं पंथानमाश्रि
तः॥६॥ तस्य भार्या वने नष्टा सीता पतिमनुव्रता। वैदेहस्य सुता राज्ञो जनकस्य महात्मनः॥७॥ स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः। ऋश्यमूकमनुप्राप्तः सुग्रीवेण
च संगतः॥८॥ तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणं। सुग्रीवस्यापि रामेण हरिराज्यं निवेदितं॥९॥ ततस्तेन मृधे हत्वा राजपुत्रेण वालिनं। सुग्रीवः स्थापितो रा
ज्ये हर्यृक्षाणां गणेश्वरः॥१०॥ त्वया विज्ञातपूर्वश्च वाली वानरपुंगवः। स तेन निहतः संख्ये शरेणैकेन वानरः॥११॥ स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः। हरीन्सं
प्रेषयामास दिशः सर्वा हरीश्वरः॥१२॥ तां हरीणां सहस्राणि शतानि नियुतानि च। दिक्षु सर्वासु मार्गंते ह्यधश्चोपरि चांबरे॥१३॥ वैनतेयसमाः केचित्केचित्तत्रानिलोप
माः। असंगगतयः शीघ्रा हरिवीरा महाबलाः॥१४॥ अहं तु हनुमान्नाम मारुतस्यौरसः सुतः। सीतायास्तु कृते तूर्णं शतयोजनमायतं॥१५॥ समुद्रं लंघयित्वैव तां दिदृ
क्षुरिहागतः। भ्रमता च मया दृष्टा गृहे ते जनकात्मजा॥१६॥ तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः। परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि॥१७॥ न हि धर्मविरुद्धेषु बह्व
पायेषु कर्मसु। मूलघातिषु सज्जंते बुद्धिमंतो भवद्विधाः॥१८॥ कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनां। शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि॥१९॥ न चा
पि त्रिषु लोकेषु राजन्विद्येत कश्चन। राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात्॥२०॥ ॥ ॥

त्यर्थः। यस्मादेतादृशस्त्वं तस्मात्परदारानुपरोद्धुं नार्हसीति योजना। अनेन ममका हानिरित्यत आह। न हीति। धर्मविरुद्धेषु अधर्मेष्वित्यर्थः। अधर्मफलमाह।
। बह्वपायेषु बहुदुःखेषु। ननु सर्वापायप्रतीकारसमर्थस्य किमियं वाचोयुक्तिस्तत्राह। मूलघातिषु मूलतो विनष्टः किं प्रतिकरिष्यतीति भावः। ननु सर्वमूलफल
हेतोरेकमूलछेदी स तत्राह। कश्चेत्यादिनेति। व्यलीकं। अपराधं॥ ॥

सु० ६७

तदिति। त्रिकालहितं तद्वाक्यं सुग्रीवोक्तवाक्यं त्रिकालहितं सीतानुपरोधेन पूर्वापरावनाशात्। वर्त्तमाने स्वर्पविरोधात्। भाविषु महेतुत्वाच्च त्रिकालहितं। धर्मीधर्मी
नयेतं अर्थानुबंधिवमन्यस्व जानीहि अतो नरदेवाय जानकी प्रतिदीयतामिति संबंधः। न च सीतावचना स्तीत्य पक्षोहं शक्य इत्याह। ईदृशीहीति। यत्सीतादर्शनरूपं वस्तु दु
र्लभं सीतान्वेषणार्थोपि तैःसर्वैरपि वानरैः प्राप्तुमशक्यं तदिह मया लब्धं यावदासन्न प्रेतावत्कृतं उत्तरकर्त्तव्यं तद्रामायात्तमित्याह। उत्तरमिति लक्षितेति। पंचास्यपन्नग्र
मिव यां गृह्य गृहीत्वा नाभिजानासि तथाशोकपरायणा वा वामगोवरशोकृतत्व रादयं सीता मया लक्षितेति संबंधः। परमपतिव्रता सा ता शोकपरायणासती न च

तद्विलोकोहितं वाक्यं धर्म्यमर्थानुबंधि वा। मन्यस्व नरदेवाय जानकी प्रतिदीयतां॥२१॥ दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभं। उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः॥२२॥ लक्षि
तेयं मया सीता तथा शोकपरायणा। गृह्य यां नाभिजानासि पंचास्यामिव पन्नगीं॥२३॥ नेयं जरयितुं शक्या सासुरैरमरैरपि। विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा॥२४॥ त
पःसंतापलब्धस्ते योयं धर्मपरिग्रहः। न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः॥२५॥ अवध्यतां तपोभिर्यां भवान्समनुपश्यति। आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं म
हान्॥२६॥ सुग्रीवो न च देवोयं न यक्षो न च राक्षसः। मानुषो राघवो राजन् सुग्रीवश्च हरीश्वरः॥२७॥ तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि॥ ॥

यां निकृत्य तद्गतिकत्वात् लंकाविनंक्ष्यतीति भावः। न तपइति तपःसंतापलब्धः तपश्चर्यालब्धो योयं धर्मपरिग्रहः। आत्मप्राणापरिग्रहः। आत्मप्राणानां परिग्रहः। तत्वायुर्वर्धक इति
यावत् तं नाशयितुं न न्याय्य इति योजना। ननु पितामहवरादवध्यस्य मे कैर्यविभीषिकेत्याशंक्याह। अवध्यतामिति। तयोभिर्हेतुभिः सासुरैर्देवैरात्मनो यामवध्यतां भवान्सम
नुपश्यति तत्रापि यया अवध्यत्वे तत्रैवच्यत्वे पि अयं हेतुरिति योजना। कोसौ हेतुस्तत्राह। सुग्रीव इत्यादि। यद्यपि मानुषादवध्यत्वं न प्रार्थितं तथाप्यनीकृत्यो हृगमाह
। न च मानुष इति। न यक्षो न च राक्षस इत्यपि पाठः। सम्यक्फलितमाह तस्मादिति॥ ॥

राम ६५

ननु महता पूर्वसंचितेनैव धर्मेणैव मम भ्राता रामो भविष्यतीत्याशंक्य रोगराज्यादिवद्धर्माधर्मफलयोः संभूयाऽनुभवसिद्धेरात्मनाऽपि सिद्धिरुक्ता धर्मबाधेन धर्मफलानुभवश्चेति द्वेधा विकल्प्याद्यस्यासंभवमाह। नत्विति धर्मोपसंहारं धर्मस्य फलादिनाश्यपर्यंतं दुःखैः उपसंह्रियते येनेति धर्मोपसंहारं धर्मफलं सुखं तत् अधर्मफलसहितं न भवति अधर्मेण सह भोगं न भवतीत्यर्थः। तावत्तयोः परदारापहरणाभवदीय धर्माधर्मफलयोर्वैपरीत्याद्वध्यत्वयोर्जीवनतत्स्वभावयोः सहावस्थानविरोधात्। रोगराज्यादिवत्संभूयानुभवो न संभवतीति भावः। द्वितीयं दूषयति। तदेवेति। तद्धर्मफलमेवाप्नोति धर्मफलं धर्मफलेन सह तिष्ठतीति यावत् धर्मो नाधर्मनाशनः। अधर्मबाधेन धर्मफलानुभवो न घटत इति भावः। यद्वा। ननु ये भोऽत्र वधोत्त्वे न प्राप्तिं तं तेभ्योऽपि पूर्वोपार्जितो महान्सुकृतसंचयः पूरयिष्यतीत्याशंक्य एवं चेत्तुल्यन्यायतया त्वत्कृतो धर्मनिचयोऽपि त्वां नाशयिष्यतीत्याह। नन्विति। धर्मोपसंहारं धर्मस्य फलादिनाश्यपर्यंतं दुःखं उपसंह्रियते येनेति धर्मोपसंहारं धर्मफलं सुखं तत्तेऽधर्मफलसहितं विरूढकारणकत्वाद्दुःखसहितं न भवतीत्यर्थः। किं त्वात्तदेव फलमन्वेति। स-

ननु धर्मोपसंहारमधर्मफलसंयुतं। तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥२९॥ कं प्राप्तं धर्मफलं तावद्भवता नात्र संशयः। फलमस्याप्यधर्मस्य क्षिप्रमेव प्रयत्स्यसे ॥३०॥ जनस्था-
नवधं बुध्वा वालिनश्च वधं तथा। रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥३१॥ कामं स्वत्वहमप्येकः सवाजिरथकुंजरां। लंकां नाशयितुं शक्तः नैष तु व्यवसायः ॥३२॥ रामेण
ह्यप्रतिज्ञातं हर्यृक्षगणसंनिधौ। उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥३३॥ अपकुर्वन्हि रामस्य साक्षादपि पुरंदरः। न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥३४॥
यां सीतेत्यभिजानासि येयं तिष्ठति ते गृहे। कालरात्रीति तां विद्धि सर्वलंकाविनाशिनीं ॥३५॥ तदलं कालपाशेन सीताविग्रहरूपिणा। स्वयं स्कंधावसक्तेन क्षेमे-
ममात्मनि चिंत्यतां ॥३६॥ सीताया तेजसा दग्धां रामकोपप्रदीपितां। दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकां ॥३७॥

त्वमेव फलत्वेनानुवर्तते। तद्वत् अर्थे। तेन अधर्मफलमपि धर्मफलसहितं न भवति अधर्मफलमेव फलत्वेनानुवर्तत इति लभ्यते। ननु धर्मेण धर्मो नाशयिष्यतीत्याशंक्याह। धर्म इति। अत्र न अनुवर्तते। धर्मे अधर्मनाशनो न भवति पूर्वकृतो धर्मः इदानींकृताधर्मनाशनो भवतीत्यर्थः। चकारादेवमधर्मोऽपि धर्मनाशनो न भवतीति लभ्यते धर्मो धर्मीवत्नुभवे कविनाश्यादिति भावः। ननु महतः पुण्यफलानुभवस्य समाप्त्यनंतरं अधर्मफलानुभवो भविष्यतीत्यत्राह। प्राप्तमिति। धर्मफलं तावत्त्वाकृतेन प्राप्तं सुकृतं अस्याधर्मस्य सीताहरणरूपस्य मानुषो रामः किं मां करिष्यतीति माशंकीरित्याशयेनाह। जनस्थानेति। काममिति। एवं त्वमेकः तेन लंकाविनाशक्तस्य रामस्य न निश्चयः। न संमत इत्यर्थः। कुत इत्यत आह। रामेणेति। अतिबलशालिनो मे सीतापहारेण का बाधीति स्थित आह। अपकुर्वन्हीति। सीताया इति। प्रतोलिका रथ्या
। मंत्री नाम मंत्रिणः ॥ ॥

सुं॰
६५

सत्यमिति। रामदासस्येत्यादिविशेषणत्रयेण स्वस्य रामसामर्थ्यपरिज्ञानं हितोपदेशाधिकारं चाभ्यसूचयत्। विदितं यद्ब्रह्मा स्वयंभूरित्यादिविशेषणानि ते
षां सामर्थ्यविशेषद्योतनार्थं इंद्रः परमैश्वर्यवान् इंद्रः। इदि परमैश्वर्ये इति धातोः। यो ब्रह्मा समाहेंद्रः। महानाश्रयभूधो ब्रह्म दधीदिति तन्महेंद्रः। महेंद्र इति श्रुतेः।
लोकानियंतृत्वं तत्र हेतुः सर्वेश्वरत्वात् इत्यादिविशेषणं वज्रपाणिर्वा। रुद्रः संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः। हंतशब्दं वेदात्मानं ब्रह्मणे कल्पादौ ददातीति वा रुद्रः
। यद्वा। नादेन सकलं जगदिदं भयति रजपती तिनादात्मकत्वाद्रुद्रः। यद्वा। रुता नादेन प्रणवरूपेण वेदरूपेण वा वाचा पयति इष्टमर्थं गमयतीति रुद्रः। यद्वा। रुतं संसारदु

खानि विभिनत्ति मैत्रीश्च तातीन्द्रात्मस्य हितान्। भोगान्सरांश्च लेकांश्च मा विना शमुपानय ॥३९॥ संमरामसत्येदं शृणुष्व वचनं मम। रामस्य हतस्य वानरस्य
विशेषतः ॥३९॥ सर्वान्लोकान्सुसंहृत्य सभूतान्सचराचरान्। पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥४०॥ देवासुरनरेंद्रेषु यक्षरक्षोरगेषु च। विद्याधरेषु नागेषु गंधर्वे
षु मृगेषु च ॥४१॥ सिद्धेषु किंनरेंद्रेषु पतत्रिषु च सर्वशः। सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः ॥४२॥ यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमं। सर्वलोकेश्वरस्येह कृत्वा
विप्रियमीदृशं ॥४३॥ रामस्य राजसिंहस्य दुर्लभं तव जीवितं। देवाश्च दैत्याश्च निशाचरेंद्र गंधर्वविद्याधरनागयक्षाः। रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु
सर्वे ॥४४॥ ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरांतको वा। इंद्रो महेंद्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यं ॥४५॥ स सौष्ठवोपेतमदीनवादिनः कपे
र्निशम्याप्रतिमोऽप्रियं वचः। दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः ॥४६॥ इत्यार्षे रामायणे सुंदरकांडे एकपंचाशः सर्गः ॥ स तस्य वचनं श्रु
त्वा वानरस्य महात्मनः। आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥१॥ वधे तस्य समाज्ञप्ते रावणेन दुरात्मना। निवेदितवतो दौत्यं नानुमेने विभीषणः ॥२॥ तं रक्षो
त्वा वानरस्य महात्मनः ... [illegible] ... अनिश्चितार्थस्तत्तः सांत्वपूर्वमथाग्रजं। उवाच हितमत्यर्थं वाक्यं वाक्यवि
विपतिं क्रुद्धं तत्कार्यमुपस्थितं। विदित्वा चिंतयामास कार्यं कार्यविधौ स्थितः ॥३॥ निश्चितार्थस्ततः साम्ना पूज्य शत्रुजिदग्रजं। उवाच हितमत्यर्थं वाक्यं वाक्यवि
शारदः ॥४॥

: स्वहेतुं वा डावयतीति रुद्रः। तदुक्तं। रुदुद्रः स्वदुःखहेतुं वा तद्द्रावयति यः प्रभुः। रुद्र इत्युच्यते तस्मात् शिवः परमकारणमिति। एवं स्तुत्यनियुक्त
: स्वहेतुं वा डावयतीति रुद्रः ... भवति न परतंत्र इति त्व
रुद्रत्वशत्रुसंसर्गीकरणासमर्थभाललोचनपुरुषत्रिपुरांतकत्वादिधर्मविशिष्टो महेश्वरो वा। ब्रह्मा ब्रूहतीति ब्रह्मा स्वयंभूः। स्वयमेव स्वतेजसा भवति न परतंत्र इति त्व
यंभूः। बृहत्वनित्यत्वतंत्रत्वबहुमुखकार्यनिर्वाहकत्वादिधर्मविशिष्टो विरिंचिर्वा युधि [illegible] त्रातुं न शक्ता इत्यर्थः ॥ इति श्रीमहे॰ एकपंचाशः सर्गः ॥ वधइति।
निवेदितेन समदौत्येन तदर्थं मतिः कार्यं निवेदितवता मम न कार्यं हननमिति आनेन त्रस्य [illegible] दूतार्थं दत्तेन [illegible] खिलादवध्यत्वमुक्तं स्वतोसिनिषेधे हृतं
तरेत विशिष्टा यथा निर्दिष्टं वधं नानुमेने। नमिति। तत्कार्यं तद्वधरूपं कार्यं कार्यविधौ कर्तव्यविधाने स्थितं कार्यकरणे। कृत निश्चय इत्यर्थः ॥ ॥ विपेंद्राः
[illegible] सदप्रसीद मे वाक्यमिदं [illegible] धर्मवचनं कुर्वेति परापरज्ञाः रूपत्स्यसमताव स्वया विपेंद्राः १

राम
६५

राजेति। अप्रमापणं मारणं। असंशयमिति। आतुरिति। प्रतिहांत्यजरोषं क्षमस्वेति परापरज्ञाः न्याय्योपदेष्टारः निर्दिष्टः उक्तः। चैव नृपमिति लक्षणसंनिपातः दृतयोग्यं पांकनमेवं वधः नन
श्रुतोपि। अस्माभिर्निष्कृतः। परापरप्रत्ययनिश्चितार्थः। उत्कृष्टापकृष्टज्ञानेन निश्चितकार्यः। अ[illegible] वधयइदं कार्यं परमिदमपरमिति विवेकेन निश्चितप्रयोजन इत्यर्थः।
नेतु तवअन्येनोपदेष्टव्योशोनास्तीत्याह। न धर्मवादइति। महावीरस्य तवनकुत्रापि भयं शंकेत्याशयेनाह। पराक्रमेत्यादि। पदुमवकाधमवध्यं हंतव्यइत्यतआह। साधुरि

राजधर्मविरुद्धं च लोकद्वयेप्यगर्हितं। तव वासदृशं वीर कपेरस्य प्रमापणं ॥६॥ धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः। परावरज्ञो भूतानां त्वमेव परमार्थवित ॥७॥ गृह्यंते च
दि रोषेण त्वादृशोपि विपश्चितः। ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलं ॥८॥ तस्मात्प्रसीद शत्रुघ्न राक्षसेंद्र दुरासद। युक्तायुक्तं विनिश्चित्य दूतदंडो विधीयतां ॥९॥ विभी
षणवचः श्रुत्वा रावणो राक्षसेश्वरः। कोपेन महताविष्टो वाक्यमुत्तरमब्रवीत ॥१०॥ न पापानां वधे पापं विद्यते शत्रुसूदन। तस्मादेनं वधिष्यामि वानरं पापकारि
णं ॥११॥ अधर्ममूलं बहुदोषयुक्तं अनार्यजुष्टं वचनं निशम्य। उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतां वरिष्ठः ॥१२॥ प्रसीद लंकेश्वर राक्षसेंद्र धर्मार्थयुक्तं
वचनं शृणुष्व। दूता न वध्याः समयेषु राजन्सर्वेषु सर्वत्र वदंति संतः ॥१३॥ राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितं। तव वासदृशं वीर कपेरस्य प्रमापणं ॥१४॥ असं
शयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयं। न दूतवध्यां प्रवदंति संतो दूतस्य दृष्टा बहवो हि दंडाः ॥१५॥ वैरूप्यमंगेषु कशाभिघातो मौंड्यं तथा लक्षणसंनि
पातः। एतान्हि दूते प्रवदंति दंडान्वधस्तु दूतस्य न नः श्रुतोपि ॥१७॥ कथं च धर्मार्थविनीतबुद्धिः परापरप्रत्ययनिश्चितार्थः। भवद्विधः कोपवशे हि तिष्ठेत्को
पं नियच्छंति हि सत्त्ववंतः ॥१८॥ न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु चापि। विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणां ॥१९॥ पराक्र
मोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन। त्वया मनोनंदन नैर्ऋतानां युद्धायतिर्नाशयितुं न युक्ता ॥२०॥ न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणं ॥ ते
ष्वयं पात्यतां दंडो यैरयं प्रेषितः कपिः ॥२१॥ साधुर्वा यदि वासाधुः परैरेष समर्पितः। ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥२२॥ अपि चास्मिन्हते राजन्नान्यं
पश्यामि खेचरं। इह यः पुनरागच्छेत्परं पारं महोदधेः ॥२३॥ तस्मान्नास्य वधे यत्नः कार्यः परपुरंजय। भवान्सेंद्रेषु देवेषु यत्नमास्थातुमर्हति ॥२४॥

ति। समर्पितः प्रेषितः। अस्मिन्हते सति वृत्तांतनिवेदकाभावात्। रामलक्ष्मणयोरिहागमनाभावेन तद्वधाच्छत्रुक्षयो न स्यात्। विशुकोत्वस्मिन्नेतं निवेदितवृत्तांत
योस्तयोरिहागमनाद्यत्नेन तद्वधाच्छत्रुनाशो भवेदित्याशयेनाह। अपि चेत्यादि। इह पारं इदं पारमित्यर्थः। तस्मादिति। तस्मात्पुनरागंतुकाभावादित्यर्थः॥

तत्रास्य गमने हनने वा मम कांक्षतीत्यत आह। अस्मिन्निति। युद्धप्रियस्य तव तयोरनागमनमेव न्नतिरिति भावः। हिताश्चेति। समाहिता दानमानाभ्यां वशीकृता इत्यर्थः।
सुभृताः संहृत्याः योधाश्च वर्तंते एव्विति शेषः। नतदिति। तस्मात्कारणाद्बलस्य सैन्यस्य एकदेशेन एकांशेन सह। आदेशकृतः आज्ञाकारिणः। केचित्कतिचित्भावि
तुंप्रकाशयितुं॥ ॥सुंदरकांडे द्विपंचाशः सर्गः॥ ॥ततइति। मित्राणि पाशाः अममसुखदुःखाः। ज्ञातयः भ्रात्रादयः। बांधवाः संबंधिनः। सुहृज्जनाः स्निग्धजनाः। काममिति

अस्मिन्विनष्टे न हि पश्यतमन्यं पश्यामि यस्तौ नरराजपुत्रौ। युद्धाय युद्धप्रियदुर्विनीतावुद्योजयेद्दीर्घपथावरुद्धौ॥२५॥ हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च
महागुणेषु। मनस्विनः शस्त्रभृतां वरिष्ठाः कोट्यग्रशस्ते सुभृताश्च योधाः॥२६॥ तदेकदेशेन बलेन तावत्केचित्तवादेशकृतोपयान्तु। तौ राजपुत्रौ विनिगृह्य मूढौ
परेषु ते भावयितुं प्रभावं॥२७॥ निशाचराणामधिपोनुजस्य विभीषणस्योत्तमवाक्यमिष्टं। जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो राक्षसराजमुख्यः॥ ॥सुंदरकांडे द्वि
पंचाशः सर्गः॥ तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः। देशकालहितं वाक्यं भ्रातुरुत्तममब्रवीत्॥१॥ सम्यगुक्तं हि भवता दूतवध्या विगर्हिता। अवश्यं तु वधादन्य
त्क्रियतामस्य निग्रहः॥२॥ कपीनां किल लांगूलमिष्टं भवति भूषणं। तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु॥३॥ ततः पश्यंत्विमं दीनमंगवैकल्यकर्शितं। मित्राणि ज्ञा
तयः सर्वे बांधवाः ससुहृज्जनाः॥४॥ आज्ञापयद्राक्षसेंद्रः पुरं सर्वं सचत्वरं। लांगूलेन प्रदीप्तेन रक्षोभिः परिणीयतां॥५॥ तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः
वेष्टयंते स्म लांगूलं जीर्णैः कार्पासकैः पटैः॥६॥ संवेष्ट्यमाने लांगूले व्यवर्धत महाकपिः। शुष्कमिंधनमासाद्य वनेष्विव हुताशनः॥७॥ तैलेन परिषिच्याथ तेग्निं त
त्प्रदीपयन्। लांगूलेन प्रदीप्तेन राक्षसांस्तानताडयत्॥८॥ रोषामर्षपरीतात्मा बालसूर्यसमाननः। स भूयः संगतैः क्रूरै राक्षसैर्हरिपुंगवः॥९॥ लांगूलं संप्रदीप्तं
तं द्रष्टुं तस्य महात्मनः। सहस्त्रीबालवृद्धाश्च जग्मुः प्रीता निशाचराः॥१०॥ निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिं। कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः
११॥ छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः। यदि भर्तृहितार्थाय चरंतं भर्तृशासनात्॥१२॥ बध्नंत्येते दुरात्मानो न तु मे निष्कृतिः कृता। सर्वेषामेव पर्याप्तो
राक्षसानामहं युधि॥१३॥ किं तु रामस्य प्रीत्यर्थं विषहिष्येहमीदृशं। लंका चारयितव्या मे पुनरेव भवेदिति॥१४॥ रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः। अव
श्यं चैव द्रष्टव्या मया लंका निशाक्षये ॥१५॥

।निबद्धस्यापि मे न शक्ता मम निग्रहे न समर्था इत्यर्थः। यदिति। भर्तुः स्वामिनो रामस्य भर्तृशासनात् रावणशासनात्। निष्कृतिः प्रतिक्रिया न कृता मया हास्यवंशलक्षा
त्वं प्रतिक्रिया न भवतीति भावः। सर्वेषामिति। सर्वेषां हनने इति शेषः। अहं पर्याप्तः। रामस्य प्रीत्यर्थं ईदृशमवमानं विषहिष्ये सर्वराक्षससंहारस्य रामेण प्रतिज्ञात
त्वादिति भावः। लंकेति। दुर्गकर्मविधानतः विधानाद्धेतोः रात्रौ लंका न हि सुदृष्टा अतो मे मया लंका पुनः प्रचारयितव्या भवेत् शोधयितव्या भवेदिति योजना। यद्वा॥
दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः। अनेन उषःकालः संग्राम इति गम्यते ॥१५॥

काममिति। मनसः श्रमः। अत्र चिंतासमाप्तिद्योतकमिति कश्चात् दृष्टवान्॥ शंखेति। स्वकर्मभिः आस्फोटसिंहनादैः सह पुरीं घोषयंतः संचारयंति स्मेति संबंधः। अन्वीयमान इति। चा
रयामास शोधयामासेत्यर्थः। अथेति। वत्सुवान्गृहवद्विमानानि रथ्याश्चेति गृहसंबाधाः गृहैः संबाधाः निविडाः रथ्याः शृंगाटकानि चतुष्पथानि उपरथ्याः क्षुद्रवीथ्यः। चत्वरेषु
च तरहणां रथ्यानां संबंधेषु चतुष्केषु चतुस्तंभमंडपेषु चार एव चारिकः। दीप्यमान इति। शशसुः शशंसुः। यत्तिपरिणीयते परितो नीयते। श्रुत्वेति। आत्मापहरणोपमतां दुःखजन
कमित्यर्थः। हुताशनमुपागमत्। उपासितवती मंगलेति ध्यातास्तु द्विमतीयदि तिए कपत्नीत्व एकः पतिर्यस्याः सा एकपत्नी तस्या भावस्तत्त्वं पातिव्रत्यमित्यर्थः। यदि किंचिदिति तत्स्यराम

कामं खलु मे भूयः पुच्छस्योद्दीपनेन च। पीडां कुर्वंतु रक्षांसि न मेऽस्ति मनसः श्रमः॥१६॥ ततस्ते संवृताकारं सत्त्ववंतं महाकपिं। परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुंजरं॥१७॥ शं
खभेरीनिनादैस्तैर्घोषयंतः स्वकर्मभिः। राक्षसाः क्रूरकर्माणश्चारयंति स्म तां पुरीं॥१८॥ अन्वीयमानो रक्षोभिर्ययौ सुखमरिंदमः। हनूमांश्चारयामास राक्षसानां महापुरीं॥१९॥
अथापश्यद्विमानानि विचित्राणि महाकपिः। संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान्॥२०॥ रथ्याश्च गृहसंबाधाः कपिः शृंगाटकानि च। तथा रथ्योपरथ्याश्च तथैव च गृहांतरा
न्॥२१॥ चत्वरेषु चतुष्केषु राजमार्गे तथैव च। घोषयंति कपिं सर्वे चारीक इति राक्षसाः॥२२॥ दीप्यमाने ततस्तस्य लांगूलाग्रे हनूमतः। राक्षस्यस्ता विरूपाक्ष्यः शशंसुर्देव्यास्तदप्रियं
॥२३॥ यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः। लांगूलेन प्रदीप्तेन स एष परिणीयते॥२४॥ श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमं। वैदेही शोकसंतप्ता हुताशनमुपागमत्॥२५॥
मंगलाभिमुखी तस्य सा तदासीन्महाकपेः। उपतस्थे विशालाक्षी प्रयता हव्यवाहनं॥२६॥ यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः। यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः॥
॥२७॥ यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः। यदि वा भाग्यशेषं मे शीतो भव हनूमतः॥२८॥ यदि मां वृत्तसंपन्नां तत्समागमलालसां। स विजानाति धर्मात्मा शीतो भव ह
नूमतः॥२९॥ यदि मां तारयेत्पार्थः सुग्रीवः सत्यसंगरः। अस्माद्दुःखान्महाबाहुः शीतो भव हनूमतः॥३०॥ ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः। जज्वाल मृगशावाक्ष्याः
शंसन्निव शिवं कपेः॥३१॥ हनुमज्जनकश्चापि पुच्छानलसमन्वितः। ववौ स्वास्थ्यकरो देव्याः प्रालेयानलशीतलः॥३२॥ दह्यमाने च लांगूले चिंतयामास वानरः। प्रदीप्तो
ग्निरयं कस्मान्न मां दहति सर्वतः॥३३॥ दृश्यते च महाज्वालः करोति न च मे रुजं। शिशिरस्येव संपातो लांगूलाग्रे प्रतिष्ठितः॥३४॥

स्पतत इति। मृगशावाक्ष्याः सीतायाः महिम्नेति शेषः। अनलः पुच्छानलः प्रदक्षिणशिखः प्रदक्षिणाकारज्वालः सन् कपेः शिवं शंसन्निव जज्वालेति संबंधः। किंच हनुमदि
ति। हनुमज्जनकः अनिलः पुच्छानलयुतः हनुमत्पुच्छाग्निसंयुतोऽपि देव्याः प्रभावादिति शेषः। कपेरित्यनुकर्षः। प्रालेयानिलशीतलः हिममारुतवच्छीतलः सन् स्वास्थ्य
करः सुखकरो ववाविति संबंधः। दृश्यत इति मे रुजनं करोति प्रत्युत शिशिरस्य संपातः हिमसंघात इव वर्तते अत्र हेतुं न पश्यामीति शेषः॥ ॥ ॥ ॥ ॥

सुं॰टी॰ हेतुविशेषान्निश्चिनोति। अथवेत्यादि। प्लवता मया सरितांपतेः रामप्रभावात्। पर्वतः पर्वतरूपमाश्चर्यं यत्यस्मात्कारणात् दृष्टं तस्मात्कारणादिदं अग्नेः शैत्यमपि रामप्रभावात्संजातं व्य
६७ क्तं निश्चितमिति योजना। क्वात्यतत्राह। यदितीति संभ्रमस्त्वराद्यदि तदाग्निः किं किमिति न करिष्यति शैत्यमिति शेषः सीताया इति। आनृशंस्येन कृपया भूयः संचिंतयामास

अथवा तदिदं व्यक्तं यद्दृष्टं प्लवता मया। रामप्रभावादाश्चर्यं पर्वतः सरितांपतौ ॥३५॥ यदि तावत्समुद्रस्य मैनाकस्य च धीमतः। रामार्थं संभ्रमस्तादृक् किमग्निर्न करिष्यति ॥३६॥
सीतायाश्चानृशंस्येन तेजसा राघवस्य च। पितुश्च मम सख्येन न मां दहति पावकः ॥३७॥ भूयः संचिंतयामास मुहूर्तं कपिकुंजरः। कथमस्मद्विधस्येह बंधनं राक्षसाधमैः ॥३८॥
प्रतिक्रियास्य युक्ता स्यात्सति मह्यं पराक्रमे। ततश्छित्वा च तान्पाशान्वेगवान्वै महाकपिः ॥३९॥ उत्पपाताथ वेगेन ननाद च महाकपिः। पुरद्वारं ततः श्रीमान् शैलशृंगमिवोन्न
तं ॥४०॥ विभक्तरक्षःसंबाधमाससादानिलात्मजः। स भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥४१॥ ह्रस्वतां परमां प्राप्तो बंधनान्यवशातयत्। विमुक्तश्चाभवच्छ्रीमान् पुनः प
र्वतसन्निभः ॥४२॥ वीक्षमाणश्च ददृशे परिघं तोरणाश्रितं। स तं गृह्य महाबाहुः कालायसपरिष्कृतं ॥४३॥ रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः। स तान्निहत्वा रणचंड
विक्रमः समीक्षमाणः पुनरेव लंकां। प्रदीप्तलांगूलकृतार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥४४॥ इत्यार्षे रामायणे सुंदरकांडे त्रिपंचाशः सर्गः ॥ वीक्षमाणस्त
तो लंकां कपिः कृतमनोरथः। वर्धमानसमुत्साहः कार्यशेषमचिंतयत् ॥१॥ किं नु खल्ववशिष्टं मे कर्तव्यमिह सांप्रतं। यदेषां रक्षसां भूयः संतापजननं भवेत् ॥२॥ वनं ता
वत्प्रमथितं प्रकृष्टा राक्षसा हताः। बलैकदेशः क्षपितः शेषं दुर्गविनाशनं ॥३॥ दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमं। अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः
॥४॥ यो ह्ययं मम लांगूले दीप्यते हव्यवाहनः। अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥५॥ ततः प्रदीप्तलांगूलः सविद्युदिव तोयदः। भवनाग्रेषु लंकाया विचचार म
हाकपिः ॥६॥ गृहाद्गृहं राक्षसानामुद्यानानि च वानरः। वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥७॥ अवप्लुत्य महावेगः प्रहस्तस्य निवेशनं। अग्निं तत्र स निक्षिप्य
श्वसनेन समो बली ॥८॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान्। मुमोच हनुमानग्निं कालानलशिखोपमं ॥९॥ वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः। शुकस्य
च महातेजाः सारणस्य च धीमतः ॥१०॥

अनंतरं कर्तव्यमिति शेषः। पुरद्वारमिति। विभक्तरक्षःसंबाधं विमुक्तरक्षःसंचारमित्यर्थः। प्रदीप्तलांगूलकृतार्चिमाली पुच्छाग्रहतज्वलनकृतार्चिः। अत्र प्रकाशतेत्यडभाव आर्षः। राम
इति श्रीमहेश्वरविरचिते रामायणतत्त्वदीपिकायां सुंदरकांडे त्रिपंचाशः सर्गः ॥ ॥ दुर्गमिति। कर्म समुद्रलंघनादिकं सुखपरिश्रमं सफलश्रमं न चाशक्यमेत ६७
दित्याह। अल्पयत्नेनेति। अस्मिन्कार्ये दुर्गविनाशकार्ये कृते सतीति शेषः। केनोपायेन दुर्गविनाशनं स्यादित्यत आह। यो हीति ॥१॥

विभीषणगृहं प्रति वर्जयित्वेति संबंधः। श्वसनेनेति सर्वमावणादतिभीतावन्यानिलो इदानीं राक्षसबलक्षयं देवबलोदयं च प्रत्यासन्नं विदित्वा निःशंकावभूतामि
तिभावः। संजज्ञ इति। भग्नोत्साहा ऊर्जितश्रियो यासां भग्नोत्साहा ऊर्जिताः श्रियश्चेति विशेषणसमासः कनमिति। स्तनंधयः शिशुः ... इति। ...

तथा चेंद्रजितो वेश्म ददाह हरियूथपः। जंबुमालेः सुमालेश्च ददाह भवनं ततः ॥११॥ रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च। ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च
रक्षसः। युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः। विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥१३॥ करालस्य विशालस्य शोणिताक्षस्य चैव हि। कुंभ
कर्णस्य भवनं मकराक्षस्य चैव हि ॥१४॥ नरांतकस्य कुंभस्य निकुंभस्य महात्मनः। यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥१५॥ वर्जयित्वा महातेजा विभी
षणगृहं प्रति। क्रममाणः क्रमेणैव ददाह हरिपुंगवः ॥१६॥ तेषु तेषु महार्हेषु भवनेषु महायशाः। गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः ॥१७॥ सर्वे
षां समतिक्रम्य राक्षसेंद्रस्य वीर्यवान्। आससादाथ लक्ष्मीवान् रावणस्य निवेशनं ॥१८॥ ततस्तस्मिन् गृहे मुख्ये नानारत्नविभूषिते। मेरुमंदरसंका
शे नानामंगलशोभिते ॥१९॥ प्रदीप्तमग्निमुत्सृज्य लांगूलाग्रे प्रतिष्ठितं। ननाद हनुमान्वीरो युगांतजलदो यथा ॥२०॥ श्वसनेन च संयोगादति
वेगो महाबलः। कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥२१॥ तानि कांचनजालानि मुक्तामणिमयानि च। भवनान्यवशीर्यंत रत्नवंति
महांति च ॥२२॥ तानि भग्नविमानानि निपेतुर्वसुधातले। भवनानीव सिद्धानामंबरात्पुण्यसंक्षये ॥२३॥ संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावतां।
स्वगृहस्य परित्राणे भग्नोत्साहोर्जितश्रियां ॥२४॥ नूनमेषोग्निरायातः कपिरूपेण हा इति। क्रंदंत्यः सहसा पेतुः स्तनंधयधराः स्त्रियः ॥२५॥ काश्चिदग्नि
परीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः। पतंत्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवांबरात् ॥२६॥ वज्रविद्रुमवैडूर्यमुक्तारजतसंहितान्। विचित्रान्भवनाद्धा
तून्स्यंदमानान्ददर्श सः ॥२७॥ नाग्निस्तृप्यति काष्ठानां तृणानां च यथा तथा। हनुमान्राक्षसेंद्राणां वधे किंचिन्न तृप्यति ॥२८॥ न हनूमद्विश
स्तानां राक्षसानां वसुंधरा। क्वचित्किंशुकसंकाशाः क्वचिच्छाल्मलिसंनिभाः ॥२९॥ क्वचित्कुंकुमसंकाशाः शिखा वह्नेश्चकाशिरे। हनूमता
वेगवता वानरेण महात्मना ॥३०॥ लंकापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा। ततस्तु लंकापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः। प्रसार्य चूडा

णोः काष्ठेरित्यर्थः। तत इति। लंकापुरपर्वताग्रे लंकाधारत्रिकूटशिखरे चूडावलयं ज्वालासमूहं प्रसार्य समुत्थितोऽग्निः। विसृष्टः गृहेष्विति शेषः। भी
मपराक्रमः भयंकरवेगः ॥

युगांतेति। दिविस्पृक्। अभ्रलिडित्यर्थः। रक्षःशरीराज्यसमर्पितार्चिः रक्षःशरीराण्येवाज्यानि तैः समर्पितार्चिः। उत्थापितज्वालः। समंतामिति। वह्निज्वालामालास
कुलानां प्रसारणैः। लंकामित्यर्थः। अदहदिति संबंधः। परति। सहनूमान्। सचेति संक्रमनुगाऽक्रनु सरति। लांगूलोपसक्ताग्निः। लांगूलस्थितोऽग्निः मृत्युगृहानुक
इवतेया प्रतिभीकर इत्यर्थः। हुताशनेति। कालोपहतेव प्रलयकालोपहतेव। आदित्यसादिश्यमोकद्वयमेकं वाक्यं। अंवरादंवरपर्यंतं प्रवृद्धः किंशुकपुष्पचूडः

युगांतकालानलतुल्यरूपः समारुतोऽग्निर्ववृधे दिविस्पृक्। विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः॥३३॥ सतामत्पर्यंततो वह्निर्लंकां
राक्षससंकुलां॥ ज्वालामालापरिक्षिप्तैरदहन्मारुताचिता॥३४॥ तेनशमेन चित्रघाधर्षिता स्तेनचाग्निना। अभिपेतुस्तदा घोरा हनूमंतं निशाचराः॥
३५॥ तं प्रदीप्तैश्च शूलाद्यैः प्राशैः खड्गैः परश्वधैः। हनूमंतं महावेगैरस्त्रपत्रैन्नतवधमः॥३६॥ तेरा हूसा भीमवला नानाप्रहरणान्विताः। निरस्य च सतां सर्व
दिवमेवोत्पपात सः॥३७॥ सच विक्रम्य सहसा संक्रामन्वेश्मगृहाद्गृहं। लंकामादीपयामास वायुपुत्रः प्रतापवान्॥३८॥ सलांगूलोपसक्तोऽग्निर्भुक्त्वा मृत्यु
खादित्वा लंकां पर्यदहत्क्रमात् विथहसंपतन्निव॥३९॥ तोरणेष्व वालेषु रम्येषु हि खेचवा। निघातं समपश्यंति राक्षसाः सवगोत्तमं॥ ॥४०॥ हुताशन
ज्वालसमावृतासाः हतप्रवीरा हतसर्वशोभना। हनूमतः क्रोधवलाभिभूता वभूव कालोपहतेव लंका॥४१॥ संवंधमवप्रविश्य सुराहमाप्रमुज्वल ज्वालेऊ
समनाकितां॥ ददर्श लंकां हनुमान्महात्मनाः स्वयंभुवः कोपहतामिवावनिं॥४२॥ गृहाययशृंगाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः। प्रदीप्तलां
गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली। आदित्यकोटीसदृशः सुतेजा लंकां समस्तां परिवार्य तिष्ठन्। शब्दैरनेकैरशनिप्रकाशैर्भिंदन्निवांडं
प्रवभौ महाग्निः॥४५॥ तत्रांवरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः॥ निर्वाणधूमानलराजयश्च नीलोत्पलाभाः प्रचकाशिरे
भ्राः॥४६॥ वज्री महेंद्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणोऽनिलो वा। रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोऽयं स्वयमेव कालः॥४७॥ किं ब्रह्म
णः सर्वपितामहस्य लोकस्य धातुश्चतुराननस्य। इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः॥४८॥

ततसमज्वालः। अग्निः हनूमद्दीप्तिप्रोक्तिः अशनिप्ररूढः। अशनिवत निष्ठुरैरनेकैः शब्दैः समासानिः शेषां लंकां परिवार्य परिवेष्टः। तिष्ठन् असौ राम
उभिंदन्महाग्निः प्रलयाग्निरिव प्रवभौ। तत्र तत्र निर्वाणकृलाधूमाकुलराजयः पूर्वदीप्तप्रवलाग्निनिर्वाणसमयोत्थितेन धूमेनाभियंत्रयः अ ६८
भ्राः प्रचकाशिरे इति संबंधः। अभ्राः इति पुंलिंग समाधी॥ ॥

॥२४॥ दीप्तमग्निमिवांभसा। क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि। क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत्। वाच्यावाच्यं प्रकुपितो न विजानाति ॥१३४ मूलं
कर्हिचित्। नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित्। यः समुत्पतितं क्रोधं क्षमयैव निरस्यति। यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते। धिगस्तु मां सुदु
किं वै भवमिति। अनंतं त्रिविधपरिच्छेदरहितं। अव्यक्तं चक्षुराद्यगोचरं। अचिंत्यं मनसोऽविषयं एकमद्वितीयं वै भवान्। सुतेजः स्वमायया शक्त्या कपिरू
पमेत्य रक्षोविनाशायागतं किं वेति योजना। हुताशनेति। परिवृत्तयोधा पराङ्मुखयोधा। सेति। तस्थौ संकल्पितकार्यस्य परिसमाप्तत्वादुपयोगाभावादि

किं वै भवान्वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः। अचिंत्यमव्यक्तमनंतमेकं स्वमायया सांप्रतमागतं वा ॥४८॥ इत्येवमूचुर्बहवो विशिष्टा रक्षो
गणास्तत्र समेत्य सर्वे। सप्राणिसंघां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य। ततस्तु लंका सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा। सपक्षिसं
घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दं। हा तात हा पुत्रक कांत मित्र हा जीवितं भोगयुतं सुपुण्यं। रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरत
रः सुभीमः ॥५२॥ हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा। हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लंका ॥५३॥ भंक्त्वा वनं पादपर
त्नसंकुलं हत्वा तु रक्षांसि महांति संयुगे। दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः। त्रिकूटशृंगाग्रतले विचित्रे प्रतिष्ठितो वा
नरराजसिंहः। प्रदीप्तलांगूलकृतार्चिमाली व्यराजदादित्य इवांशुमाली। स राक्षसांस्तान्सुबहूंश्च हत्वा वनं च भंक्त्वा बहुपादपं तत्। विसृज्य रक्षो
भवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥५४॥ ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगं। महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवग
णाश्च सर्वे। देवाश्च सर्वे मुनिपुंगवाश्च गंधर्वविद्याधरकिंनराश्च। भूतानि सर्वाणि महांति तत्र जग्मुः परां प्रीतिमतुल्यरूपां ॥५५॥ इत्या
र्षे रामायणे सुंदरकांडे पंचाशः सर्गः ॥ भंक्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे। गंधर्वविद्याधरकिंनरराक्षसभूतानि सर्वा
णि महांति च तत्र दग्ध्वा लंकापुरीं सर्वां राक्षसमहाकपिः। तं दृष्ट्वा वानरश्रेष्ठं हनूमंतं महाकपिं। कालाग्निमिव संदीप्तं सर्वभूतानि तत्रसुः।
लंकां समस्तां संदीप्य लांगूलाग्निं महाबलः। निर्वापयामास तदा समुद्रे हरिपुंगवः। ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः। दृष्ट्वा लंका
प्रदग्धां तां विस्मयं परमं गताः। संदीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीं। अवेक्ष्य हनुमांल्लंकां चिंतयामास वानरः। तस्याभूत्सुमहांस्त्रा
सः कुत्सा चात्मन्यजायत। लंकां प्रदहता कार्यं किंस्वित्कृतमिदं मया। धन्याः खलु महात्मानो ये बुद्ध्या कोपमुत्थितं। निरुंधंति महात्मानो
र्बुद्धिं निर्लज्जं पापकृत्तमं। अचिंतयित्वा तां सीतामग्निदं स्वामिघातकं ॥७॥
त्पर्थः। लंकामिति। निर्वापयामास लांगूलाग्निं शमयामास ॥ इति महेश्वरतीर्थविरचितरामायणतत्त्वदीपिकायां सुंदरकांडे चतुःपंचाशः सर्गः ॥ ॥

सुं॰टी॰
६९

यदि तीयुद्विज्ञानकी दग्धा भर्तुः कार्यं हतमिति संबंधः ॥ ईषदिति ॥ इदं कार्यमन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यं
मीषत्कार्यं कृतमासीत् । एतन्निवेदनमात्रावशिष्टं यथा भवति तथा कृतमासीदित्यर्थः ॥ अतः इदानीं क्रोधाभिभूतेन मया तस्य कार्यस्य मूलक्षयः कृतः
न संशय इति योजना ॥ दद्मि ददामि मयेति ॥ अनवस्थितं अव्यवस्थितं चपलमिति यावत् रजःसंभवं रजोगुणनिबंधनचेष्टाविशेषः ॥ अनीशं नियामकरहितं सुतरामि

यदि दग्धा त्वियं सर्वा नूनमार्यापि जानकी । दग्धा तेन मया भर्तुर्हतं कार्यमजानता ॥८॥ यदर्थमयमारंभस्तत्कार्यमवसादितं । मया हि दहता लं
कां न सीता परिरक्षिता ॥९॥ ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः । तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥१०॥ विनष्टा जानकी नूनं न ह्य
दग्धः प्रदृश्यते । लंकायाः कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥११॥ यदि तद्विहतं कार्यं मया प्रज्ञाविपर्ययात् । इहैव प्राणसंन्यासो ममापि ह्यद्य रो
चते ॥१२॥ किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे । शरीरमाहो सत्वानां दद्मि सागरवासिनां ॥१३॥ कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः । तौ
वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥१४॥ मया खलु तदेवेदं रोषदोषात्प्रदर्शितं । प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितं ॥१५॥ धिगस्तु
राजसं भावमनीशमनवस्थितं । ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥१६॥ विनष्टायां तु सीतायां तावुभौ विनशिष्यतः । तयोर्विनाशे सु
ग्रीवः सबंधुर्विनशिष्यति ॥१७॥ एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः । धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुं ॥१८॥ इक्ष्वाकुवंशे धर्मिष्ठे
गते नाशमसंशयं । भविष्यंति प्रजाः सर्वाः शोकसंतापपीडिताः ॥१९॥ तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः । रोषदोषपरीतात्मा व्यक्तं लोक
विनाशनः ॥२०॥ इति चिंतयतस्तस्य निमित्तान्युपपेदिरे । पूर्वमप्युपलब्धानि साक्षात्पुनरचिंतयत् ॥२१॥ अथवा चारुसर्वांगी रक्षिता स्वेन तेज
सा । न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥२२॥ न हि धर्मात्मनस्तस्य भार्याममिततेजसः । स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥२३॥
नूनं रामप्रभावेन वैदेह्याः सुकृतेन वा । यन्मां दहनकर्मायं नादहद्धव्यवाहनः ॥२४॥ त्रयाणां भरतादीनां भ्रातॄणां देवता च या । रामस्य च मनः
कांता सा कथं विनशिष्यति ॥२५॥ यद्वा दहनकर्मायं सर्वत्र प्रभुरव्ययः । न मे दहति लांगूलं कथमार्यां प्रधक्ष्यति ॥२६॥ पुनश्चाचिंतयत्तत्र हनूमा
न्विस्मितस्तदा । हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनं ॥२७॥ तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि । अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति
॥२८॥ स तथा चिंतयंस्तत्र देव्या धर्मपरिग्रहं । शुश्राव हनुमान्वाक्यं चारणानां महात्मनां ॥२९॥

तियावत् ईश्वरेणापि त्राणसमर्थेनापि रागात् आत्मपीता आग्रहादिति यावत् ॥ इतीति ॥ निमित्तानि शुभसंशीनि उपपेदिरे प्रादुर्बभूवुः नाग्निरग्नौ प्रवर्तते ॥ अग्नि
रग्निं न दहतीत्यर्थः ॥ नूनमिति ॥ दहनकर्मा भस्मीकरणस्वभावः अयं हव्यवाहनः मां तत्किंकरणाय तत्यता नादहत् ॥ अतस्तां दग्धुं नार्हतीति संबंधः ॥
देवीप्रभावात् सिंहो महिषांतनिमित्तगिरिदर्शनहेतुनापि देवीमग्निर्न दहतीत्याह ॥ पुनश्चेति ॥ स इति ॥ देव्याः धर्मपरिग्रहं धर्मप्रभावमित्यर्थः ॥ चिंतयन् हनूमान्

राम
६९

दर्शयेति॥ विस्मयः आश्चर्यं॥ अद्भुतः अश्रुतपूर्वइत्यर्थः॥ सा सज्ञतानिमित्तैर्दक्षिणाक्षिस्पंदनादिभिः कारणैः सीतापातिव्रत्यरामप्रभावादिभिः अग्निर्वा
कैश्चारणानांवाक्यैरित्यर्थः॥ दृष्टार्थैः दृष्टफलसंवादैः ततइति॥ विदित्वा पूर्वं चारणैर्विदित्वा पुनः प्रत्यक्षतो दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चका

अहोखलुकृतंकर्म दुर्विषहं हनुमता॥ अग्निं विसृजता तीक्ष्णां भीमं राक्षससद्मनि ॥३०॥ प्रपलायितरक्षःस्त्रीबालवृद्धसमाकुला॥ जन
कोलाहलाध्माता क्रंदतीवाद्रिकंदरैः ॥३१॥ दग्धेयं नगरी लंका साट्टप्राकारतोरणा॥ जानकी न च दग्धेति विस्मयोद्भुत एव नः ॥३२॥ इ
ति श्रुत्वा हनुमान्वाचं ताममृतोपमां॥ बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥३३॥ स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः॥ ऋ
षिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥३४॥ ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा॥ प्रत्यक्षतस्तां पुनरेव दृ
ष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥३५॥ इत्यार्षे रामायणे सुंदरकांडे पंचपंचाशः सर्गः॥ ततस्तु शिंशुपामूले जानकीं पर्युपस्थितां॥
अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षतां ॥१॥ ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः॥ भर्तृस्नेहान्वितं वाक्यं हनुमंतम
भाषत॥ काममस्य त्वमेवैकः कार्यस्य परिसाधने॥ पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः॥ शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः॥
मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत्॥ तद्यथा तस्य विक्रांतमनुरूपं महात्मनः॥ भवत्याहवशूरस्य तथा त्वमुपपादय॥ तद
र्थोपहितं वाक्यं प्रश्रितं हेतुसंहितं॥ निशम्य हनुमांस्तस्या वाक्यमुत्तरमब्रवीत् ॥१४॥

रेतिसंबंधः॥ सुंदरकांडे पंचपंचाशः सर्गः॥ अथामिति॥ हर्यृक्षेषु मध्ये महाबलः सुग्रीवस्तद्दिति॥ कार्यनिर्बंधे कार्यसंकटे॥ काममिति॥
अस्य कार्यस्य सर्वराक्षससंहारपूर्वकमत्प्रापणरूपकार्यस्य परिसाधने त्वमेक एव कामं पर्याप्तः॥ तथापि बलोदयः ते तव यशस्यः
यशस्करः न तु रामस्येति शेषः तर्हि रामस्य किं यशस्करमित्यत्राह॥ शरैरिति॥ तदिति॥ विक्रांतं विक्रमणं॥॥

सुं०टी०
७०

ततइति।अरिष्टंअरिष्टाख्यंपर्वतं।तुंगेत्यादि।पद्मकोवृक्षविशेषः।सपरिधानमिवेतिशेषः।बोध्यमानइति।उद्धूतैरुद्धृतैः।आधीतमिवअध्येतुमुपक्रां
तमिवकर्तरिक्तः।प्रगीतमिति।प्रगीतंगातुमुपक्रांतंगायंतमित्यर्थः।प्रस्रवणस्वनैः।पर्वतमूलाद्बहिःप्रवहंतिजलानिप्रस्रवणानितेषांस्वनैः।
प्रपातजलनिर्घोषैः।प्रपाताभृगवः।तेषांजलानिप्रदेशात्पतंतोनिर्झराइत्यर्थः।तेषांनिर्घोषैःप्राक्रुष्टंक्रोशंतमिवेत्यर्थः।कर्तरिक्तः।वेपमा

क्षिप्रमेष्यतिकाकुत्स्थोहर्यृक्षप्रवरैर्युतः।यस्तेयुधिविजित्यारीन्शोकंव्यपनयिष्यति॥१५॥एवमाश्वास्यवैदेहींहनूमान्मारुतात्मजः।
गमनायमतिंकृत्वावैदेहीमभ्यवादयत्॥१६॥प्रदक्षिणंपरिक्रम्यप्रणम्यसोत्पपातह।ततःसकपिशार्दूलःस्वामिसंदर्शनोत्सुकः॥१७॥
आरुरोहगिरिश्रेष्ठमरिष्टमरिमर्दनः।तुंगपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः॥१८॥सोत्तरीयमिवांभोदैःशृंगांतरविलंबिभिः।बोध्य
मानमिवप्रीत्यादिवाकरकरैःशुभैः॥१९॥उन्मिषंतमिवोद्धूतैर्लोचनैरिवधातुभिः।तोयौघनिस्वनैर्मंद्रैःप्राधीतमिवसर्वतः॥२०॥प्र
गीतमिवविस्पष्टंनानाप्रस्रवणस्वनैः।देवदारुभिरत्युच्चैरूर्ध्वबाहुमिवस्थितं॥२१॥प्रपातजलनिर्घोषैःप्राक्रुष्टमिवसर्वतः।वेपमानमि
वश्यामैःकंपमानैःशरद्घनैः॥२२॥वेणुभिर्मारुतोद्धूतैःकूजंतमिवकीचकैः।निश्वसंतमिवामर्षाद्घोरैराशीविषोत्तमैः॥२३॥नीहारकृ
तगंभीरैर्ध्यायंतमिवगह्वरैः।मेघपादनिभैःपादैःप्रक्रांतमिवसर्वतः॥२४॥जृंभमाणमिवाकाशेशिखरैरभ्रमालिभिः।कूटैश्च
बहुधाकीर्णैःशोभितंबहुकंदरैः॥२५॥सालतालाश्वकर्णैश्चवंशैश्चबहुभिर्वृतं।लतावितानैर्विततैःपुष्पवद्भिरलंकृतं॥२६॥नाना
मृगगणाकीर्णंधातुनिष्यंदभूषितं।बहुप्रस्रवणोपेतंशिलासंचयसंकटं॥२७॥महर्षियक्षगंधर्वकिन्नरोरगसेवितं।लतापादपसंबाधंसिंहाध्युषितकंदरं
॥२८॥व्याघ्रादिभिःसमाकीर्णंधातुनिष्यंदभूषणं।आरुरोहानिलसुतःपर्वतंप्लवगोत्तमः॥२९॥रामदर्शनशीघ्रेणप्रहर्षेणाभिचोदितः।तेनपादतलाक्रांतारम्येषु
गिरिसानुषु॥३०॥सघोषाःसमशीर्यंतशिलाश्चूर्णीकृतास्ततः।सतमारुह्यशैलेंद्रंव्यवर्धतमहाकपिः॥३१॥दक्षिणादुत्तरंपारंप्रार्थयंल्लवणांभसः।अधिरुह्यत
तोवीरःपर्वतंपवनात्मजः॥३२॥ददर्शसागरंभीमंमीनोरगनिषेवितं॥समारुतइवाकाशंमारुतस्यात्मसंभवः॥३३॥प्रपेदेहरिशार्दूलोदक्षिणादुत्तरांदिशं।स
तदापीडितस्तेनकपिनापर्वतोत्तमः॥३४॥ररासविविधैर्भूतैःप्रविशन्वसुधातलं।कंपमानैश्चशिखरैःपतद्भिरपिचद्रुमैः॥३५॥तस्योरुवेगोन्मथिताःपादपाःपुष्प
शालिनः।निपेतुर्भूतलेभग्नाःशक्रायुधहताइव॥३६॥कंदरोदरसंस्थानांपीडितानांमहौजसां।सिंहानांनिनदोभीमोनभोभिंदन्सशुश्रुवे॥३७॥

नमितिशेषः।शारदैर्घनैःशरद्घनैःससर्पाणिदिशावद्वृक्षसंघर्षैरित्यर्थः।नीहारकृतगंभीरैः।नीहारकृतानीत्कानीहाराणिनीहारकृतानीत्यर्थः।गंभीरैर्गह्वरैर्ध्यायंतमिवनिरुद्धेंद्रि
महाध्यानाद्दृढमिवस्थितमित्यर्थः।मेघपादनिभैःपादैःमेघपादामेघप्ररोहाःतेषांनिभैःपादैःप्रत्यंतपर्वतैःप्रक्रांतमिवगच्छंतमिवजृंभमाणमिवगात्रभंगंकुर्वाणमिव।अभ्र

[illegible]

राम
७०

न्वेतितान्वकेतेनत्वात्तेनत्वाविहानिद्यमपमलानिवसनानियातांताःमरुत्वशिवरोदयः॥महेंद्रैःशिखरैरेकःमभ्रउन्नतःमहति [illegible] कल्लोलाकालवेलांते [illegible] कालपतत्स्याकाल-
कल्लोलानामास्फालोवेलांतेयस्यतत्॥इतिसुंदरकांडेषट्पंचाशःसर्गः॥ [illegible] लंघनीयगगनमर्णववत् [illegible] ॥

सप्तविहवसनाव्याकुलीकृतभूषणाःविद्याधर्यःसमुत्पेतुःमहत्साधरणीधरात्॥३०॥अतिक्रमाणवलिनोदीप्तजिव्हामहाविषाः॥निष्पेतितत्र [illegible]
वेष्टितमहोरगाः॥३९॥किंनरोरगगंधर्वयक्षविद्याधरास्तथा॥पीडितंतंनगवरंत्यक्त्वागगनमास्थिताः॥४०॥सचभूमिधरःश्रीमान्मलिलोतनृपति [illegible]
शिखरोदयः॥प्रविवेशसमातलं॥४१॥दशयोजनविस्तीर्णस्त्रिंशद्योजनमुच्छ्रितः॥धरण्यांसमतांयातःसबभूवधराधरः॥४२॥तलिलंघयिषुर्भीमंसलीलंलव-
णार्णवं॥कल्लोलास्फालनवेलांतमुत्पपातनभोगिरिः॥४३॥॥इत्यार्षेरामायणेसुंदरकांडेषट्पंचाशःसर्गः॥अथसप्तपंचाशःसर्गः॥अथतत्रप्रवरानिवपवनोभुजगायत-
गंधर्वयक्षदेवकमलोत्पलं॥१॥सचंद्रकुमुदंरम्यंसार्ककारंडवंशुभं॥तिष्यश्रवणकादंबमभ्रशैवलशाद्वलं॥पुनर्वसुमहामीनंलोहितांगमहाग्रहं॥२
ऐरावतमहाद्वीपंस्वातीहंसविलोलितं॥वातसंघातजालोर्मिचंद्रांशुशिशिरांबुमत्॥३॥भुजंगयक्षगंधर्वप्रबुद्धकमलोत्पलं॥हनुमान्मारुतगतिर्म-
हानौरिवसागरं॥४॥अपारमपरिश्रांतःपुप्लुवेगगनार्णवं॥ग्रसमानइवाकाशंताराधिपमिवोल्लिखन्॥५॥हरन्निवसनक्षत्रंगगनंसार्कमंडलं॥मारुतः
स्यात्मजःश्रीमान्कपिर्व्योमचरोमहान्॥हनूमान्मेघजालानिविकर्षन्निवगच्छति॥पांडुरारुणवर्णानिनीलमांजिष्ठकानिच॥हरितारुणवर्णानिम-
हाभ्राणिचकाशिरे॥प्रविशन्नभ्रजालानिनिष्क्रामंश्चपुनःपुनः॥८॥प्रच्छन्नश्चप्रकाशश्चचंद्रमाइवलक्ष्यते॥विविधाभ्रघनापन्नगोचरोधवलांबरः॥९
दृश्यादृश्यतनुर्वीरस्तदाचंद्रायतेंबरे॥तार्क्ष्यायमाणोगगनेबभासेवायुनंदनः॥१०॥दारयन्मेघजालानिनिष्पतंश्चपुनःपुनः॥नदन्नादेनमहताम-
घस्वनमहास्वनः॥११॥प्रवरान्राक्षसान्हत्वानामविश्राव्यचात्मनः॥आकुलांनगरींकृत्वाव्यथयित्वाचरावणं॥१२॥अर्दयित्वाबलंघोरंवैदेहीम-
भिवाद्यच॥आजगाममहातेजाःपुनर्मध्येनसागरं॥१३॥पर्वतेंद्रंसुनाभंचसमुपस्पृश्यवीर्यवान्॥ज्यामुक्तइवनाराचोमहावेगोभ्युपागमत्॥१४॥
सकिंचिदानुसंप्राप्तःसमालोक्यमहागिरिं॥महेंद्रंमेघसंकाशंननादहरिपुंगवः॥१५॥सपूरयामासकपिर्दिशोदशसमंततः॥नदन्नादेनमह-
तामेघस्वनमहास्वनः॥सतंदेशमनुप्राप्तःसुहृद्दर्शनलालसः॥ननादहरिशार्दूलोलांगूलंचाप्यकंपयत्॥१७॥ ॥ ॥ ॥छ॥ ॥ ॥ ॥ ॥ ॥

यस्मिन्नस्तसचंद्रमिति॥चंद्रएवकुमुदंकारंडवःजलपक्षिविशेषःकादंबःकलहंसःलोहितांगःअंगारकःऐरावतःइंद्रगजःचंद्रांशुशिशिरांबुमत्॥चंद्रांशुरेवएव
शिशिरांबुतदस्यास्तीतितथा॥अत्रगगनस्यार्णवत्वेनचंद्रादीनांतदवयवकुमुदादित्वेनचनिरूपणात्सावयवरूपकं॥विविधेति॥विविधाभ्रघनापन्नगोचरः

विविधेषुअभ्रघनेषुमेघसंघातेषुआपन्नःप्राप्तःगोचरोमा
र्गोयेनसः॥दृश्यादृश्यतनुःमेघांतःप्रवेशनिष्क्रमाभ्यामितिभा
वः॥पर्वतेंद्रमिति॥सुनाभंमैनाकं॥ ॥

सुं०टी० तस्येतिफलतीवद्लत्तीवा।नेप्रीताः इतिपादपाग्रेषुविष्ठिताः शुभ्राखाग्राग्रशाखाः वासांसीवसमाविध्यंतवाससून्वन्नातमितिाअभ्रघनसंकाशंमेघसन्नह
तस्यनानद्यमानस्यसुपर्णाचरितेपथि। फलतीवास्यघोषेणगगनंसार्कमंडलं १८ येतुतत्रोत्तरेकूलेसमुद्रस्यमहाबलाः पूर्वंसंविष्ठिताःशूरावायुपुत्रं
७१ दिदृक्षवः १९ महतोवायुनुन्नस्यतोयदस्येवनिस्वनां शुश्रुवुस्तेतदाघोषमूरुवेगंहनूमतः २० तेदीनमनसःसर्वेशुश्रुवुःकाननौकसः वानरेंद्रस्य
निर्घोषंपर्जन्यनिनदोपमं २१ निशम्यनदतोनादंवानरास्तेसमंततः बभूवुरुत्सुकाः सर्वेसुहृद्दर्शनकांक्षिणः २२ जांबवान्सहरिश्रेष्ठः प्रीतिसं
हृष्टमानसः उपामंत्र्यहरीन्सर्वानिदंवचनमब्रवीत् २३ सर्वथाकृतकार्योसौहनूमान्नात्रसंशयः नह्यस्याकृतकार्यस्यनादएवंविधोभवेत्
२४ तस्यबाहूरुवेगंचनिनादंचमहात्मनः निशम्यहरयोहृष्टाःसमुत्पेतुर्यतस्ततः २५ तेनगाग्रान्नगाग्राणिशिखराच्छिखराणिचप्रहृ
ष्टाःसमपद्यंतहनूमंतंदिदृक्षवः २६ तेप्रीताःपादपाग्रेषुगृह्यशाखाःसुविस्थिताः वासांसीवमहाप्रीत्यासमाविध्यंतवानराः २७ गिरिगह्वरसंली
नोयथागर्जतिमारुतः एवंजगर्जबलवान्हनूमान्मारुतात्मजः २८ तमभ्रघनसंकाशमापतंतंमहाकपिं दृष्ट्वातेवानराःसर्वेतस्थुःप्रांजलयस्त
दा ततस्तुवेगवांस्तस्यगिरेर्गिरिनिभःकपिः निपपातगिरेस्तस्यशिखरेपादपाकुले ३० हर्षेणापूर्यमाणोसौरम्येपर्वतनिर्झरे छिन्नपक्षइवाका
शात्पपातधरणीधरः ३१ ततस्तेप्रीतमनसःसर्वेवानरपुंगवाः हनूमंतंमहात्मानंपरिवार्योपतस्थिरे ३२ परिवार्यचतेसर्वेपरांप्रीतिमुपागताः प्रहृ
ष्टवदनाःसर्वेतमरोगमुपागतं ३३ उपायनानिचादायमूलानिचफलानिच प्रत्यर्चयन्हरिश्रेष्ठंहरयोमारुतात्मजं ३४ हनूमांस्तुगुरून्वृद्धान्जां
बवत्प्रमुखांस्तदा कुमारमंगदंचैवसोवंदतमहाकपिः ३५ सताभ्यांपूजितःपूज्यःकपिभिश्चप्रसादितः दृष्टादेवीतिविक्रांतःसंक्षेपेणन्यवेद
यत् ३६ निषसादचहस्तेनगृहीत्वावालिनःसुतं रमणीयेवनोद्देशेमहेंद्रस्यगिरेस्तदा ३७ हनूमानब्रवीद्धृष्टस्तदातान्वानरर्षभान् अशोकवनि
कासंस्थादृष्टासाजनकात्मजा ३८ रक्ष्यमाणासुघोराभीराक्षसीभिरनिंदिता एकवेणीधराबालारामदर्शनलालसा ३९ उपवासपरिश्रांता
मलिनाजटिलाकृशा ततोदृष्टेतिवचनंमहार्थममृतोपमं ४० निशम्यमारुतेःसर्वेमुदितावानराभवन् क्ष्वेलंत्यन्येनदंत्यन्येगर्जंत्यन्येम राम
हाबलाः ४१ चक्रुःकिलकिलामन्येप्रतिगर्जंतिवानराः केचिदुच्छ्रितलांगू [illegible] ४२ ७१
सहृष्टाःअंचितायतदीर्घाणिदीर्घाणिदीर्घशद्पसन्निभान्यायतशद्वेनस्यैो [illegible] ४२

हनूमतेतियशस्विनेत्यत्रगदविशेषणंअतोनपुनरुक्तिः॥ ॥इतिश्रीमाहेश्वरतीर्थविरचितायांरामायणतत्त्वदीपिकाख्यायांसुंदरकांडेसप्तपंचाशःसर्गः॥कथमितिदृष्टां

आयतांचितदीर्घाणिलांगूलानिप्रविव्यधुः॥अपरेतुहनूमंतंवानरावारणोपमं॥४३॥आप्लुत्यगिरिश्रृंगेभ्यःसंस्पृशंतिस्मवानराः॥उक्तवाक्यंहनूमंतमंगद

स्तुतदाब्रवीत्।४४।सर्वेषांहरिवीराणांमध्येवाचमनुत्तमां॥सत्वेवीर्येनतेकश्चित्समोवानरविद्यते।४५।यदवप्लुत्यविस्तीर्णंसागरंपुनरागतः॥जीवितस्य

प्रदातानस्त्वमेकोवानरोत्तमः।४६।त्वत्प्रसादात्समेष्यामःसिद्धार्थाराघवेणह।अहोस्वामिनितेभक्तिरहोवीर्यमहोधृतिः।४७।दिष्ट्यादृष्टात्वयादेवी

रामपत्नीयशस्विनी।दिष्ट्यात्यक्ष्यतिकाकुत्स्थःशोकंसीतावियोगजं।ततोंगदंहनूमंतंजांबवंतंचवानराः।परिवार्यप्रमुदिताभेजिरेविपुलाःशिलाः

उपविष्टागिरेस्तस्यशिलासुविपुलासुते।श्रोतुकामाःसमुद्रस्यलंघनंवानरोत्तमाः।४८।दर्शनंचापिलंकायाःसीतायारावणस्यच।तस्थुःप्रांजलयःसर्वे

हनुमद्वदनोन्मुखाः।५०।तस्थौतत्रांगदःश्रीमान्वानरैर्बहुभिर्वृतः।उपास्यमानोविबुधैर्दिविदेवपतिर्यथा।५१।हनूमताकीर्तिमतायशस्विना

तथांगदेनांगदबद्धबाहुना।मुदातदाध्यासितमुन्नतंमहन्महीधराग्रंज्वलितंश्रियाभवत्॥ इत्यार्षेरामायणेसुंदरकांडेसप्तपंचाशःसर्गः॥ ततस्त

स्यगिरेःश्रृंगेमहेंद्रस्यमहाबलाः।हनूमत्प्रमुखाःप्रीतिंहरयोजग्मुरुत्तमां।१।प्रीतिमत्स्वपविष्टेषुवानरेषुमहात्मसु।ततःप्रतिसंहृष्टःप्रीतियुक्तं

महाकपिं।जांबवान्कार्यवृत्तांतमपृच्छदनिलात्मजं।२।कथंदृष्टात्वयादेवीकथंवातत्रवर्तते।तस्यांवापिकथंवृत्तःक्रूरकर्मादशाननः।३।तत्वतःसर्व

मेतन्नःप्रब्रूहित्वंमहाकपे।संमार्गिताकथंदेवीकिंचसाप्रत्यभाषत।४।श्रुतार्थाश्चिंतयिष्यामोभूयःकार्यविनिश्चयं।यश्चार्थस्तत्रवक्तव्योगतैर

स्माभिरात्मवान्।५।रक्षितव्यंचयत्तत्रतद्भवान्व्याकरोतुनः।सनियुक्तस्ततस्तेनसंप्रहृष्टतनूरुहः।६।नमस्यन्शिरसादेव्यैसीतायैप्रत्यभाषत।

प्रत्यक्षमेवभवतांमहेंद्राग्रात्खमाप्लुतः।७।उदधेर्दक्षिणंपारंकांक्षमाणःसमाहितः।गच्छतश्चहिमेघोरंविघ्नरूपमिवाभवत्।कांचनंशिखरं

दिव्यंपश्यामिसुमनोहरं।स्थितंपंथानमावृत्यमेनेविघ्नंचतन्नगं।उपसंगम्यतंदिव्यंकांचनंनगसत्तमं।कृतामेमनसाबुद्धिर्भेत्तव्योयंमयेतिच

प्रहतंचमयातस्यलांगूलेनमहागिरेः।शिखरंसूर्यसंकाशंव्यशीर्यतसहस्रधा।१०।व्यवसायंचमेबुद्ध्वासहोवाचमहागिरिः।पुत्रेतिमधु

रांवाणींमनःप्रह्लादयन्निव।१३।पितृव्यंचापिमांविद्धिसखायंमातरिश्वनः।मैनाकइतिविख्यातंनिवसंतंमहोदधौ।१४।पक्षवंतःपुरापुत्र

ननुःकथंहनूमतोहस्तव्यापाररूपश्चेति।तत्ररामकृतंनिघ्नोरक्षितव्यंगोप्यं।अवक्तव्यमितियावत्।आत्मवान्भवान्गच्छतुइति।पश्यामिस्वरूपंस्थितमि

बभूवुःपर्वतोत्तमाः।छंदतःपृथिवींचेरुर्बाधमानाःसमंततः ९५

तिमेनइतिलिङ्गव्यत्ययःपुंस्येकवचनं॥ ॥

सुं०टी० सचेति। वुभुक्षता पैष्कल्पवता मानुषेणा शरीरेणांतर्हितः शैलेन शिलानुरूपेणा शरीरेणा तु महोदधौ। सागरोपरि स्थित इति शेषः। ममेति। प्रदिष्टः दत्तः विहितः लब्धः
तस्याऽइति। विषयेसाते विषयवासिनी। एवमिति। ततोऽर्द्धगुणविस्तारः ततो दशयोजनादर्द्धस्य पंचयोजनस्य गुणा आवृत्तिः तद्विस्तारो दशयोजनविस्तारः इत्यम
७२ कृत्वा नगानां वर्त्तिं महेंद्रः पाकशासनः। वज्रेण भगवान्पक्षौ चिच्छेद सहस्रशः॥१६॥ अहं तु मोचितस्तस्मात्तव पित्रा महात्मना। मारुतेन तदाव
त्स प्रक्षिप्तोस्मि महार्णवे।१७। राघवस्य मया साह्ये वर्त्तितव्यमरिंदमः। रामो धर्मभृतां श्रेष्ठो महेंद्रसमविक्रमः॥१८॥ एतच्छ्रुत्वा मया तस्य मैनाकस्य
महात्मनः। कार्यमावेद्य च गिरेरुद्यतं च मनो मम।१९॥ तेन चाहमनुज्ञातो मैनाकेन महात्मना॥ स चाप्यंतर्हितः शैलो मानुषेण वपुष्मता। शरीरेण महाशै
लः शैलेन च महोदधौ॥२०॥ उत्तमं जवमास्थाय शेषमध्वानमास्थितः। ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि॥२१॥ ततः पश्याम्यहं देवीं सुरसां नाग
मातरं। समुद्रमध्ये सा देवी वचनं मामभाषत॥२२॥ मम भक्ष्यः प्रदिष्टस्त्वममरैर्हरिसत्तम॥ ततस्त्वां भक्षयिष्यामि विहितस्त्वं चिरस्य मे।२३॥ एवमुक्तः सुर
सया प्रांजलिः प्रणतः स्थितः। विषण्णवदनो भूत्वा वाचं चेदमुदीरयं।२४॥ कृते राघवकार्ये मामागतं भक्षयादिता॥ एवमुक्त्वा तु तां देवीं रामका
र्यं निवेदितं॥२५॥ रामो दाशरथिः श्रीमान्प्रविष्टो दंडकावनं। लक्ष्मणेन सह भ्रात्रा सीतया च परंतपः॥२६॥ तस्य सीता हृता भार्या रावणेन दुरात्म
ना॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात्। कर्त्तुमर्हसि रामस्य साह्यं विषयवासिनि। अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणं। आगमि
ष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते। एवमुक्ता मया सा तु सुरसा कामरूपिणी। अब्रवीन्नातिवर्त्तेत कश्चिदेष वरो मम। एवमुक्तः सुरसया दशयोजनमा
यतं। ततोऽर्द्धगुणविस्तारो बभूवाहं क्षणेन तु। मत्प्रमाणाधिकं चैव व्यादितं तु मुखं तया। तद्दृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं पुनः। तस्मिन्मुहू
र्त्ते च पुनर्बभूवांगुष्ठसंमितः। अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात्। अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः। अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ
सौम्य यथासुखं। समानय च वैदेहीं राघवेण महात्मना। सुखी भव महाबाहो प्रीतास्मि तव वानर। ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः॥ ॐ
२९। ततोऽतरिक्षं विपुलं प्लुतोऽहं गरुडो यथा॥ छाया मे निगृहीता च न च पश्यामि किंचन। सोऽहं विगतवेगस्तु दिशो दश विलोकयन्। न किंचित्तत्र
पश्यामि येन मे विहता गतिः॥३०॥ ततो मे बुद्धिरुत्पन्ना किं नाम गगने मम॥ ईदृशो [illegible] न दृश्यते॥३१॥ अधोभागेन मे दृष्टिः
शोचता पातिता तदा। ततोऽद्राक्षमहं भीमां राक्षसीं सलिलेशयां॥३२॥ प्रहस्य च म[illegible]स्थितमसंभ्रांतमिदं [illegible]शो
सार्द्धदशयोजनविस्तारेऽत्यद्भुतरूपेणैन व्याख्यातं। अर्थसिद्ध्यै इति। समानयसंगमय ततः इति। साधु[illegible]आर्षः ततः इति। न दृश्यामि नापश्यं॥ ॥ ॥ राम ७२

आस्येति। तस्या आस्यप्रमाणादधिकं कायमात्मनः कायं आप्रदर्शयं अवर्धतानचेति। सा ... यं कामरूपीति मत्वं ह्नाततवतीत्यर्थः। मम ... विकृतं त्वा
मयाहृतं विकारस्वरूपं वानवबुधेति हि कृतं किमित्यत आह। ततोहमिति। हृदयमादाय हृदयं निकृत्य प्रपतामि आपतं सति विसृष्टभुजा विश्रमित भुजा श्रेणी
मीति सिंहिका हनुमता हतेति घातानां देवानां वाचः शृणोमीति संबंधः। तामिति। कृत्यमात्ययिकं आपातिकं कर्म चिंतयनित्यर्थः। सत्वेति। प्रविशं सा विशा। तेन तिम

भक्षः श्रीणयमे देहं विरमाहारवर्जितं। ४३। बाढमित्येवतां वाणीं प्रत्यगृह्णाम्यहं ततः। आस्यप्रमाणादधिकं तस्याः कायमपूरयं। ४४। तस्याश्चास्यं महद्भीमं
वर्द्धते मम भक्षणे। न च मां साधु बुबुधे मम वा विकृतं कृतं। ततोहं विपुलं रूपं संक्षिप्य निमिषांतरात्। ४५। तस्या हृदयमादाय प्रपतामि नभस्थलं। सा विसृ
ष्टभुजा भीमा पपात लवणांभसि। ४६। मया पर्वतसंकाशा निकृत्तहृदया सती। शृणोमि खगतानां च सिद्धानां चारणैः सह। ४७। राक्षसी सिंहिका भीमा
क्षिप्रं हनुमता हता। तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन्। ४८। गत्वा च महदध्वानं पश्यामि नगमंडितं। दक्षिणं तीरमुदधेर्लंका यत्र महापुरी। ४९
अस्तं दिनकरे याते रक्षसां निलयं पुरं। प्रविष्टोहमविज्ञातो रक्षोभिर्भीमविक्रमैः। ५०। तत्र प्रविशतश्चापि कल्पांतघनसन्निभा। अट्टहासं विमुंचंती
नारी काप्युत्थिता पुरः। ५१। जिघांसंतीं ततस्तां तु ज्वलदग्निशिरोरुहां। सव्यमुष्टिप्रहारेण पराजित्य सुभैरवां। प्रदोषकाले प्रविशं भीतयाहं तयोदितः
अहं लंकापुरी वीर निर्जिता विक्रमेण ते। ५२। यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः। तत्राहं सर्वरात्रं तु विचिन्वन् जनकात्मजां। ५३। रावणांतःपुर
गतो न चापश्यं सुमध्यमां। ततः सीतामपश्यंस्तु रावणस्य निवेशने। ५४। शोकसागरमासाद्य न पारमुपलक्षये। शोचता च मया दृष्टं प्राकारेणाभिसंवृतं
५५। कांचनेन विकृष्टेन गृहोपवनमुत्तमं। तं प्राकारमवप्लुत्य पश्यामि बहुपादपं। अशोकवनिकामध्ये शिंशपापादपो महान्। तमारुह्य च पश्यामि
कांचनं कदलीवनं। अदूरात् शिंशपावृक्षात्पश्यामि वरवर्णिनीं। श्यामां कमलपत्राक्षीमुपवासकृशाननां। ५७। तदेकवासःसंवीतां रजोध्वस्तशिरोरुहां
शोकसंतापदीनांगीं सीतां भर्तृहिते स्थितां। ५८। राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृतां। मांसशोणितभक्षाभिर्व्याघ्रीभिर्हरिणीं यथा। ५९। सा मया
राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः। एकवेणीधरा दीना भर्तृचिंतापरायणा। ६०। भूमिशय्या विवर्णांगी पद्मिनीव हिमागमे। रावणाद्विनिवृत्तार्था भर्तृ
व्यकृतनिश्चया। ६१। कथंचिन्मृगशावाक्षी तूर्णमासादिता मया। तां दृष्ट्वा तादृशीं नारीं रामपत्नीमनिंदितां। ॥६३॥

वेरात्रं सर्वरात्रं चिंतयामह मध्यरात्रे त्विति पाठः साधुः ततइति उपलक्षये उपलक्षये। शोचतेति। विकृष्टेन विप्रकृष्टेन अतिदीर्घेणेति यावत्। बहुपादपं गृहोप
वनं गृहारामं ह्दयमिति संबंधः। तदिति। तदेकवासः संवीतां तेन तत्कालदृष्टेन सर्वदृष्टेनैव वासमासं वीतां भेमामपतेति। सा मया राक्षसी मध्ये इति तर्ज्यमाना इति

सहितपूर्वं ॥ अस्तं प्रविशतां नाम ... स्र्हितः मतभ्रम्
कामिनिकामा ... ॥ ३३ ॥

सुं०टी० ७३

ततस्तितिगहनेस्थितः अत्रगहनशब्देनपर्णसंहतिरूपप्रदेशउच्यते। तमिति। परिरभ्यविनत्रासेतिशेषः। स्त्रीणामिति। पूर्वंधान्यमालिन्याश्रुतिपिहृस्य
कं इदानीमंदोदरीयत्पतिधानांउभाभ्यामपीतिकल्पनीयं। अलमस्मात्परिरंभादितिइयंसीतेतिशेषः। ततइति। ततस्त्रिजटावाक्यानंतरंभर्तुर्विजयह

तत्रैवशिंशुपावृक्षेपत्रपन्नइवस्थितः। ततोहलहलाशब्दंकांचीनूपुरमिश्रितं ॥६४॥ करेणाभ्यधिकगंभीरंरावणस्यनिवेशने। ततोहंसरसोद्विग्नः
स्वरूपंप्रत्यसंहरं। अहंचशिंशुपावृक्षेपत्रैवगहनेस्थितः। ततोरावणदाराश्चएवाच्चमहाबलः ॥६६॥ तंदेशमनुसंप्राप्तोयत्रसीताभवत्स्थिता। तद्दृष्ट्वा
चवरारोहासीतारक्षोमहाबलं ॥६७॥ संकुच्यास्तनौपीनौवाहुभ्यांपरिरभ्यच। आवपतवरारोहाप्रवातेकदलीयथा ॥६८॥ वित्रस्तांपरमोद्विग्नांवीक्ष्यमाणां
मितस्ततः। त्राणंकिंचिदपश्यंतीवेप्यमानांतपस्विनीं ॥६९॥ तामुवाचदशग्रीवःसीतांपरमदुःखितां। अवाक्शिराःप्रपतितोबहुमन्यस्वमामिति ॥७०॥ यदि
चेत्वंतुमांदर्पान्नाभिनंदसिगर्विते। द्वौमासावंतरंसीतेपास्यामिरुधिरंतव। एतच्छ्रुत्वावचस्तस्यरावणस्यदुरात्मनः। उवाचपरमक्रुद्धासीतावचनमुत्तमं ॥७२
राक्षसाधममांदर्पान्नाभिनंदसिगर्विते। द्वौमासावंतरंसीतेपास्यामिरुधिरंतव। राक्षसाधमरामस्यभार्याममिततेजसः। इक्ष्वाकुवंशनाथस्यस्नुषांदशरथ
स्यच ॥७३॥ अवाच्यंवदतोजिह्वाकथंनपतितातव। किंचिद्वीर्यंतवानेनयोमांभर्तुरसन्निधौ ॥७४॥ अपहृत्यागतःपापतेनादृष्टोमहात्मना। नत्वंरामस्य
सदृशोदास्येप्यस्यनयुज्यसे ॥७५॥ अजेयःसत्यवाक्शूरोरणश्लाघीचराघवः। जानक्याःपरुषंवाक्यमेवमुक्तोदशाननः ॥७६॥ जज्वालसहसाकोपा
च्चितास्थइवपावकः। विवृत्यनयनेक्रूरेमुष्टिमुद्यम्यदक्षिणां ॥७७॥ मैथिलींहंतुमारब्धःस्त्रीभिर्हाहाकृतंतदा। स्त्रीणांमध्यात्समुत्पत्यतस्यभार्यादुरात्मनः
॥७८॥ वरामंदोदरीनामतयासप्रतिबोधितः। उक्तश्चमधुरांवाणींतयासमदनार्दितः ॥७९॥ सीतयातवकिंकार्यंमहेंद्रसमविक्रम। मयासहरमस्वायम
द्विशिष्टानजानकी ॥८०॥ देवगंधर्वकन्याभिर्यक्षकन्याभिरेवच। सार्धंप्रभोरमस्वेतिसीतयाकिंकरिष्यसि ॥८१॥ ततस्ताभिःसमेताभिर्नारीभिःसमहाव
लः। प्रसाद्यसहसानीतोभवनंस्वंनिशाचरः। यातेतस्मिन्दशग्रीवेराक्षस्योविकृताननाः। सीतांनिर्भर्त्सयामासुर्वाक्यैःक्रूरैःसुदारुणैः ॥८३॥ तृणवद्भाषि
तंतासांगणयामासजानकी। गर्जितंचतदातासांसीतांप्राप्यनिरर्थकं ॥८४॥ वृथागर्जितनिश्चेष्टाराक्षस्यःपिशिताशनाः। रावणायशशंसुस्ताःसीताव्य
वसितंमहत् ॥८५॥ ततस्ताःसहिताःसर्वाविहताशानिरुद्यमाः। परिक्षिप्यसमंतात्तांनिद्रावशमुपागताः ॥८६॥ तासुचैवंप्रसुप्तासुसीताभर्तृहितेरता।
विलप्यकरुणंदीनाप्रशुशोचसुदुःखिता ॥८७॥ तासांमध्यात्समुत्थायत्रिजटावाक्यमब्रवीत्। आत्मानंखादतक्षिप्रंनसीताविनशिष्यति ॥८८॥ जन
कस्यात्मजासाध्वीस्नुषादशरथस्यच। स्वप्नोह्यद्यमयादृष्टोदारुणोरोमहर्षणः ॥८९॥ ॥ ॥ ॥ ॥ ॥ ॥
षितात्रिजटाकथितस्वप्नस्वचितरामविजयहर्षिताततस्त्रिजटास्वप्नवाक्यानंतरंयदिकःशरणंतदेयमित्यवोचदितिसंबंधःतामिति। चिंतयामासेतिलिङ्गुन्नमपउपे

राम ७३

तदितित्वयाज्ञाप्तुमिच्छामित्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः॥इत्युक्तोतिवाचामांसंदिदेशसा।रामेकवचंआयुक्तकाकासुरहननंतंतिलककनिर्माणंच
रक्षसांचविनाशायभर्तुरस्यापजयायच।अलमस्मात्परित्रातुंराघवाद्राक्षसीगणं।९०।अभियाचामवैदेहीमेतद्धिममरोचते।यदिह्येवंविधःस्वप्नोदुःखि
तायाःप्रदृश्यते।९१।सादुःखैर्विविधैर्मुक्तासुखमाप्नोत्यनुत्तमं।प्रणिपातप्रसन्नाहिमैथिलीजनकात्मजा।९२।अलमेषापरित्रातुंराक्षस्योमहतोभया
त्।ततःसाह्रीमतीबालाभर्तुर्विजयहर्षिता।९३।अवोचद्यदितत्तथ्यंभवेयंशरणंहिवः।तांचाहंतादृशींदृष्ट्वासीतायादारुणांदशां।९४।चिंतयामा
सविक्रांतोनचमेनिर्वृतंमनः।संभाषणार्थंचमयाजानक्याश्चिंतितोविधिः।९५।इक्ष्वाकुकुलवंशस्तुततोममपुरस्कृतः।श्रुत्वातुगदितांवाचंरा
जर्षिगणपूजितां।९६।प्रत्यभाषतमांदेवीबाष्पैःपिहितलोचना।कस्त्वंकेनकथंचेहप्राप्तोवानरपुंगव।९७।काचरामेणतेप्रीतिस्तन्मेशंसितुमर्हसि
तस्यास्तद्वचनंश्रुत्वाअहमप्यब्रुवंवचः।९८।देविरामस्यभर्तुस्तेसहायोभीमविक्रमः।सुग्रीवोनामविक्रांतोवानरेंद्रोमहाबलः।९९।त
स्यमांविद्धिभृत्यंचहनूमंतमिहागतं।भर्त्राहंप्रहितस्तुभ्यंरामेणाक्लिष्टकर्मणा।१००।इदंचपुरुषव्याघ्रःश्रीमान्दाशरथिःस्वयं।अंगुली
यमभिज्ञानमदात्तुभ्यंयशस्विनि।१।तदिच्छामित्वयाज्ञप्तंदेविकिंकरवाण्यहं।रामलक्ष्मणयोःपार्श्वंनयामित्वांकिमुत्तरं।२।एतच्छ्रुत्वाविदित्वाच
सीताजनकनंदिनी।आहरावणमुत्साद्यराघवोमांनयत्विति।३।प्रणम्यशिरसादेवीमहमार्यामनिंदितां।राघवस्यमनोह्लादमभिज्ञान
मयाचिषं।४।अथमामब्रवीत्सीतागृह्यतामयमुत्तमः।मणिर्येनमहाबाहूरामस्त्वांबहुमन्यते।५।इत्युक्त्वातुवरारोहामणिप्रवरमुत्तमं।प्राय
च्छत्परमोद्विग्नावाचामांसंदिदेशह।६।ततस्तस्यैप्रणम्याहंराजपुत्र्यैसमाहितः।प्रदक्षिणंपरिक्रामन्निहाभ्युद्गतमानसः।७।उत्तरंपुनरेवाहंनि
श्चित्यमनसातदा।हनूमन्ममवृत्तांतंवक्तुमर्हसिराघवे।८।यथाश्रुत्वैवनचिरात्तावुभौरामलक्ष्मणौ।सुग्रीवसहितौवीरावुपेयातांतथाकुरु।९।यद्य
न्यथाभवेदेतद्द्वौमासौजीवितंमम।नमांद्रक्ष्यतिकाकुत्स्थोम्रियेसाहमनाथवत्।१०।तच्छ्रुत्वाकरुणंवाक्यंक्रोधोमामभ्यवर्तत।उत्तरंचमयादृष्टं
कार्यशेषमनुत्तमं।११।ततोवर्धतमेकायस्तदापर्वतसन्निभः।युद्धकांक्षीवनंतच्चविनाशयितुमारभे।१२।तद्भग्नंवनखंडंतुभ्रांतत्रस्तमृगद्विजं।प्रति
बुद्धानिरीक्षंतेराक्षस्योविकृताननाः।१३।मांचदृष्ट्वावनेतस्मिन्समागम्यततस्ततः।ताःसमभ्यागताःक्षिप्रंरावणायाचचक्षिरे।१४।राजन्वनमिदंदुर्गंतवभ
ग्नंदुरात्मना।वानरेणह्यविज्ञायतववीर्यंमहाबल।१५।दुर्बुद्धेस्तस्यराजेंद्रतवविप्रियकारिणः।वधमाज्ञापयक्षिप्रंयथासौविलयंव्रजेत्।१६।तच्छ्रुत्वाराक्षसें

णविहग्धामृगाडर्ज्याः॥राम्हमाः किंकरणाम रावणास्यमनो॥

सुं०रा०
७४

तेषामिति। शूलमुद्गरपाणिनामित्यत्र दीर्घाभावश्चार्षः। ततइति। द्वितीयेप्रेषितपुत्रापेक्षया द्वितीयांउक्त इतिरिति। अतिवन्नंइति। अप्यवभग्नाश्रस्येति। अस्याहं
तेषामशीतिसाहस्रंशूलमुद्गरपाणिनां। मयातस्मिन्वनोद्देशेपरिघेणनिषूदितं॥१८॥ तेषांतुहतशिष्टायेतेगत्वालघुविक्रमाः। निहतंचमयासैन्यंरावणा
यचचक्षिरे॥१९॥ ततोमेबुद्धिरुत्पन्नाचैत्यप्रासादमुत्तमं। तत्रस्थान्राक्षसान्हत्वाशतंस्तंभेनवैपुनः॥२०॥ ललामभूतोलंकायाम्मयाविध्वंसितोरुषा। ततः
प्रहस्तस्यसुतंजंबुमालिनमादिशत्॥२१॥ राक्षसैर्बहुभिःसार्धंघोररूपैर्भयानकैः। तमहंबलसंपन्नंराक्षसंरणकोविदं॥२२॥ परिघेणातिघोरेणसूदया
मिसहानुगम्। तच्छ्रुत्वाराक्षसेंद्रस्तुमंत्रिपुत्रान्महाबलान्॥२३॥ पदातिबलसंपन्नान्प्रेषयामासरावणः। परिघेणैवतान्सर्वान्नयामियमसादनं॥२४॥
मंत्रिपुत्रान्हतांछ्रुत्वासमरेलघुविक्रमान्। पंचसेनाग्रगांछूरान्प्रेषयामासरावणः॥२५॥ तानहंसहसैन्यान्वैसर्वानेवाभ्यसूदयं। ततःपुनर्दशग्री
वःपुत्रमक्षंमहाबलं॥२६॥ बहुभीराक्षसैःसार्धंप्रेषयामाससंयुगे। अहंमंदोदरीपुत्रंकुमारंरणपंडितं॥२७॥ सहसाखंसमुत्क्रांतंपादयोश्चगृहीतवा
न्नाचर्मासिनंशतगुणंभ्रामयित्वापिपेषच॥२८॥ तमक्षमागतंभग्नंनिशम्यसदशाननः। ततइंद्रजितंनामद्वितीयंरावणःसुतं॥२९॥ व्या
दिदेशसुसंक्रुद्धोबलिनंयुद्धदुर्मदं। तस्याप्यहंबलंसर्वंतंचराक्षसपुंगवं॥३०॥ नष्टौजसंरणेकृत्वापरंहर्षमुपागमं। महतापिमहाबाहुःप्र
त्ययेनमहाबलः॥३१॥ प्रहितोरावणेनैषसहवीरैर्मदोद्धतैः। सोविषह्यंहिमांबुध्वास्वसैन्यंचावमर्दितं॥३२॥ ब्राह्मेणास्त्रेणसतुमांप्रबबंधाचा
तिवेगितः। रज्जुभिश्चापिबध्नंतिततोमांतत्रराक्षसाः॥३३॥ रावणस्यसमीपंचगृहीत्वामामुपागमन्। दृष्ट्वासंभाषितश्चाहंरावणेनदुरात्मना॥३४॥
पृष्टश्चलंकागमनंराक्षसानांचतंवधं। तत्सर्वंचरणेतत्रसीतार्थमुपजल्पितं॥३५॥ अस्याहंदर्शनाकांक्षीप्राप्तस्त्वद्भवनंविभो। मारुतस्यौरसःपुत्रो
वानरोहनुमानहं॥३६॥ रामदूतंचमांविद्धिसुग्रीवसचिवंकपिं। सोहंदौत्येनरामस्यत्वत्सकाशमिहागतः॥३७॥ शृणुचापिसमादेशंयदहंप्रब्रवीमि
ते। राक्षसेशहरीशस्त्वांवाक्यमाहसमाहितं॥३८॥ सुग्रीवश्चमहाभागःसत्वांकौशलमब्रवीत्। धर्मार्थकामसहितंहितंपथ्यमिवामृतं॥३९॥ वसतोऋ
ष्यमूकेयपर्वतेविपुलद्रुमे। राघवोरणविक्रांतोमित्रत्वंसमुपागतः॥४०॥ तेनमेकथितंराजन्भार्यामेरक्षसाहृता। तत्रसाहाय्यंहेतोर्मेसमयंकर्तुमर्हसि ॥४१॥
दर्शनाकांक्षीत्यत्रसंधिरार्षः। लङ्घनंप्राप्तोहं। हनुमानित्यहमित्यस्यछहृदयस्यनिर्वाहः। सुग्रीवइति धर्मकामार्थसहितं धर्मसहितत्वाद्धितं परलोकोपयोगि पथ्यं ऐहिककाम

राम
७४

वालिनेति। सुग्रीवेण मयेति शेषः। तेनेति। वानराणां महाराजः कृतः अहमिति शेषः। तस्येति तस्य रामस्य तेन सहायस्य कार्ये चावश्यं पितुः
हृत इति शेषः। सुभंतवधर्मतः कलहं विनेत्यर्थः। सीता दीयतां विपद्येति वाचकमाहृयाविदिति। विधमंतीति विधमिष्यंति। लंकानाशने वानराणां सामर्थ्यम्
नीत्याशयेनाह। वानराणामिति। येनिमंत्रिता युद्धसाहाय्यार्थमाहूताः देवतानां सकाशं यांति ते तेषां वानराणां प्रभावः। सुराणामपि विदितः न विज्ञातो हीति
वालिना हृतराज्येन सुग्रीवेण सह प्रभुः। चक्रेग्निसाक्षिकं सख्यं राघवः सह लक्ष्मणः॥४२॥ तेन वालिनमाहत्य शरेणैकेन संयुगे। वानराणां महाराजः कृतः संप्लवतां
प्रभुः॥४३॥ तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह। तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः॥४४॥ क्षिप्रमानीयतां सीता दीयतां राघवस्य तु। यावन्न हरयो वीरा
विधमंति बलं तव॥४५॥ वानराणां प्रभावो हि न केन विदितः पुरा। देवतानां सकाशं च ये गच्छंति निमंत्रिताः॥४६॥ इति वानरराजस्त्वामाहेत्यभिहितो मया ॥
मामेव हततस्तेन हृष्ट्वा सर्वस्वं दहन्निव॥४७॥ तेन वध्योहमाज्ञप्तो रक्षसा रौद्रकर्मणा। मत्प्रभावमविज्ञाय रावणेन दुरात्मना॥४८॥ ततो विभीषणो नाम तस्य भ्रा
ता महामतिः। तेन राक्षसराजः स याचितो मम कारणात्॥४९॥ नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः। राजशास्त्रव्यपेतो हि मार्गः संसेव्यते त्वया॥५०॥ दूतवध्या
न दृष्टा हि राजशास्त्रेषु राक्षस। दूतेन वेदितव्यं च यथार्थं हितवादिना॥५१॥ सुमहत्यपराधेपि दूतस्यामितविक्रम। विरूपकरणं दृष्टं न वधोस्तीह शास्त्रतः॥५२
विभीषणेनैवमुक्तो रावणः संदिदेश तान्। राक्षसानेतदेवास्य लांगूलं दह्यतामिति॥५३॥ ततस्तस्य वचः श्रुत्वा मम पुच्छं समंततः। वेष्टितं शणवल्कैश्च
पटैः कार्पासकैस्तथा॥५४॥ राक्षसाः सिद्धसन्नाहास्ततस्ते चंडविक्रमाः। तदादह्यंत मे पुच्छं निघ्नंतः काष्ठमुष्टिभिः॥५५॥ बद्धस्य बहुभिः पाशैर्यंत्रितस्य च
राक्षसैः। न मे पीडा भवेत्काचिद्दिदृक्षोर्नगरीं दिवा॥५६॥ ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम्। अघोषयन् राजमार्गे नगरद्वारमागताः॥५७॥ ततोहं सुम
हद्रूपं संक्षिप्य पुनरात्मनः। विमोचयित्वा तं बंधं प्रकृतिस्थः पुनः स्थितः॥५८॥ आयसं परिघं गृह्य तानि रक्षांस्यसूदयम्। ततस्तन्नगरद्वारं वेगेनाप्लुतवान
हं॥५९॥ पुच्छेन च प्रदीप्तेन पुरीं साट्टालगोपुरां। दहाम्यहमसंभ्रांतो युगांताग्निरिव प्रजाः॥६०॥ विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते। लंकायाः
कश्चिदुद्देशः सर्वा भस्मीकृता पुरी॥६१॥ दहता च मया लंकां दग्धा सीता न संशयः। रामस्य हि महत्कार्यं मयेदं वितथीकृतं॥६२॥ इति शोकसमाविष्ट
श्चिंतामहमुपागमं। अथाहं वाचमश्रौषं चारणानां शुभाक्षरां॥६३॥ जानकी न च दग्धेति विस्मयोदंतभाषिणां॥ ॥
योजना। तेनेति। मत्प्रभावं वरदानलब्धं वध्यत्वरूपं। तत इत्यादि श्लोकत्रयमेकं वाक्यं। शास्त्रेण हतवधानदृष्टा विरूपकरणं ताडनं वा शास्त्रतः दृष्टमिति। ए
हृतराजो रावणः तेन विभीषणेन याचित इति संबंधः। बद्धस्येति। यंत्रितस्य निरुद्धस्य। अथेति। विस्मयोदंतभाषितां विस्मयवृत्तांतविषयव्यवहारां। विस्मयो

ततइति। आरेभे। लिङ्त्वमपुत्वेप्येकवचनं। ततइति। अहंपंथानमाक्रम्यभवतोदृष्टवानिहेतिपाठः। अन्यथाहंशब्दपौनरुक्त्यात्॥ ॥ इतिश्रीमहेश्वरतीर्थीये सुंदरकांडेऽ
ष्टपंचाशःसर्गः॥ ॥ सफलइति। संभ्रमः त्वरा उत्साहइत्यर्थः। कुतः साफल्यमित्याशंक्य सीतापातिव्रत्यादित्याह शीलमिति। सद्वृत्तां पातिव्रत्यमितियावत्। आसाद्य दृष्ट्वे
त्यर्थः। ममममनः प्रवणं प्रह्वं अभूदितिशेषः। सीतापातिव्रत्यस्य न किंचिदसाध्यमस्तीतिममनिश्चयोऽभूदितिभावः। तर्हि दुरात्मानं रावणं किमिति नादहदित्याशंक्य
तस्यापितपःसंपत्तिमत्त्वादित्याह। तपसेति। साईश्लोकेन। सर्वथासौ तपसा अतिप्रवृद्धः कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थो सौ रावणो महातपःसंपन्नइत्य
र्थः। अतएवतां सीतां स्पृशतोऽपि यस्य गात्रं तपसा न विनाशितमितिसंबंधः। तर्हि सीताशीलं दुर्बलमस्माकं किंस्वपकरिष्यतीत्याशंक्य उर्वलनं भवतीत्याह। नतदिति। अ

ततोमेबुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरं॥ ६४॥ अदग्धा जानकीत्येव निमित्तैश्चोपलक्षिता। दीप्यमाने तु लांगूले न मां दहति पावकः॥ ६५॥ हृदयं च प्रहृष्टं मे वा
ताः सुरभिगंधिनः। तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः॥ ६६॥ ऋषिवाक्यैश्च सिद्धार्थैरभवं हृष्टमानसः। पुनर्दृष्टा च वैदेही विसृष्टश्च तया पुनः॥ ६७॥ त
तः पर्वतमासाद्य तत्रारिष्टमहं पुनः। प्रतिप्लवनमारेभे युष्मद्दर्शनकांक्षया॥ ६८॥ ततः पवनचंद्रार्कसिद्धगंधर्वसेवितं। पंथानमहमाक्रम्य भवतो दृष्टवानहं॥ ६९॥
राघवस्य प्रसादेन भवतां चैव तेजसा। सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितं॥ ७०॥ एतत्सर्वं मया तत्र यथावदुपपादितं। अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामि
ति॥ ७१॥ इत्यार्षे रामायणे सुंदरकांडेऽष्टपंचाशः सर्गः॥ एतदाख्याय तत्सर्वं हनूमान्मारुतात्मजः। भूयः समुपचक्राम वचनं वक्तुमुत्तरं॥ १॥ सफलो राघवोद्योगः
सुग्रीवस्य च संभ्रमः। शीलमासाद्य सीताया मम च प्रवणं मनः॥ २॥ आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः। तपसा धारयेल्लोकान्क्रुद्धो वा निर्दहेदपि॥
३॥ सर्वथातिप्रवृद्धोसौ रावणो राक्षसेश्वरः। यस्य तां स्पृशतो गात्रं तपसा न विनाशितं॥ ४॥ न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती। जनकस्य सुता कुर्याद्यत्
क्रोधकलुषीकृता। अशोकवनिकामध्ये रावणस्य दुरात्मनः। अधस्ताच्छिंशपावृक्षे साध्वी करुणमास्थिता॥ ६॥ पतिव्रता वरश्रोणी प्रवसंबा च जानकी। जां
ववत्प्रमुखान्सर्वाननुज्ञाप्य महाकपीन्॥ ७॥ अस्मिन्नेवं गते कार्ये भवतां च निवेदिते। न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ॥ ८॥

नकस्यात्मजा क्रोधकलुषीकृता सती यत्कार्यात्तत्पाणिना स्पृष्टाग्निशिखा न कुर्यादितिसंबंधः। क्रोधकलुषीकृतेतिविशेषणात्स्वसूत्रेणैव निर्यातनं वीर
पत्नीधर्मः। अन्यथा महल्लाघवं भर्तुरित्यप्यभिमतवीर्यपरिपालनाय तादृक्क्रोधाकरणाद्रावणो जीवति॥ अतएव प्राक् अस्संदेशान्तरामस्यात्मनामितिभावः। भ
र्तृजयोपि स्वामिन एवेति हृदा। सीतापातिव्रत्यमहिम्ना रावणवधमेव वृजित्वा देव्या सह राघवौ द्रष्टुमिच्छामेत्याह। जांववत्प्रमुखानिति। अस्मिन्कार्ये एवं भवतां निवेदि
ते च मति जांववत्प्रमुखान्सर्वाननुज्ञाप्य वैदेह्या सह तौ पार्थिवात्मजौ द्रष्टुं न्याय्यं स्मेति संबंधः। जांववदादयो यद्यनुजानीयुः तदास्मान्हत्वा देव्या सहैव रामस
मीपं गमिष्याम इति भावः॥ ॥

नवाशक्तिशंकाकार्येत्याह। अहमेकोपीत्यादि। भवतामिति। अभ्यनुज्ञातः। तसिलू। अभ्यनुज्ञानादित्यर्थः। मेविक्रमः तमिदंजितंतुणाद्विवारयति। आक्रमती
त्यर्थः। भवतामनुज्ञया इदंजितमपि वधिष्यामीति भावः। सर्वेति। येच पूर्वजाः तेषामपीति शेषः। मयेति। नामविश्रावितं छायीवादेरिति शेषः। तद्देवाहजय
अहमेको विपर्यासः सराक्षसगणां पुरीं। तां लंकां तरसा हंतुं रावणं च महाबलं॥ किंपुनः सहितो वीरैर्बलवद्भिर्महात्मभिः। कृतास्त्रैः प्लवगैः शूरै
र्भवद्भिर्विजयैषिभिः॥१०॥ अहं तु रावणं युद्धे ससैन्यं सपुरःसरं। सहपुत्रं वधिष्यामि सहोदरयुतं युधि॥११॥ ब्राह्ममैंद्रं च रौद्रं च वायव्यं वारुणं तथा। य
नि शक्रजितोऽस्त्राणि दुर्निरीक्ष्याणि संयुगे॥१२॥ तान्यहं निहनिष्यामि विधमिष्यामि राक्षसान्। मयातुलं विसृष्टा हि शैलवृष्टिर्निरंतरा॥१३॥ देवान
पि रणे हन्यात्किं पुनस्तान्निशाचरान्। भवतामननुज्ञातो विक्रमो मे रुणद्धि मां॥१४॥ सागरोप्यतियाद्वेलां मंदरः प्रचलेदपि। न जांबवंतं समरे कंपये
दरिवाहिनी॥१५॥ सर्वराक्षससंघानां राक्षसा ये च पूर्वजाः। तेषामपि न संदेहः समरे बलिनां वरः॥१६॥ अलमेको विनाशाय वीरो वालिसुतः कपिः
पनसस्योरुवेगेन नीलस्य च महात्मनः॥१७॥ मंदरोप्यवशीर्येत किंपुनर्युधि राक्षसाः। सदेवासुरयक्षेषु गंधर्वोरगपक्षिषु॥१८॥ मैंदस्य प्रतियो
द्धारं शंसत द्विविदस्य वा। अश्विपुत्रौ महावीर्यौ यौ तौ प्लवगसत्तमौ॥१९॥ एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे। मयैव विहृता लंका दग्धा भ
स्मीकृता पुरी॥२०॥ राजमार्गेषु सर्वेषु नाम विश्रावितं मया। जयत्यतिबलो रामो लक्ष्मणश्च महाबलः॥२१॥ राजा जयति सुग्रीवो राघवेणाभिपा
लितः। अहं कोसलराजस्य दासः पवनसंभवः॥२२॥ हनूमानिति सर्वत्र नाम विश्रावितं मया। अशोकवनिकामध्ये रावणस्य दुरात्मनः। अध
स्ताच्छिंशुपामूले साध्वी करुणमास्थिता। राक्षसीभिः परिवृता शोकसंतापकर्षिता॥२४॥ मेघलेखापरिवृता चंद्रलेखेव निष्प्रभा। अचिंतयंती वै
देही रावणं बलदर्पितं॥२५॥ पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी। अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा॥२६॥ अनन्यचित्ता रामेण पौलो
मीव पुरंदरे। तदेकवासः संवीता रजोध्वस्ता तथैव च। शोकसंतापदीनांगी सीता भर्तृहिते रता॥२७॥ सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः
राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने॥२८॥ एकवेणीधरा दीना भर्तृचिंतापरायणा। अधःशय्या विवर्णांगी पद्मिनीव हिमोदये॥२९॥ राव
णाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया। कथंचिन्मृगशावाक्षी विश्वासमुपपादिता॥३०॥ ततः संभाषिता चैव सर्वमर्थप्रदर्शिता। रामसुग्रीवसख्यं
तीति। सीता दुर्दशाविमर्शेपि संप्रति मासमानेतव्यत्वाशयेत दृष्ट्वां वर्णयति। अशोकवनिकेत्यादि। अचिंतयंतीति। अवष्टब्धा निरुद्धा। पौलोमीवापुरं
दरस्ति। नद्रूपवद्दापीति भावः। रावणाद्विनिवृत्तार्था विनिवृत्तः अर्थः प्रयोजनं यस्याः सा रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः। ततः इति। दर्शि

१६

सुं०टी० नियतइति।नियतःसमुदाचारःहृदपतिव्रत्यंभर्तरितत्रमातःकिंस्वदशग्रीवंनहंतीतियुक्तःअतःसदशाननोमहात्माशापनिबंधनऊमरणाभावादितिभावःदेव्यातस्य
वधाकरणेहेतुमाह।निमित्तमात्रमितिवृत्ताशोवधारणे।निमित्तमात्रमसीतेतिशेषः।तस्यवधेरामःप्रवभविष्यति॥ ॥इतिसुंदरकांडेएकोनषष्टितमःसर्गः॥दृष्टेति।दृष्टादेवी
७६ नचानीताइति।भवद्भिर्निवेदितुंनयुक्तमिवपश्यामीतिसंबंधःनेष्यति।हनुमतानेषुवानरेषुहृतशेषेषुसत्स्वपिश्रवणानामेषुअस्माभिःकिंकर्तव्यंनकिमपिकिंतुजान

नियतःसमुदाचारोभक्तिर्भर्तरिचोत्तमा।यन्नहंतिदशग्रीवंसमहात्मादशाननः॥३२॥निमित्तमात्रंरामस्तुवधेतस्यभविष्यति।साप्रकृत्यैवतन्वंगीतद्वियोगाच्चकर्शिता
॥३३॥प्रतिपत्पाठशीलस्यविद्येवतनुतांगता।एवमास्तेमहाभागासीताशोकपरायणा॥३४॥यदत्रप्रतिकर्तव्यंतत्सर्वमुपकल्प्यतां॥इत्यार्षेरामायणेसुंदरकां
डेएकोनषष्टितमःसर्गः॥तस्यतद्वचनंश्रुत्वावालिसूनुरभाषत।जांबवत्प्रमुखान्सर्वाननुज्ञाप्यमहाकपीन्॥१॥अस्मिन्नेवंगतेकार्येभवतांचनिवेदिते॥
न्याय्यंस्मसहवैदेह्याद्रष्टुंतौपार्थिवात्मजौ॥२॥अश्विपुत्रौमहावेगौबलवंतौप्लवंगमौ।एतयोःप्रतियोद्धारंनपश्यामिरणाजिरे॥३॥पितामहवरोत्से
कात्परमंदर्पमास्थितौ।अमृतप्राशिनावेतौसर्ववानरसत्तमौ॥४॥अश्विनोर्माननार्थंहिसर्वलोकपितामहः।सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा।
॥५॥वरोत्सेकेनमत्तौचप्रमथ्यमहतींचमूं।सुराणाममृतंवीरौपीतवंतौप्लवंगमौ॥६॥एतावेवहिसंक्रुद्धौसवाजिरथकुंजरां।लंकांनाशयितुंशक्तौसर्वेति
ष्ठंतुवानराः॥७॥अयुक्तंतुविनादेवींदृष्टवद्भिश्चवानरैः।जित्वालंकांससैन्यांचहत्वातंरावणंरणे॥८॥दृष्टादेवीनचानीताइतितत्रनिवेदितुं।अयुक्तमि
वपश्यामिभवद्भिःख्यातविक्रमैः।नहिवःप्लवनेकश्चिन्नापिकश्चित्पराक्रमे॥९॥तुल्यःसामरदैत्येषुलोकेषुहरिसत्तमाः।जित्वालंकांसरक्षौघांहत्वा
तंरावणंरणे॥१०॥सीतामादायगच्छामःसिद्धार्थाहृष्टमानसाः।तेष्वेवंहतशेषेषुराक्षसेषुहनूमता॥११॥किमन्यदत्रकर्तव्यंगृहीत्वायामजानकीं।रामलक्ष्मण
योर्मध्येन्यस्यामजनकात्मजां॥१२॥वयमेवहिगत्वातान्हत्वाराक्षसपुंगवान्।राघवंद्रष्टुमर्हामःसुग्रीवंसहलक्ष्मणं॥१३॥तमेवंकृतसंकल्पंजांबवान्
हरिसत्तमः।उवाचपरमप्रीतोवाक्यमर्थवदर्थवित्॥१४॥नैषाबुद्धिर्महाबुद्धेयद्ब्रवीषिमहाकपे।विचेतुंवयमाज्ञप्तादक्षिणांदिशमुत्तमां॥१५॥नानेतुंक
पिराजेननैवरामेणधीमता।कथंचिन्निर्जितांसीतामस्माभिर्नाभिरोचयेत्॥१६॥राघवोनृपशार्दूलःकुलंव्यपदिशन्स्वकं।प्रतिज्ञायस्वयंराजासीताविजयमग्र
तः॥१७॥सर्वेषांकपिमुख्यानांकथंमिथ्याकरिष्यति।विफलंकर्मचकृतंभवेत्तुष्टिर्नतस्यच॥१८॥वृथाचदर्शितंवीर्यंभवेद्वानरपुंगवाः।तस्माद्गच्छाम
वैसर्वेयत्ररामःसलक्ष्मणः॥१९॥सुग्रीवश्चमहातेजाःकार्यस्यास्यनिवेदने।नतावदेषामतिरक्षमाणोयथाभवान्पश्यतिराजपुत्र।यथातुरामस्यम
तिर्निविष्टातथाभवान्पश्यतुकार्यसिद्धिं॥२०॥सुंदरकांडेषष्टितमःसर्गः॥ ॥ राम

कींगृहीत्वायामेतिसंबंधःजांबवानंगदस्यमतंवक्ष्यमाणप्रवृद्धजांबवन्निवर्तयतिनतावदितिराजपुत्रयथा [illegible] अस्माकं [illegible] प्रवृत्तान ७६
किंतुयुक्तंवातथापिययारामस्यमतिर्निविष्टाअवस्थितातयाभवान्कार्यसिद्धिंपश्यत्वितिसंबंधः इतिश्रीमहेश्वरतीर्थीयेसुंदरकांडेषष्टितमःसर्गः

समाजन्नमिति। सभाज्यमानं पूज्यमानं वहंत इव दृष्टिभिरिति प्रीतिपूर्वकानिमिषदर्शनात् हर्षितं वा हनूमंतं प्रेक्षमाणा राघव इति। अर्थनिर्वृत्तिं कार्यसिद्धिं समाधाय निश्चित्य पुष्कल
रिति। सर्वेषां संबंधः। प्रियाख्यानेति। रामप्रतीकारो रामस्य प्रत्युपकारः परमोत्कटाः परमोन्मत्ताः मधुपिंगलाः मधुवत्पिंगलवर्णाः ततः इति अनुमान्य अनुमतिं कारयित्वा निसर्ग

ततो जांबवतो वाक्यमगृह्णंत वनौकसः। अंगदप्रमुखा वीरा हनूमांश्च महाकपिः॥ प्रीतिमंतस्ततः सर्वे वायुपुत्रपुरःसराः। महेंद्राग्रात्समुत्पत्य पुप्लुवुः प्लवगर्षभाः॥ २॥
२॥ मेरुमंदरसंकाशा मत्ता इव महागजाः। छादयंत इवाकाशं महाकाया महाबलाः॥ ३॥ सभाज्यमानं भूतैस्तमात्मवंतं महाबलं। हनूमंतं महावेगं वहंत इव दृष्टिभिः॥ ४॥ राघ
वे चार्थनिर्वृत्तिं कर्तुं च परमं यशः। समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः॥ ५॥ प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनंदिनः। सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः
॥ ६॥ प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः। नंदनोपममासेदुर्वनं द्रुमलतायुतं॥ ७॥ यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितं। अधृष्यं सर्वभूतानां सर्वभूतमनोहरं॥ ८॥ य
द्रक्षति महावीर्यः सदा दधिमुखः कपिः। मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः॥ ९॥ ते तद्वनमुपागम्य बभूवुः परमोत्कटाः। वानरा वानराधिपतेरस्य मनःकांतं महद्
नं॥ १०॥ ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत्। कुमारमभ्ययाचंत मधूनि मधुपिंगलाः॥ ११॥ ततः कुमारस्तान्वृद्धाञ्जांबवत्प्रमुखान्कपीन्। अनुमान्य ददौ तेषां नि
सर्गं मधुभक्षणे॥ १२॥ ते विसृष्टाः कुमारेण धीमता वालिसूनुना। हरयः समपद्यंत द्रुमान्मधुकराकुलान्॥ १३॥ भक्षयंतः सुगंधीनि मूलानि च फलानि च। जग्मुः
प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः॥ १४॥ ततश्चानुमताः सर्वे संहृष्टा वनौकसः। मुदिताश्च ततस्ते च प्रनृत्यंति ततस्ततः॥ १५॥ गायंति केचित्प्रहसंति केचिन्नृ
त्यंति केचित्प्रणमंति केचित्। पतंति केचित्प्रचरंति केचित्प्लवंति केचित्प्रलपंति केचित्॥ १६॥ परस्परं केचिदुपाश्रयंते परस्परं केचिदतिब्रुवंते। परस्परं केचिदु
पारमंते परस्परं केचिदुपाक्रमंते॥ १७॥ द्रुमाद्द्रुमं केचिदभिप्लवंते क्षितौ नगाग्रान्निपतंति केचित्। महीतलात्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतंति
॥ १८॥ धावंति केचिद्विचरंति केचित्समाहता वानरयूथमुख्याः। गायंतमन्यः प्रहसन्नुपैति हसंतमन्यः प्ररुदन्नुपैति॥ १९॥ रुदंतमन्यः प्रणदन्नुपैति नदंतम
न्यः प्रणुदन्नुपैति। अवेक्षमन्यः प्रपतन्नुपैति पतंतमन्यः प्रलपन्नुपैति॥ २०॥ मधुप्रपानं मधुपानरंभं मधुप्रदानोत्कटसत्वचेष्टं समाकुलं तत्कपिसैन्यमासीन्न
तत्र कश्चिन्न बभूव तृप्तः॥ २१॥ ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान्। समीक्ष्य कोपाद्दधिवक्त्रनामा निवारयामास कपिः कपींस्तान्॥ २२॥ स तैः
प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः। चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः॥ २३॥ उवाच कांश्चित्परुषाणि धृष्टमसक्तमन्यांश्च तले
जघान। समेत्य कैश्चित्कलहं चकार तथैव साम्नोपजगाम कांश्चित्॥ २४॥

मद्वाताभिप्रायः। समाकुलमिति। मधुप्रपानोत्कटसत्वचेष्टं मधुप्रपानेनोत्कटसत्वचेष्टं। मत्तचित्तचेष्टमित्यर्थः॥ ॥

सुं॰टी॰
७७

मत्तैरिति।तेन दधिमुखेन वलाद्प्रतिवार्यमाणोऽस्मत्क्रमेयेः समेत्य संपरिवार्य महाद्वाक्येः प्रधर्षणो दोषमनवेक्ष्य प्रहृष्यत इति संबंधः।नेविरिति।निर्विषयं चक्रुः।निर्गतमधुफल
द्रिमोऽप्य चक्रुरित्यर्थः॥ ॥इति श्रीसुंदरकांडे एकषष्टितमः सर्गः॥ ॥क्रूरेति।पिबंत्विति प्रत्युवाचेति संबंधः।जग्मुर्मधुवनमिति पुनर्वचनं प्रदेशभेदविवक्षयेति इष्टवंते पल्ल्वः
समर्था।हस्यः मैथिलीं दृष्टाख्य बुद्धिस्य हृत्वमहृशीनेन सर्वदृष्टवंतः कृत्वा हत्वमन्त्र वेन त्वति मर्गाद्वाद्वाभ्यवज्ञानात् मधुवनं प्रविश्य वीर्यतः वलात्पालानाक्रम्य

ते मदाच्चाप्रतिवार्य वेगैर्वलाद्धतेनाप्रतिवार्यमाणाः।प्रधर्षितत्वपक्रमयेन्समेत्य प्रहृष्यते चाप्यनवेक्ष्य दोषं॥२५॥नाप्रेक्ष्य दंतो दशनेर्दशंतस्तलेश्च पादैश्च समाप्नुवं
तः।मदात्कपिं तं कपयः समग्रा महावनं निर्विषयं च चक्रुः॥२६॥ ॥इत्यार्षे रामायणे सुंदरकांडे एकषष्टितमः सर्गः॥ ॥तानुवाच हरिश्रेष्ठो वानरान्वानरर्षभः।अ
व्यग्रमनसो यूयं मधु सेवत वानराः॥१॥अहमावारयिष्यामि युष्माकं परिपंथिनः।श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽंगदः॥२॥प्रत्युवाच प्रसन्नात्मा पिबंतु ह
रयो मधु।अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया॥३॥अकार्यमपि कर्तव्यं किमंग पुनरीदृशं।अंगदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः॥४॥साधु साध्विति संहृष्टा वा
नराः प्रत्यपूजयन्।पूजयित्वांगदं सर्वे वानरा वानरर्षभं॥५॥जग्मुर्मधुवनं यत्र नदीवेगा इव द्रुतं।ते प्रविष्टा मधुवनं पालानाक्रम्य वीर्यतः॥६॥अतिसर्गाच्च
पटवो दृष्ट्वा श्रुत्वा च मैथिलीं।पपुः सर्वे मधु तदा रसवत्फलमाददुः॥७॥उत्पत्य च ततः सर्वे वनपालान्समागतान्।ताडयंति स्म शतशः सक्तान्मधुवने तदा॥८॥म
धूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते।घ्नंति स्म सहिताः सर्वे भक्षयंति तथापरे॥९॥केचित्पीत्वापविध्यंति मधूनि मधुपिंगलाः।मधूच्छिष्टेन केचिच्च
जघ्नुरन्योन्यमुत्कटाः॥१०॥अपरे वृक्षमूलेषु शाखां गृह्य व्यवस्थिताः।अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते॥११॥उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्ट
वत्।क्षिपंति वै तथान्योन्यं स्खलंति च तथापरे॥१२॥केचित्क्ष्वेलां प्रकुर्वंति केचित्कूजंति हृष्टवत्।हरयो मधुना मत्ताः केचित्सुप्ता महीतले॥१३॥कृत्वा केचि
द्धसंत्यन्ये केचित्कुर्वंति चेतरत्॥१४॥येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु।तेऽपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः॥१५॥जानुभिश्च प्रकृष्टाश्च देव
मार्गं च दर्शिताः।अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः॥१६॥हनूमता दत्तवरैर्हतं मधुवनं वलात्।वयं च जानुभिर्दृष्टा देवमार्गं च दर्शिताः॥१७॥ततो दधिमुखः क्रु
द्धो वनपस्तत्र वानरः।हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन्॥१८॥इहागच्छत गच्छामो वानरानतिदर्पितान्।बलेनावारयिष्यामो मधु भक्षयतो वयं॥१९॥

मधुपपुः रसवत्फलमाददुरिति योजना॥मधूनीति।मधूनि।मधुपटलानि।घ्नंति।निघ्नंति।इष्टवत्हर्षात्।केचिदिति।मधूनि।मधुपटलानि।अपविध्यंति।क्षिपंति।उ
न्मत्तेति।मधुमत्ताः।अत एव उन्मत्तभूताः।उन्मत्तसदृशाः।प्रथमे हृष्टवत् हृष्टाः।कृत्वेति।अन्ये किंचित्क्ष्वेलां प्रकृत्वा हसंति।केचित्।इतरत्।अपकर्म कुर्वंति
केचित्।अन्यत्कर्म कृत्वा तद्वदंति केचित्।अन्यत्कर्म कुर्वंतीति मनसा संकल्पयंति।जानुभिरिति।प्रहृष्टाः प्रहृताः।इत्यर्थः।देवमार्गमिपातनद्वारेण दर्शिताः॥१९॥

राम
७७

वंधाश्रिता॥ अमर्षप्रभवः॥ अत्र समाजन्यः समप्रतिष्ठां॥ समास्पदं॥ समतलां जगतीं भूमिं॥ ॥ इति श्रीमहेश्वरतीर्थीये सुंदरकांडे द्विषष्टितमः सर्गः॥ नैवेति॥ निसृष्ट

श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः॥ पुनर्वीरा मधुवनं तेनैव सहिता ययुः॥ मध्ये चैषां दधिमुखः प्रगृह्य सुमहातरुं॥ समभ्यधावद्वेगेन ते च सर्वे प्लवंगमाः
२१॥ ते शिलाः पादपांश्चापि पाषाणांश्चैव वानराः॥ गृहीत्वाभ्यगमन् क्रुद्धा यत्र ते कपिकुंजराः॥२२॥ ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत्॥ त्वरया ह्यभ्यधाव
तः सालतालशिलायुधाः॥२३॥ वृक्षस्थांश्च वानरान् बलदर्पितान्॥ अभ्याक्रामंस्ततो वीराः पालास्तत्र सहस्रशः॥ अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुंगवाः॥ अभ्य
धावत संक्रुद्धा हनुमत्प्रमुखास्ततः॥२५॥ तं सवृक्षं महाबाहुमापतंतं महाबलं॥ आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोंगदः॥२६॥ मदांधश्च न वेदैनमार्यकोयम
मेति सः॥ अथैनं निष्पिपेषाशु वेगवद्वसुधातले॥२७॥ स भग्नबाहुर्विमुखो विह्वलः शोणितोक्षितः॥ मुमोह सहसा वीरो मुहूर्तं कपिकुंजरः॥२८॥ स समाश्वास्य
सहसा संक्रुद्धो राजमातुलः॥ वानरान् वारयामास दंडेन मधुमोहितान्॥ स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः॥ उवाचैकांतमागम्य भृत्यान् स्वान् समुपागतान्॥
एत गच्छत गच्छामः भर्ता नो यत्र वानरः॥ सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति॥३१॥ सर्वं चैवांगदे दोषं श्रावयिष्यामि पार्थिवे॥ अमर्षी वचनं श्रुत्वा घातयि
ष्यति वानरान्॥३२॥ इष्टं मधुवनं ह्येतत् सुग्रीवस्य महात्मनः॥ पितृपैतामहं दिव्यं देवैरपि दुरासदं॥३३॥ स वानरानिमान् सर्वान् मधुलुब्धान् गतायुषः॥ घातयिष्यति दं
डेन सुग्रीवः ससुहृज्जनान्॥३४॥ वध्या ह्येते दुरात्मानो नृपाज्ञापरिपंथिनः॥ अमर्षप्रभवो रोषः सफलो मे भविष्यति॥ एवमुक्त्वा दधिमुखो वनपालो महाब
लः॥ जगाम सहसोत्पत्य वनपालैः समन्वितः॥३६॥ निमेषांतरमात्रेण स हि प्राप्तो वनालयः॥ सहस्रांशुसुतो धीमान् सुग्रीवो यत्र वानरः॥ रामं च लक्ष्मणं चैव
दृष्ट्वा सुग्रीवमेव च॥ समप्रतिष्ठां जगतीमाकाशान्निपपात ह॥ स निपत्य महावीर्यः सर्वैस्तैः परिवारितः॥ हरिर्दधिमुखः पालैः पालानां परमेश्वरः॥ स दी
नवदनो भूत्वा कृत्वा शिरसि चांजलिं॥ सुग्रीवस्य ततो मूर्ध्ना चरणौ प्रत्यपीडयत॥४०॥ ॥ इति श्रीरामायणे सुंदरकांडे द्विषष्टितमः सर्गः॥ ॥ ॥ इति विंशद्धिकथा
समाप्ता॥ ॥ ततो मूर्ध्ना निपतितं वानरं वानरर्षभः॥ दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह॥१॥ उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम॥ अभयं ते भवेद्वीर सत्यमे
वाभिधीयतां॥२॥ किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि॥ कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर॥ स तु विश्वासितस्तेन सुग्रीवेण महात्मना॥ उत्थाय स महा
प्राज्ञो वाक्यं दधिमुखोऽब्रवीत्॥४॥ नैवर्क्षरजसा राजन्न त्वया न च वालिना॥ वनं निसृष्टपूर्वं हि भक्षितं तत्तु वानरैः॥५॥ अचिंतयित्वा मां दृष्ट्वा भक्षयंति पिबंति च॥ ए
भिः प्रधृष्यमाणाश्च वारिता वनरक्षिभिः॥ ॥६॥ ॥

पूर्वं सर्वेषां यथेच्छभोगास्पदं यत्पूर्वं त्वत्कं न भवति॥ अचिंतयित्वेति॥ अचिंतयित्वा इमान् विगणय्य भक्षयंति पिबंति फलानि भक्षयंति मधूनि पिबंतीत्यर्थः॥ ॥

इमेहीति। इमे मद्भृत्याः। अप्रच्छन्नेति। स एवमत्तो लक्ष्मणस्य कं वार्थमभिनिर्दिश्य गुरुः। विनतो वा कथमब्रवीदिति। अकारणात् दधिमुखेन वनभंगादि किं त्वजानतो विमोचयो
न्कमित्य वगंतव्यं पश्चात्तापमिति वा कृष्णवा॥ वनमिति। अभिपन्नाः प्राप्ताः अभितेति। उपयुक्तं। भुक्तं। कृत्वेति। अत्र द्वितीयसुग्रीवशब्दः शोभनग्रीववपरः। इच्छामीति

मधून्यचिंतयित्वा ते मद्धयंति पूर्वं निचाधि दृष्टमज्ञाय विध्यंति मद्धयंति तथापुंरेवनिवार्य्यमाणाश्च सर्वे भ्रूकुटिं दर्शयंति हि। इमे हि संस्खलत्तन्तयातेः संप्रधर्षिताः
८॥ निवार्य्यमाणे वनात्तस्मात्क्रुद्धैर्वानरपुंगवैः। ततस्तैर्वृद्धिभिर्वीरैर्वानरैर्वानरर्षभ॥ ९॥ संरक्तनयनैः क्रुद्धैः हरयः प्रधर्षिताः। पाणिभिर्निहताः केचित्केचि
ज्जानुभिराहताः॥१०॥ प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः। एवं ते निहताः शूरास्त्वयि तिष्ठति भर्त्तरि॥११॥ कृत्स्नं मधुवनं चैव प्रकामं तैश्च भक्ष्यते। एवं विज्ञा
प्यमानं तं सुग्रीवं वानरर्षभं॥१२॥ अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा। किमयं वानरो राजन्वनपः प्रत्युपस्थितः॥ कं वार्थमभिनिर्दिश्य दुःखितो वाक्यम
ब्रवीत्। एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना। लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः। आर्य्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः। अंगदप्रमुखैर्वी
रैर्भक्षितं मधु वानरैः। विचित्य दक्षिणामाशामागतैर्हरिपुंगवैः॥१६॥ आगम्य छत्तैः प्रहृष्टैश्च हतं मधुवनं हितेः॥ नैषामकृतकृत्यानामीदृशः स्यादुपक्रमः
॥१७॥ वनं यथाभिपन्नास्तैः साधितं कर्म वानरैः। वारयंतो भृशं प्राप्ताः पाला जानुभिराहताः॥ तथा न गणितश्चायं कपिर्दधिमुखो बली। पतिर्मम वनस्यायं च
स्माभिः स्थापितः स्वयं॥१९॥ दृष्टा देवी न संदेहो न चान्येन हनूमता। न ह्यन्यः साधने हेतुः कर्मणोस्य हनूमतः॥२०॥ कार्य्यसिद्धिर्मतिश्चैव तस्मिन्वानरपुंग
वे। व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवं॥ जांववान्यत्र नेता स्यादंगदश्च हरीश्वरः। हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा॥२२॥ अंगदप्रमुखैर्वीरैः
हतं मधुवनं किल। धर्षितं च वनं कृत्स्नमुपयुक्तं च वानरैः। वारिताः सहिताः पालास्तथा जानुभिराहताः॥ एतदर्थमयं प्राप्तो वक्तुं मधुरया गिरा॥२४
नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः। दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ॥२५॥ अभिगम्य यथा सर्वे पिबंति मधु वानराः। न चाप्यदृ
ष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ॥२६॥ वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः। ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः॥२७॥ श्रुत्वा कर्णसुखां वा
णीं सुग्रीववदनाच्च्युतां। प्राहृष्यत भृशं रामो लक्ष्मणश्च महायशाः॥ श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च। वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभा
षत। प्रीतोस्मि सौम्य यद्भुक्तं वनं तैः कृतकर्मभिः। मर्षणीयं मतं तेषां चेष्टितं कृतकर्मणां॥३०॥ इच्छामि शीघ्रं हनुमत्प्रधानान् शाखामृगांस्तान्मृगराजद
र्पान्। द्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नं॥३१॥ प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा। अंगैः संहृष्टैः क
र्म्मसिद्धिं विदित्वा बाह्वोरासन्नां सोतिमात्रं ननंद॥ ॥ इत्यार्षे रामायणे सुंदरकांडे त्रिषष्टितमः सर्गः॥ ॥६३॥

सीताभिगमप्रयत्नं सीताभिगमे कृतप्रयत्नं च श्रोतुमिच्छामीति संबंधः। अथ राम प्रत्युपकारार्थी सुग्रीवः स्वो घोषात्कपीनां दर्शनात्। प्रशांतं नंदेत्साह। प्रीतिं प्रीतिं निस्स
नाद्दौ प्रीत्यास्फीते नो घनेवि कस्मिन्नेवोसंप्रहृष्टे पुलकिते नगाद्धौ संप्रहृष्टैः पुलकितैः रोमपुलकितैः। कर्मसिद्धिं कार्यसिद्धिं। बाह्वोरासन्नां समीपस्थां विदित्वा निश्चित्य

इति सुंदरकांडे त्रिषष्टितमः सर्गः ॥

सुप्रविष्ट इति विमदत्वे हेतुः मेहमानान्मधूदकमिति। मेहमानान् मूत्रयतः। एतेन मूत्रपानमधुनां जीर्णता विवक्षिता। अतो विमदाः मधुनि चोदकानि च मधूदकमिति
द्वंद्वैकवद्भावः। उदकानि चात्र पानीतानि पीतानीति द्रष्टव्यं। सौम्येति। हे सौम्य एभिरभिवारितः प्रतिषेधिता इति यत् एतत् परितो वारणं प्रति रोषो न क
सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः। राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत्॥ स प्रणम्य च सुग्रीवं राघवौ च महाबलौ। वानरैः सहितः शूरैर्दिवमे
वोत्पपात ह॥३॥ स यथैवागतः पूर्वं तथैव त्वरितो गतः। निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह॥४॥ स प्रविष्टो मधुवनं ददर्श हरियूथपान्। विमदानुत्थितान्
सर्वान्मेहमानान्मधूदकं॥ स तानुपागमद्वीरो बद्ध्वा करपुटांजलिं। उवाच वचनं श्लक्ष्णमिदं हृष्टवदंगदं॥५॥ सौम्य रोषो न कर्त्तव्यो यदेभिरभिवारितः
अज्ञानाद्रक्षिभिः क्रोधाद्भवंतः प्रतिषेधिताः॥६॥ युवराजस्त्वमीशश्च वनस्यास्य महाबल। आतो हृदत्तु आमो भक्षयस्व स्वकं मधु॥७॥ मोहात्पू
र्वं कृतो दोषस्तं भवान्क्षंतुमर्हसि। यथैव हि पिता ते पूर्वं हरिगणेश्वरः॥८॥ तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम। आख्यातं हि मया गत्वा पितृ
व्यस्य त्वयानघ॥९॥ इहोपयानं सर्वेषामेतेषां वनचारिणां। स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः॥१०॥ प्रहृष्टो न तु रुष्टोसौ वनं श्रुत्वा प्रधर्षितं। प्रहृ
ष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः। शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः॥ श्रुत्वा दधिमुखस्येदं वचनं श्लक्ष्णमंगदः॥१२॥ अब्रवीत्तान्हरिश्रेष्ठो
वाक्यं वाक्यविशारदः। शंके श्रुतोयं वृत्तांतो रामेण हरियूथपाः॥१३॥ अयं च हर्षादाख्याति तन्न जानामि हेतुना। तत्क्षमं नेह नः स्थातुं कृतकार्ये परंत
पाः॥१४॥ पीत्वा मधु यथाकामं विश्रांता वनचारिणः। किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः॥१५॥ सर्वे तथा मां वक्ष्यंति समेत्य हरियूथपाः। तथास्मि
कर्ता कर्त्तव्ये भवद्भिः परवानहं॥१६॥ नाज्ञापयितुमीशोहं युवराजोपि यद्यपि। अयुक्तं कृतकर्माणो यूयं धर्षयितुं रुषा॥१७॥ ब्रुवतश्चांगदस्यैवं श्रुत्वा
वचनमव्ययं। प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः॥१८॥ एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ। ऐश्वर्यमदमत्तो हि सर्वोहमिति मन्यते॥१९॥ तव चे
दं सुसदृशं वाक्यं नान्यस्य कस्यचित्। संनतिर्हि तवाख्याति भविष्यच्छुभयोग्यतां॥२०॥ सर्वे वयमपि प्राप्तास्तत्र गंतुं कृतक्षणाः। स यत्र हरिवीराणां सुग्रीवः प
तिरव्ययः॥२१॥ त्वया ह्यनुक्ता हरयो नैव शक्ताः पदात्पदं। क्वचिद्गंतुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते॥२२॥ एवं तु वदतां तेषामंगदः प्रत्यभाषत। बाढं गच्छाम इत्यु
क्त्वा उत्पपात महीतलात्॥२३॥ उत्पतंतमनूत्पेतुः सर्वे ते हरियूथपाः। कृत्वाकाशं निराकाशं यंत्रोत्क्षिप्ता इवानलाः॥२४॥

न्व्यय इति योजना। किं शेषमिति किं शेषं न किमपि शिष्टमित्यर्थः। गमनं कर्तव्यमिति शेषः। नाज्ञापयितुमिति अशक्तमित्येतदव्ययं अयुक्ताः अनर्हाः इत्यर्थः। धर्षयितुं वि
यंतुं सन्नतिरिति। सन्नतिः विनयः नम्रता भविष्यच्छुभयोग्यतां भाविनीं भाग्योन्नतिं आख्याति स्तवयति एवमिति। एवं वदतां तेषां श्रुत्वा अंगदो बाढमित्यभाषत॥

महाबलाः गच्छाम इत्युक्त्वा खमुत्पेतुरिति यो
जना॥ उत्पतंतमिति। उत्पतंतमंगदं। निराकाशं निरवकाशं॥

तंगदमित्यादिसार्द्धश्लोकमेकं वाक्यं। ते वानराः अंगदं हनूमंतं च पुरतः कृत्वा अंबरं सहसोत्पत्य जग्मुरिति शेषः। अंगदे समनुप्राप्ते सुग्रीवो वानरेश्वरः उवाचे
ति। अंगदागमनात्प्रागिति द्रष्टव्यं। आगमनस्य वक्ष्यमाणत्वात् इति भावः। नूनं मधुवनधर्षणमात्रेण कथं कार्यसिद्धिः कोपयादिनापि संभवादित्याशंक्य
मत्वं अन्येषां तादृशत्वेपि अंगदस्य नेतादृशत्वापायेन हीयद्यपीत्यादिश्लोकद्वयेन। अकृतकृत्यानामन्येषां वानराणां ईदृश उपक्रमः मधुवनभंगह

तंगदं पुरतः कृत्वा हनूमंतं च वानरं। ते वरं सहसोत्पत्य वेगवंतः प्लवंगमाः॥२५॥ विनर्दंतो महानादं घना वातेरिता यथा॥ अंगदे समनुप्राप्ते सुग्रीवो वा
नरेश्वरः॥२६॥ उवाच शोकसंतप्तं रामं कमललोचनं। समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः॥२७॥ नागंतुमिह शक्यं तेतीतसमये रिह। अंगदस्य
प्रहर्षाद्बुद्धानामि शुभदर्शन। नमत्सकाशमागच्छेत्कृत्ये हि विनिपातिते॥ युवराजो महाबाहुः प्लवतामंगदो वरः॥२८॥ यद्यप्यकृतकृत्यानामी
दृशः स्यादुपक्रमः। भवेत्स दीनवदनो भ्रांतविप्लुतमानसः॥३०॥ पितृपैतामहं चैतत्पूर्वकैरभिरक्षितं। न मे मधुवनं हन्याददृष्ट्वा प्लवगेश्वरः॥
३१॥ कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत। दृष्टा देवी न संदेहो न चान्येन हनूमता॥३२॥ न ह्यन्यः कर्मणो हेतुः साधनेऽतद्विधो भवेत्। हनूम
ति मतिश्चैव कर्मसिद्धिश्च सत्तम॥३३॥ व्यवसायश्च शौर्यं च सूर्ये तेजः इव ध्रुवं। जांबवान्यत्र नेता स्यादंगदश्च हरीश्वरः॥३४॥ हनूमांश्चाप्यधिष्ठा
ता न तत्र गतिरन्यथा। मा भूश्चिंतासमायुक्तः संप्रत्यमितविक्रम॥३५॥ यदा हि दर्पितोदग्राः संगताः काननौकसः। नैषामकृतकार्याणामीदृशः
स्यादुपक्रमः॥३६॥ वनभंगेन जानामि मधूनां भक्षणेन च। ततः किलकिलाशब्दं शुश्रावासन्नमंबरे॥३७॥ हनूमत्कर्मदृप्तानां नर्दतां काननौ
कसां। किष्किंधामुपयातानां सिद्धिं कथयतामिव॥३८॥ ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः। आयतांचितलांगूलः सोऽभवद्धृष्टमान
सः॥३९॥ आजग्मुस्तेपि हरयो रामदर्शनकांक्षिणः। अंगदं पुरतः कृत्वा हनूमंतं च वानरं॥४०॥ तेंगदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः॥
निपेतुर्हरिराजस्य समीपे राघवस्य च॥४१॥ हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः। नियतामक्षतां देवीं राघवाय न्यवेदयत्॥४२॥ दृष्टा दे
वीति हनुमद्वदनादमृतोपमं। आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः॥४३॥ निश्चितार्थं ततस्तस्मिन्सुग्रीवं पवनात्मजे। लक्ष्मणः प्रीति
मान्प्रीतिं बहुमानादवैक्षत॥४४॥ प्रीत्या च रममाणोथ राघवः परवीरहा। बहुमानेन महता हनूमंतमवैक्षत॥ ॥४५॥ ॥ इतिमत्सुंदरकांडे
चतुःषष्टितमः सर्गः॥

र्वव्यापारो यद्यपि स्यात् तथापि तत्र अंगदः दीनवदनो भ्रांतविप्लुतमानसश्च भवेत्। अतः पितृपैतामहं। पितृपितामहपरंपरागतं मे मधुवनं जनकात्म
जामदृष्ट्वा न हन्यात्। कौसल्येति हे राम कौसल्या सुप्रजा आसीत् तया यं स्थितपरिज्ञानेन भवतः सन्नालाभादिदानीं कौसल्या सुप्रजावत्यभूदिति भावः। हनू
मानीति॥ तिलकाख्यायां सुंदरकांडे चतुःषष्टितमः सर्गः॥

रावणांतःपुरइति समयः मा न हत्या वधिष्यसमयः। तं चेतिशेषः। उवाचेति सीताया दर्शनं यथा येन प्रकारेण जातं तत्सर्वं तां कथं वा चेत्यर्थः। तत्र सीतेति॥
ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननं। प्रणम्य शिरसा रामं लक्ष्मणं च महाबलं। युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य चाब्रुवन्निमं यथा सीतायाः प्रवृत्तिमुपचक्रमुः ॥२॥
रावणांतःपुरे रोधं राक्षसीभिश्च तर्जनं। रामे समनुरागं च यश्चापि समयः कृतः ॥३॥ एतदाख्यांति ते सर्वे हरयो रामसंनिधौ। वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥४॥ क्व
सीता वर्तते देवी कथं च मयि वर्तते। एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥५॥ रामस्य गदितं श्रुत्वा हरयो रामसंनिधौ। चोदयंति हनूमंतं सीतावृत्तांतकोविदं ॥६॥ श्रुत्वा
तु वचनं तेषां हनूमान्मारुतात्मजः। प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥७॥ उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा। तं मणिं कांचनं दिव्यं दीप्यमानं स्वतेजसा
दत्वा रामाय हनुमांस्ततः प्रांजलिरब्रवीत्। समुद्रं लंघयित्वाहं शतयोजनमायतं ॥८॥ अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया। तत्र लंकेति नगरी रावणस्य दुरात्म
नः ॥१०॥ दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे। तत्र सीता मया दृष्टा रावणांतःपुरे सती ॥११॥ संन्यस्य त्वयि जीवंती रामा राममनोरथा। दृष्टा मया राक्षसीभिस्तर्ज्यमाना मुहुर्मु
हुः ॥१२॥ राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने। दुःखमापद्यते देवी त्वयादुःखोचिता सती ॥१३॥ रावणांतःपुरे रुद्धा राक्षसीभिः सुरक्षिता। एकवेणीधरा दीना त्व
यि चिंतापरायणा ॥१४॥ अधःशय्या विवर्णांगी पद्मिनीव हिमोदये। रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥१५॥ देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता
मया। इक्ष्वाकुवंशविख्यातिं शनैः कीर्तयता मया ॥१६॥ सा मया नरशार्दूल विश्वासमुपपादिता। ततः संभाषिता देवी सर्वमर्थं च दर्शिता ॥१७॥ रामसुग्रीवसख्यं
च श्रुत्वा हर्षमुपागता। नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ॥१८॥ एवं मया महाभागा दृष्टा जनकनंदिनी। उग्रेण तपसा युक्ता त्वद्भक्त्या रघुनंद
न ॥१९॥ अभिज्ञानं च मे दत्तं यथावृत्तं तवांतिके। चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥२०॥ विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया। अखिलेनेह यद्दृष्ट
मिति मामाह जानकी ॥२१॥ इदं चास्मै प्रदातव्यं यत्नात्सुपरिरक्षितं। ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥२२॥ एष चूडामणिः श्रीमान्मया ते परिरक्षितः। म
नःशिलायास्तिलकं तत्स्मरस्वेति चाब्रवीत् ॥२३॥ एष निर्यातितः श्रीमान्मया ते वारिसंभवः। एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥२४॥ जीवितं धार
यिष्यामि मासं दशरथात्मज। ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥२५॥ इति मामब्रवीत्सीता कृशांगी वरवर्णिनी। रावणांतःपुरे रुद्धा मृगीवोत्फुल्ल
लोचना ॥२६॥ एतदेव मयाख्यातं सर्वं राघव यद्यथा। सर्वथा सागरजले संतारः प्रविधीयतां ॥२७॥

हे राम त्वयि मनोरथं संन्यस्य समर्प्य त्वन्मनस्या। जीवंती स्थिता आर्या। अधःशय्या स्थंडिलशयना। ततः इति। सर्वमर्थं च दर्शिता ज्ञापिता। एष इति। निर्यातितः प्रेषितः। वा
रिसंभवो मणिः प्रत्यामिति। एतत्स्थं अंगुलीयकं

सुंदर० ८०

पंचषष्ठिः सर्गः॥ ॥अस्मिन्निति नेत्राभ्यामश्रुपूर्णाभ्यां उपलक्षितः। तथैवेति। स्रवतीं द्रवतीं। वत्सस्येत्यत्रापि दर्शनादिति संबध्यते। हृदयमित्यत्रापि स्नेहद्रवती
मिति संबंधः। श्वशुरेणाजनकेन। मणिरिति रत्नमिति। मे श्वशुरेण जनकेन वधूकाले विवाहकाले वैदेह्या मूर्ध्नि शोभते इति संबंधः। जनकेनापि
कुत आगमितमाह। अयं हीति॥ पिपासुमिति वैदेहीं विना आगतं मणिं पश्यामीति संबंधः। ... टीकायां॥ ॥६॥ इति श्रीमहेश्वरतीर्थीयायां सुंदर ... कांडे षष्ठितमः सर्गः॥
तो जाताश्वासो राजपुत्रो विदित्वा। तच्चाभिज्ञानं राघवाय प्रदाय देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशास॥ ६८॥ इत्यार्षे रा
मायणे सुंदरकांडे पंचषष्ठितमः सर्गः॥ ॥एवमुक्तो हनुमता रामो दशरथात्मजः॥ तं मणिं हृदये कृत्वा रुरोद सहलक्ष्मणः॥१॥ तं तु दृष्ट्वा मणिश्रे
ष्ठं राघवः शोककर्शितः। नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत्॥२॥ यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला। तथा ममापि हृदयं मणिश्रे
ष्ठस्य दर्शनात्॥३॥ मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे। वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते॥४॥ इदं हि जलसंभूतं मणिप्रवरसत्तमं यज्ञे
परमतुष्टेन दत्तं शक्रेण धीमता॥५॥ इमं दृष्ट्वा मणिश्रेष्ठं तथा तातस्य दर्शनं। अद्याप्यवगतं सौम्य वैदेहस्य तथा विभोः॥६॥ अयं हि शोभते त
स्याः प्रियाया मूर्ध्नि मे मणिः। अद्यास्य दर्शनेनाहं प्राप्तां तामिव चिंतये॥७॥ किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः। पिपासुमिव तोयेन सिं
चंती वाक्यवारिणा॥८॥ इतस्तु किं दुःखतरं यदिमं वारिसंभवं। मणिं पश्यामि सौमित्रे वैदेहीमागतां विना॥९॥ चिरं जीवति वैदेही यदि
मासं धरिष्यति। क्षणं सौम्य न जीवेयं विना तामसितेक्षणां॥१०॥ नय मामपि तं देशं यत्र दृष्टा मम प्रिया। न तिष्ठेयं क्षणमपि प्रवृत्तिमुपल
भ्य च॥११॥ कथं सा मम सुश्रोणी भीरु भीरुः सती सदा। भयावहानां घोराणां मध्ये तिष्ठति रक्षसां॥१२॥ शारदस्तिमिरोन्मुक्तो नूनं चंद्र इवांबु
दैः। आवृतं वदनं तस्या न विराजति राक्षसैः॥ किमाह सीता हनुमंस्तत्त्वतः कथयस्व मे। एतेन खलु जीविष्ये भेषजेनातुरो यथा॥१४॥ मधु
रा मधुरालापा किमाह मम भामिनी। मद्विहीना वरारोहा हनुमन्कथयस्व मे॥१५॥ इत्यार्षे रामायणे सुंदरकांडे षट्षष्ठितमः सर्गः॥ एवमु
क्तस्तु हनुमान् राघवेण महात्मना। सीताया भाषितं सर्वं न्यवेदयत राघवे॥१॥ इदमुक्तवती देवी जानकी पुरुषर्षभ। पूर्ववृत्तमभिज्ञा
नं चित्रकूटे यथातथं। सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता। वायसः सहसोत्पत्य विरराद स्तनांतरे॥३॥ पर्यायेण प्रसुप्तस्त्वं देव्यं
के भरताग्रज। पुनश्च किल पक्षी स देव्या जनयति व्यथां॥४॥ ततः पुनरुपागम्य विरराद भृशं किल। ततस्त्वं बोधितस्तस्याः शोणितेन समु
त्थितः॥५॥ वायसेन च तेनैवं सततं बाध्यमानया। बोधितः किल देव्या त्वं सुखसुप्तः परंतप॥६॥ तां तु दृष्ट्वा महाबाहो दारितां च स्तनांतरे। आशी
विष इव क्रुद्धो निश्वसन्नभ्यभाषत॥७॥ नखाग्रैः केन ते भीरु दारितं वै स्तनांतरं। कः क्रीडति सरोषेण पंचवक्त्रेण भोगिना॥८॥

राम ८०

त्वल्लोकविमुखः।त्वल्लोकेनकार्यंतवविमुखः॥९॥सासमीक्ष्येतितांवायुपुत्रस्थितंशिरसिकतिपयकेश[illegible]लीलंवस्त्रानुमुक्तावस्त्रांतर्ग्रथितमुन्म्
निरीक्ष्यमाणाःसहसावायसंसमुदैक्षत।नखैःसतुधिक्षिप्तौद्वेणामेवाभिमुखंस्थितां।सुतःकिलस[illegible]वायसःपततांवरः।धरांतरगतःशीघ्रं
पवनस्यगतौसमः॥१०॥ततस्तस्मिन्महाबाहोकोपसंवर्तितेक्षणः।वायसेत्वंकृथाःक्रूरांमतिंमतिमतांवर॥११॥सदर्भंसंस्तराद्गृह्यब्राह्मेणास्त्रेणयोजय
तं।सदीप्तइवकालाग्निर्जज्वालाभिमुखःखगं॥१२॥सत्वंप्रदीप्तंचिक्षेपदर्भंतंवायसंप्रति।ततस्तंवायसंदीप्तःसदर्भोभिज[illegible]॥१३॥सपित्राचपरि
त्यक्तःसुरैःसर्वैश्चवायसः।त्रीन्लोकान्संपरिक्रम्यत्रातारंनाधिगच्छति॥१४॥पुनरेवागतस्त्रस्तस्त्वत्समीपमरिंदम।ततस्तंपतितंभूमौशरण्यःशरणाग
तं॥१५॥वधार्हमपिकाकुत्स्थःकृपयापर्यपालयत्।मोघमस्त्रंनशक्यंतुकर्त्तुमित्येवराघवः॥१६॥ततस्तस्याक्षिकाकस्यहिनस्तिस्मसदक्षिणं
ततोरामंनमस्कृत्यराज्ञोदशरथस्यच॥१७॥विसृष्टस्तुतदाकाकःप्रतिपेदेस्वमालयं।एवमस्त्रविदांश्रेष्ठःसत्ववान्शीलवानपि॥१८॥किमर्थमस्त्रं
रक्षःसुनयोजयसिराघव।ननागानापिगंधर्वानासुरानमरुद्गणाः॥१९॥तवरामसुखेस्थातुंशक्ताःप्रतिसमाधिरां।तववीर्यवतःकच्चिद्यद्यस्ति
मयिसंभ्रमः॥२०॥क्षिप्रंसुनिशितैर्बाणैर्हन्यतांयुधिरावणः।भ्रातुरादेशमाज्ञायलक्ष्मणोवापरंतपः॥२१॥सकिमर्थंनरवरोनमांरक्षतिराघवः॥
शक्तौतौपुरुषव्याघ्रौवाय्वग्निसमतेजसौ॥२२॥सुराणामपिदुर्द्धर्षौकिमर्थंमामुपेक्षितः।तमेवदुष्कृतंकिंचिन्महदस्तिनसंशयः॥२३॥समर्थौसहितौ
यन्मामुपेक्षेतेपरंतपौ।वैदेह्यावचनंश्रुत्वाकरुणंसाश्रुभाषितं॥२४॥हनुमानाहमार्यांतांइदंवचनमब्रवीत्।त्वच्छोकविमुखोरामोदेवीसत्येनतेसपे
॥२५॥रामेदुःखाभिभूतेतुलक्ष्मणःपरितप्यते।कथंचिद्भवतीदृष्टानकालःपरिशोचितुं॥२६॥इदंमुहूर्त्तंदुःखानामंतंद्रक्ष्यसिभामिनि।तावुभौ
पुरुषव्याघ्रौराजपुत्रौमहाबलौ॥२७॥त्वद्दर्शनकृतोत्साहौलंकांभस्मीकरिष्यतः।हत्वाचसमरेरौद्रंरावणंसहबांधवं॥२८॥राघवस्त्वांवरारोहे
स्वांपुरींनयतेध्रुवं।यच्चरामोविजानीयादभिज्ञानमनिंदिते॥२९॥प्रीतिसंजननंतस्यप्रदातुंतत्वमर्हसि।सासमीक्ष्यदिशःसर्वावेण्युद्ग्रथन
मुत्तमं॥३०॥मुक्त्वावस्त्राद्ददौमह्यंमणिमेतंमहाबला।प्रतिगृह्यमणिंदिव्यंतवहेतोरघुप्रिय॥३१॥शिरसासंप्रणम्यैनामहमागमनेत्वरे।गम
नेचकृतोत्साहमवेक्ष्यवरवर्णिनी॥३२॥विवर्द्धमानोमांवैदेहीवाचजनकात्मजा।अश्रुपूर्णमुखीदीनावाष्पसंदिग्धभाषिणी ॥३३॥

च्यददावित्यर्थः ॥३०॥

॥ ॥इति श्रीमहेश्वरतीर्थीये सुंदरकांडे सप्तषष्टिः सर्गः॥ ॥अथेति। हे नरव्याघ्र त्वत्स्नेहान्नयामीति शेषः सौहार्दात्त्वद्भक्त्या वा। आसत्त्वादिति यावत्। ह
नुमान्सम्मानपंचत्वं ततः परं तत्र त्वं कार्यं वा पुनः पुनः देव्या ससंभ्रमं गमनत्वरयोक्तः। अहस्तु नत्स्यच्ययः। किमुक्त तदाह। एवमित्यादि यदित्यादि श्लो
ममोत्पन्नसंभ्रांता शोकवेगसमाहता। हनूमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ॥३४॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूयाह्यनामयं। यथा च स म
हाबाहुर्मां तारयति राघवः॥३५॥ अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि। इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च। ब्रूयास्तु रामस्य
गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर॥३६॥ एतत्तवार्य नृपराजसिंह सीता वचः प्राह विषादपूर्वं। एतच्च बुद्ध्वा गदितं मया त्वं श्रद्धत्स्व सीतां कुशलां
समग्रां॥३७॥ ॥इत्यार्षे रामायणे सुंदरकांडे सप्तषष्टितमः सर्गः॥ ॥अथाहमुत्तरं देव्या पुनरुक्तः ससंभ्रमः। तव स्नेहान्नरव्याघ्र सौहार्दादनुमा
न्य वै॥१॥ एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया। यथा मां प्राप्नुयाच्छीघ्रं हत्वा रावणमाहवे॥२॥ यदि वा मन्यसे वीर वसैकाहमरिंदम। कस्मिंश्चित्सं
वृते देशे विश्रांतः श्वो गमिष्यसि॥३॥ मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वीर्यवान्। अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणं॥४॥ गते हि त्वयि
विक्रांते पुनरागमनाय वै। प्राणानामपि संदेहो मम स्यान्नात्र संशयः॥५॥ तवादर्शनजः शोको भूयो मां परितापयेत्। दुःखाद्दुःखवालिसंभृतां चेदुग
तां दुःखभागिनीं। अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः। सुमहांस्त्वत्सहायेषु हर्यृक्षेषु न संशयः॥७॥ कथं नु खलु दुष्पारं तरिष्यंति महोदधिं। तानि हर्य
क्षसैन्यानि तौ वा नरवरात्मजौ॥८॥ त्रयाणामपि भूतानां सागरस्यापि लंघने। शक्तिः स्याद्वैनतेयस्य वायोर्वा तव वानघ॥९॥ तदस्मिन्कार्यनिर्योगे वी
र एवं दुरतिक्रमे। किं पश्यसि समाधानं ब्रूहि कार्यविदांवर॥१०॥ काममस्य त्वमेवैकः कार्यस्य परिसाधने। पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः॥११॥ ब
लैः समग्रैर्यदि मां हत्वा रावणमाहवे। विजयी स्वां पुरीं रामो नयेन्मां तद्यशस्करं॥१२॥ यथाहं तस्य वीरस्य वनादुपधिना हृता। रक्षसा तद्भयादेव तथा
नार्हति राघवः॥१३॥ शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः। मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत्॥१४॥

कदह्यमेकं वा कां हे वीर यदि वा मन्यसे एकाहं वस तावत्। किमायातमत आह। कस्मिंश्चिदिति। अरिंदम कस्मिंश्चित्संवृते देशे विश्रांतः श्वो गमिष्यसि
चेत् तव सांनिध्यादल्पभाग्याया मम अस्य महतः शोकविपाकस्य शोकरूपस्य पापपरिणामस्य फलस्येत्यर्थः। मुहूर्तं मोक्षणं स्यादिति योजना।
गतेति। पुनरागमनाय प्रतीक्ष्यमाणाया मम प्राणानामपि संदेहः स्यादिति संबंधः॥१५॥

तद्दलमिति। मन्युः दैन्यं। तत्र इति। तत्र शोकेनापि नैव दृश्यते इत्यादि पूर्ववदुक्त्या मद्वचसा आकृतेन त्वच्छोकेनापि ममसुरतस्थाभिपीडिता अदीन
भाषिणा मया शिवाभिः रिष्टाभिः वाग्भिरभिप्रसादिता शांतिं दुःखनिवृत्तिं जगामेति योजना॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनारायण

तद्यथा तस्य विक्रांतमनुरूपं महात्मनः। भवत्याहवशूरस्य तत्त्वमेवोपपादय॥१५॥ तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितं। निशम्याहं ततः शेषं
वाक्यमुत्तरमब्रुवं॥१६॥ देवि हर्यृक्षसैन्यानां ईश्वरः प्लवतां वरः। सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः॥१७॥ तस्य विक्रमसंपन्नाः सत्त्ववंतो
महाबलाः। मनःसंकल्पसंपाता निदेशे हरयः स्थिताः॥१८॥ येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः। न च कर्मसु सीदंति महत्स्वमिततेजसः
१९॥ असकृत्तैर्महाभागैःससागरधराधरा। प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः॥२०॥ मद्विशिष्टाश्च तुल्याश्च संति तत्र वनौकसः। मत्तः
प्रत्यवरः कश्चिन्नास्ति सुग्रीवसंनिधौ॥२१॥ अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः। न हि प्रकृष्टाः प्रेष्यंते प्रेष्यंते हीतरे जनाः॥२२॥ तदलं परि
तापेन देवि मन्युर्व्यपैतु ते। एकोत्पातेन वै लंकां एष्यंति हरियूथपाः॥२३॥ मम पृष्ठगतौ तौ च चंद्रसूर्याविवोदितौ। त्वत्समीपं महाभागे नृसिं
हावागमिष्यतः॥२४॥ अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवं। लक्ष्मणं च धनुष्पाणिं लंकाद्वारमुपागतं॥२५॥ नखदंष्ट्रायुधान्वीरान्सिंहशार्दूल
विक्रमान्। वानरान्वारणेंद्राभान्क्षिप्रं द्रक्ष्यसि संगतान्॥२६॥ शैलांबुदनिकाशानां लंकामलयसानुषु। नर्दतां कपिमुख्यानां नचिरात्श्रो
ष्यसे स्वनं॥२७॥ निवृत्तवनवासं च त्वया सार्द्धमरिंदमं। अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवं॥२८॥ ततो मया वाग्भिरदीनभाषिणा शिवा
भिरिष्टाभिरभिप्रसादिता। जगाम शांतिं मम मैथिलात्मजा तवापि शोकेन तथाभिपीडिता॥२९॥ ॥ इत्यार्षे श्रीरामायणे आदिकाव्ये श्री
मद्वाल्मीकीये चतुर्विंशसहस्रिकायां संहितायां श्रीमत्सुंदरकांडे अभिरामरामरामहृत्श्रोत्राभिरामामृताख्यवचनं नाम अष्टषष्टितमः सर्गः॥ ॥ राम ८२

तीर्थस्वामिशिष्यश्रीमन्महेश्वरतीर्थविरचितश्रीरामायणतत्त्वदीपिकायां सुंदरकांडे अष्टषष्टितमः सर्गः॥ महेशतीर्थरचिता रामपादसमर्पिता। व्या
ख्या सुंदरकांडस्य संपूर्णा तत्त्वदीपिका॥ श्रीरामायणटीकेयं महेशयतिना कृता। शिवरामेण यतिना नामिरूपेण कारिता॥ ॥ संवत १७२३॥ ॥

मृदरकीः

रक्तेति रक्तमाल्यमहादामा रक्तमाल्यं च तन्महादामेति विग्रहः । श्वेतेति स्पष्टं । काञ्चनसन्नं मणिकृतोन्नतं मणिगणविचित्रमध्यप्रदेशं । दिव्यानीति । माल्यदामानि । माल्यरूपाणि । दा
मानि श्वेतेश्वेत्यचपी । सकाञ्चनमिति । भारसहं । पर्वतायुधादिसहं भारसहं । पद्मे । तुलायोल्याप्यमानान्बहून्भारान्सहत इति तथा । अनेकपलभारनिर्मितमित्यर्थः । निवातम

इंद्राशनिसमप्रख्यं वज्रप्रतिमगौरवं । देवदानवगंधर्वयक्षकिंनरसूदनं १९ रक्तमाल्यमहादामं स्वतश्चोद्गतपावकं । आदाय विपुलं शूलं शत्रुशोणितरंजितं
२० कुंभकर्णो महातेजा रावणं वाक्यमब्रवीत् । गमिष्याम्यहमेकाकी तिष्ठत्विह बलं महत् २१ अद्य तान्क्षुधितः क्रुद्धो भक्षयिष्यामि वानरान् । कुंभकर्णवचः श्रुत्वा राव
णो वाक्यमब्रवीत् २२ सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः । वानरा हि महात्मानः शीघ्राः सुव्यवसायिनः २३ एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयं । तस्मात्परमदु
र्धर्षैः सैन्यैः परिवृतो व्रज २४ रक्षसामहितं सर्वं शत्रुपक्षं निषूदय । अथासनात्समुत्पत्य स्रजं मणिकृतान्तरां २५ आबबंध महातेजाः कुंभकर्णस्य रावणः । अंगद
न्यंगुलीवेष्टान्वराण्याभरणानि च २६ हारं च शशिसंकाशमाबबंध महात्मनः । दिव्यानि च सुगंधीनि माल्यदामानि रावणः २७ गात्रेषु सज्जयामास श्रोत्रयोश्चा
स्य कुंडले । कांचनांगदकेयूरनिष्काभरणभूषितः २८ कुंभकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ । श्रोणीसूत्रेण महता मेचकेन विराजिता २९ अमृतोत्पाद
नेनद्धो भुजंगेनेव मंदरः ३० स कांचनं भारसहं निवातं विद्युत्प्रभं दीप्तमिवात्मभासा । आबध्यमानः कवचं रराज संध्याभ्रसंवीत इवाद्रिराजः ३१ सर्वाभरणस
र्वांगः शूलपाणिः स राक्षसः । त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ३२ भ्रातरं संपरिष्वज्य कृत्वा चापि प्रदक्षिणं । प्रणम्य शिरसा तस्मै संप्रतस्थे महाबलः ३३
निष्पतंतं महाकायं महानादं महाबलं । तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ३४ शंखदुंदुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः । तं गजैश्च तुरंगैश्च स्यंदनैश्चांबुदस्व
नैः ३५ अनुजग्मुर्महात्मानो रथिनो रथिनां वरं । सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्वीपमृगद्विजैः ३६ अनुजग्मुश्च तं घोरं कुंभकर्णं महाबलं ३७ स पुष्पवर्षैरवकीर्यमा
णो धृतातपत्रः शितशूलपाणिः । मदोत्कटः शोणितगंधमत्तो विनिर्ययौ दानवदेवशत्रुः ३८ पदातयश्च बहवो महानादा महाबलाः । अन्वयू राक्षसा भीमा भीमा
क्षाः शस्त्रपाणयः ३९ रक्ताक्षाः सुमहाकाया नीलांजनचयोपमाः । शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ४० ॥

ड्डा आबध्यमानः आबध्य आपीविकरणि वा सपः सर्वेति । सर्वाभरणसर्वांगः सर्वाभरणयुक्तसर्वांगः । त्रिविक्रमकृतोत्साहः त्रिषु विक्रमेषु पादन्यासेषु कृ
तोत्साहः ॥ ।

यु० ६० बद्धितिबद्ध्वामासा बद्ध्वा मध्यमारमान् व्यामो बाह्वोस्सकरयोस्ततयोस्तिर्यगंतरमितमर ॥ धनुरिति धनुःशतपरिणाहः ॥ धनुःशतविशालवान् ॥ सषट्शतसमुच्छ्रितः ॥ षट्छत धनुरुन्न
तः ॥ पुरोधक्षेत्यस्य प्रातीतिकार्थस्पष्टः ॥ वक्तृलक्ष्म ॥ पुरोधस्य मूलं मलस्मृतो राघवः ॥ स्वलुम्तनुतिष्ठतुपेन्द्र सर्वमस्य दीपमितिशेषः ॥ हतं तं संयुगे वधिष्यामि कुतः ॥ तस्मिन्नुहते नदा ये

बद्ध्वा मांस्वपरिघान्गदास्त्रमुसलानपि। तालस्कंधांश्च विपुलान्क्षेपणीयान्दुरासदान् ४१ अर्थान्यद्वपुरादाय दारुणं घोरदर्शनं। निष्पपात महातेजाः कुंभकर्णो महाब
लः ४२ धनुःशतपरीणाहः सषट्शतमुच्छ्रितः। रौद्रः शकटचक्राक्षो महापर्वतसन्निभः ४३ सन्निपत्य च रक्षांसि दग्धशैलोपमो महान्। कुंभकर्णो महावक्त्रः प्रहस
न्निदमब्रवीत् ४४ अद्य वानरमुख्यानां महायूथानि भागशः। निर्दहिष्यामि संक्रुद्धः शलभानिव पावकः ४५ नापराध्यंति मे कामं वानरा वनचारिणः। जातिरस्माद्वि
धानां सा पुरोद्यानविभूषणं ४६ पुरोधस्य मूलं तु राघवः सहलक्ष्मणः। हतेन तस्मिन्हतं सर्वं तं वधिष्यामि संयुगे ४७ एवं तस्य ब्रुवाणस्य कुंभकर्णस्य राक्षसाः। नादं
चक्रुर्महाघोरं कंपयंत इवार्णवं ४८ तस्य निष्पततस्तूर्णं कुंभकर्णस्य धीमतः। बभूवुर्घोररूपाणि निमित्तानि समंततः ४९ उल्काशनिमुचो मेघा बभूवुर्गर्दभा
रुणाः। ससागरवना चैव वसुधा समकंपत ५० घोररूपाः शिवा नेदुः सज्वालकवलैर्मुखैः। मंडलान्यपसव्यानि बबंधुश्च विहंगमाः ५१ निःपपात च गृध्रोऽस्य शूलाग्रे प
थि गच्छतः। प्रास्फुरन्नयनं चास्य सव्यो बाहुरकंपत। ५२ निष्पपात तदा चोल्का ज्वलंती भीमनिस्वना। आदित्यो निष्प्रभश्चासीन्न प्रवाति सुखोऽनिलः ५३ अचिंतयन्महो
त्पातानुत्थितान्रोमहर्षणान्। निर्ययौ कुंभकर्णस्तु कृतांतबलचोदितः ५४ स लंघयित्वा प्राकारं पद्भ्यां पर्वतसन्निभः। ददर्शाभ्रघनप्रख्यो वानरानीकमद्भुतं ५५
ते दृष्ट्वा वानरश्रेष्ठा राक्षसं पर्वतोपमं। वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ५६ तद्वानरानीकमतिप्रचंडं दिशो द्रवद्भिन्नमिवाभ्रजालं। स कुंभकर्णः समवेक्ष्य
हर्षान्ननाद भूयो घनवद्घनाभः ५७ ते तस्य घोरं निनदं निशम्य यथा निनादं दिवि वारिदस्य। पेतुर्धरण्यां बहवो प्लवंगा निकृत्तमूला इव सालवृक्षाः ५८ विपुलप
रिघवान्स कुंभकर्णो रिपुनिधनाय विनिःसृतो महात्मा। कपिगणभयमाददत्सुभीमः प्रभुरिव किंकरदंडवान्युगांते ५९ इत्यार्षे रामायणे युद्धकांडे पंचषष्ठितमः सर्गः॥ राम ६०

सर्वं हतं स्यादिति भावः ॥ पुनर्योजनीया ॥ उत्स्फुरदिति नयनं सव्यं ॥ स लंघयित्वेति ॥ अभ्रघनप्रख्यं ॥ अभ्रसंघाततुल्यः ॥ विपुलपरिघवानिति ॥ प्रभुरंतकः ॥ किंकरदंडवान् ॥ किंक
रोऽस्मीत्युपस्थितो दंडो यस्यास्तीति तथोक्तः ॥ ॥ इति महेश्वरतीर्थीये युद्धकांडे पंचषष्ठितमः सर्गः ॥ ॥

मयारामेतिस्थलानितत्पञ्चाविदुद्रुवुरितिसंबध्यते।कासारइति॥ममज्जुः।निपेतुः।निरायुधानीति।सैवेघातनकृत्तीविनो।सः।दृष्टकृतापहासः॥घातः।मरणं।जीवितं।जीवितो ॥ ॥

सलंघयित्वाप्राकारंगिरिकूटोपमोमहान्।निर्ययौनगराद्वीरःकुंभकर्णोमहाबलः १ सननादमहानादंसमुद्रमभिनादयन्।जनयन्निवनिर्घोषान्विधमन्निवपर्वतान् २ तमवध्यंम
घवतायमेनवरुणेनवा।प्रेक्ष्यभीमाक्षमायांतंवानराविप्रदुद्रुवुः ३ तान्वीरःपद्रुतान्दृष्ट्वावालिपुत्रोंगदोब्रवीत्।नलंनीलंगवाक्षंचकुमुदंचमहाबलं ४ आत्मानमत्रविस्मृत्यवीर्याण्य
भिजनानिच।क्वगच्छथभयत्रस्ताःप्राकृताहरयोयथा ५ साधुसौम्यानिवर्तध्वंकिंप्राणान्परिरक्षथ।नालंयुद्धायवैरक्षोमहतीयंविभीषिका ६ महतीमुत्थितामेतोराक्षसानांविभी
षिकां।विक्रमाद्विधमिष्यामोनिवर्तध्वंप्लवंगमाः ७ कृच्छ्रेणतुसमाश्वास्यसंगम्यचततस्ततः।वृक्षाद्रिहस्ताहरयःसंप्रतस्थूरणाजिरे ८ तेनिवर्त्यतुसंरब्धाःकुंभकर्णंवनौक
सः।निजघ्नुःपरमक्रुद्धाःसमदाइवकुंजराः ९ प्रांशुभिर्गिरिशृंगैश्चशिलाभिश्चमहाबलाः।पादपैःपुष्पिताग्रैश्चहन्यमानोनबुध्यते १० अस्यगात्रेषुपतिताभिद्यंतेशतशः
शिलाः।पादपाःपुष्पिताग्राश्चभग्नाःपेतुर्महीतले ११ सोपिसैन्यानिसंक्रुद्धोवानराणांमहौजसां।ममंथपरमायत्तोवनान्यग्निरिवोत्थितः १२ लोहितार्द्रास्तुबहवःशे
रतेराक्षसाहताः।निरस्ताःपतिताभूमौताम्रपुष्पाइवद्रुमाः १३ लंघयंतःप्रधावंतोवानरानावलोकयन्।केचित्समुद्रेपतिताःकेचिद्गगनमाश्रिताः १४ वध्यमानास्तुतेवी
राराक्षसेनबलीयसा।सागरंयेनवैतीर्णाःपथातेनैवदुद्रुवुः १५ तेस्थलानितथानिम्नंविषण्णवदनाभयात्।ऋक्षाःवृक्षान्समारूढाःकेचित्पर्वतमाश्रिताःगुहाः १६ ममज्जुरर्णवेकेचि
द्गिरीन्केचित्समाश्रिताः।निपेतुर्हरयःकेचित्केचिन्नैवावतस्थिरे १७ केचिद्भूमौनिपतिताःकेचित्सुप्तामृताइव।तान्समीक्ष्यांगदोभग्नान्वानरानिदमब्रवीत् १८ अवतिष्ठ
तयुध्यामोनिवर्तध्वंप्लवंगमाः।भग्नानांवोनपश्यामिपरिक्रम्यमहीमिमां १९ स्थानंसर्वेनिवर्तध्वंकिंप्राणान्परिरक्षथ।निरायुधानांद्रवतामसंगगतिपौरुषं २० दारा
ह्यपहसिष्यंतिसवैघातस्तुजीवितं।कुलेषुजाताःसर्वेस्मविस्तीर्णेषुमहत्सुच २१

श्रीरामश्रीरामश्रीरामनाम्नेनमोनमः॥ ॥ ॥श्रीरामराघवरामपनः॥ ॥श्रीगुरवेनमः॥ ॥श्रीढुंढराजविघ्नविनाशायनमः॥

अनार्य इति। यद्यस्माद्भीताः पलायध्वं तस्मादनार्याः खलु। विकत्थनानीति। सोदग्राणि। श्लाघ्यान्युक्तानि। महान्तीति भूयांसि। भीरुप्रवादा इति। यत्र कश्चित्कुत्सितो जीवति तद्विषयभी-
रुप्रवादाः श्रूयन्ते। तं सर्वे भीरुरिति वदन्तीत्यर्थः। सत्पुरुषैः शूरैः। कस्माद्धि सत्पुरुषजुष्टो मार्ग इत्यपेक्षायामाह। शयामह इति। युद्धमरणं सत्पुरुषजुष्टो मार्गः। मरणस्यावश्यंभावित्व-
प्रदर्शनार्थं अल्पजीविता इत्युक्तं। मरणनिवर्तकानां वीराणां मरणजीवितयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयति दुष्प्रापमिति। जीवितमिति वीरलोकस्य वीराणां लोको ब्रह्मलो-
कस्तस्य प्रत्युपभूतं जीवितं भोक्ष्यामः॥ नेति। पतङ्ग इव कुम्भकर्णः दीप्यमानं पावकमिव काकुत्स्थं दृष्ट्वा जीवन्न गमिष्यतीति संबन्धः। पलायनेनेति। बहवो वयं एकेन कुम्भक-

क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा। अनार्याः खलु यद्भीतास्त्यक्त्वा वीर्यं प्रधावत २२ विकत्थनानि वो यानि तदा वै जनसंसदि। तानि वः क्व नु याता-
नि सोदग्राणि महान्ति च २३ भीरुप्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः॥ मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयं २४ शयामहे वा निहताः पृथिव्यामल्प-
जीविताः। दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः २५ संप्राप्नुयामः कीर्तिं वा निहत्वा शत्रुमाहवे॥ जीवितं वीरलोकस्य भोक्ष्यामो वसु वान-
राः २६ न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन्गमिष्यति। दीप्यमानमिवासाद्य पतङ्ग इव पावकं २७ पलायनेन चोद्दिष्टाः प्राणान्रक्षामहे वयं। एकेन
बहवो भग्ना यशो नाशं गमिष्यति २८ एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदं। द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितं २९ कृतं नः कदनं घोरं कुम्भकर्णे-
न रक्षसा। न स्थानकालो गच्छामो दयितं जीवितं हि नः ३० एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः। भीमराक्षसमायान्तं दृष्ट्वा वानरयूथपाः ३१ द्रव-
माणास्तु ते वीरा अङ्गदेन वलीमुखाः। सान्त्वैश्च बहुमानैश्च ततः सर्वे निवर्तिताः ३२ प्रहर्षमुपनीताश्च वालिपुत्रेण धीमता। आज्ञाप्रतीक्षास्तस्थु-
श्च सर्वे वानरयूथपाः ३३ ऋषभशरभमैन्दधूम्रनीलाः कुमुदसुषेणगवाक्षरम्भताराः। द्विविदपनसवायुपुत्रमुख्यास्त्वरिततराभिमुखं रणं रामप्र-
याताः ३४ इत्यार्षे रामायणे वाल्मीकीये युद्धकाण्डे षट्षष्टितमः सर्गः॥ ॥

र्णेन भग्नाः पलायनेन अनेन भङ्गेनोद्दिष्टाः एते पलायिता इति जनैर्निर्दिष्टाः शब्दिताः
प्राणान्रक्षामहे यदि तदास्माकं यशः नाशं गमिष्यतीति संबन्धः। द्रवमाणा इति। अनुमानैः सालगिरिभेदनादिदृष्टान्तैः। ऋषभशरभेति। वायुपुत्रः हनूमान् पलायनिवृत्तः। किंतु ऋ-
षभादिभिर्मिलित्वा कुम्भकर्णेन सह युद्धार्थं निवृत्त इति ज्ञेयं॥ ॥ इति श्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदीपिकायां युद्धकाण्डे षट्षष्टितमः सर्गः॥ ॥

नइतिनैष्ठिकींनिष्ठानाशःतत्संबंधिनींमरणपर्यवसायिनीमितियावत्।समुदीरितवीर्याःकथितात्मीयप्रावृष्यपराक्रमाइत्यर्थः।ततःपर्वतमिति।विलंबः।विशेषेणलंबतइतिविलंबः।

तेनिवृत्तामहाकायाःश्रुत्वांगदवचस्तदा।नैष्ठिकींबुद्धिमास्थायसर्वेसंग्रामकांक्षिणः १ समुदीरितवीर्यास्तेसमारोपितविक्रमाः।पर्यवस्थापितावाक्यैरंगदेनबलीमुखाः २ प्रया
तास्तुगताहर्षंमरणेकृतनिश्चयाः।चक्रुःसुतुमुलंयुद्धंवानरास्त्यक्तजीविताः ३ अथवृक्षान्महाकायाःसानूनिसुमहांतिच।वानरास्तूर्णमुद्यम्यकुंभकर्णमभिद्रवन् ४ सकुंभ
कर्णःसंक्रुद्धोगदामुद्यम्यवीर्यवान्।अर्दयन्सुमहाकायःसमंताद्व्याक्षिपद्रिपून् ५ शतानिसप्तचाष्टौचसहस्राणिचवानराः।प्रकीर्णाःशेरतेभूमौकुंभकर्णेनपोथिताः ६
षोडशाष्टौचदशचविंशत्त्रिंशत्तथैवच।परिक्षिप्यचबाहुभ्यांखादन्सपरिधावति ७ भक्षयन्भृशसंक्रुद्धोगरुडःपन्नगानिव।कृच्छ्रेणचसमाश्वस्ताःसंगम्यचततस्ततः ८ वृक्षा
द्रिहस्ताहरयस्तस्थुःसंग्राममूर्द्धनि।ततःपर्वतमुत्पाट्यद्विविदःप्लवगर्षभः ९ दुद्रावगिरिशृंगाभोविलंबइवतोयदः।तंसमुत्क्षिप्यचिक्षेपकुंभकर्णायवानरः १० तमप्राप्तो
महाशैलस्तत्सैन्येऽन्यपतत्तदा।ममर्दाश्वान्गजांश्चैवरथांश्चैवनगोत्तमः ११ तानिचान्यानिरक्षांसिपुनश्चान्यन्गिरेःशिरः।तच्छैलशृंगाभिहतंहताश्वंहतसारथि १२ रक्षसां
रुधिरक्लिन्नंबभूवायोधनंमहत्।रथिनोवानरेंद्राणांशरैःकालांतकोपमैः १३ शिरांसिनर्दतांजह्रुःसहसाभीमविक्रमाः।वानराश्चमहात्मानःसमुत्पाट्यमहाद्रुमान्
१४ रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन्।हनुमान्शैलशृंगाणिवृक्षांश्चविविधान्बहून् १५ ववर्षकुंभकर्णस्यशिरस्यंबरमास्थितः।तानिपर्वतशृंगाणिशूला
ग्रेणबिभेदसः १६ बभंजवृक्षवर्षंचकुंभकर्णोमहाबलः १७ ततोहरीणांतदनीकमुग्रंदुद्रावशूलंनिशितंप्रगृह्य।तस्थौततोस्यापततःपुरस्तान्महीधराग्रंहनुमान्प्रगृह्य
१८ सकुंभकर्णंकुपितोजघानवेगेनशैलोत्तमभीमकायं।सचुक्षुभेतेनतदाभिभूतोमहार्द्रगात्रोरुधिरावसिक्तः १९ सशूलमाविध्यतडित्प्रकाशंगिरिर्यथाप्रज्वलिताग्रशृंगं।बाहं
तरेमारुतिमाजघानगुहोऽचलंक्रौंचमिवोग्रशक्त्या २० सशूलनिर्भिन्नमहाभुजांतरःप्रविह्वलःशोणितमुद्वमन्मुखात्।ननादभीमंहनुमान्महाहवेयुगांतमेघस्तनितस्वनोपम
२१ ततोविनेदुःसहसाप्रहृष्टारक्षोगणास्तंव्यथितंसमीक्ष्य।प्लवंगमास्तुव्यथिताभयार्ताःप्रदुद्रुवुःसंयतिकुंभकर्णात् २२ ततस्तुनीलोबलवान्पर्यवस्थापयन्बलं।नीलश्चिक्षे
पशैलाग्रंकुंभकर्णायधीमते २३ तमापतंतंसंप्रेक्ष्यमुष्टिनाभिजघानह।मुष्टिप्रहाराभिहतंतच्छैलाग्रंव्यशीर्यत। २४

पवापव्।ममर्देति।तानिचसिद्धानि।अन्यत्।गिरेःशिरः अत्रापिविक्षेपेतियोजनीयं॥ ॥

यु० ८२ सवानरसहस्रैरिति।विचितःव्याप्तः ३४ आत्मरुहैःतनूरुहैः ३५ प्रभग्नानीति।वज्रहस्तात्मजात्मजःअंगदइत्यर्थः ४३

सविस्फुलिंगंसज्वालंनिपपातमहीतले।अमर्षःशरभोनीलोगवाक्षोगंधमादनः २५ पंचवानरशार्दूलाःकुंभकर्णमुपाद्रवन्।शैलैर्वृक्षैस्तलैःपादैर्मुष्टिभिश्चाभितस्तदा २६ कुंभ
कर्णंमहाकायंनिजघ्नुस्तेमहाबलाः।स्पर्शानिवप्रहारांस्तान्वेदयानोनविव्यथे २७ ऋषभंतुमहावेगंबाहुभ्यांपरिषस्वजे।कुंभकर्णभुजाभ्यांतुपीडितोवानरर्षभः २८ निपपातर्षभो
भूमौवक्त्राद्वांतशोणितः।मुष्टिनाशरभंहत्वाजानुनानीलमाहनन् २९ आजघानगवाक्षंचतलेनेंद्ररिपुस्तदा।दत्तप्रहाराव्यथितामुमुहुःशोणितोक्षिताः ३० निपेतुस्तेतुमे
दिन्यांनिकृत्ताइवकिंशुकाः।तेषुवानरमुख्येषुपतितेषुमहात्मसु ३१ वानराणांसहस्राणिकुंभकर्णंप्रदुद्रुवुः।तंशैलमिवशैलाभाःसर्वेतुप्लवगर्षभाः ३२ समारुह्यसमु
त्पत्यदंशुःप्लवगर्षभाः।तान्नखैर्दशनैश्चापिमुष्टिभिर्बाहुभिस्तथा ३३ कुंभकर्णंमहाबाहुंनिजघ्नुःप्लवगर्षभाः।सवानरसहस्रैस्तैर्विचितःपर्वतोपमः ३४ रराजराक्षसव्याघ्रो
गिरिरात्मरुहैरिव।बाहुभ्यांवानरान्सर्वान्प्रगृह्यसुमहाबलः ३५ भक्षयामासरुष्टोगरुडःपन्नगानिव।प्रक्षिप्ताःकुंभकर्णेनवक्त्रेपातालसन्निभे ३६ नासापुटाभ्यांनिर्जग्मुः।
कर्णाभ्यांचैववानराः।भक्षयन्भृशसंक्रुद्धोहरीन्पर्वतसन्निभान् ३७ बभंजवानरान्सर्वान्संक्रुद्धोराक्षसोत्तमः।मांसशोणितसंक्लेदांकुर्वन्भूमिंसराक्षसः ३८ चचारहरिसै
न्येषुकालाग्निरिवमूर्छितः।वज्रहस्तोयथाशक्रःपाशहस्तोयथांतकः ३९ शूलहस्तोबभौतस्मिन्कुंभकर्णोमहाहवे।यथाशुष्काण्यरण्यानिग्रीष्मेदहतिपावकः ४० त
थावानरसैन्यानिकुंभकर्णोददाहसः।ततेवध्यमानाहतयूथाविनायकाः ४१ वानराभयसंविग्नाविनेदुर्विस्वरंभृशं।अनेकशोवध्यमानाःकुंभकर्णेनवानराः ४२ रा
घवंशरणंजग्मुर्व्यथिताःखिन्नचेतसः।प्रभग्नान्वानरान्दृष्ट्वावज्रहस्तात्मजात्मजः ४३ अभ्यधावतवेगेनकुंभकर्णंमहाहवे।शैलशृंगंमहद्गृह्यविनदन्सनुहुर्मुहुः ४४ त्रास
यन्राक्षसान्सर्वान्कुंभकर्णपदानुगान्।चिक्षेपशैलशिखरंकुंभकर्णस्यमूर्धनि ४५ सतेनाभिहतस्तेनशैलेनेंद्ररिपुस्तदा।कुंभकर्णःप्रजज्वालकोपेनमहतातदा ४६ सो
भ्यधावतवेगेनवालिपुत्रममर्षणः।कुंभकर्णोमहानादस्त्रासयन्सर्ववानरान् ४७ शूलंससर्जवैरोषादंगदेतुमहाबलः।तमापतंतंबलवान्युद्धमार्गविशारदः ४८ राम
लाघवान्मोक्षयामासबलवान्वानरर्षभः।उत्पत्यचैनंतरसातलेनोरस्यताडयत् ४९ सतेनाभिहतःकोपात्प्रमुमोहाचलोपमः।सलब्धसंज्ञोबलवान्मुष्टिंसंगृह्यरा ८२
क्षसः ५० अपहासेनविक्षेपविसंज्ञःसपपातह।तस्मिन्प्लवगशार्दूलेविसंज्ञेपतितेभुवि ५१

श्लाघते रूपौत्रहति। चतुर्दश्वत्सलत्नं भग्ननितत्क्ष स्वरतः पुत्रत्वा सुग्रीवस्य वइत्यपौत्रत्वं। स्वरति। वालिविधातो लपित्वा। सत्तमिति। उच्छ्रितपोरथेगाः उच्छ्रितानि। उच्चनानि। पोरगाणि तं

तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे। तमापतंतं संप्रेक्ष्य कुंभकर्णं महाबलं ५२ उत्पपात महावेगः सुग्रीवो वानराधिपः। स पर्वताग्रमुत्क्षिप्य समाविध्य महाकपिः ५३
अभिदुद्राव वेगेन कुंभकर्णं महाबलः। तमापतंतं संप्रेक्ष्य कुंभकर्णः प्लवंगमं ५४ तस्थौ विवृतसर्वांगो वानरेंद्रस्य संमुखः। कपिशोणितदिग्धांगं भक्षयंतं महाकपीन् ५५
कुंभकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत्। पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करं ५६ भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः। त्यज तद्वानरानीकं प्राकृतैः किं करिष्य
सि ५७ सहस्वैकं निपातं मे पर्वतस्यास्य राक्षस। तद्वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितं ५८ श्रुत्वा राक्षसशार्दूलः कुंभकर्णोऽब्रवीद्वचः। प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः ५९
श्रुतपौरुषसंपन्नस्तस्माद्गर्जसि वानर। स कुंभकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच। तेनाजघानोरसि कुंभकर्णं शैलेन वज्राशनिसंनिभेन ६१ तच्छैलशृंगं सहसा
विभिन्नं भुजांतरे तस्य तदा विशाले। ततो विषेदुः सहसा प्लवंगमा रक्षोगणाश्चापि मुदा विनेदुः ६२ स शैलशृंगाभिहतश्चुकोप ननाद कोपाच्च विवृत्य वक्त्रं॥ व्याविध्य शूलं स
तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ६३ तत्कुंभकर्णस्य भुजाप्रविद्धं शूलं शितं कांचनदामजुष्टं। क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभंज वेगेन सुतोऽनिलस्य ६४ कृतं
भारसहस्रस्य शूलं कालायसं महत्। बभंज तन्तु मारोधि प्रीतः सर्वः प्लवंगमः ६५ शूलं भग्नं हनुमता दृष्ट्वा सा हरिवाहिनी। हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे ६६ सिंह
नादं च ते चक्रुः प्रहृष्टा वनगोचराः। मारुतिं पूजयामासुर्दृष्ट्वा शूलं द्विधाकृतं ६७ स तत्तथा भग्नमवेक्ष्य शूलं चुकोप रक्षोधिपतिर्महात्मा। उत्पाट्य लंकामलयात्स शृंगं ज
घान सुग्रीवमुपेत्य तेन ६८ स शैलशृंगाभिहतो विसंज्ञः पपात भूमौ युधि वानरेंद्रः। तं वीक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ६९ तमभ्युपेत्याद्भुतघोरवी
र्यं स कुंभकर्णो युधि वानरेंद्रं। जहार सुग्रीवमभिप्रगृह्य यथानिलो मेघमिव प्रचंडः ७० स तं महामेघनिकाशरूपमुत्पाट्य गच्छन्युधि कुंभकर्णः। रराज मेरुप्रतिमानरूपो
मेरुर्यथात्युच्छ्रितघोरशृंगः ७१ ततः समादाय जगाम वीरः संस्तूयमानो युधि यातुधानैः। शृण्वन्निनादं त्रिदशालयानां प्लवंगराजग्रहविस्मितानां ७२ ततः समादा
य तदा स मेने हरींद्रमिंद्रोपममिंद्रवीर्यः। अस्मिन्हृते सर्वमिदं हृतं स्यात्सराघवं सैन्यमितींद्रशत्रुः ७३ विद्रुतां वाहिनीं दृष्ट्वा वानराणां ततस्ततः। कुंभकर्णेन सुग्रीवं गृहीतं
च हरीश्वरं ७४ हनूमांश्चिंतयामास मतिमान्मारुतात्मजः। एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत् ७५ यद्वै न्याय्यं मया कर्तुं तत्करिष्यामि सर्वथा। भूत्वा पर्वतसंकाशो
नाशयिष्यामि राक्षसं ७६

ग्रणिपस्पसः। तत इति। त्रिदशालयानां। त्रिदशालयस्थानां ॥ ॥

यु० ८३

अथवा स्वयमिति। सासुरोरगैस्त्रिदशैः। गृहीतोपि अयं मोक्षं प्राप्नुयादिति। किंपुनरनेन राक्षसेन। अपथ्यं देहनिग्रहः। तर्ह्यात्मानं मोचयित्वा किमिति न निवर्तेत इत्यत्राह मन्य इति। तथापि
रूक्षणात्स्वामी भृत्येनावश्यं मोचयितव्य इत्याशंक्याह। मयात्विति। स कुंभकर्ण इति। पुष्पाग्र्यवर्षैः। अग्र्यकुसुमवृष्टिभिः। एवं गृहीतइति। संप्रतिकर्तुं। सम्यक्प्रतिकर्तुं। नामइति।

मयाहते संयति कुंभकर्णे महाबले मुष्टिविशीर्णदेहे। विमोचिते वानरपार्थिवे च भवेत्सुहृष्टाः प्लवगाः समग्राः ७७ अथवा स्वयमप्येष मोक्षं प्राप्स्यति पार्थिवः। गृहीतोयं यदि
भवेत्त्रिदशैः सासुरोरगैः ७८ मन्ये न तावदात्मानं बुध्यते वानराधिपः। शैलप्रहाराभिहतः कुंभकर्णेन संयुगे ७९ अयं मुहूर्तात्सुग्रीवो लब्धसंज्ञो महाहवे। आत्मनो वानराणां
च यत्पथ्यं तत्करिष्यति ८० मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः। अप्रीतिश्च भवेत्कष्टा कीर्तिनाशश्च शाश्वतः ८१ तस्मान्मुहूर्तं कांक्षिष्ये विक्रमं पार्थिवस्य नः। भिन्नं
च वानरानीकं तावदाश्वासयाम्यहं ८२ इत्येवं चिंतयित्वा तु हनूमान्मारुतात्मजः। भूयः संस्तंभयामास वानराणां महाचमूं। ८३ स कुंभकर्णोथ विवेश लंकां स्फुरंतं
आदाय महाहरिं तं। विमानचर्यागृहगोपुरस्थैः पुष्पाग्र्यवर्षैरभिपूज्यमानः ८४ पुष्पाग्र्यगंधोदवर्षैस्तु सिच्यमानः शनैः शनैः॥ राजवीथ्यास्तु शीतत्वात्संज्ञां लेभे ह
रीश्वरः ८५ ततः स संज्ञामुपलभ्य कृच्छ्राद्बलीयसस्तस्य भुजांतरस्थः। अवेक्षमाणः पुरराजमार्गं विचिंतयामास मुहुर्महात्मा ८६ एवं गृहीतेन कथं नु नाम शक्यं
मया संप्रतिकर्तुमद्य॥ तथा करिष्यामि यथा हरीणां भविष्यतीष्टं च हितं च कार्यं ८७ ततः कराग्रैः सहसाभिपत्य राजा हरीणाममरेंद्रशत्रुं। खरैश्च कर्णौ दशनैश्च
नासां ददंश पादैर्विददार पार्श्वं ८८ स कुंभकर्णो हृतकर्णनासो विदारितस्तेन नखैर्दंतैश्च। रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाविध्य पिपेष भूमौ ८९ स भूतले
भीमबलेन पिष्टः सुरारिभिस्तैरभिहन्यमानः। जगाम खं कंदुकवज्जवेन पुनश्च रामेण समाजगाम ९० कर्णनासाविहीनस्तु कुंभकर्णो महाबलः। रराज शोणितो
त्सिक्तो गिरिः प्रस्रवणैरिव ९१ शोणिताद्रमहाकायो राक्षसो भीमदर्शनः। युद्धायाभिमुखो भूयो मनश्चक्रे महाबलः ९२ अमर्षाच्छोणितोद्गारी शुशुभे रावणा
नुजः। नीलांजनगिरिप्रख्यः ससंध्य इव तोयदः ९३ गते तु तस्मिन्सुरराजशत्रुः क्रोधात्प्रदुद्राव रणाय भूयः। अनायुधोस्मीति विचिंत्य रौद्रो घोरं तदा मुद्गरमा
ससाद ९४ ततः स पुर्याः सहसा महात्मा निष्क्रम्य तद्वानरसैन्यमुग्रं। तेनैव रूपेण बभंज दुष्टः प्रहारमुष्ट्या च पदेन सद्यः ९५ बभक्ष रक्षो युधि कुंभकर्णः प्रजा यु
गांताग्निरिव प्रदीप्तः। बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रं ९६ राम ८३

खरैः। तीक्ष्णैः। कराग्रैः। करनखैः। कर्णौ समेत्य संदंष्टेत्यर्थः। पादैः। पादनखैः। पार्श्वेषु च कुंभकर्णमिति पाठे। पार्श्वेषु। कपोलयोः संयोरुदरपार्श्वयोश्च पादाभ्यां विददारे
तिशेषः॥ ॥

संप्रस्रवदिति। शोणितं भक्षितानां वानरादीनां। संबंधि संप्रस्रवत्। तालुस्था भुद्धमन्। ते भक्ष्यमाणा इति। गतिं शरणं ॥ ॥

चैरवाहुरसां सिंहीनृपिशाचाननरान्बहून्महाधुषिकुंभकर्णः। पपैवमृत्युर्हरते युगांते संभक्षयामास तथा हरीश्वरान्: ९७ एकं द्वौ त्रीन्बहून्क्रुद्धो वानरान्सहराक्षसैः। स
मादाय करहस्तेन प्रचिक्षेप मुखे त्वरन् ९८ संप्रस्रवंस्तदा मेदः शोणितं च महाबलः। वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान् ९९ ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा ग
तिं। कुंभकर्णो भृशं क्रुद्धः कपीन्खादन्प्रधावति १०० शतानि सप्त चाष्टौ च विंशत्त्रिंशत्तथा। संपरिष्वज्य बाहुभ्यां भक्षयन्परिधावति १०१ मेदोवसाशोणितदिग्ध
गात्रः कर्णावसक्तग्रथितान्त्रमालः। ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः कालो युगान्तस्थ इव प्रवृद्धः॥ १०२ तस्मिन्काले सुमित्रायाः पुत्रः परबलार्दनः। चकार लक्ष्मणो युद्धं बद्ध
गोधांगुलित्रवान् ३ स कुंभकर्णस्य शरान् शरीरे सप्तवीर्यवान्। निचखानाददे वान्यान्विससर्ज च लक्ष्मणः ४ पीड्यमानस्तदास्त्रं तु विशेषेहे तं स राक्षसः। ततश्चुकोप बलवा
न्सुमित्रानंदवर्द्धनः ५ अथास्य कवचं शुभ्रं जांबूनदमयं शुभं। प्रच्छादयामास शरैः संध्याभ्रमिव मारुतः ६ नीलांजनचयप्रख्यः शरैः कांचनभूषणैः आपीड्यमानः
शुशुभे मेघैः सूर्य इवांशुमान् ७ ततः स राक्षसो भीमः सुमित्रानंदवर्द्धनं। सावज्ञमेव प्रोवाच वाक्यं मेघौघनिःस्वनः ८ अंतकस्यापि क्रुद्धस्य विजेतारमाहवे। युध्यता मामभी
तेन ख्यापिता वीरता त्वया ९ प्रगृहीतायुधस्येह मृत्योरिव महामृधे। तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः १० ऐरावतसमारूढो वृतः सर्वामरैः प्रभुः। नैव शक्रोपि समरे स्थि
तपूर्वः कदाचन ११ अद्य त्वयाहं सौमित्रे बलेनापि पराक्रमैः। तोषितो गंतुमिच्छामि त्वामनुज्ञाप्य राघवं १२ यत्तु वीर्यबलोत्साहैस्तोषितोहं रणे त्वया। राममेवैकमिच्छामि हं
तुं यस्मिन्हते हतं १३ रामे मयाद्य निहते ये न्ये स्थास्यंति संयुगे। तानहं योधयिष्यामि स्वबलेन प्रमाथिना १४ इत्युक्तवाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितं। मृधे घोरतरं वाक्यं सौ
मित्रिः प्रहसन्निव १५ यत्त्वं शक्रादिभिर्देवैरसह्यं प्राप्य पौरुषं। तत्सत्यं नान्यथा वीर दृष्टस्तेद्य पराक्रमः १६ एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः इति श्रुत्वा ह्यनादृ
त्य लक्ष्मणं स निशाचरः १७ अतिक्रम्य तु सौमित्रिं कुंभकर्णो महाबलः॥ राममेवाभिदुद्राव दारयन्निव मेदिनीं १८ अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन्। कुंभ
कर्णस्य हृदये ससर्ज निशितान्छरान् १९ तस्य रामेण विद्धस्य सहसा अभिप्रधावतः। अंगारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः २० रामास्त्रविद्धो घोरं नदन्राक्षसपुंगवः।
अभ्यधावत्संक्रुद्धो हरीन्विद्रावयन्रणे २१ तस्योरसि निमग्नाश्च शरा बर्हिणवाससः। रेजुर्नीलाद्रिकटके संततइव बर्हिणः २२

यु॰ ८४ आघायमिति॥ भारः। वानराणां हरणं भारः। जिह्वयेति। कालांतकयमोपमं रुद्रस्त्रिनेत्रस्त्रिपुरांतके निवृत्त एकस्यैवावस्थाभेदात्कालादीनां भेदः॥ ॥ रामायनमः॥ ॥
हस्तात्तस्यावशात्त्रस्ता पपातोर्व्यां महागदा। आयुधानि च सर्वाणि विप्रकीर्यंत भूतले २३ स निरायुधमात्मानं यदा मेने महाबलः। मुष्टिभ्यां चक्रपाणिभ्यां चकार कदनं महत्
२४ स बाणैरतिविद्धांगः क्षतजेन समुक्षितः। रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा २५ स तीव्रेण च कोपेन रुधिरेण च मूर्छितः। वानरान्राक्षसानृक्षान्खादन्
स परिधावति २६ अद्रिशृंगं समाविध्य भीमं भीमपराक्रमः। चिक्षेप राममुद्दिश्य बलवानंतकोपमः २७ अप्राप्तमेतं रामः सप्तभिस्तैरजिह्मगैः। चिच्छेद गिरिशृंगं
तं पुनः संधाय कार्मुकं। ततस्तु रामो धर्मात्मा तस्य वर्म महद्दृढं २८ शरैः कांचनचित्रांगैश्चिच्छेद भरताग्रजः। तन्मेरुशिखराकारं द्योतमानमिव श्रिया २९ द्वे शते वा
नरेंद्राणां पतमानमपातयत्। तस्मिन्काले तु धर्मात्मा लक्ष्मणो राममब्रवीत् ३० कुंभकर्णवधे युक्तो योगान्परिमृशन्बहून्। नैवायं वानरान्राजन्न विजानाति रा
क्षसान् ३१ मत्तः शोणितगंधेन स्वान्परांश्चापि खादति। साध्वेनमधिरोहंतु सर्वे ते हरियूथपाः ३२ यूथपाश्च यथा मुख्यास्तिष्ठंत्वस्य समंततः ३३ अद्यायं दुर्मतिः
काले हरिभारप्रपीडितः। प्रपतेद्राक्षसो भूमौ नान्यान्हन्यात्प्लवंगमान् ३४ तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः। ते समारुरुहुर्हृष्टाः कुंभकर्णं प्लवंगमाः ३५ कुंभक
र्णस्तु संक्रुद्धः समारूढः प्लवंगमैः। व्यधूनयत्तान्वेगेन दुष्टहस्तीव हस्तिपान् ३६ तान्दृष्ट्वा निर्धुतान्रामो रुष्टोऽयमिति राक्षसः। समुत्पपात वेगेन धनुश्चोत्तममाददे ३७ को
धरक्तेक्षणो वीरो निर्दहन्निव चक्षुषा। राघवो राक्षसं वेगादभिदुद्राव वेगितः ३८ यूथपान्हर्षयन्सर्वान्कुंभकर्णभयार्दितान् ३९ स चापमादाय भुजंगकल्पं दृढज्यमुग्रं
तपनीयचित्रं। हरीन्समाश्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ४० स वानरगणैस्तैस्तु वृतः परमदुर्जयः। लक्ष्मणानुचरो रामः संप्रतस्थे महाबलः ४१ स ददर्श म
हात्मानं किरीटिनमरिंदमं। शोणिताप्लुतरक्ताक्षं कुंभकर्णं महाबलं ४२ हरीन्समभिधावंतं यथा रुष्टं दिशागजं। मार्गमाणं हरीन्क्रुद्धं राक्षसैः परिवारितं॥ ४३ विंध्यमं
दरसंकाशं कांचनांगदभूषणं। स्रवंतं रुधिरं वक्त्राद्वर्षमेघमिवोत्थितं ४४ जिह्वया परिलिह्यंतं सृक्किणी शोणितोक्षिते। मृद्नंतं वानरानीकं कालांतकयमोपमं ४५ तं दृ
ष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसं। विस्फारयामास तदा कार्मुकं पुरुषर्षभः ४६ स तस्य चापनिर्घोषात्कुपितो राक्षसर्षभः। अमृष्यमाणस्तं घोषमभिदुद्राव राघ राम ८४
वं ४७ ततस्तु वातोद्धतमेघकल्पं भुजंगराजोत्तमभोगबाहुं। तमापतंतं धरणीधराभमुवाच रामो युधि कुंभकर्णं ४८

आगच्छेतिमामांत्रविषादं विषादरहितं। रामोयमितिविज्ञायेति राममेव वचनेनेति। विकर्णनासइत्येतावन्मात्रेणमामवज्ञातुं दुर्बलस्त्वमितिमंतुं नार्हसीति हितिरा धारिवरहली लथालय

आगच्छरक्षोधिपमाविषादमवस्थितोहंप्रगृहीतचापः। अवेहिमांशक्रसपत्नरामंमयंमुहूर्ताद्भविताविचेताः ४५ रामोयमितिविज्ञायजहासविकृतस्वनं। अभ्यधावत
संक्रुद्धोहरीन्विद्रावयन्रणे ४६ दारयन्निवसर्वेषांहृदयानिवनौकसां। प्रहस्यविकृतंभीमंसमेघस्तनितोपमं ४७ कुंभकर्णोमहातेजाराघवंवाक्यमब्रवीत्॥ नाहंविरा
धोविज्ञेयोनकबंधःखरोनच ४८ नवालीनमारीचःकुंभकर्णोहमागतः। पश्यमेमुद्गरंभीमंसर्वकालायसंमहत् ४९ अनेननिर्जितादेवादानवाश्चपुरामया
॥विकर्णनासइतिमांनावज्ञातुंत्वमर्हसि ५० स्वल्पापिहिनमेपीडाकर्णनासाविकर्तनात्॥ दर्शयेक्ष्वाकुशार्दूलवीर्यंगात्रेषुमेनघ ५१ ततस्त्वांभक्षयिष्यामिदृष्टपौरु
षविक्रमं। सकुंभकर्णस्यवचोनिशम्यरामःसुपुंखान्विससर्जबाणान्॥ तैराहतोवज्रसमानवेगैर्नचुक्षुभेनव्यथतेसुरारिः ५३ यैःसायकैःसालवरानिकृत्तावाली
हतोवानरपुंगवश्च। तेकुंभकर्णस्यतदाशरीरंवज्रोपमानव्यथयांप्रचक्रुः ५४ सवारिधाराइवसायकांस्तान्पिबन्शरीरेणमहेंद्रशत्रुः। जघानरामस्यशरप्रवेगं।
व्याविध्यतंमुद्गरमुग्रवेगं ५५ ततस्तुरक्षःक्षतजानुलिप्तंवित्रासनंदेवमहाचमूनां। व्याविध्यतंमुद्गरमुग्रवेगंविद्रावयामासचमूंहरीणां ५६ वायव्यमादायततोवराम
हास्त्रंरामःप्रचिक्षेपनिशाचराय। समुद्गरंतेनचकर्तबाहुंसकृत्तबाहुस्तुमुलंननाद ५७ सतस्यबाहुर्गिरिशृंगकल्पःसमुद्गरोराघवबाणकृत्तः॥ पपाततस्मिन्हरि
राजसैन्येजघानतांवानरवाहिनींच ५८ तेवानराभग्नहतावशेषाःपर्यंतमाश्रित्यतदाविषण्णाः॥ प्रवेपितांगाददृशुःसुघोरंनरेंद्ररक्षोधिपसन्निपातं ५९ सकुंभकर्णो
स्त्रनिकृत्तबाहुर्महान्निकृत्ताग्रइवाचलेंद्रः। उत्पाटयामासकरेणसालंततोभिदुद्रावरणेनरेंद्रं ६० तंतस्यबाहुंसहसालवृक्षंसमुद्यतंपन्नगभोगकल्पं। ऐंद्रास्त्रयुक्तेनजघान
रामोबाणेनजांबूनदचित्रितेन ६१ सकुंभकर्णस्यभुजोनिकृत्तःपपातभूमौगिरिसन्निकाशः। विवेष्टमानोनिजघानवृक्षान्शैलान्शिलावानरराक्षसांश्च ६२ तंछिन्न
बाहुंसमवेक्ष्यरामःसमापतंतंसहसानदंतं। द्वावर्धचंद्रौनिशितौप्रगृह्यचिच्छेदपादौयुधिराक्षसस्य ६३ तौतस्यपादौप्रदिशोदिशश्चगिरीन्गुहांश्चैवमहार्णवंच॥ लं
कांचसेनांकपिराक्षसानांविनादयंतौविनिपेततुश्च ६४ निकृत्तबाहुर्विनिकृत्तपादोविदार्यवक्त्रंवडवामुखाभं। दुद्राववरामंसहसाभिगर्जन्राहुर्यथाचंद्रमिवांतरिक्षे ६५
अपूरयत्तस्यमुखंशिताग्रैरामःशरैर्हेमपिनद्धपुंखैः। सपूर्णवक्त्रोनशशाकवक्तुंचुकूजकृच्छ्रेणमुमोहचापि ६६

दर्पोधःदर्शयेक्ष्वाकुशार्दूलेतस्यधातोनिकार्थःस्पष्टः। वक्ष्यतस्त्वा। हेइक्ष्वाकुशार्दूलमेगात्रेषुवीर्यंदर्शय। ततःदृष्टपौरुषविक्रमंत्वामसाधमन्वानरतिशेषः। भक्षयिष्यामि

यथापूर्वंवानरानितिशेषः। तौतस्यपादावितिा विनादयंतौदिशादीन्प्रतिध्वनयंतावित्यर्थः॥

यु॰ ८५ अथाददइति। अरिष्टं रिपूणामशुभप्रदं। अरिष्टं तु शुभाशुभमित्यमरः। कुंभकर्णशिर इति। कन्नेनवेगात् गगनेस्थितं सत् कुंभकर्णशिरः। आदित्ये आदितिदेवताके पुनर्वसुनक्षत्रे।
आव अभ्युदिते तन्मध्यगतश्चंद्रमा इव भातीत्यर्थः। कुंडलस्य व्यतिरिक्तकर्णप्रदेशयोः सुग्रीवेण गृहीतत्वात् कुंभकर्णशिरः कुंडलालंकृतं भातीति भावः। पद्य। कुंभकर्णशिरः कुंडला
लंकृतं कुंडलाभ्यामलंविनाकृतं सत्। आदित्ये अभ्युदिते सति अरुणो अहनि मध्यःस्थगगनमध्यस्थ चंद्रमा इव भीतात्पन्वय इत्यप्रकृति। लंवमाना नं कोघः। को

अथाददे सूर्यमरीचिकल्पं स ब्रह्मदंडांतककालकल्पं। अरिष्टमैंद्रं निशितं सुपुंखं रामः शरं मारुततुल्यवेगं ६७ तं वज्रजांबूनदचारुपुंखं प्रदीप्तसूर्यज्वलनप्रकाशं। महें
द्रवज्राशनितुल्यसारं रामः प्रचिक्षेप निशाचराय ६८ स सायको राघवबाहुचोदितो दिशः स्वभासा दश संप्रकाशयन्। विधूमवैश्वानरदीप्तदर्शनो जगाम शक्रा
शनितुल्यवेगः ६९ स तं महापर्वतकूटसंनिभं विवृत्तदंष्ट्रं चलचारुकुंडलं। चकर्त रक्षोधिपतेः शिरस्तदा यथैव वृत्रस्य पुरा पुरंदरः ७० कुंभकर्णशिरो भाति कुंडला
लंकृतं महत्। आदित्ये भ्युदिते रात्रौ मध्यस्थ इव चंद्रमाः ७१ तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतकूटकल्पं। बभंज चर्यागृहगोपुराणि प्राकारमुच्चं तमपा
तयच्च ७२ न चातिकायं हिमवत्प्रकाशं रक्षस्तदा तोयनिधौ पपात। ग्राहान्वरान्मीनवरान्भुजंगमान्ममर्द भूमिं च समाविवेश ७३ तस्मिन्हते ब्राह्मणदेवशत्रौ
महाबले संयति कुंभकर्णे। चचाल भूर्भूमिधराश्च सर्वे हर्षाच्च देवास्तुमुलं प्रणेदुः ७४ ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भूतानि सुपर्णगुह्यकाः। सयक्षगंधर्व
गणा नभोगताः प्रहर्षिता रामपराक्रमेण ७५ ततस्तु ते तस्य वधेन भूरिणा मनस्विनो नैर्ऋतराजबांधवाः। विनेदुरुच्चैर्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा सुरार्दिताः॥
७६ स देवलोकस्य तमो विहत्य सूर्यो यथा राहुमुखाद्विमुक्तः। तथा व्यभासीद्धरिसैन्यमध्ये निहत्य रामो युधि कुंभकर्णं ७६ प्रहर्षमीयुर्बहवस्तु वानराः प्रबुद्धप
द्मप्रतिमैरिवाननैः। अपूजयन्राघवमिष्टभागिनं हते रिपौ भीमबले दुरासदे ७७ स कुंभकर्णं सुरसैन्यमर्दनं महत्सु युद्धेष्वजितं कदाचन। ननंद हत्वा भरताग्रजो रणे
महासुरं वृत्रमिवामराधिपः ७८ इत्यार्षे रामायणे सप्तषष्टितमः सर्गः। कुंभकर्णवधेन सप्तमः प्रहारः समाप्तः॥ ॥

टी॰। कायेन विनिपातपक्षे तु कुंभकर्णो न्यपतदिति संबंधः ततः कृतइति। सुरार्दिताः राक्षसाः। हरिं समीक्ष्यैव नैर्ऋतबांधवाः रघूत्तमं समीक्ष्य। व्यथिता विनेदुरिति संबंधः। प्र राम ८५
हर्षमिति। प्रबुद्धपद्मप्रतिमैरिवाननैः। इत्यत्र प्रतिमाशब्दो रूपवः चकः। अन्यथा इवशब्दो निरर्थकः॥ ॥सप्तम्यां कुंभकर्णवधः॥ सप्तमः प्रहारः समाप्तः॥ ॥इति श्रीमहे
श्वरतीर्थविरचितरामायणतत्त्वदीपिकायां युद्धकांडे सप्तषष्टितमः सर्गः पूर्वभागः समाप्तः॥ ॥

परतिमापन्नात्रप्रहृष्टाः शास्त्रं कुंभकर्णं हतं दृष्ट्वेत्यस्य श्लोकस्य चतुर्विंशतितमासर्गेणायद्यत्नेनेन संगृह्णाति प्रतपित्वेत्यादि श्लोकत्रयमेकं वाक्यं। पर्वतोपमः कुंभकर्णः मुहूर्तं प्रतपित्वा। विक्रम्य
निकृत्तकण्ठोरुभुजो विक्षरन्रुधिरं यथा भवति तथा काकुत्स्थशरपीडितो दावदग्धद्रुम इव अगंडभूतः पिंडीभूतः। अगंड अगदृशो वा। अगंडो जगरोगेत्ते यद्गतिनि स्वेदुः। विकोनेः विकृतशरीरः। अर्ध
द्वप्रविष्टेन कायेन समुद्रं रुद्ध्वा शरीरेण शरीरोपरिभागेन। लंकायाद्वारं रुद्ध्वा राममतेन तेन सा प्रशान्त इत्यन्वयः। इदानीमिति। सुरासुरान्। सुरासुरेभ्यः। ध्रुवमिति। लब्धलक्षाः। लब्धावसरा इत्यर्थः।

अत्रगापत्नीपरति॥ कुंभकर्णं हतं दृष्ट्वा राघवेण महात्मना। राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् १ राजन्स कालसंकाशः संयुक्तः कालधर्मणा। विद्राव्य वानरीं सेनां भक्षयित्वा
च वानरान् २ प्रतपित्वा मुहूर्तं तु प्रशान्तो राम तेजसा। कायेनार्द्धप्रविष्टेन समुद्रं भीमदर्शनं ३ निकृत्तकण्ठोरुभुजो विक्षरन्रुधिरं बहु। रुद्ध्वा द्वारं शरीरेण लंकायाः पर्वतोपमः ४
कुंभकर्णस्तव भ्राता काकुत्स्थशरपीडितः। अगंडभूतो विवृतो दावदग्ध इव द्रुमः ५ श्रुत्वा विनिहतं संख्ये कुंभकर्णं महाबलं। रा
वणः शोकसंतप्तो मुमोह च पपात च ६ पितृव्यं निहतं श्रुत्वा देवान्तकनरान्तकौ। त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः ७ भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकर्म
णा॥ महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः ८ ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः। कुंभकर्णवधाद्दीनो विललाप स रावणः ९ हा वीर रिपुदर्पघ्न कुंभकर्ण महाब
लः। त्वं मां विहाय वै दैवाद्यातोसि यमसादनं १० मम शल्यमनुद्धृत्य बांधवानां महाबल शत्रुसैन्यं प्रताप्यैकः क्व मां संत्यज्य गच्छसि ११ इदानीं खल्वहं नास्मि यस्य मे दक्षिणो भुजः
। पतितो यं समाश्रित्य न बिभेमि सुरासुरात् १२ कथमेवंविधो वीरो देवदानवदर्पहा॥ कालाग्निप्रतिमो ह्यद्य राघवेण रणे हतः १३ यस्य ते वज्रनिष्पेषो न कुर्याद्व्यसनं सदा। स
कथं रामबाणार्त्तः प्रसुप्तोसि महीतले १४ एते देवगणाः सार्द्धं ऋषिभिर्गगने स्थिताः। निहतं त्वां रणे दृष्ट्वा निनदंति प्रहर्षिताः १५ ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवंगमाः
। आरोक्ष्यंतीह दुर्गाणि लंकाद्वाराणि सर्वशः १६ राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया॥ कुंभकर्णविहीनस्य जीविते नास्ति मे रतिः॥ यद्यहं भ्रातृहंतारं न हन्मि युधि राघ
वं॥ ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितं १८

१८ यद्यहमिति। भ्रातृहंतारं न हन्मि यदि तदा इदं व्यर्थजीवितं श्रेयो न नैवेत्यर्थः। किंतु मरणमेव श्रेयो नन्वि
तिसंबंधः। यद्यहमित्यस्य वास्तवार्थस्तु। भ्रातृहंतारं हत्वा सुखेन जीवेयमित्याह। यदिति। भ्रातृहंतारं राघवं हन्मि यदि तदा मे मम मरणं नास्ति अत एव श्रेयः। मरणानंतरभाविभगवद्दत्ता
दत्ताशाश्वितसुखश्रेयस्तु नास्ति अत एव इदं जीवितं व्यर्थमिति संबंधः॥ ॥

पु॰
८६

अद्यैवेति। आत्मनिति बहुवचनं पूज्यायां विभीषणवचः इति प्रहस्तकुंभकर्णयोर्वधात्पूर्वं विना श्रेयो यावत्पदार्थसमुत्पन्नः ततश्चारभ्य विभीषणवचो मां व्रीडयतीति संबंधः॥ इ
तीतिकुंभकर्णम्। इति हतं कुंभकर्णं रघुनंदनाघुक्त प्रकारेण दिविजवधं ज्ञात्वा विदित्वा बहु विलप्य न्यपतदिति संबंधः॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे षष्ठितमः॥
सर्गः॥ ॥ एवमिति। एवमेव महावीर्यः देवदानवदर्पहा। कालं प्रियं तिमहत्त्वात् कुंभकर्णप्रकारेण महावीर्यः हतः देवादितिशोयः॥ सत्पुरुषाः॥ प्रभुः॥ शंबरइति। नरकादि इस्तु

अद्यैवं तं गमिष्यामि देशं यत्रानुजो मम। नहि भ्रातॄन्समुत्सृज्य क्षणं जीवितुमुत्सहे १९ देवा हि मां हसिष्यंति दृष्ट्वा पूर्वापकारिणं। कथमिंद्रं जयिष्यामि कुंभकर्ण हते त्वयि २०
तदिदं मामनुप्राप्तं विभीषणवचः शुभं। यदज्ञानान्मया तस्य न गृहीतं महात्मनः २१ विभीषणवचो यावत्कुंभकर्णप्रहस्तयोः। विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः २२
तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः। यन्मया धार्मिकः श्रीमान्स निरस्तो विभीषणः २३ इति बहुविधमाकुलांतरात्मा कृपणमतीव विलप्य कुंभकर्णं। न्यपतद
थ दशाननो भृशार्तस्तमनुजमिंद्ररिपुं हतं विदित्वा २४ इत्यार्षे रामायणे युद्धकांडे षष्ठितमः सर्गः॥ एवं विलपमानस्य रावणस्य दुरात्मनः। श्रुत्वा शोकाभितप्तस्य
त्रिशिरा वाक्यमब्रवीत् १ एवमेव महावीर्यो हतो नस्तात मध्यमः। नतु सत्पुरुषा राजन्विलपंति यथा भवान् २ नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो। स कस्मात्प्राकृ
त इव शोचस्यात्मानमीदृशं ३ ब्रह्मदत्तास्ति ते शक्तिः कवचं सायको धनुः। सहस्रखरसंयुक्तो रथो मेघसमस्वनः ४ त्वयासकृद्विशस्त्रेण विशस्ता देवदानवाः। स सर्वायुधसं
पन्नो राघवं शास्तुमर्हसि ५ कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणं। उद्धरिष्याम्यहं शत्रून्गरुडः पन्नगानिव ६ शंबरो देवराजेन नरको विष्णुना यथा। तथाद्य शयिता रा
मो मया युधि निपातितः ७ श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसेश्वरः। पुनर्जातमिवात्मानं मन्यते कालचोदितः ८ श्रुत्वा त्रिशिरसो वाक्यं देवांतकनरांतकौ। अतिका
यश्च तेजस्वी बभूवुर्युद्धहर्षिताः ९ ततोऽहमहमित्येवं गर्जंतो नैर्ऋतर्षभाः। रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः॥ १० अंतरिक्षगताः सर्वे सर्वे मायाविशारदाः। सर्वे त्रि
दशदर्पघ्नाः सर्वे समरदुर्मदाः ११ सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्तयः। सर्वे समरमासाद्य न श्रूयंते स्म निर्जिताः। सर्वेऽस्त्रविदो वीराः सर्वे युद्धविशारदाः १३
सर्वे प्रवरविज्ञानाः सर्वे लब्धवराः सुताः १४ स तैस्तथा भास्करतुल्यदर्शनैः सुतैर्वृतः शत्रुबलश्रियार्दनैः। रराज राजा मघवान्यथामरैर्वृतो महादानवदर्पनाशनैः १५
नाय यथा। अपि नरकः सिंहिकायां विप्रचित्तेर्जातेषु पुत्रेष्वन्यतमः। तदुक्तं विष्णुपुराणे॥ वातापिर्नमुचिश्चैव इल्वलः सृमरस्तथा। अंधको नरकश्चैव कालनाभस्तथैव चेति। सत्य
ति। नतु परंतापकेन हतो भौमः। शंबरस्त्वनावृताथका आरामः इति च्छेदः। आरामो रामव्यतिरिक्तः कश्चन त्वया मया युधि निपातितः। शयितो रामस्यासाध्यत्वादिति भावः॥

राम
८६

युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः इति पाठः। युद्धोन्मत्तो मत्तश्च द्वौ महोदरमहापार्श्वयोः पर्यायनामानि। सर्वौषधाभिरिति। औषधाभिः। आयुधप्रहारनिवारकौषधविशेषैः। औ
षधयस्तु। कुष्ठं मांसं हरिद्रे द्वे मुराशैलेयचंदनं। त्वचा चंपकमुस्तं च सर्वौषधो दश स्मृताः इति पुराणवचनात्॥ त्रिभिरिति। त्रिभिः कांचनपर्वतैः शिखराभूतैर्हिमवानिवेत्यर्थः॥ सु

स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः। आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे १६ युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः। रक्षणार्थं कुमाराणां प्रेषयामास संयुगे १७
तेऽभिवाद्य महात्मानं रावणं रिपुरावणं। कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे १८ सर्वौषधीभिर्गंधैश्च समालभ्य महाबलाः। निर्जग्मुर्नैरृतश्रेष्ठाः षडेते युद्धकांक्षिणः १९
त्रिशिराश्चातिकायश्च देवांतकनरांतकौ। महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः २० ततः सुदर्शनं नागं नीलजीमूतसंनिभं। ऐरावतकुले जातमारुरोह महोदरः २१ सर्वा
युधसमायुक्तं तूणीभिश्चाप्यलंकृतं॥ रराज गजमास्थाय सवितेवास्तमूर्द्धनि २२ हयोत्तमसमायुक्तं सर्वायुधसमाकुलं। आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः २३ त्रिशिरा
रथमास्थाय विरराज धनुर्धरः। सविद्युदुल्कः सज्वालः सेंद्रचाप इवांबुदः २४ त्रिभिः किरीटैस्त्रिशिराः शुशुभे स रथोत्तमे। हिमवानिव शैलेंद्रस्त्रिभिः कांचनपर्वतैः २५ अ
तिकायोऽतितेजस्वी राक्षसेंद्रसुतस्तदा। आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मतां २६ सुचक्राक्षं सुसंयुक्तं सानुकर्षं सकूबरं। तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलं २७ स
कांचनविचित्रेण किरीटेन विराजता। भूषणैश्च बभौ मेरुः प्रभाभिरिव भासयन् २८ स रराज रथे तस्मिन् राजसूनुर्महाबलः। वृतो नैरृतशार्दूलैर्वज्रपाणिरिवामरैः २९
हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणं। मनोजवं महाकायमारुरोह नरांतकः ३० गृहीत्वा प्रासमुल्काभं विरराज नरांतकः। शक्तिमादाय तेजस्वी गुहः शत्रुष्विवाहवे। ३१
देवांतकः समादाय परिघं वज्रभूषितं। परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडंबयन् ३२ महापार्श्वो महाकायो गदामादाय वीर्यवान्॥ विरराज गदापाणिः कुबेर इव संयुगे ३३
प्रतस्थिरे महात्मानो बलैरप्रतिमैर्वृताः। तान्गजैश्च तुरंगैश्च रथैश्चांबुदनिस्वनैः ३४ अनुजग्मुर्महाकायाः राक्षसाः प्रवरायुधाः। ते विरेजुर्महात्मानः कुमाराः सूर्यव
र्चसः ३५ किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवांबरे। प्रगृहीता बभौ तेषां शस्त्राणामावलिः शिता ३६ शारदाभ्रप्रतीकाशा हंसावलिरिवांबरे॥ ॥

चक्राक्षमिति। सानुकर्षं अनुकर्षो दारुविशेषस्थितः परः। सुकूबरं शोभनयुगंधरं देवांतक इति। देवांतक इत्यत्रापि रराजेति संबध्यते। परिघं परिगृह्य समुद्रमथने मंदरगिरिं प
रिगृह्य स्थितस्य विष्णोर्वपुर्विडंबयन् रराजेत्यर्थः॥ ॥

मरणं वेति। मरणं वा मरणं वा शत्रूणां पराजयं वा भवतिति निमतिं कृत्वा निश्चित्य निर्जग्मुरिति संबंधः। जगर्जुरिति। विनेदुः। शत्रुविषयाः पवना मुमुचुः केचिदित्यादिसार्द्धश्लोक
मेकं वाक्यं। द्रुमशिलायुधा इति। स्वभावोक्तिः। रणः सैन्येषु विषयेषु संक्रुद्धाः केचित्प्लवंगमाः द्रुमशिलायुधाः संतः आकाशमाविश्य चेरुः केचिद्वानरपुंगवाः विपुलस्कंधान् द्रुमान् गृह्य

मरणं वापि निश्चित्य शत्रूणां वा पराजयं ३७ इति कृत्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः। जगर्जुश्च विनेदुश्च चिक्षिपुश्चापि सायकान् ३८ जगर्जुश्चापि ते वीराः निर्जग्मुर्यु
द्धदुर्मदाः। क्ष्वेलितास्फोटितनिनदैः चचाल च वसुंधरा ३९ रक्षसां सिंहनादैश्च विस्फोटैर्वानरैस्ततः। ते भिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः ४० ददृशुर्वानरानीकं समु
द्यतशिलायुधं। हरयोपि महात्मानो ददृशुर्नैरृतं बलं ४१ हस्त्यश्वरथसंबाधं किंकिणीशतनादितं। नीलजीमूतसंकाशं समुद्यतमहायुधं। दीप्तानलरविप्रख्यै
र्नैरृतैः सर्वतो वृतं। तद्दृष्ट्वा बलमायान्तं लब्धलक्षाः प्लवंगमाः ४२ समुद्यतमहाशैलाः संप्रणेदुर्मुहुर्मुहुः। अमृष्यमाणा रक्षांसि प्रतिनर्दन्ति वानराः ४४
ततः समुद्घुष्टरवं निशम्य रक्षोगणा वानरयूथपानां। अमृष्यमाणाः परहर्षमुग्रं महाबला भीमतरं विनेदुः ४५ ते राक्षसबलं घोरं प्रविश्य हरियूथपाः। विचेरुरुद्य
तैः शैलैर्नगाः शिखरिणो यथा ४६ केचिदाकाशमाविश्य केचिदुर्व्यां प्लवंगमाः। रक्षःसैन्येषु संक्रुद्धाश्चेरुर्द्रुमशिलायुधाः ४७ द्रुमांश्च विपुलस्कं
धान् गृह्य वानरपुंगवाः। तद्युद्धमभवद्घोरं रक्षोवानरसंकुले ४८ ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमां। बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ४९
सिंहनादान्विनेदुश्च रणे राक्षसवानराः। शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवंगमान् ५० निजघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान्। केचिद्रथगतान्वी
रान्गजवाजिगतानपि ५१ निजघ्नुः सहसा युत्पयातुधानान्प्लवंगमाः। शैलशृङ्गाचिताङ्गाश्च मुष्टिभिर्वान्तलोचनाः ५२ चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुं
गवाः। राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान् ५३ शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः। अन्योन्यं पातयामासुः परस्परजयैषिणः ५४ रि
पुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः। ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ५५ मुहूर्तेनावृता भूमिरभवच्छोणितोक्षिता। विकीर्णैः पर्वताकारै
रक्षोभिररिमर्दनैः ५६ आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः। आक्षिप्ताः क्षिप्यमाणाश्च भग्नशैलाश्च वानराः ५७ पुनरङ्गैस्तदा चक्रुरासन्ना युद्धम
द्भुतं। वानरान्वानरैरेव जघ्नुस्ते रजनीचराः ५८ राक्षसान्राक्षसैरेव जघ्नुस्ते हरियूथपाः। आक्षिप्य च शिलास्तेषां निजघ्नू राक्षसा हरीन् ५९
गृहीत्वा च वधं चिरुरित्यादि। शैलशृङ्गेति। शैलशृङ्गाचिताङ्गाः गिरिशिखरैर्व्याप्तदेहाः। मुष्टिभिः। मुष्टिप्रहारैः। वान्तलोचनाः। बहिर्निर्गतलोचनाः। आक्षिप्ताः

छिन्नवर्मेति। स्मसारं निर्यासं। सन्नस्येति। तस्य मार्गे गतेन युद्धार्थं गतो मार्गः कृत्यर्थः। पतितैर्वानरैरभिसंवृतः। सत्रुमांसशोणितकर्दमः। सन्नद्धद्वरूढ इति संबन्धः॥ ॥

तेषां वा छिद्यशाखानां जघ्नू राक्षसास्तिवानराः। निजघ्नुः शूलशस्त्राद्यैः चिच्छिदुश्च परस्परं ५६ सिंहनादान्विनेदुश्च रोराक्षसवानराः छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः ५७ रुधिरं
सुस्रुवुस्तत्र रससारमिव द्रुमाः। रथेन च रथं चापि वारणं वारणं ५८ हयेन च हयं केचिन्निजघ्नुर्वानरा रणे। प्रहृष्टमनसः सर्वे प्रगृहीतमहाशिलाः ५९ हरयो राक्षसान्जघ्नुर्द्रुमै
श्च बहुशाखिभिः। तद्युद्धमभवद्घोरं रक्षोवानरसंकुलं ६० क्रुद्धैरुद्धैश्च वडैश्च भल्लैश्च निशितैः शरैः। राक्षसा वानरेन्द्रांस्तांश्चिच्छिदुः पादपान्शिलाः ६१ विकीर्णैः पर्वताग्रैश्च द्रुमैः
छिन्नैश्च संयुगे। हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत् ६२ ते वानरा गर्वितहृष्टचेष्टाः संग्राममासाद्य भयं विमुच्य। युद्धं स्म सर्वे सह राक्षसैस्तैर्नानाविधैश्चक्रुरदीनसत्वाः ६३
तस्मिन्प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु। निपात्यमानेषु च राक्षसेषु महर्षयो देवगणाश्च नेदुः ६४ ततो हयं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य। नरान्तको
वानरराजसैन्यं महार्णवं मीन इवाविवेश ६५ स वानरान्सप्तशतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद। एकः क्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुंगवानां ६६ ददृशुश्च म
हात्मानं हयपृष्ठे प्रतिष्ठितं। चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ६७ स तस्य ददृशे मार्गो मांसशोणितकर्दमः। पतितैः पर्वताकारैर्वानरैरभिसंवृतः ६८ यावद्विक्रमितुं बुद्धिं चक्रुः स
वगपुंगवाः। तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ६९ ददाह हरिसेनां स वनानीव विभावसुः ७० यावदुत्पाटयामासुर्वृक्षाञ्शैलान्वनौकसः। तावत्प्रासहताः पेतुर्वज्रकृत्ता
इवाचलाः ७१ ज्वलन्तं प्रासमुद्यम्य संग्रामाग्रे नरान्तकः। दिक्षु सर्वासु बलवान्विचचार नरान्तकः ७२ प्रमृद्नन्सर्वतो युद्धे प्रावृट्काले यथानिलः। न शेकुर्द्धावितुं वीरा न स्थातुं स्प
न्दितुं भयात् ७३ उत्पतन्तं स्थितं यान्तं सर्वान्विव्याध वीर्यवान्। एकेनान्तककल्पेन प्रासेनादित्यतेजसा ७४ भग्नानि हरिसैन्यानि निपेतुर्धरणीतले। वज्रनिष्पेषसदृशं प्रा
सस्याभिनिपातनं ७५ न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनं। पतन्तो हरिवीरास्ते रूपाणि प्रचकाशिरे ७६ वज्रभिन्नाग्रकूटानां शैलानां पततामिव। ये तु पूर्वं महात्मा
नः कुंभकर्णेन पातिताः ७७ ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे। विप्रेक्षमाणः सुग्रीवो ददर्श हरिवाहिनीं ७८ नरान्तकभयत्रस्तां विद्रवन्तीमितस्ततः। विद्रुतां वा
हिनीं दृष्ट्वा स ददर्श नरान्तकं ७९ गृहीतप्राससमायान्तं हयपृष्ठे प्रतिष्ठितं। दृष्ट्वोवाच महातेजाः सुग्रीवो वानराधिपः ८० कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमं। गच्छैनं राक्ष
सं वीरो योऽसौ तुरगमास्थितः ८१ क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय। स भर्तुर्वचनं श्रुत्वा निष्पपात ततोऽङ्गदः ८२

रणेनेति क्रोधदर्पसंबद्धः सन्नद्धोऽङ्गदः। अङ्गिगम्यांगदमित्यादि साईकृतो कमेकं वाक्यं वालिपुत्रमभिगम्य प्रासमुत्सृजत्‌संमूर्मौन्यपतद्दिनि संबंधः॥ ॥ इतिश्रीरामायणे तत्वदी
ऽनीकाभ्रे प्रसंकाशा दंष्ट्रमालि त्वं वीर्यवान्॥ शैलसंघातसंकाशो हरीणां पुत्र अंगदः ८३ रणान्तांगदमन्न दृष्ट्वा स धातुरिव पर्वतः। निरायुधो महातेजाः केवलं नखदंष्ट्रवान् ८४
८४ नरान्तकमभिक्रम्य वालिपुत्रो ब्रवीद्वचः। तिष्ठ त्वं शाकृतैरेभिर्हरिभिः किं करिष्यसि ८५ अस्मिन्वज्रसमस्पर्शे प्रासं क्षिप ममोरसि॥ अंगदस्य वचः श्रुत्वा प्र
बुद्धः क्रोधनरान्तकः ८६ संदश्य दशनैरोष्ठं विनिश्वस्य भुजंगवत्। अभिगम्यांगदं क्रुद्धो वालिपुत्रं नरान्तकः ८७ स प्रासमाविध्य तदांगदाय समुज्ज्वलंतं सहसोत्ससर्ज। स वालिपुत्रोरसि वज्रकल्पे बभूव भग्नो न्यपतच्च भूमौ ८८ तं प्रासमालोक्य तथा विभग्नं सुपर्णकृत्तोरगभोगकल्पं॥ तलं समुद्यम्य स वालिपुत्रस्तुरंगमस्या
भिजघान मूर्ध्नि॥ निमग्नपादः स्फुटिताक्षितारो निष्क्रान्तजिह्वोऽचलसन्निकाशः। स तस्य वाजी निपपात भूमौ तलप्रहारेण विभिन्नमूर्धा ८९ नरान्तकः क्रोधवशं
जगाम हतं तुरंगं पतितं समीक्ष्य। स मुष्टिमुद्यम्य महाप्रभावो जघान शीर्षे युधि वालिपुत्रं ९० अथांगदो मुष्टिविशीर्णमूर्धा सुस्राव तीव्रं रुधिरं भृशोष्णं। मुहुर्वि
जज्वाल मुमोह चापि संज्ञां समासाद्य विसिस्मिये च ९१ अथांगदो वज्रसमानवेगं संवर्त्य मुष्टिं गिरिशृंगकल्पं॥ निपातयामास तदा महात्मा नरान्तकस्योरसि वालि
पुत्रः ९२ स मुष्टिनिष्पिष्टविभग्नवक्षा ज्वालावमन्शोणितदिग्धगात्रः। नरान्तको भूमितले पपात यथाचलो वज्रनिपातभग्नः ९४ अथान्तरिक्षे त्रिदशोत्तमा
नां वनौकसां चापि महाप्रणादः। बभूव तस्मिन्निहतेऽग्र्यवीर्ये नरान्तके वालिसुतेन संख्ये ९५ अथांगदो राममनःप्रहर्षं सुदुष्करं तं कृतवान्हि विक्रमं। वि
सिस्मिये सोऽप्यतिवीर्यविक्रमः पुनश्च युद्धे स बभूव हर्षितः ९६ इत्यार्षे रामायणे युद्धकांडे एकोनसप्ततिः सर्गः॥ ॥ नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋ
तर्षभाः। देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः १ आरूढो मेघसंकाशं वारणेन्द्रं महोदरः॥ वालिपुत्रं महावीर्यमभिदुद्राव वेगवान् २ भ्रातृव्यस
नसंतप्तस्तदा देवान्तको बली॥ आदाय परिघं घोरमंगदं समभिद्रवत् ३ रथमादित्यसंकाशं युक्तं परमवाजिभिः। आस्थाय त्रिशिरा वीरो वालिपु
त्रमथाभ्यपात् ४ स त्रिभिर्देवदर्पघ्नैराक्षसेन्द्रैरभिद्रुतः॥ वृक्षमुत्पाटयामास महाविटपमंगदः ५ देवान्तकाय तं वीरश्चिक्षेप सहसांगदः। महावृक्षं
महाशाखं शक्रो दीप्तमिवाशनिं ६ त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः। स वृक्षं कृत्तमालोक्य उत्पपात तदांगदः ७ स ववर्ष ततो वृक्षान्शि
लाश्च कपिकुंजरः। तान्प्रचिच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ८ परिघाग्रेण तान्वृक्षान्बभंज स सुरान्तकः। त्रिशिरास्त्वांगदं वीरम[redacted]भिदुद्राव सायकैः ९ गर्जन्‌समभिदुद्राव वालिपुत्रं महोदरः। जघानोरसि संक्रुद्धस्तोमरैर्वज्रसन्निभैः १०
पिकाधां युद्धकांडे एकोनसप्ततिः सर्गः॥ ॥

राम
८८

समुत्पतंतं त्रिशिरा इति। अजिह्मगैः अकुटिलगामिभिः १८ स विजृंभितमिति। विजृंभितं। भग्नं २२ स मुष्टीति। निर्वांतदंताक्षिविलंबिजिह्वः। दंताक्षिविलंबिजिह्वः तथा
देवांतकस्तु संक्रुद्धः परिघेणाततोंगदं। पराम्याभिहत्याशु वायुतुल्यपराक्रमवेगवान् ११ स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः। नातिविव्यथे महातेजा वालिपुत्रः प्रतापवान् १२
सवेगवान्महावेगं कृत्वा परमदुर्जयः। तलेन समभिद्रुत्य जघानास्य महागजं १३ तस्य तेन प्रहारेण नागराजस्य संयुगे। पेततुर्लोचने तस्य विननाद स वारणः। विषाणं चास्य निष्कु
ष्य वालिपुत्रो महाबलः १४ देवांतकमभिद्रुत्य ताडयामास संयुगे॥ स विह्वलस्तु तेजस्वी वातोद्धूत इव द्रुमः १५ लाक्षारससवर्णं च सुस्राव रुधिरं मुखात्॥ अथाश्वास्य
महातेजाः कृच्छ्राद्देवांतको बली १६ आविध्य परिघं वेगादाजघान तदांगदं। परिघाभिहतश्चापि वानरेंद्रात्मजस्तदा १७ जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह। तमुत्प
तंतं त्रिशिरास्त्रिभिर्घोरैरजिह्मगैः १८ घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह। ततोंगदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुंगवैः १९ हनूमानपि विज्ञाय नीलश्चापि प्रतस्थतुः। ततः
श्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा २० तद्रावणसुतो धीमान्बिभेद निशितैः शरैः। तद्बाणशतनिर्भिन्नं विदारितशिलातलं २१ सविस्फुलिंगं सज्वालं निपपात गिरेः शि
रः। स विजृंभितमालोक्य हर्षाद्देवांतको बली २२ परिघेणाभिदुद्राव मारुतात्मजमाहवे॥ तमापतंतमुत्प्लुत्य हनूमान्मारुतात्मजः २३ आजघान तदा मूर्ध्नि वज्रकल्पेन
मुष्टिना। शिरसि प्रहरन्वीरस्तदा वायुसुतो बली। नादेनाकंपयत्सर्वान्राक्षसान्स महाबलः २४ स मुष्टिनिष्पिष्टविकीर्णमूर्धा निर्वांतदंताक्षिविलंबिजिह्वः। देवांतको राक्ष
सराजसूनुर्गतासुरुर्व्यां सहसा पपात २५ तस्मिन्हते राक्षसयोधमुख्ये महाबले संयति देवशत्रौ। क्रुद्धस्त्रिमूर्धा निशिताग्र्यमुग्रं ववर्ष नीलोरसि बाणवर्षं २६ महोदरस्तु
संक्रुद्धः कुंजरं पर्वतोपमं। भूयः समधिरूढ्वा स मंदरं रश्मिवानिव २७ ततो बाणमयं वर्षं नीलस्योरस्यपातयत्। गिरौ वर्षं तडिच्चक्रचापवानिव तोयदः २८ ततः शरौघैर
भिवर्ष्यमाणो विभिन्नगात्रः कपिसैन्यपालः। नीलो बभूवाथ विसृष्टगात्रो विष्टंभितस्तेन महाबलेन २९ ततस्तु नीलः प्रतिलभ्य संज्ञां शैलं समुत्पाट्य सवृक्षखंडं। ततः
समुत्पत्य महोग्रवेगो महोदरं तेन जघान मूर्ध्नि ३० ततः स शैलाभिनिपातभग्नो महोदरस्तेन महाद्विपेन। विपोथितो भूमितले गतासुः पपात वज्राभिहतो यथाद्रिः ३१
पितृव्यं निहतं दृष्ट्वा त्रिशिरास्त्वाप कार्मुकं। हनूमंतं च संक्रुद्धो विव्याध निशितैः शरैः ३२ स वायुसूनुः कुपितश्चिक्षेप शिखरं गिरेः। त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली
३३ तद्व्यर्थं शिखरं दृष्ट्वा द्रुमवर्षं तदा कपिः। विससर्ज रणे तस्मिन्रावणस्य सुतं प्रति ३४ तमापतंतमाकाशे द्रुमवर्षं प्रतापवान्। त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च ३५
हनूमांस्तु समुत्पत्य हयांस्त्रिशिरसस्तदा। विददार नखैः क्रुद्धो गजेंद्रं मृगराडिव ३६ अथ शक्तिं समादाय कालरात्रिमिवांतकः। चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ३७
निर्वांतवहिर्निर्गताः दंतादयो यस्य स तथा २५ ततः शरौघैरिति। विसृष्टगात्रः। श्लथावयवः। परवशगात्रो वा। विष्टंभितः। स्तंभीकृतः २९

यु॰
८९

रिवशति। भ्रमेमतां। अनिवारितो ३८ तोद्दृष्ट्वेति। घोरसंकाशं। भयंकरप्रकाशो ३९ महति। तच्चकोचेतनमूर्छितः ४२ मततसेति। लघुः सुतस्यविप्लुतरूपस्या ४६ जघाहेति ५० महापद्मः

दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसंगतां। गृहीत्वा हरिशार्दूलो बभंज च ननाद च ३८ तां दृष्ट्वा घोरसंकाशां शक्तिं भग्नां हनूमता। प्रहृष्टा वानरगणा। विनेदुर्ज्वलदा यथा ३९
ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः। निजघान च खड्गेन वानरेंद्रस्य वक्षसि ४० खड्गप्रहाराभिहतो हनूमान्मारुतात्मजः। आजघान त्रिमूर्धानं तलेनोरसि वीर्यवान् ४१
स तलाभिहतस्तेन स्रस्तहस्तांबरो भुवि। निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ४२ स तस्य पततः खड्गं समाच्छिद्य महाकपिः। ननाद गिरिसंकाशस्त्रासयन्सर्वनैर्ऋतान् ४३
अमृष्यमाणस्तं घोषमुत्पपात निशाचरः। उत्पत्य च हनूमंतं ताडयामास मुष्टिना ४४ तेन मुष्टिप्रहारेण संचुकोप महाकपिः। कुपितश्च निजग्राह किरीटे राक्षसर्षभं ४५ ह
नूमान्रोषताम्रास्यो राक्षसं परवीरहा॥ स तस्य शीर्षाण्यसिना शितेन किरीटजुष्टानि सकुंडलानि। क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ४६ तान्या
यताक्षाण्यगसंनिभानि प्रदीप्तवैश्वानरलोचनानि। पेतुः शिरांसींद्ररिपोर्धरण्यां ज्योतींषि मुक्तानि यथार्कमार्गात् ४७ तस्मिन्हते देवरिपौ त्रिशीर्षे हनूमता शक्रपरा
क्रमेण। नेदुः प्लवंगाः प्रचचाल भूमिः रक्षांस्यथो दुद्रुविरे समंतात् ४८ हतं त्रिशिरसं दृष्ट्वा महोदरमथापि च। हतौ प्रेक्ष्य दुराधर्षौ देवांतकनरांतकौ ४९ चुकोप परमा
मर्षी महापार्श्वो निशाचरः। जग्राहार्चिष्मतीं चापि गदां सर्वायसीं शुभां ५० हेमपट्टपरिक्षिप्तां मांसशोणितलेपनां। विराजमानां वपुषा शत्रुशोणितरंजितां ५१ तेजसा
संप्रदीप्ताग्र्यां रक्तमाल्यविभूषितां। ऐरावतमहापद्मसार्वभौमभयावहां ५२ गदामादाय संक्रुद्धो महापार्श्वो निशाचरः। हरीन्समभिदुद्राव युगांताग्निरिव ज्वलन् ५३
अथर्षभः समुत्पत्य वानरो रावणात्मजं। महापार्श्वमुपागम्य तस्थौ तस्याग्रतो बली ५४ तं पुरस्तात्स्थितं दृष्ट्वा वानरं पर्वतोपमं। आजघानोरसि क्रुद्धो गदया वज्रकल्पया ५५
स तयाभिहतस्तेन गदया वानरर्षभः। भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ५६ स संप्राप्य चिरात्संज्ञामृषभो वानरर्षभः। क्रुद्धो विस्फुरमाणौष्ठो महापार्श्वमुदैक्षत
५७ स वेगवान्वेगवदभ्युपेत्य तं राक्षसं वानरयूथमुख्यः। संवर्त्य मुष्टिं सहसा जघान बाह्वंतरे शैलनिकाशरूपः ५८ स कृत्तमूलः सहसेव वृक्षः पपात भूमौ क्षतजोक्षितांगः। तां
चास्य घोरां यमदंडकल्पां गदां प्रगृह्याशु तदा स ऋषभः ५९ मुहूर्तमासीत्स गतासुकल्पः प्रत्यागतात्मा सहसा सुरारिः। उत्पत्य संध्याभ्रसमानवर्णस्तं वारिराजात्मजमा
जघान ६० स मूर्छितो भूमितले पपात मुहूर्तमुत्पत्य पुनः ससंज्ञः। तामेव तस्याद्रिवराद्रिकल्पां गदां समाविध्य जघान संख्ये ६१ सा तस्य रौद्रा समुपेत्य देहं रौद्रस्य देवाध्वि
रविप्रशत्रोः। बभंज वक्षः क्षतजं च भूरि सुस्राव धातुप्रभवाद्रिराजः ६२ सोऽभिदुद्राव वेगेन तदा तस्य महात्मनः। तामस्य गृहीत्वा गदां भीमां आविध्य च पुनः पुनः ६३

पुंडरीकाख्यो दिग्गजः॥ ॥ ५२

राम
८९

तस्मिन्हतः त्रि। मित्रा एवसंकाशो मित्रेतत्कि पाविशेषणं।। ।।इति श्रीमहेश्वरतीर्थीये युद्धकांडे सप्ततितमः सर्गः।। ।।तेनमसह्यपमिति। तेजसा पुरूपमालोक्य। तोर्विंद्वतीविन छ हृदय
सनिर्वाहः। कोसावितिः। हरिलोचनः सिंहदृष्टिः। कालाजिकेति। रथशक्तिभिः रथ्यः। बलनाभिः शक्तिभिः। ध्वजशृंगे ति। ध्वजशृंगप्रतिष्ठेन सनेन राहुः ध्वजहस्तुके भवति। त्रिनतक्षिनिदि
महा पार्श्वमहानादेजघानरत्नमहिन्निति। सप्तपागरया मग्नो विशीर्णो रथान्निपपात।। ६४।। निपपात महापार्श्वो वज्राहत वानलः। विशीर्णनयनेनाद्रेमोगतस्त्वेग तासुवि
।। ६५।। पुनितेराज्ञसेनस्मिन्निह उत्तरं च सांवलं।। ६६। तस्मिन्हते स्वानरि एवणास्य तनैऋतानां बलमर्णावाभं सक्ता युधं केवलजीविता र्थी उद्भावमित्रा एवसन्निकाशो।। ६७।
इत्यार्षे रामायणे युद्धकांडे सप्ततितमः सर्गः।। ।।स्ववलेनिहतं दृष्ट्वा तुमुलं लोमहर्षणं। भ्रातृंश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान्।। १।। पितृव्यौ चापि संदृश्य
मरेस निस्सृतौ। युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसोत्तमौ।। २।। चुकोप च महातेजा ब्रह्मदत्तवरो युधि। अतिकायोऽद्रिसंकाशो देवदानवदर्पहा।। ३।। स भास्करसहस्रस्य संघा
तमिव भास्वरं रथमास्थाय शक्रारिरभिदुद्राव वानरान्।। ४।। स विस्फार्य तदा चापं किरीटी मृष्टकुंडलः। नाम संश्रावयामास ननाद च महास्वनः।। ५।। तेनसिंहप्रणादेन नाम
विश्रावणेन वाज्याशहे नमभा मोनाद्यास या मास वानरान्। ६। तेदृष्ट्वा देहमाहात्म्यं कुंभकर्णोयमुत्थितः। भयार्ता वानराः सर्वे संश्रयंते परस्परं।। ७।। तेतस्य रूपमालोक्य
यथाविष्णोस्त्रिविक्रमे भयाद्वा नरयूथपाः सेदि द्रवंतितत्तलः।। ८।। तेतिकायं समासाद्य वानरामूढचेतसः। शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे।। ९।। ततोतिकायं काकुत्स्थो
रथस्थं पर्वतोपमं। ददर्श धनुष्मंतं दूरान्नर्दंतं कालमेघवत्।। १०।। स तं दृष्ट्वा महात्मानं राघवस्तु सुविस्मितः। वानरान्सांत्वयित्वा च विभीषणमुवाच ह।। ११।। कोसौ पर्वतसंका
शो धनुष्मान्हरिलोचनः। युक्ते हयसहस्रेण विशाले स्यंदने स्थितः।। १२।। य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः। अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः।। १३।।
कालजिह्वाप्रकाशाभिर्य एषोतिविराजते। आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः।। १४।। धनूंषि चास्य सज्जानि हेमपृष्ठानि सर्वशः। शोभयंति रथश्रेष्ठं शक्रचापमि
वांबरं।। १५।। क एष रक्षःशार्दूलो रणभूमिं विराजयन्। अभ्येति रथिनां श्रेष्ठो रथेनादित्यतेजसा।। १६।। ध्वजशृंगप्रतिष्ठेन राहुणाभिविराजते। सूर्यरश्मिसमैर्बाणैर्दिशो
दशविराजयन्।। १७।। त्रिनतं मेघनिर्ह्रादं हेमपृष्ठमलंकृतं। शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते।। १८।। सध्वजः सपताकश्च सानुकर्षो महारथः। चतुःसादिसमायु
क्तो मेघस्तनितनिस्वनः।। १९।। विंशतिर्दश चाष्टौ च तूणाश्च रथमास्थिताः। कार्मुकाणि च भीमानि ज्याश्च कांचनपिंगलाः।। २०।। द्वौ च खड्गौ च पार्श्वस्थौ प्रदीप्तौ पार्श्व
हेमप्रभौ। महेमममदृशामृद्भागसम्भवनरइति। चतुःसादिसमायुक्तः। चतुर्भिः सारथिभिः।। शोभितौ। चतुर्हस्तत्सरुविन्तौ व्यक्तहस्तदशायतौ।। २१।।
समायुक्तः। द्वौ चेति। पार्श्वशोभितौ। खपार्श्वाभ्यां शोभितौ। चतुर्हस्तत्सरुविन्तौ। चतुर्हस्तप्रमाणाभ्यां सरुभ्यां खड्गमुष्टिभ्यां चितौ। व्यक्तहस्तदशायतो व्यक्तौ चतो दशहस्तायतो
चेतितया।। ।।

यु० ९० रक्तेति। रक्तकंठगुणः रक्तकंठमाल्यः। कालमहावक्त्रः कालस्येव महावक्त्रं यस्य स तथोक्तः ॥२२॥ ऋषभेति। ऋषभरथगजस्यानां क्रमेण प्रतिनियन्तृसुशस्त्याह। खड्गधनुषि कर्षण
। क्षिप्यते तेनेति कर्षणः पाशादिः तोमरश्चेदो वा ॥२४॥ कुमुदेति विरराजेति। अमितरवचः अउभावश्चार्षः ॥२८॥ सरासन इति। कलापी तूणीरवान्। कलापो बर्हे तूणीरेपि

रक्तकंठगुणो वीरो महापर्वतसन्निभः। कालः कालमहावक्त्रो मेघस्थ इव भास्करः॥२२॥ कांचनांगदनद्धाभ्यां भुजाभ्यां मे शोभते। शृंगाभ्यामिव तुंगाभ्यां हिमवान्पर्वतो
त्तमः॥२३॥ कुंडलाभ्यां तु तस्यैत्र भाति वक्त्रं शुभेक्षणं। पुनर्वस्वंतरगतः परिपूर्णो निशाकरः॥२४॥ आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमं। यं दृष्ट्वा वानराः सर्वे भयार्ता
विद्रुता दिशः॥२५॥ स पृष्टो राजपुत्रेण रामेणामिततेजसा। आचचक्षे महातेजा राघवाय विभीषणः॥२६॥ दशग्रीवो महातेजा राजा वैश्रवणानुजः। भीमकर्मा महात्मा
हि रावणो राक्षसेश्वरः॥२७॥ तस्यासीद्वीर्यवान्पुत्रो रावणप्रतिमो बले। वृद्धसेवी श्रुतधरः सर्वास्त्रविदुषां वरः॥२८॥ अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे। भेदे
सांत्वे च दाने च नये मंत्रे च संमतः॥२९॥ यस्य बाहुं समाश्रित्य लंका भवति निर्भया। तनयं धान्यमालिन्या अतिकायमिमं विदुः॥३०॥ एतेनाराधितो ब्रह्मा तपसा भावि
तात्मना। अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः॥३१॥ सुरासुरैरवध्यत्वं दत्तमस्मै स्वयंभुवा। एतच्च कवचं दिव्यं रथश्चैव सुभास्वरः॥३२॥ एतेन शतशो देवा दानवा
श्च पराजिताः। रक्षिता निवराक्षांसि यक्षाश्चापि निषूदिताः॥३३॥ वज्रं विष्टंभितं येन बाणैरिंद्रस्य धीमतः। पाशः सलिलराजस्य युद्धे प्रतिहतस्तथा॥३४॥ एषोऽतिका
यो बलवान्राक्षसानामथर्षभः। रावणस्य सुतो धीमान्देवदानवदर्पहा॥३५॥ तदस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुंगव। पुरा वानरसैन्यानि क्षयं नयति सायकैः॥
३६। ततोऽतिकायो बलवान्प्रविश्य हरिवाहिनीं। विस्फारयामास धनुर्ननाद च पुनःपुनः॥३७॥ तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरं। अभिपेतुर्महात्मानो ये
प्रधाना वनौकसः॥३८॥ कुमुदो द्विविदो मैंदो नीलः शरभ एव च। पादपैर्गिरिशृंगैश्च युगपत्समभिद्रवन्॥३९॥ तेषां वृक्षांश्च शैलांश्च शरैः कांचनभूषणैः। अति
कायो महातेजाश्चिच्छेदास्त्रविदां वरः॥४०॥ तांश्चैव सर्वान्स हरीन्शरैः सर्वायसैर्बली। विव्याधाभिमुखान्संख्ये भीमकायो निशाचरः॥४१॥ तेऽर्दिता बाणवर्षेण भि
न्नगात्राः पराजिताः। न शेकुरतिकायस्य प्रतिकर्तुं महाहवे॥४२॥ तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः। मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः॥४३॥ स राक्ष राम ९०
सेंद्रो हरिसैन्यमध्ये नायुध्यमानं निजघान कंचित्। उपेत्य रामं सधनुः कलापी सगर्वितं वाक्यमिदं बभाषे॥४४॥ रथे स्थितोऽहं शरचापपाणिर्न प्राकृतं कंचन योध
यामि। यस्यास्ति शक्तिर्व्यवसाययुक्ता ददातु मे क्षिप्रमिहाद्य युद्धं॥४५॥ तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहंता। अमृष्यमाणश्च समुत्पपात जग्राह चापं च
ततः स्मयित्वा॥४६॥ क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकं। पुरस्तादतिकायस्य विचकर्ष महद्धनुः॥४७॥

वेत्यमरः। स गर्वितं सगर्वं उपस्थितः इति। व्यवसायः उत्साहः। तत्तस्येति। स्मयित्वा अनादृत्य। स्मिङ् अनादरे इति धातुः ॥४७॥

ज्याशङ्क इति। त्रासयन्। अन्वर्द्रितिशेषः। सौमित्रे रिति। प्रतिमेयं भयंकरं। अथवेति। त्वतिष्ठः। अमितु खं स्थितः। पमत्तं पुंगमिष्यसि। वक्तन रुक्त। निवर्त्तितुं नेच्छसि। यदि त्वं
तिष्ठ गमिष्यसि जियंमा प्येतिशेषः। वा एणान्परित्यज्य अहं युष्मत्तयं गमिष्ये। मीतिक्रियाविपरिणामः। पश्येति। ईश्वराणुत्वं निश्चलो। एषवति। नेत वशेगोणितं पास्यति। वक्त
सुरपत्तम हीशेलानो कारांहारंगदिवा॥ न्याशाघो लक्ष्मणस्यानस्त्रास यन्नरजनीचरान्। ४८। सौमित्रिस्त्वा पतिर्घोषं कृत्वा पतिम यंतरा। विसिस्मिये महातेजा याद
सेंद्रा त्मजल्सरा॥ ४९। तरातिकायः कुपितो हृष्ट्वा लक्ष्मणमुत्थितं। आरा पनिशितं वाणामिदं वचनमब्रवीत। ५०॥ वालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः।
गच्छ किं कालसदृशं मां योधयितुमिच्छसि। ५१। नहि मद्बाहुसृष्टानां वाणानां हिमवानपि। सोढुमुत्सहते वेगमंतरिक्षमथो मही॥ ५२। सुखप्रसुप्तं कालाग्निं विबोध
यितुमिच्छसि न्यस्य चापं निवर्त्तस्व मा प्राणान्जहि मद्गतः। ५३। अथवा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि। तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयं। ५४। पश्य मे
निशितान्बाणानरिदर्पनिसूदनान्। ईश्वरायुधसंकाशांस्तप्तकांचनभूषणान्। ५५। एषते सर्पसंकाशो बाणः पास्यति शोणितं। मृगराज इव क्रुद्धो नाग
राजस्य शोणितं। ५६। इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि संदधे॥ ५७। श्रुत्वातिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः। ससंक्रुद्धः कोपातिबलो महौजा उवाच
वाक्यं ततो महार्थं। न वाक्यमात्रेण भवान्प्रधानो न कत्थनात्सत्पुरुषा भवंति। मयि स्थिते धन्विनि वाणपाणौ निदर्शय स्वात्मबलं दुरात्मन्। ५८। कर्मणा सूच
यात्मानं न विकत्थितुमर्हसि। पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः॥ ५९॥ सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः। शरैर्वा यदि वाप्यस्त्रैर्दर्शय स्वपराक्रमं। ६०।
ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः। मारुतः कालसंपक्वं वृंतात्तालफलं यथा। ६१। अद्य ते मामका बाणास्तप्तकांचनभूषणाः। पास्यंति रुधिरं गात्रा
द्बाणशल्यांतरोत्थितं॥ ६३। वालोयमिति विज्ञाय न चावज्ञातुमर्हसि। वालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे॥ ६४। वालेन विष्णुना लोकास्त्रयः क्रांतास्त्रिवि
क्रमैः। लक्ष्मणस्य वचः श्रुत्वा हेतुमत्परमार्थवत्॥ ६५॥ अतिकायः प्रचुक्रोध लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चांतरं। तमापतंतं निशितं शरमाशीविषोपमं। ६६।
अर्द्धचंद्रेण चिच्छेद लक्ष्मणः परवीरहा। तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगं। ६७। अतिकायो भृशं क्रुद्धः पंच वाणान्समादधे। तान्छरान्संप्रचिक्षेप लक्ष्मणा
य निशाचरः। ६८। तानप्राप्तान्शरैस्तीक्ष्णैश्चिच्छेद स्मयः परवीरहा। पंचभिः पंचभिश्छेद्य पावकार्कसमप्रभैः। ७१। आददे निशितं वाणं ज्वलंतमिव तेजसा। तमादाय धनुः
गच्छ। तत्ववाणः शोणितं पास्यति पर्मेति शेषः। अद्य तन्निपाराणशल्यान्तरोत्थितं। वाणशल्यकृतमहेशाद्रुत्थितं। तत्रइति। सायकं चापमारोप्य वाणं धनुषि संदधे वायसंत्निपचि
मूल ४ सुखकाम्यमहात्मा न ससुडुंररसुलरा। ततोतिकायः कुपितश्चापमारोप्य सायकं। ६७। लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चांतरं। तमापतंतं निशितं शरमाशीविषोपमं। ६८ ४४

रा. यु.
९१

द्धेर्णापतेनि। इषुणा येननाश्लीकृत्ये नासं ऋत्यपर्वणा विलीनपर्वणा। काकुनेनि। यावन्न वितयामासे स्मादि। वितयामास दिंनित्वा। आश्वस्य विमृशन्क्रणं यंनिर्धार्य
विचकर्ष चवेगेनविससर्ज च वीर्यवान्। इषुणायतविस्रष्टेनशेरणानतपर्वणो।७३। ललाटेराक्षसश्रेष्ठमाजघानचवीर्यवान्। सललाटेशरोमग्नस्तस्यभी
मस्यरक्षसः।७४। ददर्शेशोणितेनोक्तः पन्नगेइवाचले। राक्षसः प्रचकंपेचलक्ष्मणेषुप्रपीडितः।७५। रुद्रबाणहतंभीमंयथा त्रिपुरगोपुरं। चिंत
यामासचाश्वस्यविमृश्यचमहाबलः।७६। साधुबाणनिपातेनश्लाघनीयोसिमेरिपुः। विदर्यैवंनियम्यास्यविनम्यचभुजावुभौ।७७। रथोपस्थेसमा
स्थाय रथेनप्रचचाररह। एकंत्रीन्पंच सप्तेतिसायकान्राक्षसेश्वरः।७८। आददेसंदधेचापिविचकर्षोत्ससर्जचाते बाणाः कालसंकाशाराक्षसेंद्रधनुः
च्युताः।७९। हेमपुंखारविप्रख्याश्चक्रुर्दीप्तमिवांवरं ततस्तान्राक्षसोत्सृष्टान्शरौघान्राघवानुजः।८०। असंभ्रांतः प्रचिच्छेद निशितैर्बहुभिःशरैः। तां
श्छरान्युधि संप्रेक्ष्य निकृत्तान्रावणात्मजः।८१। चुकोपत्रिदशेंद्रारिर्जग्राहनिशितंशरं। ससंधायमहातेजास्तंबाणंसहसोत्सृजत्।८२। तेनसौमित्रिमायांत
माजघानस्तनांतरे। अतिकायेनसौमित्रिस्ताडितोयुधिवक्षसि।८३। सुस्राव रुधिरंतीव्रंमदमत्तइवद्विपः। सचकारतदात्मानंविशल्यंसहसाविभुः।८४।
जग्राहचशरंतीक्ष्णमस्त्रेणापिसमादधे। आग्नेयेनतदास्त्रेणयोजयामाससायकं।८५। सजज्वालतदाबाणोधनुष्यस्यमहात्मनः। अतिकायोपितेजस्वी
रौद्रमस्त्रंसमाददे।८६। तेनबाणंभुजंगाभंहेमपुंखमयोजयत्। तदस्त्रंज्वलितंघोरंलक्ष्मणःशरमाहितं।८७। अतिकायायचिक्षेपकालदंडमिवांतकः। आ
ग्नेयास्त्राभिसंयुक्तंदृष्ट्वाबाणंनिशाचरः।८८। उत्ससर्जतदाबाणंरौद्रंसूर्यास्त्रयोजितं। तावुभावंवरेबाणावन्योन्यमभिजघ्नतुः।८९। तेजसासंप्रदीप्ताग्रौ क्रुद्धा
विवभुजगाविव। तावन्योन्यंविनिर्दह्यपेततुःपृथिवीतले।९०। निरर्चिषौभस्मकृतौनभ्राजेतेशरोत्तमौ। तावुभौदीप्यमानौतुनभ्राजेतेमहाहवे।९१। ततोति
कायःसंक्रुद्धस्त्वाष्ट्रमैषीकमुत्सृजत्। ततश्चिच्छेदसौमित्रिरस्त्रमैंद्रेणवीर्यवान्।९२। ऐषीकंनिहतंदृष्ट्वाकुपितोरावणात्मजः। याम्येनास्त्रेणसंक्रुद्धोयोज
यामाससायकं।९३। ततस्तदस्त्रंचिक्षेपलक्ष्मणायनिशाचरः। वायव्येनतदस्त्रंतुनिजघानसलक्ष्मणः।९४। अथैनंशरधाराभिर्धाराभिरिवतोयदः। अभ्यवर्ष
तसंक्रुद्धोलक्ष्मणोरावणात्मजं।९५। तेतिकायंसमासाद्यकवचेवज्रभूषिते। भग्नाग्रशल्याःसहसापेतुर्बाणामहीतले।९६। तान्मोघानभिसंप्रेक्ष्यलक्ष्मणः परवीरहा।
अभ्यवर्षतबाणानांसहस्रेणमहायशाः।९७। सवर्ष्यमाणोबाणौघैरतिकायोमहाबलः। अवध्यकवचःसंख्येराक्षसोनैवविव्यथे।९८। नशशाककरुषंकर्तुं
बाणाति यतेनमेसाधुःश्लाघनीयो रिपुरसि खेदं विधाय आनिधाय आसंविनम्य भुजौनियम्यवश्येष्याप्रोक्षितस्य नाोत्तमः। अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह।९९।
ब्रह्मदत्तवरोह्येषअवध्यकवचावृतः। ब्राह्मेणास्त्रेणभिंध्येनंनान्यथावध्यतेऽनयाह्ण्ति। अस्त्रेणअस्त्रमंत्रेण। आग्नेयेनस्वारि वधी कास्येनैवशरणं। ।९१। ।

राम
९१

प्रहर्षयुक्ता इति ॥ इष्टभागिनां इष्टस्य भागः । प्राप्तिः ॥ इंद्रं तोरष्टमतिकायवधं प्राप्तवंतामित्यर्थः ॥ ॥ इति श्रीमहेश्वरतीर्थीयेयुद्धकांडे एकसप्ततितमः सर्गः ॥ प्रख्यातबलवीर्येण

स्मादित्येकवचमेकं वाक्यं । योसावहं रणे दिनिरासकौ । वीरौ तौ नौ इंद्रजिता रथवरे ॥ येसेर्वद्वीपदं धनुरासुरासुरादिनिर्भेत्तुं मोघपि तं न शक्यं त इक्षनं यांरे ॥ भवेद्वैः सेर्वैः सम्यु

ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः ॥ ब्राह्मेणास्त्रेण भिंध्येनमेष वध्यो हि नान्यथा ॥ १०॥ अब्रवीद्वचनं धाम लक्ष्मणं कवदवी वली स तस्य वायोर्वचनं निशम्य सौमि

त्रिरिंद्रप्रतिमानवीर्यः । समादधे बाणममोघवेगं तद्ब्राह्ममस्त्रं सहसा नियोज्य ॥ ११॥ तस्मिन्वरास्त्रे तु नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे । दिशः सचंद्रार्कमहाग्रहा

श्च नभश्च कंपे वरा च घोर्वी ॥ १२॥ तं ब्रह्मणोऽस्त्रेण नियुज्य चापे शरं सपुंखं यमदूतकल्पं । सौमित्रिरिंद्रारिसुतस्य तस्य ससर्ज बाणं युधि वज्रकल्पं ॥ १३॥ तं लक्ष्मणेन

उत्सृष्टमिव वेगं समापतंतं ज्वलनप्रकाशं । सुवर्णवज्रोत्तमचित्रपुंखं तदातिकायः समरे ददर्श ॥ १४॥ तं प्रेक्षमाणः सहसातिकायो जघान बाणैर्निशितैरनेकैः ॥ स

सायकस्तस्य सुपर्णवेगस्तथातिकायस्य जगाम पार्श्वं ॥ १५॥ तमागतं प्रेक्ष्य तदातिकायो बाणं प्रदीप्तांतककालकल्पं । जघान शक्त्यृष्टिगदाकुठारैः शूलैर्हलै

श्चाप्यविपन्नचेष्टः ॥ १६॥ तान्यायुधान्यद्भुतविग्रहाणि मोघानि कृत्वा स शरोऽग्निदीप्तः । प्रसह्य तस्यैव किरीटजुष्टं तदातिकायस्य शिरो जहार ॥ १७॥ तच्छिरः स

शिरस्त्राणं लक्ष्मणेषुप्रमर्दितं । पपात सहसा भूमौ शृंगं हिमवतो यथा ॥ १८॥ ततस्ते चरितं पातानि रपेत्रा निशाचराः । पुरीमभिमुखा याता द्वंतो नायके हते ॥ १९

प्रहर्षयुक्ता बहवश्च वानराः प्रफुल्लपद्मप्रतिमाननास्तदा । अपूजयन् लक्ष्मणमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ २१॥ इत्यार्षे रामायणे वाल्मीकीये

युद्धकांडे एकसप्ततितमः सर्गः ॥ ॥ अतिकायं हतं श्रुत्वा लक्ष्मणेन महात्मना । उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ॥ १॥ धूम्राक्षः परमामर्षी सर्वशस्त्रभृतां वरः ।

अकंपनः प्रहस्तश्च कुंभकर्णस्तथैव च ॥ २॥ एते महाबला वीरा राक्षसा युद्धकांक्षिणः ॥ नेतारः परसैन्यानां परैर्नित्यापराजिताः ॥ ३॥ निहतास्ते महावीर्या रामेणाक्लि

ष्टकर्मणा ॥ राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः ॥ ४॥ अन्ये च बहवः शूरा महात्मानो निपातिताः । प्रख्यातबलवीर्येण पुत्रेणेंद्रजिता मम ॥ ५॥ यौ हि तौ भ्रात

रौ वीरौ बद्धौ दत्तवरैः शरैः । यत्र शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः । मोक्तुं तद्बंधनं घोरं सर्वैः समुदितैरपि । तन्न जाने प्रभावैर्वा मायया मोहनेन वा ॥ ७॥ शरबंधाद्विमु

क्तौ तौ भ्रातरौ रामलक्ष्मणौ ॥ ये योधा राक्षसाः शूरा निर्गता मम शासनात् । ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ॥ ८॥ ॥

७ तं भूमौ पतितं दृष्ट्वा विक्षिप्तंबरभूषणं । बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ १९॥ ते विषण्णमुखा दीनाः प्रहारैर्जनितश्रमाः । विनेदुरुच्चैः सहसा विस्वरैः स्वरैः ॥ २०॥

मुदितैरपि मोक्तुं न शक्यं । तौ राघवलक्ष्मणौ प्रभावैः सहजमाहात्म्यैः मायया विचित्रशक्त्या मोहनेन वा । दैवकन्तागपाशमोहनेन वा । शरबंधाद्विमुक्तौ तं न जानशतिपोजनाद ॥

अशोकवनिकेति अशोकवनिकायां यत्र प्रदेशे विशेषे सीता निरस्ता तत्र निष्क्रामः प्रदेशो वा नः अस्माभिर्ज्ञातव्य इत्यर्थः। दर्शनप्रकारमेवाह द्विधनाभिति। दिष्टां बलं किं उपयुक्तं
किं आपतति किं। तिष्ठतीति सदा हृष्टत्वमित्यर्थः॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकाण्डे द्विसप्ततितमः सर्गः॥ ॥ ततो हतानीति। अनिरीक्ष्य इत्येतत् निकाय विशेषणं उक्तमेव।
यमनुवदति। ततो हतानिति। नततातेति। प्रत्ययतः। इंद्रारेः। इंद्रजितः। इमामिति। संतर्पयिष्यामि सर्पयिष्यामि। पश्यध्वराममित्यादि श्लोकद्वयस्य वाक्यार्थः। अतिबलप

तत्र पश्यध्वमद्यैव युधि राघवं सलक्ष्मणं शासयेत्सकबलं वीरं ससुग्रीवं विभीषणं॥८॥ अहो नु बलवान्रामो महत्सत्त्वबलं च वै। यस्य विक्रममासाद्य राक्षसा निध
नं गताः॥१०॥ तं मन्ये राघवं वीरं नारायणमनामयं यत्कृते हि पुरा लंका पिहितद्वारगोपुरा॥११॥ अप्रमत्तैश्च युष्माभिः गुल्मे राक्षसरक्षणे पात्रो अशोकवनिकायां
च यत्र सीताभिरक्ष्यते॥१२॥ निष्क्रामो वा प्रवेशो वा ज्ञातव्यः सर्व एव नः। पत्र गुल्मस्तत्र तत्र पुनः पुनः॥१३॥ सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः। द्रष्टव्यं च वानराणां निशाचराः॥१४॥ प्रदोषो वार्धरात्रे वा प्रत्यूषे वापि सर्वशः। नावज्ञा तेषु कर्तव्या वानरेषु कदाचन॥१५॥ द्विषतां बलमुद्युक्तमापतत्किं स्थितं यथा। ततस्ते
राक्षसाः सर्वे श्रुत्वा लंकाधिपस्य तत्॥१६॥ वचनं सर्वमातिष्ठन्यथावत्तु महाबलाः। स तांसर्वान्समादिश्य रावणो राक्षसाधिपः॥१७॥ मन्युशल्यं वहन्दीनः प्रविवेश निवेशनं॥
ततः स संदीपितकोपवह्निर्निशाचराणामधिपो महात्मा। तदेव पुत्रव्यसनं विचिंतयन्मुहुर्मुहुश्चैव तदा विनिश्वसन्॥१८॥ ॥ इत्यार्षे युद्धकांडे द्विसप्ततितमः सर्गः॥
ततो हतान्राक्षसपुंगवांस्तान्देवान्तकादित्रिशिरोऽतिकायान्। रक्षोगणास्तत्र हतावशेषास्ते रावणाय त्वरिताः शशंसुः॥१॥ ततो हतांस्तान्सहसा निशम्य
राजा सुमोहाश्रुपरिप्लुताक्षः। पुत्रक्षयं भ्रातृवधं च घोरं विचिंत्य राजा विपुलं प्रदध्यौ॥२॥ ततस्तु राजानमुदीक्ष्य दीनं शोकार्णवे संपरिपुप्लुवानं। रथर्षभो
राक्षसराजसूनुस्तमिन्द्रजिद्वाक्यमिदं बभाषे॥३॥ न तात मोहं प्रतिगन्तुमर्हसि यत्रेन्द्रजिज्जीवति राक्षसेन्द्र। नेन्द्रारिबाणाभिहतो हि कश्चित्प्राणान्समर्थः समरेऽभि
पातुं॥४॥ पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहं। गतायुषं भूमितले शयानं शितैः शरैराचितसर्वगात्रं॥५॥ इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनि
श्चितां पौरुषदैवयुक्तां। अद्यैव रामं सह लक्ष्मणेन संतर्पयिष्यामि शरैरमोघैः॥६॥ अद्येन्द्रवैवस्वतविष्णुरुद्रसाध्याश्च वैश्वानरचन्द्रसूर्याः। द्रक्ष्यन्ति मे विक्रमम
प्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे॥७॥ स एवमुक्त्वा त्रिदशेन्द्रशत्रुरापृच्छ्य राजानमदीनसत्त्वः। समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तं॥८॥
पराक्रमशालिनो यस्य हेतुनेन नाहं समर्थः॥ अद्यापि तावत्करिष्यामि परपदे स्पाह। पश्येति। महाराणा विकीर्णदेहमपि गणानां पुंखानां पुंखाग्रोरपि न सर्वगात्रं। रामं पश्येति सं
बंधः। उक्तार्थमेवप्रतिज्ञारूपकमाह इमामिति। पौरुषैर्दैवयुक्तां पुरुषदैवोपेतां। सत्यमिति। खरश्रेष्ठसमाधियुक्तं समाधिः संबंधः। खरः श्रेष्ठसंबंधावंतं॥ ॥

वीज्यमानामितिद्विरेमे॥ हिरण्मयदंडैः॥ महति। युद्धभूमिं। युद्धायहोमसाधनभूमिं। ति कुंभिलाख्यानमित्यर्थः। सह विरिति। लाजसत्कारैः। संस्कृतहविर्भिर्जैरित्यर्थः॥ शस्त्राणीति।
शस्त्राण्येव शरपत्राणि समास्तरणानि। शराः कुशविशेषाः॥ रौद्रकर्मणि तेषां विनियुक्तत्वात्। अन्यासे तिनिशेषु सोमसु मिति। आहारयामास। आरुह्य वत्सा सुमंत्रं जजा
तंस्थितं संप्रदातमा नःमनुनगपुर्यं हावलः॥ संहर्षमाणा वहवो धनुष्पवराणमपः॥१०॥ गनस्कंधावानाः केचित्केचिद्व्याघ्रवाजिभिः॥ व्याघ्रवृश्चिकमार्जारखरशार्दूल
जंगमैः॥११॥ वराहैः श्वापदैः सिंहैर्जंबुकैः पर्वतोपमैः॥ काकहंससमस्तैश्चरात्रासाः भीमविक्रमः॥ अपास्यपदरामं स्थितंश परस्व वगारा धराः॥ मुसुंठिषु ऊरायष्टिरशतघ्नी
परिघायुधाः॥१३॥ सशंखप्रतिनदैः घोरैर्भेरीणां च पिनिस्वनैः॥ जगाम त्रिदशेंद्रारिर्महासैन्येन वीर्यवान्॥१४॥ सभो वहं सवर्णेन छत्रेणागरिघु शुभ्रदवः॥ राजन्निशि
पूर्णेन नभश्चंद्रमसा यथा॥१५॥ वीज्यमानस्ततो वीरो हैमैर्हेमविभूषितैः॥ चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मतां॥१६॥ ततस्त्विंद्रजितालंका सूर्यप्रतिमतेजसा। रा
जप्रति वीर्येण घोरिवार्केण भावृता॥१७॥ स संप्राप्य महातेजा युद्धभूमिमरिंदमः॥ स्थापयामास रक्षांसि रथं प्रति समंततः॥१८॥ ततस्तु हुतभोक्तारं हुतभुक्स
दृशप्रभः॥ जुहुवे राक्षसश्रेष्ठो मंत्रवद्विधिवत्तदा॥१९॥ स हविर्लाजसत्कारैर्माल्यगंधपुरस्कृतैः॥ जुहुवे पावकं दिव्यं तेजसेंद्रः प्रतापवान्॥२०॥ शस्त्राणिश
रपत्राणि समिधोथ विभीतकाः॥ लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा॥२१॥ स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः॥ छागस्य सर्वकृष्णस्य गलं जग्राह जीव
तः॥२२॥ सकृदेव समिद्धस्य विधूमस्य महार्चिषः॥ बभूवुस्तानि लिंगानि विजयं यान्यदर्शयन्॥२३॥ प्रदक्षिणावर्तशिखस्तप्तकांचनसंनिभः॥ हविस्तत्प्रतिजग्राह पाव
कः स्वयमुत्थितः॥ सोस्त्रमाहारयामास ब्राह्मं ब्रह्मविशारदः॥ धनुश्चात्मरथं चैव सर्वं तत्राभ्यमंत्रयत्॥२५॥ तस्मिन्नाहूयमाने च हूयमाने च पावके॥ सार्कग्रहेंदु
नक्षत्रं वितत्रास नभस्थलं॥२६॥ स पावकं पावकदीप्ततेजा हुत्वा महेंद्रप्रतिमप्रभावः॥ सचापबाणासिरथाश्वसूतः खेंतर्दधे आत्मानमचिंत्यरूपः॥२७॥ ततो हयर
थाकीर्णं पताकाध्वजशोभितं। निर्ययौ राक्षसं सैन्यं नर्दमानं युयुत्सया॥२८॥ ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः॥ तोमरैरंकुशैश्चापि वानरान्जघ्नुराहवे॥२९॥
रावणिस्तु ततः क्रुद्धस्तान्समीक्ष्य निशाचरान्। हृष्टा भवत युध्यध्वं वानराणां जिघांसया॥३०॥ ततस्ते राक्षसाः सर्वे गर्जंतो जयकांक्षिणः॥ अभ्यवर्षंस्ततो घोरान्
वानरान्शरवृष्टिभिः॥३१॥ स तु नालीकनाराचैर्गदाभिर्मुसलैरपि॥ रक्षोभिः संवृतः संख्ये वानरान्विचकर्त ह॥३२॥

धनुरादिकं चत्रस्त्रास्त्रमंत्रेण अभ्यमंत्रयत् अभिमंत्रयत् स पावकमिति। चांतर्दधे आत्मानमित्युक्ताकारलोपश्छांदसः॥ आत्मानमंतर्दधे अंतर्धापयामासेत्यर्थः॥ रावणि
स्तु तत इति युद्धं तु इत्यादि द्वे श्लोकविशेषः। सत्विति रक्षोभिः संवृतः राक्षसैः परिवृतः सन् आकाशप्रदेशे स्थित इत्यर्थः॥ अन्यथा रावणे तर्दधे इत्येतद्विरुध्येत रक्षोभिः संवृत इति
वापाठः॥

यु॰ ८३ तेभिन्नमात्रा रतिमथितसंकल्पाः॥ नाशितमनोरथाः॥ रामस्यार्थ इति। त्यक्तजीविताः॥ त्यक्तजीवितेत्यत्र॥ अभिमत्ता॥ अभिमुखं प्रहता॥ ते द्रुमैरिति॥ रावणिं॥ रावणिर्मं वारम
नेवध्यमानाः समरे वानराः पादपायुधाः॥ अभ्यवर्तन्त सहिताः पर्वणिं रणकर्कशं॥ ३३॥ इंद्रजितुनमः कुम्भो महातेजा महाबलः। वानराणां शरीराणि व्यधमद्रावणात्म
जः॥ ३४॥ शरैरोकेनदरीरनवपर्वचसप्तवाविभेदसमरे कुम्भो राक्षसात्मजहर्षयन्॥ ३५॥ सशरैः सूर्यसंकाशैः शातकुम्भविभूषणैः॥ वानतास्सरेवीरः प्रममाथ सुदुर्जयः॥
३६॥ ते भिन्नगात्राः समरे वानराः सर्वे भिन्नदेहा विचेतसः॥ ये त्वर्मथितसंकल्पाः सुरेरिव महासुराः॥ ३७॥ तत्रपं तम्भिवादित्यं घोरैर्बाणगभस्तिभिः॥ अभ्यधावंतसे कुम्भः
समरे वानरर्षभाः॥ ३८॥ ततस्ते वानराः सर्वे भिन्नदेहा विचेतसः॥ व्यथिताविद्वंतिस्मरुधिरेण समुक्षिताः॥ ३९॥ रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः॥ तदृंतस्त्वमि
दन्त्राक्षसमेरे सशिलायुधाः॥ ४०॥ ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः॥ अभ्यवर्तन्त समरे रावणिं समवस्थितं॥ ४१॥ तद्रुमाणां शिलानां च वर्षं प्राणहरं महत्॥ व्य
पोहत महातेजा रावणिः समितिंजयः॥ ४२॥ ततः पावकसंकाशैः शरैराशीविषोपमैः॥ वानराणामनीकानि विभेद समरे प्रभुः॥ ४३॥ अष्टादशशरैस्तीक्ष्णैः स विद्धा गंधमा
दनं विद्याधनदामिश्रैः वनलंङ्गरा स्वस्थितं॥ ४४॥ सप्तभिस्त्क महावीर्यो मैन्दं मर्मविदारणैः॥ पंचभिर्विशिखैश्चैव गजं विव्याध संयुगे॥ ४५॥ जांबवंतं च दशभिर्नीलं त्रिंशद्भिरेव
चा सुग्रीवमृषभं चैव सोंगदं द्विविदं तथा॥ ४६॥ घोरैर्दत्तैर्वरैस्तीक्ष्णैर्निष्प्राणान करोत्तदा॥ अन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः॥ ४७॥ अर्दयामास संक्रुद्धः का
लाग्निरिव मूर्छितः॥ स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः॥ ४८॥ वानराणामनीकानि ममंथ महारणे॥ आकुलां वानरीं सेनां शरजालेन पीडितां॥ ४९॥ स्त
ष्टः सपर्याश्रीत्या ददर्श सततनो मित्रो कुंभरेन्द्रमहातेजा राक्षसेंद्रो मत्तो वली॥ ५०॥ संस्तम्भवाणाव चंचरास्त्र वर्षं चरारुणं॥ ममर्द वानराः द्वाणविशीर्णदेहामायाह
नीकर्मि द्विजितविरितो बली॥ ५१॥ ससैन्यमुत्तम्य समेत्य तूर्णं महाहवे वानरवाहिनीं॥ अदहत्प्रमानः शरजालमुग्रं ववर्ष नीलोंबुधरो यथांबु॥ ५२॥ ते शक्रजित्प्राण
विशीर्णदेहा मायाहता विस्वरमुन्नदंतः॥ रणोत्थिपेत्तु हरयो दिक्षु यथेन्द्र वज्राभिहता नगेन्द्राः॥ ५३॥ ते केवलं संददृशुः शिताग्रा न्बाणान्रणे वानरवाहिनीषु॥ मायाविगू
ढं च सुरेन्द्रशत्रुं नचात्र तं राक्षसमभ्यपश्यन्॥ ५४॥ ततः स रक्षो विपतिर्महात्मा सर्वा दिशो बाणगणैः शिताग्रैः॥ प्रच्छादयामास रविप्रकाशैर्विदारयामास च वानरेन्द्रान्॥
५५॥ स शूलनिस्त्रिंशपरश्वधानि व्याविद्धदीप्तानलसन्निभानि॥ सविस्फुलिंगोज्ज्वलपावकानि ववर्ष तीव्रं प्लवगेन्द्रसैन्ये॥ ५६॥ ततो ज्वलनसंकाशैर्बाणैर्वानरयूथपाः॥ राम ८३
देशं॥ अभ्यवर्षत इत्यर्थः॥ नत्स्य दर्शनात्। तदिति॥ अपोरस्त अपसार्य निखिलसुग्रीवमिति ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः॥ ५७॥
दत्तवेरं॥ वत्तदैरिसर्थः॥ ससैन्यमिति॥ स्वसैन्यमुत्सृज्य स्वसैन्यस्योपरिभागमुत्सृज्यानेकेवलमिति॥ मायानिगूढं॥ अतएव न दृष्टं॥ अपप्रकाशं॥ ॥

अन्योन्यं विविशुः॥ अन्योन्यमाश्लिष्य तस्थुः। आवां तु दृश्येति॥ अमरारिवासे लंकारणोपलक्ष्मीं न खसमूलो मूलेन समूले हंतुं न शक्ष्यतीति स्वबित्ते॥ इति श्रीमहेश्वरती
र्थीये युद्धकांडे त्रिसप्ततितमः सर्गः॥ ॥ततो रितिः सारितयोः प्रद्धनयोः ततः इति बुद्धिमतां तान वतो। मां निष्ठेति निश्चो क ह्यमेकं वाक्यं। आर्यपुत्रौ विशेषो दिपरणो विनि
तन्वोन्यमभिसर्पितो नेरंतोन्नेस्खलनौ राक्षसेंद्रो स्वनिर्मित्रा नियेतुर्वां वरर्षभा॥ ५८॥ उरीन्त्रमाणागणानंकेविनेत्रे प्रुताषी डिताः। शनैर्विविशुरन्योन्यस्येतु नश्च
जगतीतले॥ ५९॥ हनूमंतं च सुग्रीवमंगदं गंधमादनं। जांबवंतं सुषेणं च वेगदर्शिनमेव च॥ ६०॥ मैंदं च द्विविदं नीलं गवाक्षं गवयं तथा। केसरिं हरिलोमानं वि
द्युद्दंष्ट्रं च वानरं। सूर्याननं ज्योतिमुखं तथा दधिमुखं हरिं। पावकाक्षं नलं चैव कुमुदं चैव वानरं॥ ६२॥ प्रासैः शूलैः शितैर्बाणैरिंद्रजिन्मंत्रसंहितैः। विव्याध हरि
शार्दूलान्सर्वांस्तान्राक्षसेश्वरः॥ ६३॥ स वै गदाभिर्हरियूथमुख्यान्निर्भिद्य बाणैस्तपनीयपुंखैः। ववर्ष रामं शरवृष्टिजालैः सलक्ष्मणं भास्कररश्मिकल्पैः॥ ६४
स बाणवर्षैरभिवर्ष्यमाणो धारानिपातानिव तान्विचिंत्य। समीक्षमाणः परमाद्भुतश्री रामस्तदा लक्ष्मणमित्युवाच॥ ६५॥ असौ पुनर्लक्ष्मण राक्षसेंद्रो ब्रह्मास्त्र
माश्रित्य सुरेंद्रशत्रुः। निपातयित्वा हरिसैन्यमुग्रमस्माच्छरैरर्दयति प्रसक्तं॥ ६६॥ स्वयंभुवा दत्तवरो महात्मा समाहितोंतर्हितभीमकायः। कथं नु शक्यो
युधि नष्टदेहो निहंतुमद्येंद्रजिदुद्यतास्त्रः॥ ६७॥ मन्ये स्वयंभूर्भगवानचिंत्यो यस्यैतदस्त्रं प्रभवश्च योस्य। बाणावपातांस्त्वमिहाद्य धीमन्मया सहाव्यग्रमनाः स
हस्व॥ ६८॥ प्रच्छादयत्येष हि राक्षसेंद्रः सर्वा दिशः सायकवृष्टिजालैः। एतच्च सर्वं पतिताग्र्यशूरं न भ्राजते वानरराजसैन्यं॥ ६९॥ आवां तु दृष्ट्वा पतितौ विसंज्ञौ
निवृत्तयुद्धौ हतरोषहर्षौ। ध्रुवं प्रवेक्ष्यत्यमरारिवासमसौ समादाय रणाग्रलक्ष्मीं॥ ७०॥ ततस्तु ताविंद्रजिदस्त्रजालैर्बभूवतुस्तत्र तदा विशस्तौ। स चा
पि तौ तत्र विषादयित्वा ननाद हर्षाद्युधि राक्षसेंद्रः॥ ७१॥ स तत्तदा वानरराजसैन्यं रामं च संख्ये सह लक्ष्मणेन। विषादयित्वा सहसा विवेश पुरीं दशग्रीवभु
जाभिगुप्तां॥ ७२॥ ॥ इति युद्धकांडे त्रिसप्ततितमः सर्गः॥ ॥ ततो सरामारितयो रणाग्रे मुमोह सैन्यं हरियूथपानां। सुग्रीवनीलांगदजांबवंतो न चापि किं
चित्प्रतिपेदिरे ते॥ १॥ ततो विषण्णं समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः। उवाच शाखामृगराजवीरानाश्वासयन्नप्रतिमैर्वचोभिः॥ २॥ मा भैष्ट नास्त्यत्र वि
षादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ। स्वयंभुवो वाक्यमथोद्वहंतौ यत्सादिताविंद्रजिदस्त्रजालैः॥ ३॥
नियत्॥ अत्र विषये मानैः छद्मयोर्विषण्णयोरस्माकं वा रक्षिष्यति निशाचरो नयं मास्त्विदित्यर्थः॥ नास्त्यत्र विषादकालः॥ विषादजनककालो नास्ति एतयोर्विषादे नभवतां
विषादो मास्त्वित्यर्थः॥ कुतस्त्वत्राह स्वयंभुव इति। वाक्यं मंत्ररूपवाक्यं उद्वहंतौ। मानयंतौ। इंद्रजिदस्त्रजालैः सादितौ। सादितौ विवशौ मानावित्यर्थः। प्रकाश ब्रह्मास्त्रमाना
र्थः स्वयमेव पतितौ न त्वस्मान्मानिस्येत्यर्थः॥ ॥

सवद्भिरिति। स्रवद्भिः स्त्रुत्रपद्भिः॥ एतांश्चान्यानीति। हताश्चाहनश्चायाश्च। सप्तषष्टीति। वानराणां षष्ट्यपयथस्य पवानराणामित्यर्थः। अह्नः पंचमशेषेण। पंचमभागे नष्टानः संगदम

तस्मै तु दत्तं परमास्त्रमेतत्स्वयंभुवा ब्राह्मममोघवीर्यं॥ तन्मानयंतौ यदि राजपुत्रौ निपातितौ कोऽत्र विषादकालः॥४॥ ब्राह्ममस्त्रं तदा धीमान्मानयित्वा तु मारुतिः। वि
भीषणवचः श्रुत्वा हनूमानिदमब्रवीत्॥५॥ एतस्मिन्निहते सैन्ये वानराणां तरस्विनां। यो यो धारयते प्राणांस्तं तमाश्वासयावहे॥६॥ तावुभौ युगपद्वीरौ हनूमद्रा
क्षसोत्तमौ। उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः॥७॥ भिन्नलांगूलहस्तोरुपादांगुलिशिरोधरैः। स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिरितस्ततः। पतितैः पर्वताका
रैर्वानरैरभिसंवृतां। शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुंधरां।८। सुग्रीवमंगदं नीलं शरभं गंधमादनं। जांबवंतं सुषेणं च वेगदर्शिनमाहुकं।९। मैंदं नलं ज्योतिमु
खं द्विविदं पनसं तथा। विभीषणो हनूमांश्च ददृशाते हतान्रणे। ११। सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनां। अह्नः पंचमशेषेण वल्लभेन स्वयंभुवः॥१२॥
ष्या नानादेवपुत्रा एतावताः कोटयो निपातिताः। इतरेषां तु संख्या नाहता निशांतसंघशः। ब्रह्मा स्वं जपमानस्तु सुकृशास्त्रो विभीषणः॥ ब्रह्मणो वरदानाद्बहु तु संख्या
पि तान्सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलं। मार्गते जांबवंतं स्म हनूमान्सविभीषणः॥१३॥ स्वभावजरया युक्तं वृद्धं शरशतैश्चितं। प्रजापतिसुतं वीरं
शाम्यंतमिव पावकं।१४। दृष्ट्वा तमुपसंगम्य पौलस्त्यो वाक्यमब्रवीत्। स्वरेण त्वाभिलक्षये पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा।१७। अंजना सु
प्रजा येन मातरिश्वा च नैर्ऋत। हनूमान्वानरश्रेष्ठः प्राणान्धारयते क्वचित्॥१८॥ श्रुत्वा जांबवतो वाक्यमुवाचेदं विभीषणः॥ आर्यपुत्रावतिक्रम्य कस्मात्पृच्छ
सि मारुतिं॥२१॥ अस्मिन्जीवति वीरे तु हतमप्यहतं बलं। हनूमत्युत्सृष्टप्राणे जीवंतोऽपि वयं हताः॥२२॥ धरते मारुतिस्तात मारुतप्रतिमो यदि। वैश्वानर
समो वीर्ये जीविताशा ततो भवेत्॥२३॥ ततो वृद्धमुपागम्य नियमेनाभ्यवादयत्॥ गृह्य जांबवतः पादौ हनूमान्मारुतात्मजः॥२४॥ श्रुत्वा हनूम
तो वाक्यं तदापि व्यथितेंद्रियः॥ पुनर्जातमिवात्मानं मन्यते स्मर्क्षपुंगवः॥२५॥ ततोऽब्रवीन्महातेजा हनूमंतं स जांबवान्॥ आगच्छ हरिशार्दूल वानरां
स्त्रातुमर्हसि॥२६॥ नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा॥ त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कंचन॥२७॥

श्र

४१९॥ नैर्ऋतराज न सुग्रीवे नांगदे नापि राघवे। आर्यसंदर्शितः स्नेहो यथा वायुसुते परः।२०। विभीषणवचः श्रुत्वा जांबवान्वाक्यमब्रवीत्। शृणु नैर्ऋतशार्दूल यस्मात्पृच्छामि मारु[ति]

माध्याह्नापराह्णसायाह्नसंज्ञितेषु एवं रिकाह्नसु पंचसु भागेषु सायाह्नसंज्ञिकेन भागेनेत्यर्थः। स्वयंभुवो वल्लभेन ब्रह्मास्त्रेणेति शेषः। आगच्छ हरिशार्दूलेति। विक्रम
पर्याप्तः। पर्याप्तविक्रमः॥ ॥

तस्य वानरशार्दूलेति ॥ ओषधयः ॥ ओषधीः ॥ दीप्यमानाः ॥ दीपयंती ॥ ऋक्षबिलोदरे ॥ बलोत्कटे ॥ आहार्यनादरेणेश्वबा सदृश ॥ पर्वततटाग्रस्थः ॥ त्रिकूटशिखरस्थः ॥ तस्येति ।
तस्य त्रिकूटपर्वतस्य नगाः ॥ दृष्ट्वा ॥ तस्य सु ॥ परस्परसंघर्षादिति भावः ॥ पद्भ्यामिति ॥ आसयह्वनारसालत्तरमेहेतोः क्रिया पाडतिहेतौ शतृप्रत्ययः ॥ यावदेष गानयते ॥ तावद्ब्रूतेति

ऋक्षवानरवीराणामनीकानि प्रहर्षयन् ॥ विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ ३३ ॥ गत्वा परममध्वानमुपर्युपरि सागरं ॥ हिमवंतं नगश्रेष्ठं हनुमन् गंतुमर्हसि
॥ ३४ ॥ ततः कांचनमत्युच्चमृषभं पर्वतोत्तमं ॥ कैलासशिखरं चात्र द्रक्ष्यस्यरिनिषूदन ॥ ३५ ॥ तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभं ॥ सर्वौषधियुतं वीर द्रक्ष्यस्यौष
धिपर्वतं ॥ ३६ ॥ तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः ॥ द्रक्ष्यस्योषधयो दीप्ता दीपयंत्यो दिशो दश ॥ ३७ ॥ मृतसंजीवनीं चैव विशल्यकरणीमपि सावर्ण्यकर
णीं चापि संधानीं च महौषधिं ॥ ३८ ॥ ताः सर्वा हनुमन् गृह्य क्षिप्रमागंतुमर्हसि ॥ आश्वासय हरीन्प्राणैर्योज्य गंधवहात्मज ॥ श्रुत्वा जांबवतो वाक्यं हनुमान्हरिपुंगवः ॥
आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ४० ॥ स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमं ॥ हनुमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ४१ ॥ हरिपादविनिर्भिन्नो निषसाद स पर्वतः
न शशाक तदात्मानं सोढुं भृशनिपीडितः ॥ ४२ ॥ तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः ॥ शृंगाणि च व्यशीर्यंत पीडितस्य हनूमता ॥ ४३ ॥ तस्मिन्संपीड्यमाने तु भग्नद्रुम
शिलातले ॥ न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ४४ ॥ स घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा ॥ लंका त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४५ ॥ पृथिवीधरसंकाशो नि
पीड्य पृथिवीधरं ॥ पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४६ ॥ पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखं ॥ विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥ ४७ ॥
तस्य नानद्यमानस्य श्रुत्वा निनदमुत्तमं ॥ लंकास्था राक्षसाः सर्वे न शेकुः स्पंदितुं भयात् ॥ ४८ ॥ नमस्कृत्वाथ रामाय मारुतिर्भीमविक्रमः ॥ राघवार्थे परं कर्म स
मीहत परंतपः ॥ ४९ ॥ स पुच्छमुद्यम्य भुजंगकल्पं विनम्य पृष्ठं श्रवणे निकुंच्य ॥ विवृत्य वक्त्रं वडवामुखाभमापुप्लुवे व्योम्नि स चंडवेगः ॥ ५० ॥ स वृक्षखंडांस्तरसा ज
हार शैलाञ्छिलाः प्राकृतवानरांश्च ॥ बाहूरुवेगोद्धतसंप्रणुन्नास्ते क्षीणवेगाः सलिले निपेतुः ॥ ५१ ॥ स तौ प्रसार्योरगभोगकल्पौ भुजौ भुजंगारिनिकाशवीर्यः ॥
जगाम मेरुं नगराजमग्र्यं दिशः प्रकर्षन्निव वायुसूनुः ५२

तावद्दर्शनगतिर्गमनं मा भूदिति तेषां त्रासनार्थं ननादेति भावः ॥ इव शब्दो वाक्यालंकारे विकल्पेति । प्राकृतवानरान् त्रिकूटशिखरवने स्थितान् तस्मात्प्रकृत्या वानराणीत्यर्थः
सतावितिः ॥ जगाम मेरुं कैलासपर्वतवर्तिनो ऋषित्वन्यो हिमवदंगपर्वतो मेरुः ॥ यद्वा ॥ मेरुं मेरूपलक्षितदिशि स्थितो नगराजं हिमवंतं गत्यर्थः ॥ मेरुतुल्यं हिमवंतं तस्मिन्देशे प्राप्त
वकृति बहुगोत्रप्रयोगः ॥

सपर्वतानिति। नगात्॥ नगपरात्॥ जगामेति। स्मरन्नोवावतोवाक्यं। जांबवद्वाक्यस्मरणं। श्रीपधिपर्वतमतीत्यर्थः॥ गहं दिशेयेनान्यत्र गत नतिहृत्यर्थे द्दष्ठा नामाश्रमाणांनामानु
नुक्रामति। सब्रह्मकोशरत्वादिना। ब्रह्मकोशं हिरण्यगर्भस्थानां रजतालयं रजतनाभिस्थानां हिरण्यगर्भीपस्थं निरजतनाभिभगवान् पत्रास्थिता रुद्रशिवपुरं तंहारायशंखुमो
चात स्थानं रुद्रशरपोत्नाहयाननो हयग्रीवभगवात्स्थानो ब्रह्मशिरोमाशाद्देवतानन्स्थानांवत्स्थानिनित्यसन्निहिता देवेवस्तनकिंकरा श्च ददर्श। ब्रह्मर्षिनिवेशनं। सप्तर्षि
णांपवस्थाने निवंधनं समावेशः। नित्यसंति यानंश्चत एवतत्सर्यभगेश्वलालयां च वसु रवमसालयं। शंकरकार्मुकं पिनाकास्तुरानस्थाना वसुंधरा यानां निस्त्तु प्रजापत्यंगृहं
सस्रागरंप्रतितवीचिमलां तथा प्दर्शं धाम्तिसर्वसत्वां सर्वोब्रह्माणः सहस्राणजगामवक्रंयथा विष्णुकरान्मसुक्तं। ५३। सपर्वतान्नत्तगरणात्सरांसिनदीस्तथाका निपुरो
तमा निःस्कांतं जनानानरनयिसंपवीहृजगामवेगात्पिटतुल्यवेगः। ५४। आदित्यपथमास्थाय जगाम सगतामः। हरवमांस्कारतोवीरः पितृतुल्यपराक्रमः। ५५।
तवेनमहतायुक्तो मारुतिर्भीरुतो यथा॥ जगाम हरिशार्दूलो दिशः शब्देन नारयन्॥ ५६॥ स्मरन्नोववतो वाक्यं मारुतिर्भीमविक्रमः। ददर्श सहसागत्वाहिमवंतं महा
कपिः। ५७। नानाप्रस्रवणोपेतं नानाकंदरनिर्झरं। श्वेताभ्रचयसंकाशंशिखरैश्चारुदर्शनं। ५८। शोभितंविविधैर्वृक्षैरगमत्पर्वतोत्तमं। ५९। सतंसमासाद्यमहानग
गेंद्रमतिप्रवृद्धोत्तमहेमशृंगं। ददर्शसुरपानि महाश्रमाणिसुरर्षिसंघोत्तमसेवितानि। ६०। सब्रह्मकोशंरजतालयंचशक्रालयंरुद्रशरप्रमोक्षं। हयाननंब्रह्मशि
रश्वदीप्तो ददर्शवैवस्वतकिंकरांश्च। ६१। वज्रालयंवैश्रवणालयंचसूर्यप्रभंसूर्यनिबंधनंच। ब्रह्मासनंशंकरकार्मुकंचददर्शनाभिंचवसुंधरायाः। ६२। विश्वेश्वरंतत्र
स्थं रिके शंस्कंदं हतं देवगणो र्हृशो उमांसदुर्गामथकन्यकानिर्विलासयंती ददर्शाप्रवीर्यः॥ ६३॥ कैलाससमु ग्रं हिमवच्छिलांवनं वनेवृषभं कांचनशैलमग्र्यामदरी
नसर्वौषधिसंप्रदीप्तंदर्शसर्वौषधिपर्वतेंद्रं। ६४। सतंसमीक्ष्यानलराशिदीप्तंविसिष्मिये वासवदूतसूनुः। आप्लुत्यतंचौषधिपर्वतेंद्रं तत्रौषधीनां विचयंचकार। ६५।
सयोजनसहस्राणि समतीत्यमहाकपिः। दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः। ६६। महौषध्यस्तुताः सर्वास्तस्मिन्पर्वतसत्तमे। विज्ञायार्थिनमायांतं ततोजग्मु
रदर्शनं। ६७। सतामहात्माहनुमान्पश्यन्चुकोप रोषाच्च भृशं ननाद। अमृष्यमाणोऽग्निनिकाशचक्षुर्महीधरेंद्रं तमुवाचवाक्यं। ६८। किमेतदेवंसुविनिश्चितंते यद्राघ
राम ८५
मवच्छिवां रुद्रस्यतपः समा विपी वंबहकोगस्तीन्याश्रम नामा नि। कैलासमिति। हिमवच्छिवां। वेनासि हृतोतुकंपः। पश्यापमद्य ह्यबलाभिभूतो विकीर्णमात्मानमथोनगेंद्र॥
कैलासपार्श्वेकस्थिहिमविशेषः। पश्यास्विवधिदिलेहातिहासमतिष्ठिः। सतमिति॥ वासवदूतसूनुः। आप्लुत्य। शीघ्रंवासवदूतं तं वासवादेशेनमेघा दिशेरकस्याह। किमेतदिति॥
पदा। यस्मात्। राघवेन चानुकंपानास्ति नस्मादेतत्। औषध्यप्रदर्शनं तेनत्वया एवंस्तुनिश्चितं किं तर्हि विकीर्णमात्मानं पश्येति संबंधः॥ ॥

सनस्येति। सनागं। सनागं। उन्ममाथ। उत्पाटयामासेत्येनेति। सहस्रधारेण। सहस्रारेण। चक्रेणार्पितेनास्रकरार्पितेनाप्यायाहतावानराः प्रतिबुद्धाः। एवं राक्षसाः किमितिनप्रतिबुद्धास्त
त्राह। यदाप्रभृतीत्यादिश्लोकद्वयेन। मानार्थं मानं हतानां राक्षसानां रक्षणार्थं। ततीरित्रानार्थं। यद्वा। मानोऽभिमानः। तदर्थं राक्षसा बहवो हताइति सर्वे ज्ञास्यंतीत्यभिमाना
प्रकटनायेत्यर्थः। हताहताः क्षिप्तुमुर्मावस्थापञ्चात्रापलयर्थः॥ ॥इतिश्रीमहेश्वरतीर्थीये युद्धकांडे चतुःसप्ततितमः सर्गः॥ ॥ततइति। अर्थ्यं। अर्थादनपेतं कर्तव्यमित्यर्थः। विज्ञा

सतस्य शृंगं सनगं सनागं सकांचनं धातुसहस्रजुष्टं विकीर्णकूटं ज्वलिताग्रसानुं प्रगृह्य वेगात्सहसोन्ममंथ॥६९॥ स तं समुत्पाट्य खमुत्पपात वित्रास्य लोकान्ससु
रान्सुरेंद्रान् संस्तूयमानः खचरैरनेकैर्जगाम वेगाद्गरुडोग्रवीर्यः॥७०॥ स भास्कराध्वानमनुप्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य। बभौ तदा भास्करसंनिकाशो रवेः समीपे
प्रतिभास्कराभः॥७१॥ स तेन शैलेन भृशं रराज शैलोपमो गंधवहात्मजस्तु। सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन॥७२॥ तं वानराः प्रेक्ष्य तदा विनेदुः
स तानपि प्रेक्ष्य मुदा ननाद तेषां समुत्कृष्टरवं निशम्य लंकालया भीमतरं विनेदुः॥७३॥ ततो महात्मा निपपात तस्मिन् शैलोत्तमे वानरसैन्यमध्ये। हर्युत्तमेभ्यः। शिरसा
भिवाद्य विभीषणं तत्र च सस्वजे सः॥७४॥ तावप्युभौ मानुषराजपुत्रौ तं गंधमाघ्राय महौषधीनां। बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः॥७५॥ सर्वे विश
ल्या विरुजः क्षणेन हरिप्रवीरा निहता ये स्युः। गंधेन तासां प्रवरौषधीनां सुप्ता निशांतेष्विव संप्रबुद्धाः॥७६॥ यदा प्रभृति लंकायां युध्यंते कपिराक्षसाः। तदा प्रभृ
ति मानार्थमाज्ञया रावणस्य च॥७७॥ ये हन्यंते रणे तत्र राक्षसाः कपिकुंजरैः। हता हतास्तु क्षिप्यंते सर्व एव तु सागरे। ततो हरिर्गंधवहात्मजस्तमोषधी
शैलमुदग्रवीर्यः। निनाय वेगाद्धिमवंतमेव पुनश्च रामेण समाजगाम॥ ॥युद्धकांडे चतुःसप्ततितमः सर्गः॥ ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः। अर्थ्यं
विज्ञापयंश्चापि हनूमंतं महाबलं॥१॥ यतो हतः कुंभकर्णः कुमाराश्च निषूदिताः। नेदानीमुपनिर्हारं रावणो दातुमर्हति॥२॥ ये ये महाबलाः संति लघवश्च
प्लवंगमाः। लंकामभ्युत्पतंत्वाशु गृह्योल्काः प्लवगर्षभाः॥३॥ ततोऽस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे। लंकामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः॥४॥

पयन्। कर्तव्यं बोधयन्नित्यर्थः। यत इति। उपनिर्हारं। उपनिष्क्रम्य युद्धं प्रदानं। ततोऽस्तमिति। निशामुखे। निशायाः प्रथमे। उल्का हस्तोत्तरा तोरणशीर्षे विचेरुरिति सर्वसर्गे
के। संध्याकालानंतरं स्यात्। ओषधिपर्वतमानीय पुनस्तत्र निक्षिप्यागतं हनूमंतं सुग्रीवः। ये ये महाबलाः संति लघवश्च प्लवंगमाः। लंकामभ्युत्पतंत्विति। सुग्रीवादेशानंत
रं। प्लवगर्षभा विशामुखे लंकां जग्मुः स्वसन्निधानात्। हनूमतो विंशवेगातिशयः सूच्यते। ततोऽस्तंगत आदित्य इति। एकस्मिन्नेवास्तमयस्यानुवादः। नचिदानीमस्तमयः
प्रद्य। ततोऽस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे इति प्रदिनवृत्तांतः॥ ॥

सु·टी·
९६

उल्काहस्तैरिति। आकृत्यास्यास्तुल्यास्याः विरूपा इत्याः। राक्षसा। पातेषामिति। तेषां वनराणां सर्वं विकृतमुक्तमनंतिन्म तत्॥७॥ आगरु इति। रत्नैरेतैर्द्रव्यैरिति। श्वेतार्थे लट्॥८॥ आविकमि
ति। आविकं। आविरोमनिर्मितं। और्णं ऊर्णामेषादिलोमतन्तुनिष्कंबलादिकं तु नैमांडं सोवर्णानुपकरणं॥९॥ नाना विकृतसंस्थानं। नानाञ्जनेकं विकृतसंस्थानं विचित्र
विन्यासं वा लिभांड परिच्छदं भांडमश्वालंकारः परिच्छदः पल्ययनादिपरिकरः। मौ उष्टो हेतैवास्या अरलोअतीते घनवाजि महर्षकणिवतं सवन्मादित्यावेवा धनार्थे रथमांडरथो
पकरणं निलंकृताः। संप्रयथिताः॥१०॥ रोमनाभिति। रोमनं। कंबला हिवा लानोवा मरादि। व्याघ्रगंचमश्चाउनो कस्तूरिव्याघ्रचर्मेत्युक्ता मणीति। अस्त्रसंयोगात्। अस्त्रसंघाता

उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः। आस्यस्याः विरूपास्याः सरसा विप्रउद्बुधः॥५॥ गोपुराट्टमतोल्यो युचर्या युविविधायुधा आसारैश्च सर्वैः सहस्तैस्तु ऊतायनेः॥६॥
तेषां ग्रहसहस्राणि दारादृढजस्रुकृतरा। प्रासादाः पर्वताकाराः पतंति धरणीतले॥७॥ आगरुरहस्वनेतत्र परं चैवस्तु चंदनं। मौक्तिकामणयः स्निग्धाबद्धंवापिजवालकं॥८॥
क्षौमं च दत्युनेतत्र कौशेयं चापि शोभनं। आविकं विविधं चौर्णं कांचनं भांडमायुधं॥९॥ नानाविकृतसंस्थानं वाजिभांडपरिच्छदं गजेभेवेयकक्ष्याश्च रथभांडास्व
संस्कृताः॥१०॥ तनुत्राणि तथा योधानां हस्त्यश्वानां च वर्मवा। खड्गाः धनूंषि ज्या बाणा तोमरांकुशशक्तयः॥११॥ रोमजं वालजं चैव व्याघ्रजं चांडजं बहु। मुक्तामणिविचित्रा श्च
प्रासादाश्च समेततः॥१२॥ विविधान स्त्रसंयोगानग्निर्दहति तत्र वा नाना विकृतसंस्थानां रसाह्रुकुत्रस्रुकुतराः॥१३॥ आवासान्रा रूक्षानां च सर्वेषां स हृष्टस्तुनो हे समवि
तनुत्राणां स्वभोगं च दारिणं॥१४॥ शीघ्रपानेवसक्तानां मदविह्वलगामिनां कीतालं वितथस्राणां रात्रुसंघातमस्तुनां॥१५॥ गहस्तूलासिरलानां शास्त्राधिवेता
मयि शयने शुभ्रहारैर्युमस्त्रुमानी प्रियैः सह॥१६॥ तस्या नांगन्तोत्ताहर्ण पुत्रानारा पसर्वता। तेषां शतसहस्राणि तदा लंकानिवासिनो॥१७॥ अरहत्संपावक सवनात्रा
न च पुनः पुनः। सारवंतिमहार्हाणि गंभीरगुणवंति च॥१८॥ हेमचंद्रार्धचंद्राणि चंद्रशालोन्नतानि च। रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः॥१९॥ मणिविद्रुमवि
त्राणि स्पृशंतीव च भास्करं। क्रौंचबर्हिणवीणानां भूषणानां च निस्वनैः॥२०॥ नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः। ज्वलनेन परीतानि तोरणानि चकाशि
रे। विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे॥२१॥ ज्वलनेन परीतानि गृहाणि च कारेवाणि दीप्तानि यथा शिखराणि महागिरेः॥२२॥ विमानेसुमस्तुनाभ्य स्त्र्युमा नापरांगनाः॥
त्यक्ताभरणसर्वांगा हाहेत्युच्चैर्विचुक्रुशुः॥२३॥ तत्र चापि परीतानि निपेतुर्भवनान्यपि। वज्रिवज्राहतानीव शिखराणि महागिरेः॥२४॥ तानि निर्दह्यमानानि दूरतः
प्रचकाशिरे हिमवच्छिखराणीव दह्यमाना निसर्वशः॥२५॥ हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि। रात्रौ सा दृश्यते लंका पुष्पितैरिव किंशुकैः॥२६॥

राम
९६

२। नानेति। एरक्षं दा२। स्वस्तिका दिरूपसंनिवेशविशेषाः। आवासानिति। गृहस्तुनां गृहस्थानां स्वामीनि दाराः शीतिशत्रुसंघात मनुना मित्यत्र दीर्घाभावश्चार्षः। शयनेषि
ति। प्रियैः। प्रियाभिः सहेत्यर्थः। सारवंतीत्यादि। हेमचंद्रार्धचंद्राणि। हेमनिर्मितानि चंद्रकाराणि। अर्धचंद्रकाराणि चंद्रशालोन्नतानि। शिरोगृहैरुन्नतानि वेश्मान्यग्नि
र्ददाहेति संबंधः। साधिष्ठानि। अधिष्ठानमेव कारिसहितानि। ज्वलनेनेति। धर्मगे धर्मरस्मावहति निर्धर्मगो वर्षाकालः॥ ॥

हस्तयष्टैरिति(लोकांते) प्रलये २५ उद्बुष्टमिति। रामस्य प्रशरः तावुभौवा नरराक्षसानां शंहौ। ध्वनि। आतिक्रम्य शुशुभे वंयव्यात्याप्तानभक्ते। २५। आदिश्य इत्यादि लोके कक्षमे कं
वोक्ता वः युष्माकं मध्ये यः तत्र तत्र युपस्थितः सत्त्ववितथं कुर्यात्स छायामिति शेषः। राजशासनदूषकः। हंतव्यः चलोयुद्ध्यमिति दिसुर्यो वे एण दिश्य इति संबंधः। ४१। तस्येति। जं

हत्तध्वजेषु नैर्ऋतेषु केशेषु उरगेषु अपि च कृतं कालोकांतेयातया हरुद्राणीव। २५। अवश्यं सुकंगनोरक्षा धकविद्धोतोपसर्पति। भीतो भीतं गजं दृष्ट्वा कश्चिद्दृष्टो निवर्तते श्र्
लंकायां हतमानायां शुशुभे च महारथिः। छायासमक्तसलिलालोहितो दृश्यार्णवः। सावश्ववमुद्धुर्नमहारिरिर्दिदीपितापुरी। लोकस्यास्य क्षयेघोरे प्ररीप्तेव वसुंधरा। २८। नारी
नरघ्यर्घमेव सायस्योक्तोर्विनेदुषः स्तनो त्वलनरी प्रस्पृशुशुभे शतयोजनं। २९। मरग्वकाया नयनात्राक्षसक्षिंगिताद्वहिः। सहसा प्रस्मरंति स्मरत्त्वयोध्युयुत्सवः। ३०। उ
द्धुष्टंवा नराणां च राक्षसानां चनिस्वनः नरिशो दशसमुद्रं च पृथिवीं च व्यनादयः। ३१। विशल्यो च महात्मानो वा वुभौ राम लक्ष्मणौ। कुंसंनां तोन दहत्तस्तास्मो धनुषीवरे। ३२
त तेवि स्फारमान स्वधनुस्तनयं चृहद्वदमुलः शाह्नो राक्षसानां भयावह। ३३। अशोभत तदा रामो धनुर्विस्फारयन्महत्। भगवानिव संक्रुद्धो भवो वेदमयं धनुः। ३४। उद्धु
ष्टं वानराणां च राक्षसानां च निस्वनं। ज्याशब्दस्तावुभौ वा शब्दो अतिरम्यसु शुशुभे। ३५। वानरोद्धुष्टघोषश्च राक्षसानां च निस्वनः। ज्याशब्दश्चापि रामस्य त्रयं व्याप्य दिशो
दशा। ३६। तस्य कार्मुकनिर्मुक्तैः शरैस्तत्पुरगोपुरं। कैलासशृंगप्रतिमं विकीर्णमपतद्भुवि। ३७। ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च। संनाहो राक्षसेंद्राणां तु
मुलः समपद्यत। इत ते पां सन्नस्य मानानां सिंहनाय शर्वैवितथं कुर्यात्स वग्न तत्र युपस्थितः। सहंतव्यो मिसंस्तुत्य राजशासनदूषकः। ४१। तेषु वानरमुख्येषु दीप्तोल्को
ज्वलपाणिषु। स्थितेषु द्वारमासाद्य रावणं मंत्रिणो विशन्। ४२। तस्य जृंभितविक्षेपान्मोक्षा मिथ्या वेरिणो रणे। रूपवानिव कंदर्पसमन्तुमीने वहस्पतेः। ४३। स कुंभं च
निकुंभं च कुंभकर्णात्मजावुभौ। प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह। ४४। यूपाक्षः शोणिताक्षश्च प्रजंघः कंपनस्तथा। निर्ययुः कौंभकर्णिभ्यां सह रावणशा
सनात्। ४५। शशासैव तु तान्सर्वान्राक्षसान्स महाबलः। राक्षसा गच्छतानेव सिंहनादं च नादयन्। ४६। ततस्ते चोदितास्तेन राक्षसा ज्वलितायुधाः। लंकायानि
र्ययुर्वीराः प्रणदंतः पुनः पुनः। ४७। रक्ष्मां भूषणस्था भिर्भाभिस्ता भिश्च सर्वशः। चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह। ४८।

जितविज्ञो मातः हेतोः रशादिशे यामिश्राः पाकुला रुद्रस्यमनुः रुप वानिव यात्रे घटस्पते तिवसंबंधः। ४२। शशासेत हे राक्षसाः आचक्रमित्य लस्यवन्याग गच्छतेति सिंहनादं ना
दयताराक्षसान् शशासेति संबंधः। ४६।

यु·टी·
८१

तत्रेति। तपोर्द्धलपोर्थो अत्रप्रभाकर्त्री बल्योर्घोउ भयसेना मध्यगता काशपेशं आभासयदिति संबन्धः। तत्रेति। संसक्तपाता वाः संसक्तपाता लोये तस्मः सागरः। भाभिः। अधिकं सुखु नभस्तिसे
वं ध्वः। पताकेत्यादि। उत्तमासिपरस्वधं। परस्वधो द्विविधः। असिद्रूपः। कुठाररूपश्चात्तत्रासिरूपः। परस्वधो सिपारस्वधः॥ अनेनउत्तव्रद्धपरस्वधाभ्यां तपो तरुरूपं। हेमजालेति। हेम

तत्रतारणक्षिप्यमाणानां च तयोर्बभौ॥ तयोरम्भरणस्थाभाब्तपोर्धाम्भा स्पृशन्॥ ५०॥ चंद्राभाम्भपरणमाव दृहाणांत्वलितावुभौ। हरिण त्वसैन्यानि भ्राजयामा
सर्वतः॥ ५१॥ तत्रवोर्ड्वं षरीशानां रक्षसाणां सागरात्वुतः। भाभिः संसक्तपाता नश्चलोर्मिः सुभभेषि कं॥ ५२ पताकासिसंसङ्कुत्तमासि परस्वधं। भीमाश्वरथमार्गं ते
नानापत्तिसमाकुलं॥ ५३॥ दीप्तशूलगदाखड्गप्रासतोमरकार्मुकं। तद्राक्षबलं भीमं घोरविक्रमपौरुषं॥ ५४॥ ददृशे ज्वलितप्रासं किंकिणीशतनादितं। हेमजालावित
भुजं व्यावेष्टितपरस्वधं॥ ५५॥ व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकं। गंधमाल्यमसृत्सिकं संमोहितमहानिलं॥ ५६॥ घोरं शूरजनाकीर्णं महाम्बुधरनिस्वनं। तं दृ
ष्ट्वा बलमायान्तं राक्षसानां दुरासदं॥ ५७॥ संप्रचेलुर्वलं दृष्ट्वा वलमुद्दे नवानरावाजघ्नेनाम्नुत्पवाद्धनजहर्नरक्षसां महत्॥ ५८॥ अभ्यापतत्तस्तरिवलं पतंगा इव पावकं।
तेषां भुजपरामर्शव्यामृष्टपरिघाशनं॥ ५९॥ राक्षसानां वलं श्रेष्ठं भूयः परमशोभत। तत्तोन्मना स्वोत्प्लेत हरयो ऽथ युयुत्सवः॥ ६०॥ तरुशैलैरभिघ्नंतो मुष्टिभिश्च निशा
चरान्। तथैव पततां तेषां हरीणां निशितैः शरैः॥ ६१॥ शिरांसि सहसा जह्रू राक्षसा भीमविक्रमाः। दशनैर्हृतकर्णाश्च मुष्टिनिर्भिन्नमस्तकाः॥ ६२॥ शिलाप्रहारभग्नां
गाविचेरुस्तत्र राक्षसाः। तथैवाप्यपरे तेषां कपीनामसिभिः शितैः॥ ६३॥ प्रवीरानभितो जघ्नू राक्षसानां तरस्विनां। हरीं वीरानभिजघ्नुले घोररूपा निशाचराः॥ ६४॥ घ्नं
मन्यं जघानान्यः पातयंतमपातयत्॥ गर्हमाणं जगर्हान्यो दशंतमपरो दशत्॥ ६५॥ देहीत्यन्नो ददात्यन्यो ददामीत्यपरः पुनः। किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभा
षिरे॥ ६६॥ विप्रलंभितशस्त्रं च विमुक्तकवचायुधं। समुद्यतमहाप्रासं मुष्टिशूलासिसंकुलं॥ ६७॥ प्रावर्तत महारौद्रं युद्धं वानरराक्षसां। वानरान्दश सप्तेति राक्षसा
जघ्नुराहवे॥ ६८॥ राक्षसान्दश सप्तेति वानरास्त्वभ्यपातयन्। विप्रलंभितवस्त्रं तौ विमुक्तकवचध्वजं॥ ६९॥ बलं राक्षसमालंब्य वानराः पर्यवारयन्॥ ७०॥ इत्यार्षे रामायणे
युद्धकांडे पंचसप्ततितमः सर्गः॥ प्रवृत्ते संकुले तस्मिन्घोरे वीरजनक्षये। अंगदः कंपनं वीरमाससाद रणोत्सुकः॥ १॥ आहूय सोंगदं कोपात्ताडयामास वेगितः। गद
पाकंपनः पूर्वं स चचाल भृशाहतः॥ २॥ स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः। अर्दितश्च प्रहारेण कंपनः पतितो भुवि॥ ३॥ ततस्तु कंपनं दृष्ट्वा शोणिताक्षो हतं रणे
जालेति। हेमजालव्याप्तभुजं। पावेष्टिताः। उत्तेजिताः। परस्वधा यस्मिन्तत्॥ तथैवेति। अपरे निशाचराः। तेषां कपीनां मध्ये हरिवीरान् वीरहरीन्। निजघ्नुरिति संबन्धः। देहीति। देहीत्या
दौ युद्धमिति भ्याहार्यं। वानरानिति॥ इति अनन्तेन प्रकारेण वानरा राक्षसाश्च अन्योन्यं निवात्य जघ्नुरिति संबन्धः॥ ॥ इति श्रीमि· पंचसप्ततितमः सर्गः॥

रा·
८१

मु

क्षुरक्षुरप्रौ इति। क्षुरः नापितशस्त्राकारमुखः। क्षुरप्रः अर्धचंद्राकृतिः॥ नाराचः सर्वायसशरः। वत्सदंतो वत्सदंताकारः॥ शिलीमुखः कंकपत्रसदृशः कर्णिकः उभय
पार्श्वकृतकर्णिकाकारावयवः। शल्यस्तु अर्धनाराचकृतः। शल्यस्तु परीर्घफलको बाणः शल्यस्त्वच्युतो विपाठः ककस्वीरपत्रा समसदृशमुखः अनंतास्तरमिति। परामृष्टं। प्र
मोगरं निशितैर्बाणैस्तदा विव्याध वेगितः॥ शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः॥ ५॥ क्षुरक्षुरप्रनाराचैर्वत्सदंतैः शिलीमुखैः। कर्णिशल्यविपाठैश्च बहुभिर्निशि
तैः शरैः॥ ६॥ अंगदः प्रतिविद्धांगो वालिपुत्रः प्रतापवान्। धनुरुग्रं रथं बाणान्ममर्द तरसा बली॥ ७॥ शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे। उत्पपात दिवं क्रुद्धो
वेगवानविचारयन्॥ ८॥ तं क्षिप्रतरमाप्लुत्य परामृश्यांगदो बली। करेण तस्य तं खड्गं समाच्छिद्य ननाद ह॥ ९॥ तस्यांसफलके खड्गं निचखान ततोंगदः। यज्ञोपवी
तवच्चैनं विच्छेद कपिकुंजरः॥ १०॥ तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः। वालिपुत्रोभिदुद्राव रणशीर्षे परानरीन्॥ ११॥ आयसीं तु गदां गृह्य स वीरः कनकांगदः।
शोणिताक्षः समाश्वस्तः स्यंदने वाप्युपपात ह॥ १२॥ प्रजंघसहितो वीरो यूपाक्षसहितो बली। गदयाभिययौ क्रुद्धो वालिपुत्रं महाबलं॥ १३॥ तयोर्मध्ये कपिश्रेष्ठः
विशाखयोर्मध्यगतः पूर्णचंद्र इवाभवत्॥ १४॥ अंगदं परिरक्षंतौ मैंदो द्विविद एव च। तस्य तस्थतुरभ्याशे परस्परदिदृक्षया॥ १५॥ अभिपेतुर्महावीर्या महाकायाः
महाबलाः। राक्षसा वानरान्यत्ताः ससिबाणगदाधराः॥ १६॥ त्रयाणां वानरेंद्राणां त्रिभी राक्षसपुंगवैः। संसक्तानां महद्युद्धमभवद्रोमहर्षणं॥ १७॥ ते तु वृक्षान्समादा
य संप्रचिक्षिपुराहवे। खड्गेन प्रतिचिच्छेद तान्प्रजंघो महाबलः॥ १८॥ रथानश्वान्द्रुमाञ्शैलान्संप्रचिक्षिपुराहवे। बाणौघैः प्रतिचिच्छेद तान्यूपाक्षो महाबलः॥ १९॥ सृष्टान्
द्विविदमैंदाभ्यां द्रुमानुत्पाट्य वीर्यवान्। बभंज गदया मध्ये शोणिताक्षः प्रतापवान्॥ २०॥ उद्यम्य विपुलं खड्गं परमर्मविदारणं। प्रजंघो वालिपुत्राय अभिदुद्राव वेगि
तः॥ २१॥ तमभ्याशगतं दृष्ट्वा वानरेंद्रो महाबलः। आजघानाश्वकर्णेन द्रुमेण विविधस्वरः॥ २२॥ बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना। वालिपुत्रस्य घा
तेन स पपात क्षितावसिः॥ २३॥ तं दृष्ट्वा पतितं भूमौ खड्गं मुसलसन्निभं। मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ २४॥ स ललाटे महावीर्यमंगदं वानरर्षभं। आजघा
न महातेजाः स मुहूर्तं चचाल ह॥ २५॥ स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान्। प्रजंघस्य शिरः कायात्पातयामास वीर्यवान्॥ २६॥ स यूपाक्षोश्रुपूर्णाक्षः पितृ
व्ये निहते रणे। अवरुह्य रथात्क्षिप्रं क्षीणेषुः खड्गमाददे॥ २७॥ तमापतंतं संप्रेक्ष्य यूपाक्षं द्विविदस्त्वरन्। आजघानोरसि क्रुद्धो जग्राह च बलाद्बली॥ २८॥
त्य। अंगदमिति। परस्परदिदृक्षया। युद्धार्थं स्वात्तरक्षा प्रतिभटरक्षेच्छया सर्वे ते यूथाः। उद्यम्येति। वालिपुत्राय वालिपुत्रं हंतुं॥ ॥

तो शोणिताक्ष इत्यादि पाञ्चाविंति। प्लवगाभ्यां मैन्दद्विविदाभ्यां आपतन्तौ मिसंधिं निर्वाक्यं। कुंभः आपतन्तौ विमृश्यात्मपतत् अङ्गभावश्चार्षः। अथेत्यादिसार्द्धश्लोकमेकं वाक्यं। अकृच्छ्रं तः
कुंभः। महावीर्यैर्ज्वलद्भिः। ज्वलन्तैः। पतितुं इषुभिः। प्लवंगमैः। निपातितमहावीरौ च दृष्ट्वा रणे कृत्वा कुम्भः कर्म चकारेति संबंधः। नसतिनि। तस्य कुंभस्य सशरं धनुः। विद्युदैरावता
र्चिष्मता अनत्वन तु श्रुं इधनुरिव शुशुभे। तिसंबंधः। ऐरावतं नामास्त्यद्रीरथं मिंद्रधनुः। इंद्रस्य धनुरिवेंद्रधनुः। तत्रैरावतस्य हितो ऐरावतं च विद्युत्त्वं च लाचपलान्ते ज्यं नि।

गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः। आनयानमहातेजा वसनसि द्विविदं ततः ३० प्रसाभिहन्तिन चवाञ्च महाबलः। उद्यतां वधनन्तस्य जहार द्विविदो हा
गदां ३१ तया व्यग्र स्याक्ति ध्वंतयो हर समितां ययतः। नो शोणिताक्ष प्रपातौ प्लवगाभ्यां तरस्विनौ। व कूवेः समरे तीक्ष्णमा कर्षोत्पाट नं भृशं ३२ द्विविदः शोणिता
क्षं तु विददार नखैर्मुखे। निष्पिपेष च मन्दोपि ध्वमावा विध्यवीर्यवान् ३३ प्रपातमभिसंक्रुद्धो मैन्दो वानरपृथपः। पीड्यामास वाहुभ्यां पपात सहतः क्षि
तौ ३४ हत प्रवीरा व्यथिताय तस्मेंद्र चपलरा। जगामाभिमुखी सात्र कुंभकर्णात्मजो यतः ३५ आपतन्तीं च वेगेन कुंभस्तां सांत्वयच्च तां। अथोत्क्रुष्टे महावी
र्यैर्लब्धलक्ष्यैः प्लवंगमैः ३६ निपातितमहावीरां दृष्ट्वा रक्तश्चमूं तदा। कुंभकश्चक्रे तेजस्वी रणे कर्म सुदुष्करं ३७ स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः
मुमोचाशीविषप्रख्यान् शरान्देहविदारणान् ३८ तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमं। विद्युदैरावतार्चिष्मद्द्वितीयेंद्रधनुर्यथा ३९ आकर्णाकृष्टमुक्तेन
जघान द्विविदं तदा। तेन हाटकपुंखेन पत्रिणा पत्रवाससा ४० सहसाभिहतस्तेन विप्रमुक्तपदः स्फुरन्। निपपात त्रिकूटाभो विह्वलः प्लवगोत्तमः ४१
मैन्दस्तु भ्रातरं दृष्ट्वा भग्नं तत्र महाहवे। अभिदुद्राव वेगेन प्रगृह्य विपुलां शिलां ४२ तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः। बिभेद तां शिलां कुंभः प्रसन्नैः पं
चभिः शरैः ४४ संधाय चान्यं सुमुखं शरमाशीविषोपमं। आजघान महातेजा वक्षसि द्विविदाग्रजं ४५ स तु तेन प्रहारेण मैन्दो वानरयूथपः। मर्मण्यभिह
तस्तेन पपात भुवि मूर्छितः ४६ अंगदो मातुलौ दृष्ट्वा पतितौ तु महाहवे। अभिदुद्राव वेगेन कुंभमुद्यतकार्मुकं ४७ तमापतन्तं विव्याध कुंभः पंचभिरायसैः
त्रिभिश्चान्यैः शितैर्बाणैर्मातंगमिव तोमरैः ४८ सोंगदं बहुभिर्बाणैः कुंभो विव्याध वीर्यवान्। अकुंठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः ४९ अंगदः प
तिविद्धांगो वालिपुत्रो न कंपते। शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह ५० स प्रचिच्छेद तान्सर्वान् बिभेद च पुनः शिलाः। कुंभकर्णात्मजः श्रीमान् वालिपुत्रसमी
रितान् ५१ आपतन्तं च संप्रेक्ष्य कुंभो वानरयूथपं। भ्रुवोर्विव्याध बाणाभ्यां उल्काभ्यामिव कुंजरं ५२ तस्य सुस्राव रुधिरं पिहिते चास्य लोचने। अंगदः पाणिनाने
त्रे पिधाय रुधिरोक्षिते ५३ सालमासन्नमेकेन परिजग्राह पाणिना। संपीड्योरसि सस्कंधं करेणाभिनिवेश्य च ५४

द्वाभ्यां नीपाद्विद्युता बाणाभ्यां नीवमैरावतं उपमानं। विद्युत्साहितैरावतमहर्षिसमुनि कुंभधनुः विद्युत्साहितैरावतसहितद्वितीयेंद्रधनुरिवबभाविति विद्युत्सहि
तैरावतेंद्रचापयोः संयोगः उत्पातकाले संभवति। आशुतोपमा वा ३९ पत्रैः उत्तैर्निते ४०

समी स्या पतताती नित्रलाशपमा वार्॥६२॥ निकुं मायेनेति। मत्रतिः राक्षसेषु विनयः॥ ७२॥ प्रक्रारेनि। पितरमनु जातोसिपित्रा महश्चोसी त्यर्थः॥७३॥ वरस्मा दिति। पित्र व्यो
किं विरभ्यव बन्धेन खुन्न माध्यायथाप्न जः। त्वमिंद्र केन प्रति मंष्टे स्तुं मेरसमानि नं।५५॥ समुद्रन्तस्त जेन वेगे नयपयजां सर्वरक्षसां। सविष्ठे रशिनैर्बाणैः मताभिः कायेन दैनुः॥५६॥
अंगदोव्यु त्थिथे नी क्षण समास्व सुमो हव। अंगंरसाथि नंह्मसीरं नमिवसागरे।५७। उरासहं हरिश्रेष्ठस्तमा याथानि वेदयन्। तपस्कव्यथिनं क्षत्वा वालिपुत्रेणतान्विरे।५८
व्यादिदेशहरिश्रेष्ठान् वबसमुरवांस्ततः। नेत्र वानरशार्दू लाक्रन्या रामस्य शासनं।५९। अमियेन्तःसुर्मक्रुद्धाः कुंभमुद्यतकार्मुकं। तनोउ मशिला रत्नाः कोपसंरक्तलो
चना॥६०॥ रत्नि र्मनो व्यभ्य पतन्नगंदं वानरर्षभा॥ जांबवान्खुषेणश्चवेगदर्शी वानरः॥६१॥ कुंभकर्णात्मजं वीराः कुद्धा समभिदुद्रुवुः। समीक्ष्यापतनस्तां स्तत्र
सैंद्रो महाबलः॥६२॥ आववार शरौघेण नगेनेव जलाशयां। तस्य बाण पथं प्राप्य न शेकु रति वर्तितुं॥६३॥ वानरेंद्रा महात्मानो वेला मिव महो दधिः। तांस्त दृष्ट्वा
हरिगणान् शरवृष्टिभिरर्दितान्॥६४॥ अंगदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः। अभि उद्राव वेगेन कुं भवर्णात्मजं रणे॥६५॥ शैल सानु चरं नागं वेगवानिव केसरी।
उत्पाट्य च महाशैलान् शरकर्णोथवानरः॥६६॥ अन्यांश्च विविधान्वृक्षान्चिक्षेप स महाबलः। तो छादयंतीमा काशे नगवृष्टिं दुरासदं॥६७॥ कुंभकर्णात्मजः शीघ्रं
चिछेद निशितैः शरैः। अभिलक्षेण नीत्रेण कुंभेन निशितैः शरैः॥६८॥ आचिता स्ते द्रुमा रेजुः यथा घोराः शतघ्नयः। द्रुमवर्षं तुतछिन्नं दृष्ट्वा कुंभेन वीर्यवान्॥६९॥
वानराधिपतिः श्रीमान् महासत्त्वो न विव्यथे। निर्भिद्यमानः सहसा सहमानः स्तता शराः॥७०॥ कुंभस्य धनुराक्षिप्य बभंजेंद्रधनुष्प्रभां अवप्लुत्य ततः शीघ्रं कृ
त्वा कर्म सुदुष्करं॥७१॥ अब्रवीत् कुपितः कुंभं भग्नशृंग मिव द्विपं। निकुंभाग्रज वीर्यं ते बाणवेगं न स्फुरं॥७२॥ सन्नतिश्च प्रभावश्च तव वा रावणस्य वा। प्रह्लाद बलिवृ
त्रघ्न कुबेर वरुणोपम॥७३॥ एकस्त्वमनु जातोसि पितरं बलवत्तरं। त्वामेवैकं महाबाहुं शूलहस्तमरिंदमं॥७४॥ त्रिदशा नातिवर्तंते जितेंद्रियमिवाधयः। विक्रमस्व
महाबुद्धेकर्माणि मम पश्यतः॥७५॥ वरदाना त्पितृव्यस्ते सहते देवदानवान्। कुंभकर्णस्तु वीर्येण सहते चसुरासुरान्॥७६॥ धनुषींद्र जितस्तुल्यः प्रतापे रावणस्य वा।
त्वमद्य रक्षसां लोके श्रेष्ठोसि बलवीर्यतः॥७७॥ महाविमर्दं समरे मया सह तवाद्भुतं। अद्य भूतानि पश्यंतु शक्र शंबरयोरिव॥७८॥ कृतमप्रति मं कर्म दर्शितं चास्त्रकौ
शलं। पातिता हरि वीराश्च त्वयैते भीमविक्रमाः॥७९॥ उपालंभभयाच्चापि नासि वीर्यान्मया हतः। कृतकर्मा परिश्रांतो विश्रांतः पश्य मे बलं॥८०॥ तेनसुग्रीववाक्येन स्ता
तवताः। वरदाना देवदानवान् सहते कुंभकर्णस्तु वीर्येण शरीरबलेन सुरासुरान् सहते त्वं तु ताभ्यां तान् सहस इत्यर्थः। पराविमर्दं महायुद्धं। उपालंभेति। उपालंभभयात् बु
भिः महद्युद्धं श्रांतो हत इति परिवादभयात्॥ ॥

यु. टी.
७६

ततरति॥ अपीतमदौ अनपगतमदौ देहो अन्योन्यगात्रग्रथितौ विक्षतौ नुरिति शेषः॥ तस्येति॥ पुस्फोट॥ विन्नं स्वचेति॥ सुग्रीवो मुष्टिमुद्यम्य अस्थिमंडले प्रतिनिधेनुर्हरेत्यर्थः॥ कुंभस्येति॥ मुष्टि
नाउरसि मग्नस्य पतनं कुंभस्य। रूपं रुद्रा भिपन्नस्य रुद्रेण भिभूतस्य गवांपतेः सूर्यस्य॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे षट्सप्ततितमः सर्गः॥ ॥तत इति॥ खङ्ग रामसंनद्धो।

ततः कुंभस्तु सुग्रीवं बाहुभ्यां जगृहे तदा। गजाविवाहितमदौ निश्वसंतौ मुहुर्मुहुः॥८२॥ अन्योन्यगात्रग्रथितौ कर्षंतावितरेतरं। सधूमां मुखतो ज्वालां विसृजंतौ परिश्रमात्
८३॥ तयोः पादाभिघाताच्च निमग्ना चाभवन्मही। व्याघूर्णिततरंगश्च चुक्षुभे वरुणालयः॥८४॥ ततः कुंभं समुत्क्षिप्य सुग्रीवो लवणांभसि। पातयामास वेगेन दर्शयन्नुद
धेस्तलं॥८५॥ ततः कुंभनिपातेन जलराशिः समुत्थितः। विंध्यमंदरसंकाशो विससर्प समंततः॥८६॥ ततः कुंभः समुत्पत्य सुग्रीवमभिपत्य वा। आजघानोरसि क्रुद्धो वज्रक
ल्पेन मुष्टिना॥८७॥ तस्य चर्म च पुस्फोट संजज्ञे वास्य शोणितं। स च मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमंडले॥८८॥ तस्य वेगेन तत्रासीत्तेजः प्रज्वलितं मुहुः। वज्रनिष्पेषसंजा
तज्ज्वालामेरौ गिराविव॥८९॥ मुष्टिनाभिहतस्तेन ज्वाला विद्युन्निस्थितः। स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः॥९०॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ अर्चिःसह
स्रविकचं रविमंडलसन्निभं॥९१॥ स मुष्टिं पातयामास कुंभस्योरसि वीर्यवान्॥ स तु तेन प्रहारेण विह्वलो भृशताडितः॥९२॥ निपपात तदा कुंभो गतार्चिरिव पावकः।
मुष्टिनाभिहतस्तेन निपपाताशु राक्षसः॥९३॥ लोहितांग इवाकाशाद्दीप्तरश्मिर्यदृच्छया। कुंभस्य पततो रूपं भग्नस्योरसि मुष्टिना॥९४॥ बभौ रुद्राभिपन्नस्य यथारूपं गवांप
तेः॥९५॥ तस्मिन्हते भीमपराक्रमेण प्लवंगमानामृषभेण युद्धे॥ महीं सशैलां सवनां चचाल भयं च रक्षांस्यधिकं विवेश॥९६॥ ॥इति श्रीमद्युद्धकांडे षट्सप्ततितमः स
र्गः॥ ॥निकुंभो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितं। प्रदहन्निव कोपेन वानरेंद्रमवैक्षत॥१॥ ततः स्रग्दामसन्नद्धं दत्तपंचांगुलं शुभं। आददे परिघं वीरो नगेंद्रशिखरोपमं॥२॥
हेमपट्टपरिक्षिप्तं वज्रवैडूर्यभूषितं। यमदंडोपमं भीमं रक्षसां भयनाशनं॥३॥ तमाविध्य महातेजाः शक्रध्वजसमौजसं। विननाद विवृत्तास्यो निकुंभो भीमविक्रमः॥४॥ उरोग
तेन निष्केण भुजस्थैः सुरैरपि। कुंडलाभ्यां च मृष्टाभ्यां मालया च विचित्रया॥५॥ निकुंभो भूषणैर्भाति तेन स्म परिघेण वा। यथेंद्रधनुषा मेघः सविद्युत्स्तनयित्नुमान्॥६॥ परिघा
ग्रेण पुस्फोट वातग्रंथिर्महात्मनः। प्रजज्वाल सघोषश्च विधूम इव पावकः॥७॥ नगर्या विटपावत्या गंधर्वभवनोत्तमैः। सह चैवामरावत्या सर्वैश्च भवनैः सह॥८॥ सतारग राम
णनक्षत्रं सचंद्रं समहाग्रहं। निकुंभपरिघाघूर्णं भ्रमतीव नभःस्थलं॥९॥

सन्नद्धं निबद्धं। दत्तेति। दत्तपंचांगुलं जो वं स्नकुंकुमादिना अर्पित ७६
पंचांगुलमुद्रामुद्रितं। हेमेति। हेमपट्टपरिक्षिप्तं परिवेष्टितं परिघाग्रेणेति। वातग्रंथिः। आवहप्रवहादिसप्तमहावायुसंधिः। प्रजज्वाल। निकुंभ इति शेषः। नगर्येति। विटपावत्या
अलकया॥

दुरासद इति। परिघांतरशप्रभः परिघांतकृततरणिरश्मिप्रभ इत्यर्थः। निकुंभेनेति। उद्यतं गृहीतं। अथेति। विनर्दति निकुंभे सादिते सतीति संबंधः॥ राक्षसेंद्रसूनुर्म
कराक्षः। अनेन वस्तगतास्य रघुनाथस्य करात्कपोर्युद्धस्यापकर्षेपरूक्तः॥ नवम्यां रात्रिषु हेन कुंभादीनां वधः॥ इति श्रीयुद्धकांडे सप्ततितमः सर्गः॥ तेजोत इति परिमृ

दुरासदस्य संजज्ञे परिघांतरशप्रभः॥ कपीनां स निकुंभाग्निर्युगांताग्निरिवोत्थितः॥१०॥ राक्षसा वानराश्चापि न शेकुः स्पंदितुं भयात्। हनूमांस्तु विवृत्योर
स्तस्थौ प्रमुखतो बली ११ परिघोपमबाहुस्तु परिघं भास्करप्रभं। बली बलवतस्तस्य पातयामास वक्षसि १२ स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः॥
विकीर्यमाणः सहसा उल्काशतमिवांबरे १३ स तु तेन प्रहारेण विचचाल महाकपिः। परिघेण समाधूतो यथा भूमिचले चलः १४ स तथाभिहतस्तेन हनू
मान्प्लवगोत्तमः। मुष्टिं संवर्तयामास बलेनातिमहाबलः १५ तमुद्यम्य महातेजा निकुंभोरसि वीर्यवान्। अभिचिक्षेप वेगेन वेगवान्वायुविक्रमः १६
ततः पुस्फोट चर्मास्य प्रसुस्राव च शोणितं। मुष्टिना तेन संजज्ञे मेघे विद्युदिवोत्थिता १७ स तु तेन प्रहारेण निकुंभो विचचाल ह। स्वस्थश्चापि निजग्राह हनूम
तं महाबलं १८ विचुक्रुशुस्तदा संख्ये भीमं लंकानिवासिनः। निकुंभेनोद्यतं दृष्ट्वा हनूमंतं महाबलं १९ स तथा ह्रियमाणोपि कुंभकर्णात्मजेन ह। आज
घानानिलसुतं वज्रकल्पेन मुष्टिना २० आत्मानं मोक्षयित्वाथ क्षितावभ्यवपद्यत। हनूमानुन्ममाथाशु निकुंभं मारुतात्मजः २१ निक्षिप्य परमायत्तो निकुं
भं निष्पिपेष च। उत्पत्य चास्य वेगेन पपातोरसि वीर्यवान् २२ परिगृह्य च बाहुभ्यां परिवृत्य शिरोधरां। उत्पाटयामास शिरो भैरवं नदतो महत् २३ अथ देवाः स
गंधर्वाः विद्याधरमहोरगाः। आकाशचारिणः सर्वे अप्सरोभिः सहामराः २४ हनूमंतं महाबाहुं वायुपुत्रमरिंदमं॥ प्रशशंसुः परं प्रीताः प्रसन्नैरभ्यपूजयन् २५
अथ विनर्दति सादिते निकुंभे पवनसुतेन रणे बभूव युद्धं। दशरथसुतराक्षसेंद्रसून्वोर्भृशमनवरमागतरोषयोः सुभीमं २६ व्यपेते तु जीवे निकुंभस्य हृष्टा वि
नेदुः प्लवंगाः दिशः सस्वनुश्च॥ पपातेव चोर्वी चचालेव द्यौर्बलं राक्षसानां भयं चाविवेश २७ इत्यार्षे रामायणे युद्धकांडे सप्तसप्ततितमः सर्गः॥ न
वमापहारः समासः। त्रयोविंशे द्विवर्तमानकथाः समासा॥ निकुंभं निहतं श्रुत्वा कुंभं च विनिपातितं। रावणः परमामर्षी प्रजज्वालानलो यथा १
नैऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्छितः। खरपुत्रं विशालाक्षं मकराक्षमचोदयत् २ गच्छ पुत्र मयाज्ञप्तो बलेनाभिसमन्वितः। राघवं लक्ष्म
णं चैव जहि तौ सवनौकसौ ३ रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः। बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः ४ सोभिवाद्य दशग्रीवं कृत्वा चापि
छितः। अयमंतः गच्छत्वेति॥ राघवं लक्ष्मणं च जहि। वचस्तरस्त। राघवं लक्ष्मणं वानरांश्चेति शेषः। वनौकः॥ प्रदक्षिणं। निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ५

यु०
१००

-समीपस्थमिति। त्वरात्। त्वरया। अहं राक्षसराजेनेत्यादि श्लोकद्वयस्य प्रातीतिकोऽर्थः स्पष्टः। स्वकृतत्वसूचकः। अहं रावणो न राम लक्ष्मणौ हंतु मया ज्ञप्तो पथयितया पि लक्ष्म-
णां रामवधिनेति शेषः। वानरांश्च विष्यामीति संबंधः। तस्येति। विक्रमवर्जिताः। विविधपारम्पासविरहिताः। प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्ययुरित्यर्थः। प्रवातीति। सपां-

समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीदिदं। रथमानीयतां शीघ्रं सैन्यं चानीयतां त्वरात् ६ तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः। स्यंदनं च बलं चैव समीपं प्रत्य-
पादयत्॥ ७ प्रदक्षिणं रथं कृत्वा समारूढ्य निशाचरः। सूतं संचोदयामास शीघ्रं वै रथमावह ८ अथ तान् राक्षसान् सर्वान् मकराक्षोऽब्रवीदिदं। यूयं सर्वे प्रयुध्यध्वं पुर-
स्तान्मम राक्षसाः ९ अहं राक्षसराजेन रावणेन महात्मना। आज्ञप्तः समरे हंतुं तावुभौ रामलक्ष्मणौ। १० अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः। शाखामृगं च
सुग्रीवं वानरांश्च शरोत्तमैः ११ अद्य शूलनिपातैश्च वानराणां महाचमूं॥ प्रदहिष्यामि संप्राप्तः शुष्केंधनमिवानलः १२ मकराक्षवचः श्रुत्वा विनदंतो निशाचराः
। सर्वे नानायुधोपेताः बलवंतः समाहिताः। १३ ते कामरूपिणः शूराः दंष्ट्रिणः पिंगलेक्षणाः। मातंगा इव नर्दंतो ध्वस्तकेशा भयावहाः १४ परिवार्य महाकाया म-
हाकायं खरात्मजं। अभिजग्मुस्ततो हृष्टाः चालयंतो वसुंधरां १५ शंखभेरीसहस्राणामाहतानां समंततः। क्ष्वेलितास्फोटितानां च ततः शब्दो महानभूत् १६ प्रभ्र-
ष्टोऽथ करात्तस्य प्रतोदः सारथेस्तदा। पपात सहसा भूमौ ध्वजस्तस्य च रक्षसः १७ तस्य ते रथयुक्ताश्च हया विक्रमवर्जिताः। चरणैराकुलैर्गत्वा दीनाः सास्रमु-
खा ययुः १८ प्रवाति पवनस्तस्मिन् सपांसुः खरदारुणः। निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः १९ तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः। अचिंत्य निर्गताः
सर्वे यत्र तौ रामलक्ष्मणौ २० घनगजमहिषांगतुल्यवर्णाः समरमुखेष्वसकृद्गदासिभिन्नाः। अहमहमिति युद्धकौशलास्ते रजनिचराः परिबभ्रमुर्नदंतः। २१ इत्या-
वे युद्धकांडे अष्टसप्ततितमः सर्गः निर्गतं मकराक्षं ते दृष्ट्वा वानरपुंगवाः। आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः १ ततः प्रवृत्तं सुमहत्तद्युद्धं रोमहर्षणं। नि-
शाचरैः प्लवंगानां देवानां दानवैरिव २ वृक्षशूलनिपातैश्च शिलापरिघपातनैः। अन्योन्यं पातयंति स्म तदा कपिनिशाचराः ३ शक्तिखड्गगदाकुंतैस्तोमरैश्च नि-
शाचराः। पट्टिशैर्भिंदिपालैश्च बाणपातैः समंततः ४ पाशमुद्गरदंडैश्च निर्घातैश्चापरैस्तथा। कदनं कपिसिंहानां चक्रुस्ते रजनीचराः ५ बाणौघैरर्दिताश्चापि
खरपुत्रेण वानराः। संभ्रांतमनसः सर्वे दुद्रुवुर्भयपीडिताः ६॥ ॥

राम
१००

सः। अत एव खरः परुषः। घनेति। अहमहमिति निर्दंत इति संबंधः। इति युद्धकांडे अष्टसप्ततितमः सर्गः॥ ॥पट्टिशैरिति। निर्घातैः। निर्घातसंज्ञिकायुधविशेषैः॥

तानि ति । जितेन जयेन काशंत इति । जितकाशिनः ॥ राक्षसा जितकाशिनः ॥ अभ्युवन्निति शेषः ६ यत्नरेति । यतयस्मान्ममपितरं हतवांस्ततस्मान्मरष्यत इति पूर्वं तेस्वकर्मे
स्थमितस्तत्र सुस्वकर्मस्थमिति छेदः ॥ सुतरामकृत्य निरतं त्वामिति शेषः १० दत्तंतेइति । तस्मिन्काले पितृवधसमये । यस्मान्नदृष्टोसि अतो मम मांगानिदत्तातेतदानीमेव
बरहृच्चैतत्त किरणा तापः अरण्येरित्यर्थः ११ वारिता नराक्षसान्दृष्ट्वा त्यामप्ययेतयानिहता ॥ शूराइतं तस्य वास्तवार्थस्तुमकराक्षो रामनिष्ठुरभाषणो प्रहर्तोपि मकराक्षवा
णारामकर्णांतरेणाह । वारितान्नराक्षसान्निन्तारम्यस्तोकपद्धेन वारितानिति । कोपानलसमाविष्टइत्सेत त्वस्य स्वरूपकथनं । तिष्ठेति । हे राम तेतवधनुर्मुक्तैः शरैः मेममप्रा
णान्ताजयिष्यामि मया सार्द्धं तिष्ठ द्वंद्वयुद्धं देहीति संबंधः ॥ यत्नरैस्त्वादिस्तोकद्वयमेकं वाक्यं । हे दुरात्मन्दुष्ट छद्म्या प्यात्मात्रीत्रः करणीरयासारं रयस्यसम ॥ हे राघव यतयस्मात

तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वनौकसः । नेदुस्ते सिंहवद्धृष्टा राक्षसा जितकाशिनः ६ विद्रवत्सु तदा तेषु वानरेषु समंततः । रामस्तान्वारयामास शरवर्षेण राक्षसान् ७ वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः । कोपानलसमाविष्टो वचनं चेदमब्रवीत ८ तिष्ठ राम मया सार्द्धं द्वंद्वयुद्धं ददामि ते । त्याजयिष्यामि ते प्राणान्धनुर्मुक्तैः शितैः शरैः ९ यत्तदा दंडकारण्ये पितरं हतवान्मम । मदग्रतः स्वकर्मस्थं दृष्ट्वा रोषोऽभिवर्द्धते १० दह्यंते भृशमंगानि दुरात्मन्मम राघव । यन्मयासि न दृष्टस्त्वं तस्मिन्काले महावने ११ दिष्ट्यासि दर्शनं राम मम त्वं प्राप्तवानिह । कांक्षितोसि क्षुधार्त्तस्य सिंहस्येवेतरो मृगः १२ अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः । ये त्वया निहताः शूराः सह तैश्च समेष्यसि १३ बहुनात्र किमुक्तेन शृणु राम वचो मम । पश्यंतु सकला लोकास्त्वां मां चैव रणाजिरे १४ अस्त्रैर्वा गदया वापि बाहुभ्यां वा रणाजिरे । अभ्यस्तं येन वा राम वर्त्तंतां तेन वा युधि १५ मकराक्षवचः श्रुत्वा रामो दशरथात्मजः । अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनं १६ कत्थसे किं वृथा रक्षो बहून्यसदृशानि ते । न रणो शक्यते जेतुं विना युद्धेन वाग्बलात् १७ चतुर्दश सहस्राणि रक्षसां त्वत्पिता च यः । त्रिशिरा दूषणश्चापि दंडके निहता मया १८

मदग्रतः ॥ मत्समक्षं ॥ अग्रतः पूर्वमेव मद्धात्स्वधर्ममेवेत्यर्थः ॥ दंडकारण्ये ममपितरं स्वकर्मस्थं । सुतरामकृत्य निरतं दृष्ट्वा हतवानपस्मात्तत स्मिन्काले महावने मैया
त्वं न दृष्टः ॥ तस्मात्तममत्त्वद्दर्शनेव धाभावादिति शेषः ॥ अंगानि दह्यंते । रोषश्चाभिवर्द्धत इति संबंधः ॥ दिष्ट्येति । इव शब्दोवाक्यालंकारे । सिंहस्य । सिंहसदृशस्य क्षुधार्त्त
स्य त्वद्दर्शनं करामि भविष्यतीति । क्षुधायाइक्ष्वाकुर्यामेतस्य मृगाः मृग्यतेक्षुधा इतिमिरपीति मृगाः ॥ सर्वेश्वरः ॥ अतएव उत्तरः प्रयंचातीतः ॥ अतएव कांक्षितः ब्रह्मादिभिरिति
शेषः ॥ एतादृशस्त्वं दिष्ट्या मद्भाग्येन दर्शनं प्राप्तोसि अतो मद्भाग्यं किंवर्णये तदिति भावः ॥ अद्येति । त्वया बाणवेगेन अद्य प्रेतराड्विषयं गतो भवेयमिति शेषः ॥ अतो मत
मतः सर्वशोतये शूराः स्वर्गीकारयः ॥ अनिहतामैः सहसमेष्यसीति संबंधः ॥ अस्त्रैरिति । महाहवो । निमित्ते । येन वा । येन केन वा । अभ्यस्तं तेन रयुधि वर्त्ततां भवानि

तिशेषः ॥ मकराक्षेति । उत्तरोत्तरवादिनं बहुप्रलपिनमित्यर्थः ॥

यु॰
१०२

स्वाशिताइति। स्वाशिताः॥ सुष्टु। अशितवंतः॥ जीमूतयोरिति। आकाशे जीमूतयोः। ग्रह इव ज्यातलयोः। ज्याकरतलयोः संघर्षहेतोः। धनुर्मुक्तः अन्योन्यधनुर्मुक्तः। स्वनः
श्रूयते स्म। विद्धमिति नौ कृतप्रतिकृतान्योन्यं अन्योन्यं कृतस्य प्रतिकृतं यथा भवति तथा अन्योन्यशरस्य परनिपातः। विकृत्तेषु नैकुर्वातां। अकुर्वीतां। अडभाव आर्षः। अथ।

स्वाशितास्तावपि मांसेन गृध्रगोमायुवायसाः॥ प्रविष्टं तत्तदैवापतीत्स्मात्तदैनखांकुशाः १९ हयविराडमुखाहयशरक्रूपस्तोऽजासुयौ। खेगताश्च सुपर्णाश्चन्द्रमिष्यंति
वपर्वतः २० राघवेणाविमुक्तस्तु मकराक्षो महाबलः॥ बाणौघाननुवत्रोरोगघवायरणाजिरे २१ तीक्ष्णाराक्षरवर्षणाराममश्चिच्छेदनेकधा। निपेतुर्भुवि विच्छिन्नाफलपुंखा
ः सहस्रशः २२ तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा। खरराक्षसपुत्रस्य सूनोर्दशरथस्य च २३ जीमूतयोरिवाकाशे शब्दो ज्यातलयोस्तदा। धनुर्मुक्तः स्वनोऽन्योन्यं तेश्रूय
ते व रणाजिरे २४ देवदानवगंधर्वाः किन्नराश्च महोरगाः॥ अंतरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतं २५ विद्धमन्योन्यगात्रेषु द्विगुणं वर्द्धते बलं। कृतप्रतिकृतान्योन्यं कुर्वा॥
तां तौ रणाजिरे २६ राममुक्तांस्तु बाणौघान्राक्षसस्त्वच्छिनद्रणे। रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः॥ २७ बाणौघविततास्सर्वा दिशश्च विदिशस्तथा। संछन्ना
वसुधा चैव समंतान्न प्रकाशते २८ ततः क्रुद्धो महाबाहुर्धनुश्छित्वा रक्षसः॥ अष्टाभिरथ नाराचैः सूतं विव्याध राघवः॥ भित्त्वा रथं शरै रामो रथाश्वान्न्यपातयत् २९
विरथो वसुधां तिष्ठन्मकराक्षो निशाचरः॥ अतिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना ३० त्रासनं सर्वभूतानां युगांताग्निसमप्रभं। दुरवापं महच्छूलं रुद्रदत्तं भयंकरं
३१ जाज्वल्यमानमाकाशे संहारास्त्रमिवापरं॥ यद्दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः ३२ विभ्राम्य च महच्छूलं प्रज्वलंतं निशाचरः। स क्रोधात्प्राहिणोत्तस्मै राघ
वाय महात्मने ३३ तमापतंतं ज्वलितं खरपुत्रकराच्युतं। बाणैश्च तद्भिराकाशे शूलं चिच्छेद राघवः ३४ स छिन्नो नैकधा शूलो दिव्यहाटकमंडितः॥ व्यशीर्यत महो
ल्केव रामबाणार्दितो भुवि ३५ तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा। साधु साध्विति भूतानि व्याहरंति नभोगताः ३६ तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः॥ मु
ष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ३७ स तं दृष्ट्वा पतंतं तु प्रहस्य रघुनंदनः॥ पावकास्त्रं ततो रामः संदधे तु शरासने ३८ ॥ ॥ ॥ ॥

पि गात्रेषु द्विगुणं बलं वर्द्धत इत्यन्वयः॥ विरथ इति। वसुधास्थः अभूदिति शेषः॥ तस्मिन्नतिष्ठदिति पाठः॥ तदा रक्षः वसुधां वसुधायां तिष्ठत् शूलं जग्राहेति संबंधः॥ ॥ राम
१०२

रक्षाभ्यां मकराक्षवधः ॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे एकाशीतितमः सर्गः ॥ जहि वीरेत्यादि श्लोकद्वयस्य प्रातीतिकार्थस्य हेयः । वस्तुतस्तु इंद्रजित त्वं तो मम मानु
षजयेः कोवागारीयानि तिगाविष्टमिंद्रजितं प्रत्याह । जहि वीरेत्यादि श्लोकद्वयेन । बलाधिकस्त्वं संयुगे अदृश्यो दृश्यमानो वा सर्वथा इंद्रं दृष्ट्वा जयसि त्र्यापि मानुषाव पि रामल
क्ष्मणौ संयुगे व विध्यसि किं । न वधिष्यसि अतः तौ जहि त्वं जघ्नो हा त्यागाइति वा तो : । तयोरसाध्यत्वात् वृद्धि वयप्रसांत्वजेतिभाव : । तयोः कृते तौ जुहुव । जुहाव । हव्यमान [illegible]

तेनाद्वेता हृतरक्षः मकराक्षस्येन्तरावणो ॥ संछिन्नत्वस्य तत्र पपात च ममार च २९ दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनं । लंकामेव प्रधावंत रामबाणार्दितास्तदा
४० दशरथनृपसुतबाणवेगैर्जनिचरं निहतं समक्षं तं । ददृशुरथ च देवताः प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णं ४० इत्यार्षे रामायणे युद्धकांडे एकोनाशी
तितमः सर्गः मकराक्षे हते क्रुद्धस्तारावणः समितिंजयः । रोषेण महताविष्टो दंतान्कटकटाप्य च १ कुपितश्च तदा तत्र किं कार्यमिति चिंतयन् । आदिदेशाथ संक्रुद्धो र
णायेंद्रजितं सुतं २ जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ । अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ३ त्वमप्रतिमकर्माणमिंद्रं जयसि संयुगे । किं पुनर्मानुषौ दृ
ष्ट्वा न वधिष्यसि संयुगे ४ तथोक्तो राक्षसेंद्रेण प्रतिगृह्य पितुर्वचः । यज्ञभूमौ स विधिवत्पावकं जुहुवेंद्रजित ५ जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः । आजग्मुस्तत्र सं
भ्रांता राक्षस्यो यत्र रावणिः ६ शस्त्राणि शरपत्राणि समिधोऽथ विभीतकाः । लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ७ सर्वतोग्निं समास्तीर्य शरपत्रैः सतोमरैः । छागस्य
सर्वकृष्णस्य गलं जग्राह जीवतः ८ शरहोमसमिद्धस्य विधूमस्य महार्चिषः । बभूवुस्तानि लिंगानि विजयं दर्शयंति च ९ प्रदक्षिणावर्तशिखस्तप्तहाटकसन्निभः ।
हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः १० हुत्वाग्निं तर्पयित्वाथ देवदानवराक्षसान् । आरुरोह रथश्रेष्ठमंतर्धानगतं शुभं ११ स वाजिभिश्चतुर्भिस्तु बाणैश्च विविधै
र्युतः । आरोपितमहाचापः शुशुभे स्यंदनोत्तमः १२ जाज्वल्यमानो वपुषा तपनीयपरिच्छदः । मृगैश्चंद्रार्धचंद्रैश्च स रथः समलंकृतः १३ जांबूनदमहाकंबु दीप्तपाव
कसन्निभः । बभूवेंद्रजितः केतुर्वैडूर्यसमलंकृतः १४ तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः । स बभूव दुराधर्षो रावणिः स महाबलः १५

: शस्त्राणीति शस्त्राणीत्यपि भवन्तीति शेषः । शरहोमेति । अर्चिषः ज्वालायाः सकाशात् यानि लिंगानि विजयं दर्शयंति तानि बभूवुः विजयं दर्शयंतीति । यद्यप्यत्र युद्धे विजयो ना
स्ति तथापि जीवतः पुनर्लंकाप्रवेशरूपजयस्य सद्भावो गंतव्यः । हुत्वाग्निमिति । अंतर्धानगतं । अंतर्धानशक्तियुक्तं । मृगैरिति । मृगैः प्रतिमारूपैः । चंद्रार्धचंद्रैः । चंद्रार्धचंद्राकारस्य
नाविशेषे ॥ जांबूनदेति । जांबूनदमहाकंबुः । सौवर्णवलययुक्तः । कंबुर्ना वलये शंखे इत्यमरः ॥ ॥

यु० सोभिनियोयेति॥ राक्षसैर्मंत्रैः॥ निऋतिदेवताकैर्मंत्रैः॥ अंतर्धानगतः॥ अंतर्धानशक्तिंप्राप्तः॥ अतः इत्युक्तांतरधीयतेत्यपरितनेनन विरोधः॥ अद्यहत्वेत्यादिश्लोकद्वयस्यप्रातीति
१०२ कार्थस्पष्टः॥ वास्तवार्थस्तु॥ अद्यहत्वेत्यादिश्लोकद्वयमेकंवाक्यं॥ रणेसलक्ष्मणंरामंहत्वा॥ तत्वावनेयौ मिथ्याप्रव्रजितौ तौरामलक्ष्मणौ विनेतिशेषः॥ आहवेहत्वावानरानितिशेष
॥ उर्वीन्निर्वानरांकृत्वाराघवाप्रजयंप्रदास्यामि एवंपित्रेप्रीतिंकरिष्यामि चेत्युक्त्वा अंतरधायतइतिसंबंधः॥ सददर्शेति सृजंतौ सृजंतौ॥ इमाविति॥ इषुधाराभिः॥ निरंतरवाराधारा

सोभिनियोयनगरादिंद्रजित्समितिंजयः॥ हुत्वाग्निंराक्षसैर्मंत्रैरंतर्धानगतोब्रवीत १६ अद्यहत्वारणेयौतौ मिथ्याप्रव्रजितौवने॥ जयंपित्रेप्रदास्यामि रावणायरणार्जितं॥
१७ अद्यनिर्वानरामुर्वीं हत्वारामंसलक्ष्मणं॥ करिष्येपरमांप्रीतिमित्युक्त्वांतरधीयत १८ आपपाततस्संक्रुद्धोदशग्रीवेणचोदितः॥ तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्विंद्ररिपूर
णो १९ सददर्शमहावीर्यौनागौत्रिशिरसाविव॥ सृजंतौबाणधाराभिर्वीरौवानरमध्यगौ २० इमौताविति संचिंत्यसज्जंकृत्वाचकार्मुकं॥ संततानेषुजालानि पर्जन्यइववृष्टिमा
न् २१ सतुवैहायसंप्राप्यसरथोरामलक्ष्मणौ॥ अचक्षुर्विषयेतिष्ठन्विव्याधनिशितैःशरैः २२ तौतस्यशरवेगेनपरीतौरामलक्ष्मणौ॥ धनुषीसशरेकृत्वादिव्यमस्त्रंप्रचक्र
तुः २३ प्रच्छादयंतौगगनंशरजालैर्महाबलौ॥ तमस्त्रैःसुरसंकाशौनैवपस्पर्शतुःशरैः २४ सहिधूमांधकारंचचक्रेप्रच्छादयन्नभः॥ दिशश्चांतर्दधेश्रीमान्नीहारतमसावृ
तः २५ नैवज्यातलनिर्घोषोनचनेमिखुरस्वनः॥ शुश्रुवेचरतस्तस्यनचरूपंप्रकाशते २६ घनांधकारेतिमिरेशरवर्षमिवाद्भुतं॥ सववर्षमहाबाहुर्नाराचशरवृष्टिभिः २७
सरामंसूर्यसंकाशैःशरैर्दत्तवरैर्भृशं॥ विव्याधसमरेक्रुद्धःसर्वगात्रेषुरावणिः २८ तौहन्यमानौनाराचैर्धाराभिरिवपर्वतौ॥ हेमपुंखान्नरव्याघ्रौतिग्मान्मुमुचतुःशरान्
२९ अंतरिक्षेसमासाद्यरावणिंकंकपत्रिणः॥ निकृत्यपतगाभूमौपेतुस्तेशोणिताप्लुताः ३० अतिमात्रंशरौघेणदीप्यमानौनरोत्तमौ॥ तानिषून्पततोभल्लैरनेकैर्विचक्र
तुः ३१ यतोहिददृशातेतौशरान्निपतितान्छितान्॥ ततस्ततोदाशरथीससृजातेस्त्रमुत्तमं ३२ रावणिस्तुदिशःसर्वारथेनातिरथःपतन्॥ विव्याधतौदाशरथी
लघ्वस्त्रैर्निशितैःशरैः ३३ तेनातिविद्धौतौवीरौरुक्मपुंखैःसुसंहितैः॥ बभूवतुर्दाशरथीपुष्पिताविवकिंशुकौ ३४

भिः॥ संततानविस्तारयामास॥ वैहायसंविहायसंवियदिमार्गं॥ सहीति॥ अंधकारंचक्रे॥ नभःप्रच्छादयन्निति हेतौ शतृप्रत्ययः॥ दिशः अंतर्दधे॥ अंतर्धापयामास॥ घनांधका
रेति॥ घनांधकारेसांद्रतिमिरे॥ शरवर्षमिवउदकवर्षमिव २७ अंतरिक्षइति॥ पतगाः॥ शराः ३० ॥ ॥ राम
१०२

अयुध्यमानमिति। प्रच्छन्नं खड्गभीत्यापकृत्तं। ३६ आस्ते स्थावर इति। आस्ते न आस्वाणि। आस्ते स्थावरप्रयोगस्यावनः। यद्येष इति भूमिं भूविवरं। दिवं स्वर्गं। एतद्रूपं इतनलोकानामुपलक्ष-
णं। रसातलं। एतत्त्रयस्तनलोकानामुपलक्षणं। इति श्रीमहेश्वरतीर्थीयायां युद्धकांडे अशीतितमः सर्गः। मायया यद्यप्येकेन विंशतिमाहूर्त। विज्ञाय तमनस्तस्य तिष्ठो कुसत्तलीयाहारे माय

नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान्। न चास्य विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे ३५ तेन विद्धाश्च हरयो निहताश्च गतासवः। बभूवुः शतशस्तत्र पतिता धरणीतले ३६
लक्ष्मणस्तु ततः क्रुद्धो भ्रातरं वाक्यमब्रवीत्। ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसां ३७ अथ राक्षसमिमं लोकं करिष्यामि महाबल। तमुवाच ततो रामो लक्ष्मणं शुभलक्ष-
णं। नैकस्य हेतो रक्षांसि पृथिव्यां हंतुमर्हसि ३८ अयुध्यमानं प्रच्छन्नं प्रांजलिं शरणागतं। पलायंतं प्रमत्तं वा न हं तं त्वमिहार्हसि ३९ अस्यैव तु वधे यत्नं करिष्यावो महाभु-
जा। आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ४० तमेनं मायिनं क्षुद्रमंतर्हितरथं बलात्। राक्षसं निहनिष्यंति दृष्ट्वा वानरयूथपाः ४१ यद्येष भूमिं विशते दिवं वा र-
सातलं वापि नभस्थलं वा। एवं निगूढोपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ४३ इत्येवमुक्त्वा वचनं महात्मा रघुप्रवीरः प्लवगर्षभैर्वृतः। वधाय रौद्रस्य नृशंसकर्म-
णस्तदा महात्मा त्वरितं निरीक्षते ४४ इत्यार्षे रामायणे युद्धकांडे अशीतितमः सर्गः॥ अत्र गायत्री। य॥ विज्ञाय तु मनस्तस्य राघवस्य महात्मनः। संनिवृत्याहवात्तस्मा-
त्प्रविवेश पुरीं ततः १ सोनुस्मृत्य वधं तेषां राक्षसानां तरस्विनां। क्रोधताम्रेक्षणः शूरो निर्जगाम महाद्युतिः २ स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः। इंद्रजित्तु महा-
वीर्यः पौलस्त्यो देवकंटकः ३ इंद्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ। रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्ततः ४ इंद्रजित्तु रथे स्थाप्य सीतां मायामयीं तदा। बलेन म-
हतावृत्य तस्या वधमरोचयत ५ मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः। हंतुं सीतां व्यवसितो वानराभिमुखो ययौ ६ तं दृष्ट्वा त्वभिनिर्यांतं सर्वे ते काननौक-
सः। उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ७ हनूमान्पुरतस्तेषां जगाम कपिकुंजरः। प्रगृह्य सुमहच्छृंगं पर्वतस्य दुरासदं ८ स ददर्श हतानंदां सीतामिंद्रजितो
रथे। एकवेणीधरां दीनामुपवासकृशाननां ९ परिक्लिष्टैकवसनाममृजां राघवप्रियां। रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियं १० ॥ ॥ ॥

इत्यनेन संगृह्णाति। सोनुस्मृत्येति। तेषां कुंभकर्णादीनां। इंद्रजिदिति। मायापरस्त्रीमोहकरीं शक्तिं प्रादुष्करोत् प्रादुर्भावयामास। तत्पश्चात् निकुंभिलायां होतुकामः पश्चिम-
द्वारेण निर्गच्छन्निंद्रजित्त्वमेगेन विघातकं रामलक्ष्मणयोर्युद्धोद्योगं दृष्ट्वा तं निवारणार्थं मायां प्रकटितवानिति मंतव्यं। परिक्लिष्टेति। परिक्लिष्टं मलिनं अमृजां उद्वर्तन-
रहितां। सर्वगात्रैरुपलक्षितां ॥ ॥

सु॰ तामिति। तां मुहूर्त्तमात्रं निरीक्ष्य। अचिरदृष्टत्वात्। तां मैथिलीमित्यध्यवस्य। निश्चित्य। बभूव विमना इति शेषः २१ किमिति। किं समर्थितमेतस्याः। सीता रथेस्थौ पितवक्तो
१०३ स्य। किं समर्थितं कोवा अभिप्राय इति चिंतयन्। दुरात्मन्निति। केशपक्षे। केशसमूहे। नृशंसेति। ईदृशं। जुगुप्सितं। येचेति। हे लोकवध्य। येषु लोकेषु वक्तुं ईदृशमुचने सुव्ही

तां निरीक्ष्य मुहूर्त्तं तु मैथिलीमध्यवस्य तां बभूव विरहष्टः हितेन सा जनकात्मजा २१ तां दीनां मलदिग्धांगीं रथस्थां प्रेक्ष्य मैथिलीं। बाष्पपर्याकुलमुखो हनू
मान्मथितो भवत् २२ अब्रवीत्तां तु शोकार्त्तां निरानंदां तपस्विनीं। दृष्ट्वा रथस्थितां दीनां राक्षसेंद्रसमाश्रितां २३ किं समर्थितमतस्येति चिंतयन्स महाकपिः। सा
क्रोशंतीं राम रामेति मायया योजितां रथे १६ गृहीतमूर्द्धजां दृष्ट्वा हनूमान्दैन्यमागतः। दुःखजं वारि नेत्राभ्यामुत्सृजन्मारुतात्मजः १७ तां ५ सहितैर्वानरश्रेष्ठैः ५
५ अभ्यधावत रावणिं १४ तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः। कृत्वा विकोशं निस्त्रिंशं मूर्द्धि सीतामकर्षयत् १५ तां स्त्रियं पश्यतां तेषां ताडयामास राक्षसः ५
दृष्ट्वा राक्षसवीं गीं रामस्य महिषीं प्रियां। अब्रवीत्परुषं वाक्यं क्रोधाद्रक्षोधिपात्मजं १८ दुरात्मन्नात्मनाशाय केशपक्षे परामृशः। ब्रह्मर्षीणां कुले जातो राक्षसीं यो
निमाश्रितः १९ धिक्त्वां पापसमाचारं यस्य ते मतिरीदृशी। नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम २० अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण। च्युता गृहा
च्च राज्याच्च रामहस्ताच्च मैथिली २१ किं तवैषापराद्धा हि यदेनां हंतुमिच्छसि। सीतां हत्वा तु न चिरं जीविष्यसि कथं चन २३ वधार्हकर्मणा तेन मम हरिवाहिनीं
७ हनूमंतं हरिश्रेष्ठमिंद्रजित्समुवाच ह। सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागता ७२ हस्तगतोऽस्यसि। ये च स्त्रीघातिनां लोका लोकवध्येषु कुत्सिताः २४
इह जीवितमुत्सृज्य प्रेत्य तान्प्रतिपत्स्यसे। इति ब्रुवाणो हनुमान्सायुधैर्हरिभिर्वृतः २५ अभ्यधावत्सुसंक्रुद्धो राक्षसेंद्रसुतं प्रति। आपतंतं महावीर्यं तदनीकं
वनौकसां २६ रक्षसां भीमकोपानामनीकेन न्यवारयत्। स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीं २७ हनूमंतं हरिश्रेष्ठमिंद्रजित्समुवाच ह। सुग्रीवस्त्वं
च रामश्च यन्निमित्तमिहागताः २८ तां वधिष्यामि वैदेहीमद्यैव तव पश्यतः। इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर २९ सुग्रीवं च हनिष्यामि तं चाना
र्यं विभीषणं। न हंतव्याः स्त्रियश्चेति यद्ब्रवीषि प्लवंगम २९ पीडाकरममित्राणां यत्स्यात्कर्त्तव्यमेव तत्। ताटकायां वधं रामः किमर्थं कृतवान्पुरा ३० त

घातिनां ये कुत्सिताः लोकास्तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरी ((हहहन्निशममस्य महिषीं जनकात्मजां। तमेवमुक्त्वा रुदतीं सीतां मायामयीं तदा ३१
रमेत्य प्रतिपद्यसे प्रतिपत्स्य इति योजना। आपततमिति। आपतंतमित्यत्र आर्षो लिंगव्यत्ययः। रक्षसामनीकं कर्त्तृ इमामिति स्पष्टं। प्रातीतिकार्थस्पष्टः। वस्तुतस्तु

राम
१०३

यज्ञोपवीतेति। यज्ञोपवीतमार्गेणाभिन्ना। मार्गशब्दः प्रकारवचनः। यज्ञोपवीतधारणप्रकारेणाभिन्नेत्यर्थः ३२ वानराइति। तदुर्गं न्यक्कृतराक्षसपरिवेष्टितत्वरूपं दुर्गमिति। तामुद्दिश्योक्ते
इन्द्रजिद्वाक्यानां वानरव्यामोहनाय संपादितमायासीतेति विषयता तेषामर्थांतरं नोक्तमिति सर्वगतं इति श्रीमहेश्वरतीर्थीये युद्धकांडे एकाशीतितमः सर्गः हतमिन्द्रजित

शितधारेण खड्गेन निकृत्तवानिंद्रजित्स्वयं। यज्ञोपवीतमार्गेण छिन्ना तेन तपस्विनी ३२ सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना। तामिंद्रजित्स्त्रियं हत्वा हनूमंतमुवाच ह
३३ मया रामस्य पश्येमां प्रियां शस्त्रनिषूदितां। एषा विशस्ता वैदेही विफलो वः परिश्रमः ३४ ततः खड्गेन महता हत्वा तामिंद्रजित्स्वयं। हृष्टः स रथमास्थाय ननाद च म
हास्वनं ३५ वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः। व्यादितास्यस्य नदतस्तद्दुर्गं संश्रितस्य च ३६ तथा तु सीतां विनिहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः। तं हृष्टरूपं स
मुदीक्ष्य वानरा विषण्णरूपाः समभिप्रदुद्रुवुः ३७ इत्यार्षे रामायणे युद्धकांडे एकाशीतितमः सर्गः श्रुत्वा तं भीमनिर्ह्रादं शक्राशनिसम
स्वनं। वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः १ तानुवाच ततः सर्वान्हनूमान्मारुतात्मजः। विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् २ शक्राशनिसमस्वनं। वीक्ष
माणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः १ तानुवाच ततः सर्वान्हनूमान्मारुतात्मजः। विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् कस्माद्विषण्णवदना विद्रवध्वं प्लवंगमा
ः। त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतं ३ पृष्ठतोऽनुव्रजध्वं मामग्रतो यांतमाहवे। शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुं ४ एवमुक्ताः सुसंहृष्टा वायुपुत्रेण धीम
ता। शैलशृंगान्द्रुमांश्चैव जगृहुर्हृष्टमानसाः। अभिपेतुश्च गर्जंतो राक्षसान्वानरर्षभाः ५ परिवार्य हनूमंतमन्वयुश्च महाहवे। स तैर्वानरमुख्यैस्तु हनूमान्सर्वतो
वृतः ६ हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीं। स राक्षसानां कदनं चकार सुमहाकपिः ७ वृतो वानरसैन्येन कालांतकयमोपमः। स तु शोकेन चाविष्टः क्रोधेन च
महता कपिः ८ हनूमान्रावणिरथे महतीं पातयच्छिलां। तामापतंतीं दृष्ट्वैव रथः सारथिना तदा ९ विधेयाश्वसमायुक्तो विदूरमपवाहितः। तमिंद्रजितमप्राप्य र
थस्थं सहसारथिं १० विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता। पतितायां शिलायां तु व्यथिता रक्षसां चमूः ११ निपतंत्या च शिलया राक्षसा मथिता भृशं। तमभ्यधाव
न्शतशो नदंतः काननौकसः १२ ते द्रुमांश्च महाकाया गिरिशृंगाणि चोद्यताः। क्षिपंतींद्रजितः सैन्ये वानरा भीमविक्रमाः १३ वृक्षशैलमहावर्षं विसृजंतः प्लवंगमाः
शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वनैः १४ वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः। वीर्यादभिहता वृक्षैर्व्यचेष्टंत रणाजिरे १५ स्वसैन्यमभिवीक्ष्याथ वानरार्दित
मिति। तमप्राप्य धरणीं विवेश। अतएव सा शिला व्यर्थमुद्यता उद्युक्ता अभवदिति शेषः ११ ५ मिंद्रजित्। परिगृह्यायुधं क्रुद्धः परानभिमुखो ययौ १६

यु० निकुंभिलामिति।जुहुव।जुहाव। सोर्चिरिति होमः शोणिततर्पितः। होमशोणितं माहुतिलेन प्रक्षिप्तशोणितं तेन तर्पितः इति श्रीमहेश्वरतीर्थविरचितरामायणतत्व

१०४ स शरैर्घातयन्सज्जस्तैसैन्येनाभिसंवृतः।जघान कपिशार्दूलान्सुबहून्दृढविक्रमः॥शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः १६ तं चाप्यनुचरास्तस्य वानरान्जघ्नु
रोजसा।सस्कंधविटपैः सालैः शिलाभिश्च महाबलाः १७ हनूमान्कदनं चक्रे रक्षसां भीमकर्मणां। तेनाथ निहतास्तत्र राक्षसा भीमविक्रमाः १८ विद्रुताः शतशः स
वै रावणस्य हिते पराः।संनिवार्य परानीकमब्रवीत्तान्वनौकसः १९ हनूमान्संनिवर्तध्वं न नः साध्यमिदं बलं। त्यक्त्वा प्राणान्विचेष्टन्तो रामप्रियचिकीर्षया २० यन्नि
मित्तं हि युध्यामो हता सा जनकात्मजा।इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च २१ तौ यत्प्रतिविधास्येते तत्करिष्यामहे वयं।इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरा
न् २२ शनैः शनैरसंत्रस्तः सबलः संन्यवर्तत।स तत्र प्रेक्ष्य हनूमंतं व्रजंतं यत्र राघवौ २३ स होतुकामो दुष्टात्मा गतश्चैत्यं निकुंभिलां।निकुंभिलामधिष्ठाय पावकं जु
हुवेंद्रजित् २४ यज्ञभूम्यां तु विधिवत्पावकस्तेन रक्षसा।हूयमानः प्रजज्वाल होमशोणितभुक्तदा २५ सोर्चिःपिनद्धो ददृशे होमशोणिततर्पितः।संध्यागत इवा
दित्यः स तीव्राग्निः समुत्थितः २६ अथेंद्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित्। दृष्ट्वा व्यतिष्ठंत च राक्षसास्ते महासमूहेषु नयानयज्ञाः २७ इत्या
र्षे रामायणे वाल्मीकीये युद्धकांडे अशीतितमः सर्गः राघवश्चापि विपुलं तं राक्षसवनौकसां।श्रुत्वा संग्रामनिर्घोषं जांबवंतमुवाच ह।सौम्य नूनं हनुमता क्रि
यते कर्म दुष्करं।श्रूयते हि यथा भीमः सुमहानायुधस्वनः २ तद्गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः।क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ३ ऋक्षराजस्त
थेत्युक्त्वा स्वेनानीकेन संवृतः।आगच्छत्पश्चिमद्वारं हनूमान्यत्र वानरः ४ अथायांतं हनूमंतं ददर्शर्क्षपतिः पथि।वानरैः कृतसंग्रामैः श्वसद्भिरभिसंवृतं ५
दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतं।नीलमेघनिभं भीमं संनिवार्य न्यवर्तत ६ स तेन हरिसैन्येन सन्निकर्षं महायशाः।शीघ्रमागम्य रामाय दुःखितो वाक्यम
ब्रवीत ७ समरे युध्यमानानामस्माकं प्रेक्षतां पुनः।जघान रुदतीं सीतामिंद्रजिद्रावणात्मजः ८ उद्भ्रांतचित्तस्तां दृष्ट्वा विषण्णोहमरिंदम।तदहं भवतो वृत्तं विज्ञाप
यितुमागतः ९ तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्छितः।निपपात तदा भूमौ छिन्नमूल इव द्रुमः १० तं भूमौ देवसंकाशं पतितं दृश्य राघवं।अभिपेतुः समुत्पत्य राम
सर्वतः कपिसत्तमाः ११ ॥ ॥ ॥ ॥ १०४

टीकायां युद्धकांडे अशीतितमः सर्गः दृष्ट्वा पथीति।उद्यतं युद्धाय उद्युक्तं।सन्तेनेति।हरिसैन्येन सह संनिकर्षं रामस्येति शेषः॥ ॥ ॥

तं लक्ष्मण इति। हि हेत्वर्थसंयुतं। हेतुरूपार्थयुक्तं। युक्तियुक्तमिति यावत्। अयं लक्ष्मणो रावणस्य अधर्मिष्ठस्य विनाशादर्शनात्। प्राप्तराज्यपरित्यागपूर्वकपितृवचनपरिपालनरू
पधर्मविशिष्टस्य श्रीरामस्य तत्फलभूतसौख्यादर्शनाच्च प्रस्तुतव्यसनपरंपरादर्शनाच्च। स्वयं व्यसनानि जयेन कलुषितांतःकरणः सन् धर्म एव नास्तीत्याह। शुभे वर्त्मनि त्यादिना।
यद्वा। लक्ष्मणो धर्मो धर्मयोर्हिताहितसाधनत्वं जानन्नपि सीताहननश्रवणात् शोकाक्रांतचित्तः सन् अनवरतधर्मसेविना रघुनाथेन अयुध्यमानं समरे वर्हं तुल्यमिहाल्पीत्यादि
नाद्रुत्वा स्वप्रयोगनिवारणेन क्रोधाविष्टः सन् धर्माधर्मयोरर्थानर्थहेतुत्वनियमं निराकरोति। शुभे वर्त्मनीत्यादिना। पितृवाक्यपरिपालनादिरूपे शुभे वर्त्मनि तिष्ठंतं
आर्य विजितेंद्रियं हस्तप्राप्तराज्यपरित्यागरूपया कैकेयीदशरथयोरपकारिणः क्षमया तु त्वां नाविजितेंद्रियो नाहमर्थपरो देवलोकमावस्तुतुल्यहे। विदिमामृषिमित्युक्तेव
लं धर्ममित्युक्तप्रकारेण केवलं धर्मैकप्रवणं त्वां धर्मः। अनर्थेभ्यो त्रातुं न शक्नोतीति यदत्र तो अनुदयफलत्वेनानुमातुमशक्यत्वान्निरर्थकोऽनुपपन्नत्वर्थः। निष्प्रमाणको वा

अभिसिंचन्सलिलैश्चैनं पद्मोत्पलसुगंधिभिः। प्रदहंतमनासाद्यं सहसाग्निमिवोत्थितं २२ तं लक्ष्मणोऽथ बाहुभ्यां परिष्वज्य सुदुःखितः। उवाच राममस्वस्थं वाक्यं हेत्वर्थ
संयुतं २३ शुभे वर्त्मनि तिष्ठंतं त्वामार्य विजितेंद्रियं। अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः २४ भूतानां स्थावराणां च जंगमानां च दर्शनं। यथास्ति न तथा धर्मस्ते
न नास्तीति मे मतिः २५ यथैव स्थावरं व्यक्तं जंगमं च तथाविधं। नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते २६

ननु प्रामाणिकस्य धर्मस्य कथमनुपादेयत्वमित्याशंक्याह तत्वज्ञावेदकं किमनुमानं प्रमाणं उत प्रत्यक्षमिति। हेत्वादिकल्प्य धर्मेस्तिफलदर्शनादित्यनुमानस्य संफलादर्शनान्ना
स्तीति पूर्वश्लोकेन निराकृत्य प्रत्यक्षं निराकर्तुमाह। भूतानामिति। भूतत्वं सत्यत्वं। भूतानां सत्यानामिति यावत्। स्थावराणां जंगमानां च दर्शनं प्रत्यक्षतः उपलभ्यते यथा तथा
धर्मस्य दर्शनं नास्ति। यतः तेन कारणेन धर्मो नास्तीति मे मतिरिति संबंधः। उक्तमेवार्थं सतर्कं विशिरयति। यथैवेति। स्थावरं यथैव व्यक्तं। प्रत्यक्षं तदुपलब्धं जंगमं च तथाविधं
व्यक्तं भवति अयं धर्मरूपोर्थस्तथा युक्तो न भवति प्रत्यक्षो न भवतीत्यर्थः। तेन नास्तीति मे मतिरिति मे मतिरित्यनुषंगः। अप्रत्यक्षत्वमात्रेण धर्मनिरासो नोपपद्यते। अतींद्रियस्या
पि वस्तुनः सद्भावादित्याशंक्य बाधकतर्केण निराकरोति। त्वद्विध इति। अतींद्रियोपि धर्मो यदि स्यात्तर्हि त्वद्विधो न विपद्येत न चैवं तस्मान्नास्ति धर्म इत्यर्थः॥ ॥ ॥

यु० एवं धर्ममात्रे सद्भावे बाधकमभिधायेदानीं धर्माधर्मयोरुभयोरपि सद्भावे बाधकमाह। यद्यधर्म इति। यद्यधर्मो भूतो भवेत्। सत्तो भवेत्। तदाऽधर्मयुक्तो रावणो नरकं व्रजे
१०५ त्। व्यसनं प्राप्नुयात्। न त्वेवं दृश्यते। धर्मयुक्तो धर्मेणोपयुक्तो भवांश्च एवं व्यसनं नाप्नुयात्। न त्वेवं दृश्यते। तस्मात्फलान्यतिरेकाभावात् धर्माधर्मौ न स्त इत्यर्थः। प्रतिनियत
फलप्रदत्वाभावाद्धर्माधर्मौ न स्त इत्युक्त्वा फलविपर्यासेनापि तौ न स्त इत्याह। तस्यैवेति। तस्य च अधर्मिष्ठस्य रावणस्य व्यसनाभावात्। मम नाभावशङ्केन सुखेन सते ख
स्वसद्भावादित्यर्थः। परमधार्मिके तु मयि व्यसनेन गते सति दुःखं गते सति धर्मः अधर्मो भवति अधर्मफलप्रदो भवति। चकारादधर्मोपि धर्मफलप्रदो भवतीति लभ्यते। अत
एवं परस्परविरोधिनौ प्रत्येकं शास्त्रस्वभावात्। विरुद्धस्वभावावित्यर्थः। भवतीति वचनव्यत्ययः। धर्माधर्मौ च परस्परविरोधिनौ भवत इत्यर्थः। अस्तु तावन्नियमः स्तात्व
ताऽन्वयेनानुमानेनाशंकायाशंकाव्यभिचारादित्याह। धर्मेणोपलभेद्धर्ममित्यादिश्लोकत्रयेण। उपलभेदित्यत्र काकुरनुसंधेया। धर्मेण धर्मानुष्ठानेनाधर्मेण धर्मफ

यद्यधर्मो भवेद्भूतो रावणो नरकं व्रजेत्। भवांश्च धर्मसंयुक्तो नैवं व्यसनमाप्नुयात् १७ तस्य च व्यसनाभावाद्व्यसनं च गते त्वयि। धर्मो भवत्यधर्मश्च परस्परवि
रोधिनौ १८ धर्मेणोपलभेद्धर्ममधर्मं चाप्यधर्मतः। यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः १९ यदि धर्मेण युज्येरन्नाधर्मरुचयो जनाः। धर्मेणाचरतां धर्म
स्तथा तेषां फलं भवेत् २० यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः। क्लिश्यन्ते धर्मशीलाश्च तस्मादेतौ निरर्थकौ २१

लं सुखं लभेत। अधर्मतः। अधर्मानुष्ठानतः। अधर्मं। अधर्मफलं दुःखं उपलभेदिति मन्यसे किमित्यर्थः। एवमुक्तं किमित्याशंक्य। एतन्न संभवतीति रूपा
यितुं सार्धश्लोकेनोक्तमेवार्थं एकेन श्लोकेन रूपयति। यद्यधर्मेणेत्यादिना। येष्वधर्मः प्रतिष्ठितः। ते अधर्मेण अधर्मफलेन युज्येयुर्यदि नाधर्मरुचयो जनाः।
अधर्मरुचयो न भवन्तीति नाधर्मरुचयः। धर्मिष्ठजना इति यावत्। यदि धर्मेणाधर्मफलेन युज्येरन्। तदा धर्मेणाचरतामेवो जनानामधर्मः धर्मफलं सुखं भवेत्। चका राम
रादधर्मेणाचरतां दुःखफलं भवेत्। न चैवं दृश्यत इत्याह। यस्मादिति। येष्वधर्मः प्रतिष्ठितः। तेषामित्यध्याहार्यं। अर्था विवर्धन्ते धर्मशीलाश्च। क्लिश्यन्ते यस्मात्त १०५
स्मादेतौ निरर्थकौ। अव्यवस्थितफलावित्यर्थः। अनेन हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्त्यभावान्नतामधर्माधर्मावनुमानुं शक्यावितिभावः

किंच कर्मस्वरूपमेव धर्मोऽधर्मो कर्म जन्मातिशयो चेति विकल्पाद्यं दूषयति । वध्यं तत्रप्यादि श्लोकद्वयेन । हेयं घवपापकर्माणः पापिष्ठाः । अथ धर्मेण कर्मस्वरूपेण धर्मेण वध्यं ते परि
बाध्यंते चेत्तद्वधकर्म । वधकर्मस्वरूपाधर्मः । हतः स्वकर्मणा वध्यापि तान् हतः सन्नास । कर्मस्वरूपाधर्मः । कं च लिप्यति स्वयमसन् सन्नकर्म पिनच लिप्यतीत्यर्थः । कर्मणः स्वशि
कृतपापफलभुक्त्वमाक्षिप्तं तस्य कर्मकारयितुः सज्जिभूतेरेवं फलं दास्यतीत्याशंका मनूद्य परिहरति । अथवेति । विहितेन विधिना कारयित्रा दैवेनेत्यर्थः । अर्थं जनः हन्त्वेवा
ध्यते अपरं हंति वा घातयेद्वा । तेन पापेन कर्मणा पापफलभूतदुःखेन विधिरेवा लिप्यते संबध्यते न स । प्रयोक्तृकर्त्री लिप्यते अस्य ताप स्वपुण्यपक्कर्मणापि पितृलोकसुखेन
पिप्रयोजककर्त्रा न संबध्यते । अतः कर्मस्वरूपस्याधर्मत्वं धर्मत्वं वा न संभवतीत्यर्थः । कर्मजन्मातिशयपक्षो धर्मः श्रेयः साधनमिति द्वितीयपक्षे किं स्वतंत्र एव श्रेयो जनय
तिप्रायश्चित्तो वेति द्वेधा विकल्प्याद्यं दूषयति । अदृष्टेति । प्रतिक्रियते । प्रतिपाद्यतदुतिप्रतिकारं फलं अदृष्टप्रतिकारेण अप्रत्यक्षफलेन । अमतेन । स्वयमप्रत्यक्षेण । अ

वध्यं ते पापकर्माणो पपद्यधर्मं नाराधव । वधकर्म हतो धर्मः स्वहृतः कं च लिप्यति २२ अथवा विहितेनार्यं हन्यते हंति वा परं । विधिना लिप्यते तेन न स पापेन कर्मणा
२३ अदृष्टप्रतिकारेण व्यक्तेनासता सता । कथं शक्यं प्रांशुः धर्मं कारयितुं कर्शन २४ यदि सत्स्यात्ततो मुख्यो नासत्स्यात्तत्र किं चन । त्वय्या यदीदृशी प्राज्ञ मतिरात्मा
न्नोपपद्यते २५ अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते । दुर्बलो हतमर्यादो न सेव्य इति मे मतिः २६ बलस्य परिचैव धर्मो गुणभूतः पराक्रमः । धर्मं मुक्तस्तु वर्त
स्वपयाद्यर्मं तथा बले २७ ॥ ॥

सतासता व्यक्तभूतेन धर्मेण परं श्रेयः कथं प्राप्तुं शक्यं न शक्यमित्यर्थः । तद्वेव आसत्त्वविषयसेवावक तर्कं प्रदर्शनमुखेन आपि दृढीकरोति । यदीत्यादि हि सतां सुख्यं यदि
सत्त्वाद्धर्मोऽस्ति तर्हि सत्त्व एव शेषः । तर्हि धर्मे सत्स्य तत्र सत्त्व नित्यं किंचन न स्यात्तर्कस्य विपर्यये पर्यवसानमाह । त्वय्येति । यत त्वयस्मात्त्वया ईदृशी दुःसह व्यसने प्राप्ते तस्मा
त्तन्नोपपद्यते असदेवतदित्यर्थः । धर्मः प्रबलमाश्रितो वे फलप्रयच्छतीत्याशंका मनूद्य परिहरति । अथ वेति । दुर्बलः बलरहितः । अतएव क्लीबः कातरः स्वतः कार्यक
रणासमर्थ इति यावत् । धर्मः बलमनुवर्तते का यो त्याग नेपरबलमपेक्षते तदर्थः । एवं च दुर्बलो हतमर्यादः धर्मो हितमेव साधयतीत्येतादृशमर्यादारहितः न सेव्य
इति मे मतिरिति योजना । उपसर्जनभूतं धर्ममुत्सृज्य प्रधानभूतं बलमेवाश्रयणीयमित्याह । बलस्येति । बलस्य धर्मो गुणभूतः उपसर्जनभूतो परिस्मान्तराद्यथोरानी ध
र्मं वर्तसे तथा धर्ममुत्सृज्य बले । बलमाश्रित्य पराक्रमे वर्तस्वेत्यन्वयः ॥ ॥

सु०
१०६ ननु सर्वोपि धर्मो न भवति किंत्वस्त्रैकदेशः सत्यं धर्मः तस्मात्त्वमयावनेवत्स्यामीति पितरि प्रतिज्ञातं सत्यवचनमनुष्ठेयं तदर्थमेवमनुभूतमिति सत्याभिनिवेशिनं श
मं प्रति धर्ममात्रस्तामाम्नेहृषितेपि सत्यवचनस्यापि धर्मतो पार्थको न तिरस्क्रियोति। अथ चेदिति। हे परंतप। सत्यवचनं धर्मः किल। अथ चेत् एवं चेत्। अनृतः त्वामभिषेक्ष्यामी
त्युक्त्वा तदकरणेनासत्यरहितः त्वमपि मकत्ल सहुरणा अयं ज्येष्ठाय प्रेत्वयि अकरुणः हन्तुं प्रतिनिष्ठासनात निरंप अतो वधयोग्यः पिता त्वयापि त्वद्वचनं करिष्यामी
ति कृतप्रतिज्ञेन त्वया किं न बद्धः। किमर्थं नानियमितः। सर्वप्रजासु द्विधो रामम भिषेक्ष्यामीत्युक्त्वा प्राथमिकं पितृवचनं परित्यज्य पश्चाद्गमनविषये पितृवचनेऽपि
श्यामीति पालयता त्वया न सत्यवचनमपि सम्यक्परिपालितमिति भावः। अनृतमिति पाठे अनृतं त्वयि वरस्त्रितिशेषः। धर्माधर्मयोः सद्भावेपि राज्ञा धर्मो वा अधर्मो
वा न नियमेनानुष्ठातव्यः। किंतु तत्तत्कालप्रयोजनानुगुण्येन अभावपि कर्तव्या विसमत्रशिष्टाचारप्रमाणयति। यदि धर्म इति। यदि धर्म इति। यदि धर्मो भवेद्दूतः।

अथचेत्सत्यवचनंधर्मः किलपरंतप। अनृतस्त्वमकरुणः किंनबद्धस्त्वयापिता २८ यदिधर्मोभवद्दूतः अधर्मोवापरंतप। नस्महत्वामुनिंवज्रीकुर्यादिन्द्रः
शतक्रतुः २९ अधर्मसंश्रितोधर्मोविनाशयतिराघव। सर्वमेतद्यथाकामंकाकुत्स्थकुरुतेनरः ३० ममचेदंमतंतातधर्मोयमितिराघव। धर्ममूलंसदाछि
न्नंराज्यमुत्सृजतात्वया ३१ ॥ ॥

:केवलं धर्म एवानुष्ठेयस्तेन प्राप्तो भवेत् तर्हि वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इत्थं न कुर्यात। किंतु धर्ममेव कुर्यात। अधर्मो वा केवलाधर्मो वा यद्यनुष्ठेयः स्यात्
तर्हि शतक्रतुर्वज्री मुनिं हत्वा इत्थं न कुर्यात। किंत्वहननमेव कुर्यात।। अत्र धर्मनिष्ठेन इत्थं धर्मो धर्मयोरुभयोरप्यनुष्ठितत्वात। राज्ञा यथाकालमुभय
मपि कर्तव्यमिति भावः। इदानीं धर्माधर्मयोरेकतरस्याश्रयणमनर्थपर्यवसायीत्याह। अधर्मसंश्रित इति। अधर्मसंश्रित इति। अधर्मसंश्रितो धर्मः। अधर्मस
हितो धर्मः। धर्म आधर्मश्चेत्यर्थः। विनाशयति कर्तारमिति शेषः। नियमेन पृथक्पृथगनुष्ठीयमानो धर्मो कर्तारं विनाशयतीत्यर्थः। अत एवैतत्सर्वं धर्मो धर्मा
त्मकं कर्मतातं यथाकामं तत्तत्कालोचितं अनियमेन नरः कुरुते कुर्यादित्यर्थः। एतदेव मम धर्मत्वेन मतमित्याह। ममेति इदंय थाकाममेव अभ्याचरणीयत्वम् धर्मे
इति मम मतमित्यर्थः। इदानीमर्थस्य श्रेयो हेतुत्वं प्रतिपादयन्केवलं धर्मं एवाचरणीय इति मन्वानेन त्वया तन्मूलमेव छिन्नमित्याह धर्ममूलमिति। तदानीं किन्ने
वचनेवामारंभकालएव धर्मस्य मूलं कारणमर्थात्मकमिति शेषः॥ ॥ राम
१०६

तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति। अर्थेभ्य इति। संहृतेभ्यः संप्राप्तेभ्यः। क्रियाः। धर्ममूलभूतक्रियाः ३२ न केवलमर्थपरित्यागे धर्मासंभवः। किंतु दोषप्राप्तिरपीत्या
ह। सोयमिति। सोयमर्थपरित्यागी अर्थपरित्यागप्रारंभे अर्थैस्त्यक्ता सर्वैः क्षितः। पूर्वं सर्वैः क्षितः। पापमन्याय्येनार्थार्जनं। ततः तेन पापेन दोषः प्रवर्तते। अर्थस्येति। अर्थे
स्य परित्यागे एते दोषाः प्रत्याहृताः। स्पष्टमुक्ताः। राज्यमुत्सृजता त्वया येन गुणेन बुद्धिः अर्थपरित्यागविषयीकृता तं न जाने इति शेषः। यस्येति। यस्यार्थाः संति तस्य
धर्मरूपो अर्थः। प्रयोजनानिर्वर्तितस्य सर्वप्ररोहणामनुकूलं। अधनेन पुरुषेण अर्थं श्रेयो विचिन्वतामप्यर्थश्रेयःकामेन अर्थः। श्रेयोप्राप्तिर्न शक्या। इहैवेति। प्रवर्त्तं

अर्थेभ्योपि विवृद्धेभ्यः संहृतेभ्यस्ततस्ततः। क्रियाः सर्वाः प्रवर्तंते पर्वतेभ्य इवापगाः ३२ अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः। विच्छिद्यंते क्रियाः सर्वा ग्री
ष्मे कुसरितो यथा ३३ सोयमर्थपरित्यागसुखकामः सुखैधितः। पापमाचरते कर्तुं ततो दोषः प्रवर्तते ३४ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बांधवाः।
यस्यार्थः स पुमांल्लोके यस्यार्थः स च पंडितः ३५ यस्यार्थः स च विक्रांतो यस्यार्थः स च बुद्धिमान्॥ यस्यार्थः स महाबाहुर्यस्यार्थः स गुणाधिकः ३६ अर्थस्यैते प
रित्यागे दोषाः प्रव्याहृता मया॥ राज्यमुत्सृजता वीर येन बुद्धिस्त्वया कृता ३७ यस्यार्था धर्मकार्यास्तस्य सर्वं प्रदक्षिणं॥ अधनेनार्थकामेन नार्थः शक्यो विचिन्वता
३८ हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः। अर्थादेतानि सर्वाणि प्रवर्तंते नराधिप ३९ येषां नश्यत्ययं लोकश्चरतां धर्मचारिणां। तेर्थास्त्वयि न दृश्यंते दु
र्दिनेषु यथा ग्रहाः ४० त्वयि प्रव्रजिते वीर गुरोश्च वचने स्थिते रक्षसापहृता भार्या प्राणैः प्रियतरा तव ४१ तदद्य विपुलं वीर दुःखमिंद्रजिता कृतं। कर्मणा
व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ४२

ते। प्रकृष्टा वर्त्तंते शोभंत इत्यर्थः। न केवलमामुष्मिकश्रेयःसाधनभूतो अर्थः किंतु ऐहिकश्रेयःसाधनभूतोपीति व्यतिरेकमुखेन प्रतिपादयन् तादृशोर्थस्त्वयि
नास्तीत्याह॥ येषामिति। चरतामित्यनादरे षष्ठी। येषां चरतां यानवरतः स्फुरतो विद्यमानानर्थान् अनादृत्य धर्मचारिणां धर्ममाचरतां पुरुषाणामयं लोको नश्य
ति ऐहिकसुखं नास्तीत्यर्थः। ते तादृशा ऐहिकसुखसाधनभूताः अर्थाः दुर्दिनेषु ग्रहा यथा तथा त्वयि न दृश्यंते सकलश्रेयःसाधनभूता यास्त्वया अनादृता इत्यर्थे
परित्यागेन धर्मं चरतामनर्थो भवतीत्यस्मिन्नर्थे रघुनाथमेव दृष्टांतयति। त्वयीति। प्राणैः। प्राणेभ्यः। तदद्येति। तद्विपुलं दुःखं कर्मणा व्यपनेष्यामि भवत्कर्मणा
प्राप्तं दुःखं मच्छौर्यकर्मणा व्यपनेष्यामीत्यर्थः॥ ॥

यु॰ १०७ उन्निद्रेति। महात्मानं। परमात्मानं। सीतानिधनश्रवणाज्जनितदुःखार्दितोऽहमितः परं किमपि कर्तुं न शक्नोमि। त्वाशोकयतत्वहमेव करिष्यामि मां नियोजयेत्याशयेना
ह। अयमिति। अयमहं तव प्रियार्थमुत्पन्नः त्वं नियोजितसेवां कर्तुमेवाहमुत्पन्न इत्यर्थः। अतः जनकसुतानिधने निरीक्ष्य हृष्टः सन् लोकं विनिपातयामीत्यर्थः। यद्वा। स
कलशास्त्रार्थतत्त्वज्ञस्त्वं किमर्थमेवं धर्माधर्मसंदेहं करोषि शङ्कां त्यक्त्वा शौर्यं प्रदर्शयेत्यत आह। अयमिति। जनकसुतानिधने निरीक्ष्य हृष्टः सन् अयं पक्षो धर्मविरुद्ध इत्यपो
र्थः। इति। उक्तवानस्मि इतः परं तव प्रियार्थं तव प्रीया सीता तस्याः सीतानिधनप्रतिकारार्थं लोकं विनिपातयामीत्यर्थः ॥ इति श्रीमहेश्वरतीर्थीये युद्धकाण्डे त्र्यशी

उत्तिष्ठ नरशार्दूल दीर्घबाहो दृढव्रत। किमात्मानं महात्मानं महात्मन्नावबुध्यसे ४३ अयमनघ तवोदितः प्रियार्थं जनकसुतानिधने निरीक्ष्य हृष्टः। सरथ
गजहयां सराक्षसेंद्रां भृशमिषुभिर्विनिपातयामि लंकां ४४ इत्यार्षे रामायणे वाल्मीकीये युद्धकाण्डे त्र्यशीतितमः सर्गः। राममाश्वासमाने तु लक्ष्मणे भ्रातृ
वत्सले। निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः १ नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः। नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपः २ सोभिगम्य महात्मा
नं राघवं शोकलालसम्। वानरांश्चापि ददृशे बाष्पपर्याकुलेक्षणान् ३ राघवं च महात्मानमिक्ष्वाकुकुलनंदनम्। ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम्
४ व्रीडितं शोकसंतप्तं दृष्ट्वा रामं विभीषणः। अंतर्दुःखेन दीनात्मा किमेतदिति सोब्रवीत् ५ विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान्। लक्ष्मणोवाच मंदं
वाक्यमिदं बाष्पपरिप्लुतः ६ हतामिन्द्रजिता सीतामिह श्रुत्वैव राघवः। हनुमद्वचनात्सौम्य ततो मोहमुपाश्रितः ७ कथयंतं तु सौमित्रिं संनिवार्य विभी
षणः। पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् ८ मनुजेन्द्रार्तरूपेण यदुक्तस्त्वं हनूमता। तदयुक्तमहं मन्ये सागरस्येव शोषणम् ९ अभिप्रायं तु जानामि रा
वणस्य दुरात्मनः। सीतां प्रति महाबाहो न च घातं करिष्यति १० याच्यमानः सुबहुशो मया हितचिकीर्षुणा। वैदेहीमुत्सृजस्वेति न च तत्कृतवान् वचः ११
नैव साम्ना न दानेन न भेदेन कुतो युधा। सा द्रष्टुमपि शक्येत नैव चान्येन केनचित् १२ वानरान्मोहयित्वा तु प्रतियातः स राक्षसः। चैत्यं निकुम्भिलां नाम य
त्र होमं करिष्यति १३ हुतवानुपयातो हि देवैरपि सवासवैः। दुराधर्षो भवत्येष संग्रामे रावणात्मजः १४ ॥ ॥ ॥ ॥

तितमः सर्गः॥ ॥ राममिति॥ आश्वासमाने। आश्वासयमाने। सोभिगम्येति ददृशे। ददर्श। लक्ष्मणो वाचेत्यत्र सलोपश्छांदसः। मनुजेन्द्रेति। आर्तरूपेणाप राम ९७
रमार्तरूपेणानेवेति। यथार्थदर्शनेन। अनेन मायोपायेन। केनचिदपि पुरुषेण त्वयेत्यर्थः। तर्हि कथं हननमित्याशंक्य तमिंद्रजितो मायेत्याह। वानरानिति॥ ॥

ससैन्या इति। तद्धोमकर्म इहेति सैन्यानुकर्षिभिः। सैन्यपालैः। एष इति। तत्कर्म। होमकर्म। तस्येति। पत्रिपत्राङ्गवाजिनः। पत्रिपत्राणि पक्षिपक्षाः। तेषामङ्गानि बर्हीणि तैर्वाजिनः प
क्षवंतः। पत्रिपत्राङ्गवाजिता इति पाठे। पत्रिणां पत्ररूपाङ्गैः संजाततेगाः। मनुजवरेति। यस्मात्कारणात्। रिपुवधं प्रति कालविप्रकर्षो द्य कर्तुं न क्षमः तस्मात्त्वं रिपोर्वधाय बा

तेन मोहयता नूनमेषा माया प्रयोजिता। विघ्नमन्विच्छता तात वानराणां पराक्रमे १५ ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते। त्यजेमं नरशार्दूल मिथ्यासंतापमागतं॥
१६ सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितं। इह त्वं स्वस्थहृदयस्तिष्ठ सत्त्वसमुच्छ्रितः। १७ लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः। एष तं नरशार्दूलो राव
णिं निशितैः शरैः १८ त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति। तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिताः १९ पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितं॥
तत्संदिश महाबाहो लक्ष्मणं शुभलक्षणं २० राक्षसस्य विनाशाय वज्रं वज्रधरो यथा २१ मनुजवर न कालविप्रकर्षो रिपुनिधनं प्रति यत्क्षमोद्य कर्तुं। त्वमतिसृज
रिपोर्वधाय बाणीमसुरपुरोन्मथने यथा महेन्द्रः २२ समाप्तकर्मा हि स राक्षसेन्द्रो भवत्यदृश्यः समरे सुरासुरैः। युयुत्सुता तेन समाप्तकर्मणा भवेत्सुराणामपि संश
यो महान् २३ इत्यार्षे रामायणे युद्धकांडे चतुरशीतितमः सर्गः॥ ॥तस्य तद्वचनं श्रुत्वा राघवः शोककर्शितः। नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा १ ततो धैर्यमवष्ट
भ्य रामः परपुरंजयः। विभीषणमुपासीनमुवाच कपिसंनिधौ। नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण। भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितं ३ राघवस्य वचः श्रुत्वा
वाक्यविशारदः। यत्तत्पुनरिदं वाक्यं बभाषे स विभीषणः ४ यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनं। तत्तथानुष्ठितं वीर त्वद्वाक्यसमनंतरं ५ तान्यनीकानि सर्वाणि
विभक्तानि समंततः। विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ६ भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महाप्रभो। त्वय्यकारणसंतप्ते संतप्तहृदया वयं ७ त्यज राजन्निमं शोकं
मिथ्यासंतापमागतं। तदियं त्यज्यतां चिंता शत्रुहर्षविवर्द्धनी ८ उद्यमः क्रियतां वीर हर्षः समुपसेव्यतां। प्राप्तव्या यदि ते सीता हंतव्याश्च निशाचराः ९ रघुनंदन वक्ष्यामि श्रू
यतां मे हितं वचः। साध्वयं यातु सौमित्रिर्बलेन महता वृतः १० निकुंभिलायां संप्राप्य हंतुं रावणिमाहवे। धनुर्मंडलनिर्मुक्तैराशीविषविषोपमैः ११ शरैर्हंतुं महेष्वासो राव
णिं समितिंजयः॥ ॥

णीं मतिसृजेत्यन्वयः॥ ॥इति श्रीमहेश्वरतीर्थीये युद्धकांडे चतुरशीतितमः सर्गः॥ ततइति। उपासीनं उपसमीपे आसीनं। राघवस्येति। यद्वाक्यं सर्वमुक्तवान् तदिदं पुनर्ब
भाषइति संबंधः॥ ॥ ॥

तेनेत्यादि। तपसा ब्रह्मशिरः। ब्रह्मशिरःसंज्ञकमस्त्रं तेन वीरेण प्राप्तं वरदानात् निकुंभिलायां होमकर्मणि समाप्ते कामगतुरंगमयुक्तो रथो ह्यग्नेः सकाशात् हुतादुत्पतेत् तद्रथस्थस्य
तवाऽवध्यत्वं च भविष्यतीति वरदानात् कामगास्तुरगा मा ःआमाः तुरंगमश्च द्वौ रथस्याप्युपलक्षकः १२ सत इति। सत एवः एवंप्रकारेण लब्धवरः इंद्रजित् ससैन्येन सह निकुंभिलां प्रागमः। हो-
मकर्मणे रथादिकं प्राप्तुं वनं निकुंभिलां गत इत्यर्थः। कृतकर्मा समाप्तहोमः। यद्युत्तिष्ठेत् तर्हि सर्वे वयं हताः विद्धीत्यर्थः ॥१४॥ निकुंभिलामित्यादि श्लोकद्वयमेकं वाक्यं। यो रिपुः अहुता-

तेन वीरेण तपसा वरदानात् स्वयंभुवः। अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरंगमाः १३ स एष सह सैन्येन प्राप्तः किल निकुंभिलां। यद्युत्तिष्ठेत् कृतं कर्म हतान् सर्वांश्च विद्धि नः १४
निकुंभिलामसंप्राप्तमहुताग्निं च यो रिपुः। त्वामाततायिनं हन्यादिंद्रशत्रोः स ते वधः १५ वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै। इत्येवं विहितो राजन् वधस्तस्यैव धीमतः॥
वधायेंद्रजितो राम संदिशस्व महाबलं॥ हते तस्मिन् हतं विद्धि रावणं ससुहृज्जनं॥ विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत्। जानामि तस्य रौद्रस्य मायां सत्यपराक्रम
१८ स हि ब्रह्मास्त्रवित् प्राज्ञो महामायो महाबलः। करोत्यसंज्ञान् संग्रामे देवान् सवरुणानपि १९ तस्यांतरिक्षे चरतः सरथस्य महायशः। न गतिर्ज्ञायते वीर सूर्यस्येवाभ्र-
संप्लवे २० राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः। लक्ष्मणं कीर्तिसंपन्नमिदं वचनमब्रवीत् २१ यद्वानरेंद्रस्य बलं तेन सर्वेण संवृतः। हनुमत्प्रमुखैश्चैव यूथपैः सह-
लक्ष्मणः २२ जांबवेनर्क्षपतिना सह सैन्येन संवृतः। जहि तं राक्षससुतं मायाबलसमन्वितं २३ अयं त्वां सचिवैः सार्द्धं महात्मा रजनीचरः। अभिज्ञस्तस्य देशस्य पृष्ठ-
तोऽनुगमिष्यति २४ राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः। जग्राह कार्मुकश्रेष्ठमत्यद्भुतपराक्रमः २५ सन्नद्धः कवची खड्गी सशरी हेमचापधृक्। रामपादावु-
पस्पृश्य हृष्टः सौमित्रिरब्रवीत् २६ अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिं। लंकामभिपतिष्यंति हंसाः पुष्करिणीमिव २७ अद्यैव तस्य रौद्रस्य शरीरं मामकाः
शराः। विधमिष्यंति भित्त्वा तं महाचापगुणच्युताः २८ स एवमुक्त्वा वचनं द्युतिमान् भ्रातुरग्रतः। स रावणिवधाकांक्षी लक्ष्मणस्त्वरितो ययौ २९ सोऽभिवाद्य गुरोः पादौ
कृत्वा चापि प्रदक्षिणं। निकुंभिलामभिययौ चैत्यं रावणिपालितं ३० विभीषणेन सहितो राजपुत्रः प्रतापवान्। कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ ३१ ॥

ग्निं च समाप्तहोमं निकुंभिलां। निकुंभिलाख्यं न्यग्रोधमूलं स्थानं असंप्राप्तं आततायिनं शस्त्रपाणिं त्वं च हन्यात्। हिंस्यात्। तत् इंद्रशत्रोस्ते स एव वधः। मारकः इति वरः। सर्वलोकेश्व-
रेण ब्रह्मणा वरो दत्तः। राजन् धीमतस्तस्य एवं वधो विहित इति योजना। एवं च तत्र श्रीरामायणे इंद्रजिद्वधप्रकारस्याऽकृतत्वात् तदनुगुणतयैव व्याख्यातं तस्यांतरिक्ष इति १५ १६ अ-
भ्रसंप्लवे मेघसंघे २० स एवमुक्त्वेति। स लक्ष्मणः एवमुक्त्वा स एव लक्ष्मणः ययाविति। तच्च हृदयस्य निर्वाहः एवमुक्त्वा तु वचनमिति पाठः सम्यक् ॥२९॥ ॥ ॥

संसंप्राप्येति। सः रघुनंदनः। मायायोगं। मायैव योगः। उपायो यस्य तं। दंडजितं प्राप्य। ब्रह्मविधानेन निकुंभिलामसंप्राप्त इत्यादि नेत्तो ब्रह्मवरदानधकारेण विनिर्जितं तस्या विति संबंधः।(
२५॥ विविधमिति। प्रतिभयतमं। अतिशयेन भयंकरं॥ ३०॥ ॥इति श्रीयुद्धकांडे पंचाशीतितमः सर्गः॥ ॥ यदेत इति। आयोध्यतां। प्रहर्षयेतां। शरूपेति। पताय तत्स्व। जहीति। मायापरम

वानराणां सहस्रैस्तु हनुमान्बहुभिर्वृतः। विभीषणश्च सामात्यो लक्ष्मणं त्वन्ववर्तत॥ २१॥ महता हरिसैन्येन सवेगमभिसंवृतः। ऋक्षराजबलं चैव ददर्श पथि विष्ठितं॥ २२॥ स गत्वा दूरमध्वानं
सौमित्रिर्मित्रनंदनः। राक्षसेंद्रबलं दूरादपश्यद्व्यूहमास्थितं॥ २३॥ स संप्राप्य धनुष्पाणिर्मायायोगमरिंदमः। तस्थौ ब्रह्मविधानेन जेतुं तं रघुनंदनः॥ २४॥ विभीषणेन सहितो राजपुत्रः
प्रतापवान्। अंगदेन च वीरेण तथानिलसुतेन च॥ २५॥ विविधममलशस्त्रभास्वरं तद्ध्वजगहनं विपुलं महारथैश्च। प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश॥ ३०॥
इत्यार्षे रामायणे युद्धकांडे पंचाशीतितमः सर्गः॥ ॥अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः। परेषामहितं वाक्यमर्थसाधकमब्रवीत्॥ १॥ यदेतद्राक्षसानीकं मेघश्यामं वि
लोक्यते। एतदायोध्यतां शीघ्रं कपिभिश्च शिलायुधैः॥ २॥ अस्यानीकस्य महतो भेदने यत लक्ष्मण। राक्षसेंद्रसुतोऽप्यत्र भिन्ने दृश्यो भविष्यति॥ ३॥ स त्वमिंद्राशनिप्रख्यैः शरैरवकि
रन्परान्। अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते॥ ४॥ जहि वीर दुरात्मानं मायापरमधार्मिकं। रावणिं क्रूरकर्माणं सर्वलोकभयावहं॥ ५॥ विभीषणवचः श्रुत्वा लक्ष्मणः
ववर्ष शरवर्षाणि राक्षसेंद्रसुतं प्रति॥ ६॥ ऋक्षाः शाखामृगाश्चैव द्रुमप्रवरयोधिनः। अभ्यधावंत सहितास्तदनीकमवस्थितं॥ ७॥ राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः।
अभ्यवर्तंत समरे कपिसैन्यजिघांसवः॥ ८॥ स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसां। शब्देन महता लंकां नादयन्वै समंततः॥ ९॥ शस्त्रैश्च विविधाकारैः शितैर्बाणैश्च पाद
पैः। उद्यतैर्गिरिशृंगैश्च घोरैराकाशमावृतं॥ १०॥ ते राक्षसा वानरेषु विकृताननबाहवः। निवेशयंतः शस्त्राणि चक्रुस्ते सुमहद्भयं॥ ११॥ तथैव सकलैर्वृक्षैर्गिरिशृंगैश्च
वानराः। अभिजघ्नुर्निजघ्नुश्च समरे सर्वराक्षसान्॥ १२॥ ऋक्षवानरमुख्यैस्तु महाकायैर्महाबलैः। रक्षसां वध्यमानानां महद्भयमजायत॥ १३॥ स्वमनीकं विषण्णं तु
श्रुत्वा शत्रुभिरर्दितं। उदतिष्ठत दुर्धर्षस्तत्कर्मण्यननुष्ठिते॥ १४॥ वृक्षांधकारान्निर्गम्य जातक्रोधः स रावणिः। आरुरोह रथं सज्जं पूर्वयुक्तं स राक्षसः॥ १५॥ स भीमकार्मुक
शरधरः कृष्णांजनचयोपमः। रक्तास्यनयनः क्रूरो बभौ मृत्युरिवांतकः॥ १६॥ दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद्बलं। रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सतां॥ १७॥

धार्मिकं परमधार्मिकवत्प्रतीयमानं विभीषणवच इति राक्षसेंद्रसुतं प्रति ववर्षेति संबंधः। द्विरूपतत्सेनापां ववर्षे पर्यः। शस्त्रैरिति। बहुधाकारैर्बहुप्रकारैः। तद इति। ते राक्षसा वान
रेषु शस्त्राणि निवेशयंतः। ते विकृताननबाहवः सन्तः सुमहद्भयं चक्रुरिति संबंधः। अन तत्त्वं हृदयस्य नर्मोन कर्तव्यं। स्वमनीकमिति। अननुष्ठिते। असमाप्ते सति। वृक्षां
धकारात्। निर्गम्य वृक्षसंदर्भात्॥ २५॥

यु॰ सइति॥सोऽभ्युपेत्यस्त्वापिनियाभेदात्तच्छन्दस्य द्विषयोगः॥१८॥बाहुभ्यामितिमिति।यदिदृढदत्तासीतिशेषः।तर्हि बाहुभ्यां युध्यस्व॥२१॥तमिति।अप्रतिमसंस्थानैः।अप्रमेयैरित्यर्थः॥

१०५ तस्मिन्काले तु हनुमानुद्यम्य स्वं दुरासदं। धरणीधरसंकाशो महावृक्षमरिंदमः॥१८॥ स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन्। चकार बहुभिर्वृक्षैर्निःशब्दमिव वानरः॥१९॥
विध्वंसयंतं तरसा दृष्ट्वैव पवनात्मजं॥ राक्षसानां सहस्राणि हनूमंतमवाकिरन्॥२०॥ शितशूलधराः शूरैरसिभिश्चासिपाणयः। शक्तिहस्ताश्च शक्तीभिः पट्टसैः पट्टसायुधाः
॥२१॥ परिघैश्च गदाभिश्च कुंतैश्च शुभदर्शनैः। शतशोथ शतघ्नीभिरायसैरपि मुद्गरैः॥२२॥ घोरैः परशुभिश्चैव भिंडिपालैश्च राक्षसाः। मुष्टिभिर्वज्रवेगैश्च तलैरशनिसन्नि
भैः॥२३॥ अभिजघ्नुः समासाद्य समंतात्पर्वतोपमं। तेषामपि च संक्रुद्धश्चकार कदनं महत्॥२४॥ स ददर्श कपिश्रेष्ठमचलोपममिंद्रजित्। सूदयानममित्रघ्नममित्रान्
पवनात्मजं॥२५॥ स सारथिमुवाचेदं याहि यत्रैष वानरः। क्षयमेव हि नः कुर्याद्राक्षसानामुपेक्षितः॥२६॥ इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः। वहन्परमदु
र्धर्षं स्थितमिंद्रजितं रथे॥२७॥ सोऽभ्युपेत्य शरान्खड्गान्पट्टसासिपरश्वधान्। अभ्यवर्षत दुर्धर्षः कपिमूर्ध्नि निशाचरः॥२८॥ तानि शस्त्राणि घोराणि प्रतिगृह्य स मारु
तिः। रोषेण महताविष्टो वाक्यं चेदमुवाच ह॥२९॥ युध्यस्व यदि शूरोसि रावणात्मज दुर्मते। वायुपुत्रं समासाद्य न जीवन्प्रतियास्यसि॥३०॥ बाहुभ्यां संप्रयुध्यस्व
यदि मे द्वंद्वमाहवे। वेगं सहस्व दुर्बुद्धे ततस्त्वं राक्षसोत्तमः॥३१॥ हनूमंतं जिघांसंतं समुद्यतशरासनं। रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः॥३२॥ यः स वास
वनिर्जेता रावणस्यात्मसंभवः। स एष रथमास्थाय हनूमंतं जिघांसति॥३३॥ तमप्रतिमसंस्थानैः शरैः शत्रुनिवारणैः। जीवितांतकरैर्घोरैः सौमित्रे रावणिं ज
हि॥३४॥ इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन। ददर्श तं पर्वतसन्निकाशं रथस्थितं भीमबलं दुरासदं॥३५॥ इति श्रीमद्युद्धकांडे षडशी
तितमः सर्गः॥ ॥ एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः। धनुःपाणिनमादाय त्वरमाणो जगाम सः॥१॥ अविदूरं ततो गत्वा प्रविश्य तु महद्वनं। अद
र्शयत्तत्कर्म लक्ष्मणाय विभीषणः॥२॥ नीलजीमूतसंकाशं न्यग्रोधं भीमदर्शनं। तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत्॥३॥ इहोपहारं भूतानां बल
वान्रावणात्मजः। उपहृत्य ततः पश्चात्संग्राममभिवर्तते॥४॥

इति श्रीमहेश्वरतीर्थविरचितरामायणतत्वदीपिकायां युद्धकांडे षडशीतितमः सर्गः॥ ॥ अविदूरमिति। तत्कर्म होमकर्मस्थानं॥ ॥

तमिति। अप्रविष्टं न्यग्रोधं रावणात्मजं विध्वंसयन्यग्रोधमूलप्रदेशे दुःसाध्यो भवतीति भावः। तथेति। तत्र। न्यग्रोधमूले। तमुवाचेति। महातेजा लक्ष्मणः। इह त्वमिति। इह त्वमस्मि
न्राक्षसकुले जातः संवृद्धः। अत्रैवोत्पन्नः। अत्रैव हर्द्धिप्राप्त इत्यर्थः। पुत्रस्य द्रुह्यसीति। प्रमाणानि। मर्यादा। नैतदिति। महदन्तरं। महद्वैषम्यं। स्वजनपरित्यागपरभृत्यत्वयोर्महद्वैष
म्यमस्तीत्यर्थः। शिथिलया। तुच्छया। परस्य नीचस्य मदुदकस्यैवम्प्रगुणा वलेतत्रास्तीत्याह। गुणवान्वेति। तैरेव वैषम्यं स्वपक्षे पतीतो रक्षोपस्थितः स्वपक्षमिति। अतः स्वपक्षा अ

अदृश्यः सर्वभूतानां ततो भवति राक्षसः। निहन्ति समरे शत्रून्बध्नाति च शरोत्तमैः ५ तमप्रविष्टं न्यग्रोधं बलिनं रावणात्मजं। विध्वंसय शरैस्तीक्ष्णैः सरथं साश्वसा
रथिं ६ तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रवत्सलः। बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः ७ स रथेनाग्निवर्णेन बलवान्रावणात्मजः। इन्द्रजित्कवची खड्गी सध्व
जः प्रत्यदृश्यत ८ तमुवाच महातेजाः पौलस्त्यमपराजितं। समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ९ एवमुक्तो महातेजा मनस्वी रावणात्मजः। अब्रवीत्परुषं वाक्यं तत्र
दृष्ट्वा विभीषणं १० इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम। कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस ११ न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते। प्रमाणं न च सौदर्यं न
धर्मो धर्मदूषण १२ शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः। यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः १३ नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरं। क्व च स्वजनसं
वासः क्व च नीचपराश्रयः १४ गुणवान्वा परजनः स्वजनो निर्गुणोपि वा। निर्गुणः स्वजनः श्रेयान्यः परः पर एव सः १५ यः स्वपक्षं परित्यज्य परपक्षं निषेवते। स स्वप
क्षे क्षयं प्राप्ते पश्चात्तैरेव हन्यते १६ तस्माद्भ्रातृप्र दुर्बुद्धे राक्षसानां कुलाधम। त्वां धृत्वा बन्धुरूपेण रामो बुद्धिमतां वरः १७ ज्ञात्वोपायं त्वया पूर्वं जेतुमस्मान्सराघवः। जि
तास्मान्नु विशङ्केऽहं स भ्राता त्वां वधिष्यति॥ १८ शत्रुस्त्वमसि राक्षस्य रावणस्यानुजो भ्रियत। निरनुक्रोशता चेयं यादृशी ते निशाचर १९ स्वजनेन त्वया शक्यं प
रुषं रावणानुज। इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः २० अजानन्निव मच्छीलं किं राक्षस विगर्हसे॥ राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात् २१

परमेव श्रेयस्करमिति भावः। निरनुक्रोशतेति। इयं होमविघातपूर्वकं लक्ष्मणस्य न्यग्रोधप्रवेशकरणरूपा निरनुक्रोशता निर्दयता यादृशी यथा घोरा ईदृशं पर
षं निर्दयत्वं च स्वजनेन बंधुभूतेन त्वयैव कर्तुं शक्यं नान्येनेत्यर्थः। यद्वास्य स्वजने विषये त्वया न शक्यं न कर्तव्यं। अनुचितं कृतमिति भावः। अजानन्निवेति। गौरवात्। पि
तृव्यत्वात्। यद्वा। श्रेष्ठ इति। गौरवाद्धेतोः। यत्पारुष्यं तत्त्यजेत्यर्थः॥ ॥ ॥ ॥ ॥

यु॰ ९०

कुलइति। नराणां सत्त्वनाशनो। यः प्रथमः मुख्यः गुणः सात्विकं मन्मे अराक्षसं। अक्रूरं शीलं मम गुणाइत्यर्थः ॥ नरमइति। दारुणो नकर्मणा नरमे। अधर्मेणाव
नरमे अन्यथा विषमशीलेन रावणाशीलाद्धिस्याथीलेन आत्राभयाकथं। धातारावणो निरस्यते। हिंसेति। हिंसापरस्वहरणं हिंसा च परस्वहरणं च हिंसा दिह
पदुराचारं ॥ इंद्रजितुक्तदोषपरिजिहीर्षया परित्यागे हेतुत्वेन रावणदोषानाह ॥ परस्वानामित्यादिना। सुहृदामतिशंका। सुहृत्सु विश्वासस्त्यागो दोषत्रयाय

कुलेयद्यप्यहंजातो रक्षसां क्रूरकर्मणां। गुणो यः प्रथमो नृणां तन्मे शीलमराक्षसं २२ नरमे दारुणेनाहं नचाधर्मेण वैरमे। भ्रात्रा विषमशीलेन
कथंभ्राता निरस्यते २३ धर्मात्प्रच्युतशीलं हि पुरुषं पापनिश्चयं। त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा २४ परस्वहरणे युक्तं परदाराभिमर्शि
नं। त्याज्यमाहुर्दुराचारं वेश्म प्रज्वलितं यथा २५ परस्वानां च हरणं परदाराभिमर्शनं। सुहृदामतिशंका च त्रयो दोषाः क्षयावहाः २६ महर्षीणां वधो
घोरः सर्वदेवैश्च विग्रहः। अभिमानश्च रोषश्च वैरत्वं प्रतिकूलता २७ एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः। गुणान्प्रच्छादयामासुः पर्वतानिव तो
यदाः २८ दोषैरेतैः परित्यक्तो मया भ्राता पिता तव। नेयमस्ति पुरी लंका न च त्वं न च ते पिता २९ अतिमानी च बालश्च दुर्विनीतश्च राक्षस ॥ बद्ध
स्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि ३० अद्य ते व्यसनं प्राप्तं किं मां त्वं वनवस्ससि ॥ प्रवेष्टुं न त्वया शक्यो न्यग्रोधो राक्षसाधम ३१ धर्षयित्वा
च काकुत्स्थौ न शक्यं जीवितुं त्वया ॥ युध्यस्व नरदेवेन लक्ष्मणेन रणे सह ३२ हतस्त्वं देवताकार्यं करिष्यसि यमक्षये ३३ निदर्शय स्वात्मबलं
समुद्यतं कुरुष्व सर्वायुधसायकव्ययं। न लक्ष्मणस्यैत्य हि बाणगोचरं त्वमद्य जीवन्सबलो गमिष्यसि ३४ इत्यार्षे रामायणे वाल्मीकीयेयु
द्धकांडे सप्ताशीतितमः सर्गः ॥ ॥

यपित्रा सत्वं तत्र्यभिजनविद्यादिगुणवत्तया किमिति नयात्यत्वमित्यत आह ॥ महर्षीणामिति ॥ अभिमानो गर्वः। वैरत्वं। बद्धवैरत्वं। प्रतिकू राम
लता परश्रेयो द्वेषित्वं। अभिजनविद्यादिगुणवत्वेपि परस्त्रीहरणादिदोषदूषितयाविषसंपृक्तान्नवत्। तस्य न ग्राह्यत्वमिति भावः। युध्यस्वे ९०
ति। देवताकार्यं करिष्यसि यमदूतरूपं देवतादिष्टकार्यं करिष्यसीत्यर्थः। यमक्षयो यमनिलयो यमहूतकिंकरो भविष्यसीति यावत् इति

...कीयेषु इकांडे सप्ताशीतितमः सर्गः ॥

विभीषणराघवस्यास्मिन्नोक्तत्वयमेकं वाक्यं। परुषं वाक्यमित्येतद्रसमाप्तमिति ज्ञेयं। कालाख्याः। नीलाख्याः। रथे व्यवस्थितः सन्महाप्रमाणं धनुरुद्यम्य शरानमुमोचपत्र
मुत्सपात। अस्मुज्जगाम। अब्रवीदिति संबंधः। तमिति श्लोकत्रयं सतेजो भूषितं। उवाचैनमित्यादिना। पूर्वोक्तमब्रवीत्परुषं वाक्यमित्येतदेव विवृणोति। अद्येति मु
क्तवर्षं। मेघोत्सृष्टवर्षं। क्षिपत इति। मे युधि ममाग्रतः उक्तिसंबंधः। रात्रीति। शायितो युद्धमिति शेषः। स्मृतिरिति। यन्मा योद्धुं व्यवस्थितः। अतस्ते स्मृतिर्नोस्ति वा। यम
सादनं। यमलोकप्रापणं। अर्केप्रकाशे सन्निहिते वा इति मन्य इति संबंधः। रात्रियुद्ध इत्यादिश्लोकद्वयस्य वास्तवार्थस्तु। रात्रियुद्धे मया शरैः विसंज्ञो भूमौ शायितो। अ

विभीषणराघवः श्रुत्वा रावणिः क्रोधमूर्छितः। अब्रवीत्परुषं वाक्यं क्रोधेनाभ्युत्पपात च १ उद्यतायुधनिस्त्रिंशो रथे सुसमलंकृते। कालाश्वयुक्ते महति स्थि
तः कालान्तकोपमः २ महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढं। धनुर्भीमं परामृश्य शरांश्चामित्रकर्शनान् ३ तं ददर्श महेष्वासो रथस्थः समलंकृतः। अनेकृतम
मित्रघ्नोऽराक्षमात्मजैः बली ४ हनूमत्पृष्ठमासीनमुदयस्थरविप्रभं। उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणं ५ तांश्च वानरशार्दूलान्पश्यध्वं मे पराक्रमं। अ
द्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदं ६ मुक्तवर्षमिवाकाशे वारयिष्यथ संयुगे। अद्य वो मामका बाणा महाकार्मुकनिःसृताः ७ विधमिष्यन्ति गात्राणि तूलरा
शिमिवानलः। तीक्ष्णसायकनिर्भिन्नान्शूलशक्त्यृष्टितोमरैः ८ अद्य वो गमयिष्यामि सर्वानेव यमक्षयं। क्षिपतः शरवर्षाणि क्षिप्रहस्तस्य मे युधि ९ जीमूतस्ये
व नदतः कः स्थास्यति ममाग्रतः। रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः १० शायितौ स्थो मया भूमौ विसंज्ञौ सपुरःसरौ। स्मृतिर्न तेऽस्ति वां मन्ये व्यक्तं वा यम
सादनं ११ आशीविषसमं क्रुद्धं यन्मा योद्धुमुपस्थितः। तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं राघवस्तदा १२ अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत्। उक्तश्च दुर्ग
मः पारः कार्याणां राक्षस त्वया १३ कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान्। स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् १४ वचो व्याहृत्य जानीषे कृतार्थो

यापि तेत्वयमसादनं वा। यमलोकप्रापणं वा अतएव स्मृतिर्वां भयरूपे विशेषः। भयरूपा स्मृतिश्च नास्तीति व्यक्तं मन्ये। कुतः। आशीविषमिव क्रुद्धं मां योद्धुमुप
स्थित इति संबंधः। उक्तश्चेति। कार्याणां शत्रुविजयरूपकर्तव्यानां। दुर्गमः। पारः। दुष्प्रापोन्तः। त्वया उक्तः। अत उक्त एव उक्तिमात्रेण किं मायातमिति भावः। य
स्तु कार्याणां पारं कर्मणा आचरणेन वा यो गच्छति प्राप्नोति। स बुद्धिमान्स एव समर्थ इत्यर्थः। स त्वमिति दुर्मते हीनार्थः। शत्रुविजयरूपप्रयोजनहीनः। स त्वं के
नचित्केनापि दुरवापस्य अर्थस्य विजयप्रयोजनस्य संबंधि वचो व्याहृत्य कृतार्थोस्मि। कृतकृत्योस्मीति जानीषे इति योजना॥ ॥

टि० रा० यु०

यु० मलक्ष्मणं पराक्रमं सम्यगनुभूयापि किमर्थमेवमुक्तवानित्यत्राह। अंतर्धानगतेनेति। विना पंक्तौ नेन पराक्रमिंद्रशक्यमित्यत्राह। यथेति। यथा यत्नेनः पूर्वं कृतं तत्तेजः।
१११ पत्रिणः शितधारा इमा इत्यादिश्लोकवत्त्वपत्यस्य प्रतीतिकार्थस्पष्टः। वास्तवार्थस्तु पत्रिणा इति। हे सौमित्रे मत्कार्मुकच्युताः आशराः अशरणः अप्रयोजकत्वशरादुसर्वः। तेन त
वपत्रिणः शितधाराजीवितांतगाः कृत जीवितमादास्येत इति संबंधः। अद्येति। हे लक्ष्मण त्वां तामुद्दिश्य मया। लक्ष्मणं केश्चर्येणांस महगतास्ते भामिति शेषः। गोम्ना

अंतर्धानगतेनाजौ यस्त्वयाचरितः पुरा। तस्कराचरितो मार्गो नैष वीरनिषेवितः १५ यथा बाणपथं प्राप्य स्थितोऽस्मि तव राक्षस। दर्शयस्वाद्य यत्तेजो वाचा
त्वं किं विकत्थसे १६ एवमुक्तो धनुर्भीमं परामृश्य महाबलः। ससर्ज निशितान् बाणानिंद्रजित्समितिंजयः १७ तेन सृष्टा महावेगाः शराः सर्पविषोपमाः। सं
प्राप्य लक्ष्मणं पेतुः श्वसंत इव पन्नगाः १८ शरैरतिमहावेगैर्वेगवान् रावणात्मजः। सौमित्रिमिंद्रजिद्युद्धे विव्याध शुभलक्षणं १९ स शरैरतिविद्धांगो रुधिरे
ण समुक्षितः। शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः २० इंद्रजित्त्वात्मनः कर्म प्रसमीक्ष्याधिगम्य च २१ विनद्य सुमहानादमिदं वचनमब्रवीत् २१ पत्रिणः
शितधारास्ते शरा मत्कार्मुकच्युताः। आदास्यंतेऽद्य सौमित्रे जीवितं जीवितांतगाः २२ अद्य गोमायुसंघाश्च लक्ष्मण गृध्राश्च निपतंतु त्वां गतासुं निहतं मया २३
क्षत्रबंधुः सदानार्यो रामः परमदुर्मतिः। भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति निहतं मया २४ विध्वस्तकवचं भूमौ व्यप
विद्धशरासनं। हृतोत्तमांगं सौमित्रे त्वामद्य निहतं मया २५ इति ब्रुवाणं सौमित्रिं परुषं रावणात्मजं। हेतुमद्वाक्यमर्थज्ञो लक्ष्मणः प्रत्युवाच ह २६ वाग्बलं त्यज
दुर्बुद्धे क्रूरकर्मन्हि राक्षस। अहं कस्मात्तु वदसे तत्संपादय सुकर्मणा २७ अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस। कुरु तत्कर्म येनाहं श्रद्दधेयं तव कत्थनं २८
अनुक्त्वा परुषं वाक्यं किंचिदप्यनवक्षिपन्। अविकत्थन् विधिष्यामि त्वां पश्य पुरुषादक २९ इत्युक्त्वा पंच नाराचानाराचानाकर्णापूरितान्। निजघा
न महावेगान् लक्ष्मणो राक्षसोरसि। सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः। नैर्ऋतोरस्यभासंत सवितू रश्मयो यथा ३२ स शरैराहतस्तेन सरोषो रावणा
त्मजः। सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणं ३२
धारयः निपतंतीति संबंधः। क्षत्रबंधुमिति। सदानार्यं भिन्नपत्र। सदान। आर्यमिति छेदः। हे सदान। दानसहितादानशीलेत्यर्थः। क्षत्रबंधुं। क्षत्रस्य रामस्य बंधुं। कु राम
तः। भ्रातरं। अत एव आर्यं। मे यान्त्रहतं। तं परमदुर्मतिः। परमदुष्टेष्वपि मतिः। अतुग्रहरूपा यस्य सः। रामः अघद्रक्ष्यतीति संबंधः। विशस्तेति। हे सौमित्रे त्वां विनेतिशे १११
षः। विध्वस्तकवचं हृतोत्तमांगं मया निहतं सेत्स्यति शेषः। रामो द्रक्ष्यतीति सर्वेणासंबंधः। निजघानेति। सुपत्रवाजिताः। सुपत्रैः संजातपक्षाः॥ ॥ ॥

॰नि।सर्वसैन्यमितेद्विपः।सेन्यमितसैर्वेश्विफ किंतन्मपरमीति।प्रथमेतत्फरेशतस्मिन्सु देवासुरमरवदुरतिंपतनतस्य राक्रमं विवेधनपराक्रमेन सम्मरसि किंतमेवर

मइतिविमर्दः।मंस्युर्वः ३माविति।विक्रांतौ।हत्नपराक्रमौ।युयुधानइति।बलवत्राविवित्यत्राबलनशरः पुरंदरवावी॥ ॥इतिश्रीमहेश्वरतीर्थीये युद्धकांडे
अष्टाशीतितमः सर्गः॥ ॥निमित्तानीति।अशिवरूपाणिसुलक्षेत्रणापादीनि निमित्तान्यनुपश्यामितेरथधेन इति जोमेनेन कारणेन चान्यरक्षेत्यर्थः।शत्काशनी

समवक्षुमहाभीमोनरराक्षससिंहयोः।विमर्दस्तुमुलोयुद्धेपरस्परजयैषिणोः।३३।उभौहिबलसंपन्नौउभौविक्रमशालिनौ।उभावपिसुविक्रांतौसर्वश
स्त्रास्त्रकोविदौ।३४।उभौपरमदुर्जयावतुल्यबलतेजसौ।युयुधातेतदावीरौग्रहाविवनभोगतौ।३५।बलवृत्राविवहिलौसुयुधितोऽधर्षणौ।युयुधा
तेमहात्मानौतदाकेसरिणाविव।३६।बहूनवसृजंतौहिमार्गणौघानवस्थितौ।नरराक्षसमुख्यौतौ प्रहृष्टावभ्ययुध्यतां।३७।सुसंप्रहृष्टौनरराक्षसोत्तमौ
जयैषिणौमार्गणचापधारिणौ।परस्परंतौप्रववर्षतुर्भृशंशरौघवर्षेणवलाहकाविव।३८।अथप्रवृद्धौयुधियुद्धकोविदौशरासिचंडौशितशस्त्रधारिणौ।
अभीक्ष्णमाविव्यधतुर्महाबलौमहाहवेशंबरवासवोपमौ।३९।इत्यार्षेरामायणेयुद्धकांडेअष्टाशीतितमःसर्गः॥ ॥ततःशरंदाशरथिःसंधायामि
त्रकर्शनः।ससर्जराक्षसेंद्रायक्रुद्धःसर्पइवश्वसन्।तस्यज्यातलनिर्घोषंसश्रुत्वाराक्षसाधिपः।विवर्णवदनोभूत्वालक्ष्मणंसमुदैक्षत।तंविषण्ण
मुखंदृष्ट्वाराक्षसंरावणात्मजं।सौमित्रिंमित्रपक्षस्तुवाचविभीषणः।२।अनिमित्तान्यनुपश्यामियान्यस्मिन्रावणात्मजे।त्वरतेनमहाबाहोभग्नएष
नसंशयः।४।ततःसंधायसौमित्रिःशरानाशीविषोपमान्।मुमोचनिशितांस्तस्मैसर्पानिवविषोल्बणान्।५।शक्राशनिसमस्पर्शैर्लक्ष्मणे
नाहतःशरैः।मुहूर्तमभवन्मूढःसर्वसंक्षुभितेन्द्रियः।६।उपलभ्यमुहूर्तेनसंज्ञांप्रत्यागतेन्द्रियः।ददर्शावस्थितंवीरंवीरोदशरथात्मजं।७।सोभिचक्राममौ
मित्रिंरोषात्संरक्तलोचनः।अब्रवीच्चैनमासाद्यपुनःसपरुषंवचः।८।किंनस्मरसितत्कर्मप्रथमेमत्पराक्रमं।निबद्धस्त्वंसहभ्रात्रायदायुधिविचेष्टसे।९।युवांख
लुमहायुद्धेशक्राशनिसमैःशरैः।शायितौप्रथमंभूमौविसंज्ञौसपुरःसरौ।१०।स्मृतिर्वानास्तितेमन्येव्यक्तंवायमसादनं।गंतुमिच्छसियस्मात्त्वंमांधर्षयितु
मिच्छसि।११।यदितेप्रथमेयुद्धेनदृष्टोमत्पराक्रमः।अद्यत्वांदर्शयिष्यामितिष्ठेदानींव्यवस्थितः।१२।इत्युक्त्वासप्तभिर्बाणैरभिविव्याधलक्ष्मणं।१२
शभिस्तुहनूमंतंतीक्ष्णधारैःशरोत्तमैः।१३।ततःशरशतेनैवसुप्रयुक्तेनवीर्यवान्।क्रोधाद्द्विगुणसंरब्धोनिर्बिभेदविभीषणं।१४॥
पराक्रमंविशिनष्टि।शरैःयुवामिति।युवामित्यादिश्लोकद्वयंप्रथमयानीतिकार्यस्पष्टः।वालानताः।शरैःयुवांविसंज्ञौधर्मौशायितौ।अथापितेनवापनसारत्वंवापमवो

[illegible]

युद्ध॰ नहष्टेति। नैतत्किंचित्तदाब्रवीत्। एनं च किंचिता। अकिंचित्करमित्यब्रवीन्नर्षभः। त्वकिंचित्करत्वमेवाह। नैवमिति। विंश्य तवर्मेति। प्ररूढ इव सानुमान्। सानुमानि
११२ व प्ररूढो निखुलो बभूव। हतप्रतिहते निकृत्तप्रतिकृत्ते। निकृत्तान्योन्यं कृते प्रतिकृते अन्योन्यं यस्मिन्कर्मणि तत्तथा। स वध्यवेति। सप्रवर्णितः। घोरो बभूव पनव
तद्दृष्ट्वेति तैः कर्म कृत्वा रामानुजस्तदा। अचिंतयित्वा प्रहसन्नैनं किंचिन राघवी तां।१५। मुमोच शरान्घोरान्संगृह्य नरपुंगवः। अप्रीततरस्तत्कु-
द्धो रावणिं लक्ष्मणो वचः।१६। नैवं रणगताः शूराः प्रहरंति निशाचर। लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव।१७। नैवं शूराः प्रयुध्यंते समरे युद्धकांक्षि-
णः। इत्येवं तं ब्रुवन्धन्वी शरैरभिववर्ष ह।१८। तस्य बाणैः सुविध्वस्तं कवचं कांचनं महत्। व्यशीर्यत रथोपस्थे ताराजालमिवांबरात्।१९। विधूतवर्मा नारा-
चैर्बभूव स कृतव्रणः। इंद्रजित्समरे वीरः प्ररूढ इव सानुमान्।२०। ततः शरसहस्राणि मं क्रुद्धो रावणात्मजः। विभेद समरे वीरो लक्ष्मणं भीमविक्रमः।२१। व्य-
शीर्यत महद्दिव्यं कवचं लक्ष्मणस्य तु। कृतप्रतिकृतान्योन्यं बभूवतुररिंदमौ।२२। अभीक्ष्णं निःश्वसंतौ हि युध्येतां तुमुलं युधि। शरसंकृत्तसर्वांगौ सर्वतो
रुधिरोक्षितौ।२३। सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः। ततक्षतुर्महात्मानौ रणकर्मविशारदौ।२४। बभूवतुस्तथा अजये यत्नौ भीमपराक्रमौ तौ
शरौघैस्तथाकीर्णौ निकृत्ताविव ध्वजौ। स्रवंतौ रुधिरं चोष्णं जलं प्रस्रवणाविव। शरवर्षं ततो घोरं मुंचतोर्भीमनिःस्वनौ।२६। सासारयोरिवाकाशे नीलयोः
कालमेघयोः। तयोः सुमहान्कालो व्यतीयाद्युध्यमानयोः।२७। एकादशापहाराः समस्ताग्निनवतोसुद्धवे सुयुत्ककर्मवषुपजग्मतुः। अस्त्राण्यस्त्रविदांश्रे-
ष्ठौ दर्शयंतौ पुनः पुनः।२८। शरा उच्चावचाकारा अंतरिक्षे बबंधुः। व्यपेतदोषमस्यंतौ लघुचित्रं च सुष्ठु च।२९। उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ। तयोः पृ-
थक्पृथग्भीमः शुश्रुवे तुमुलस्वनः।३०। प्रकंपयन्नतो घोरो निर्घात इव दारुणः। स तयोर्भ्राजते शब्दस्तदा समरमत्तयोः।३१। सुघोरयोर्निष्टनतोर्गग-
ने मेघयोरिव। सुवर्णपुंखैर्नाराचैर्बलवंतौ कृतव्रणौ। प्रसुस्रुवाते रुधिरं कीर्तिवंतौ जये धृतौ। ते गात्रयोर्निपतिताः रुक्मपुंखाः शरा युधि।३३। असृग्दि-
ग्धा विनिष्पेतुर्विविशुर्धरणीतलं। अन्यैः सुनिशितैः शस्त्रैराकाशे संजघट्टिरे। बभंज चिच्छिदुश्चान्ये तयोर्बाणाः सहस्रशः। स बभूव रणे घोरस्तयो-
र्बाणमयश्चयः।३५। अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः। तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः।३६। सपुष्पाविव निष्पत्रौ वने किंशुकशा- राम
ल्मली। चक्रतुस्तुमुलं घोरं संनिपातं मुहुर्मुहुः।३७। इंद्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ। लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणं।।३८।। ११२
रतो। तयोर्बाणमयश्चयः समूहः। सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयः चय इवासीत्। सपुष्पाविति। संनिपातं युद्धं।। ।।

बाणजालैरिति। प्रवृद्धौ। दृष्टवन्तौ॥ अथ समरपरिश्रममिति। समरपरिश्रमं दृष्ट्वा निनमिति शेषः॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे एकोननवतितमः सर्गः॥ ॥
युध्यमानाविति। पारिश्लोकद्वयमेकं वाक्यं। प्रभिन्नौ मत्तौ। परस्परगतौ। मिपरस्परं युद्धार्थं संगतौ। न स्मर्तौ इजितौ। पथमं द्रष्टुकामः। स विभीषणः तौ दृष्ट्वा संग्राम

अन्योन्यं तावभिघ्नंतौ न श्रमं प्रत्यपद्यतां। बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ। ३९ शुशुभाते महावीरौ विरूढाविव पर्वतौ। तयो रुधिरसिक्तानि संवृता
नि शरैर्भृशं ४० बभ्राजुः सर्वगात्राणि ज्वलंत इव पावकाः। तयोरथ महान्कालो व्यतियाद्युध्यमानयोः ४१ न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः अथ समरप
रिश्रमं निहंतुं समरमुखेष्वजितस्य लक्ष्मणस्य। प्रियहितमुपपादयन्महात्मा समरमुपेत्य विभीषणोवतस्थे ४२ इत्यार्षे रामायणे युद्धकांडे एकोननवतितमः
सर्गः॥ ॥ युध्यमानौ ततो दृष्ट्वा प्रसक्तौ नरराक्षसौ। प्रभिन्नाविव मातंगौ परस्परजयैषिणौ १ तौ द्रष्टुकामः संग्रामे परस्परगतौ बली। शूरः स रावणभ्राता तस्थौ
संग्राममूर्द्धनि। २ ततो विस्फारयामास महद्धनुरवस्थितः। उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ३ ते शराः शिखिसंकाशा निपतंतः समाहिताः। राक्ष
सान्दारयामासुर्वज्रा इव महागिरीन् ४ विभीषणस्यानुचरास्तेपि शूलासिपट्टिशैः। चिच्छिदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ५ राक्षसैस्तैः परिवृतः स
तदा तु विभीषणः। बभौ मध्ये प्रहृष्टानां कलभानामिव द्विपः ६ ततः संचोदयानो वै हरीन्रक्षोवधप्रियान्। उवाच वचनं काले कालज्ञो रक्षसां वरः ७
एकोयं राक्षसेंद्रस्य परायणमवस्थितः। एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ८ अस्मिन्विनिहते पापे राक्षसे रणमूर्द्धनि। रावणं वर्जयित्वा तु शेषमस्य ब
लं हतं। ९ प्रहस्तो निहतो वीरो निकुंभश्च महाबलः। कुंभकर्णश्च कुंभश्च धूम्राक्षश्च महाबलः। १० जंबुमाली महामाली तीक्ष्णवेगोशनिप्रभः। सुप्तघ्नो
यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः। संह्रादी विकटोरिघ्नः तपनो मंद एव च। प्रघासः प्रघसश्चैव प्रजंघो जंघ एव च १२ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान्
। विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः १३ अकंपनः सुपार्श्वश्च चक्रमाली च राक्षसः। कंपनः सत्ववंतौ देवांतकनरांतकौ १४ एतान्निहत्यातिबलान्ब
हून्राक्षससत्तमान्। बाहुभ्यां सागरं तीर्त्वा लंघ्यतां गोष्पदं लघु १५ एतावदेव शेषं वो जेतव्यमिति वानराः। हताः सर्वे समागम्य राक्षसा बलदर्पिताः १६ अ
युक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम। घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजं ६ हंतुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यते। तमेवैष महाबाहुर्लक्ष्मणः
मूर्द्धनि योद्धुं तस्याविन्यर्थेन ते शरादन्ति। वज्राणि। अशनयः। एतावदेवेति। एतावदेव दंष्ट्रजिन्मात्रमेव शेषोत्र युक्तमिति। जनितुः पितृव्यस्य। बाष्पं शमयिष्यति १७
कन्नं निरुध्यामि। निरुणद्धि॥ ॥

युद्ध॰ ११३

हनूमानपीति। अत्र हनूमतो युद्धकथना। विश्रमार्थं स्वस्मिन्स्थितं लक्ष्मणं चरोपितवानित्यवगम्यते। तौ प्रयुद्धौ विनिष्पतु... योद्धुमुपक्रान्तौ। अभाषतामिति। उक्ता
मेवर्षा लौवंङा स्थिता विवक्षितौ महाबलौ मेघे यथा मेघौ रविशारजालैः अभीतौ अंतर्दधतुः। अदृश्यौ बभूवतुः। नैव्यादानमिति। धनुषो वा परिग्रहः। सव्याप स
मवेन कासुकयहतां वियहां चवीक्षावस्थानविशेषः। मुष्टिप्रतिसंधानं प्याकासुकयोमुष्टिवंधनं सव्यावतिपादनं सप्रभेदं इतिपावनं। चापवेगेति। हृष्यं नर

वानराघंतसंभूय प्रत्यानस्य समीपगाः इतितेनातिशयमात्रसेनाभियोदिताः १९ वानरेंद्रा नत्ज न्वहा गिरीणां मूलानिव विमसुः ततस्तेकपिशार्दूलाः
स्वेलंतश्च मुरूमुरूः २० सुग्रीवविधानार्ता मेघा यस्येव वृंहिताः। जांबवानपि तैः सर्वैः स्वयूथैरभिसंहतः २१ अश्मभिस्ताडयामास नखैर्दंतैश्च वानरम
न्। निघ्नंतमाक्षिपतिरां स्तमास्ते महाबलाः २२ पादपैश्च भेयलक्षातमनेकविधायुधाशिरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः २३ जांबवंतमथधेनघ्नु
र्निघ्नंतं राक्षसीं चमूं। स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसां २४ देवासुराणां क्रुद्धानां यथा भीमो महास्वनः। हनूमानपि संक्रुद्धः सानुमुत्याय पर्वतात्
२५ स लक्ष्मणात्स्वयं पृष्ठादवरोप्य महामनाः। रक्षसां कदनं चक्रे शतशोऽथ सहस्रशः २६ स दत्त्वा तुमुलं युद्धं पितृव्यस्येंद्रजिद्बली। लक्ष्मणं परवीरघ्नं
नरेवाभ्यधावत २७ तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ। शरौघानभिवर्षंतौ जघ्नतुस्तौ परस्परं २८ अभीक्ष्णमंतर्दधतुः शरजालैर्महाबलौ। चंद्रा
दित्याविवोष्णांते यथा मेघस्थगितौ २९ न त्वादानं न संधानं धनुषो वा परिग्रहः। न विप्रमोक्षो बाणानां न विकर्षो न संग्रहः ३० न मुष्टिप्रतिसंधानं
न लक्ष्यप्रतिपादनं। अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ३१ चापवेगप्रमुक्तैश्च बाणजालैः समंततः। अंतरिक्षेऽपि संछन्ने न रूपाणि चकाशिरे। श
न लक्ष्मणो रावणिं प्राप्य रावणिर्वापि लक्ष्मणं। अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे ३२ ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः। निरंत
रमिवाकाशं बभूव तमसावृतं ३३ तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः। दिशश्च प्रदिशश्चैव बभूवुः शरसंकुलाः ३४ तमसा पिहितं सर्वमासीद्भीमतरं
महत्। अस्तं गते सहस्रांशौ संवृतं तमसेव हि ३५ रुधिरौघा महानद्यः प्रावर्त्तंत सहस्रशः। क्रव्यादा दारुणा वाग्भिः क्षिपंतो भीमनिस्वनाः ३६

निरूपाणि। यस्तन्निवाणव्यतिरेकेण न किं विलक्षणानी अदृश्यतेति भावः। लक्ष्मणो रावणिं प्राप्य रावणिर्वापि लक्ष्मणं प्राप्य युध्यतामिति शेषः। राम ११३
ताभ्यां तथा युद्धं कुर्वद्भ्यां अन्योन्यविग्रहे। अन्योन्याभिभवेच्छया अव्यवस्था भवति। अयं न तु अन्यो न्यपराजय एवं निगृह्णाति अयं वा एनं निगृह्णातीति निश्चयो नाभू
वदित्यर्थः॥

ततः इति। मेघ्रत्तार्णय नमुक्तेन संभ्रान्तेनाक्ष्मुक्तेन॥ ॥ इतिश्रीमहेश्वरतीर्थीये युद्धकांडे नवनितमः सर्गः॥ ॥ तौ धावितौ नाबिति॥ तपेत इत्यतनाश्मिनि क्रांतौ च्यविसु

ततरानीववैमा सुग्रीव तत्राल्पपावकः। यस्यस्तक्तलोके प्यइनिनन तस्सुम्लेमहर्षयः॥२॥ संपेते श्वात्र मेघाभा गंधर्वाः सहचारणैः। अथरा हसमिंह
म्पह्रस्मा कैनक भूषणाम्॥३॥ शरैश्च तुभिः सौमित्रिर्विव्याध बलरोहयान्। ततोपरेणा भल्लेन पीतेन निशितेन च॥३॥ संप्रणीन यनुक्तेन स्तुपवेणाखव
र्जसा। महेंद्राशनि कल्पेन तस्य विच्छिन्न ४४। मनेन वाणाशनिनातल शायान्साद्रिनालाव वाणा ययवः। श्रीमान शिरस्कायादपाहरत्॥४१॥ सपं ते
गिप हातेमाह तेमंदोदरी सुतः। स्वयमाराध्य मकरीत्तुन स्वधनु रसुराता॥४२॥ नदतं तमभ्रत्तत्र सारथ्येप रुपतां युधि ह येषु न्ययहत्तं विव्याध निशितैः
शरैः॥४३॥ धनुष्यथ पुनर्गृह्य पेषु सुमुवेश सा नर। छिद्रे षुनेषु वाणौघैः सौमित्रिः शीघ्रकृन्मयः॥४४॥ अर्ध्यामास वाणौघैर्वि वरं तम भीतवतां निहतसार
थि दृष्ट्वा समरे रावणात्मजः॥४५॥ प्रतहौ समरोह्रर्ष विषाः सर्वभूतहः। विषण्णवदनैदृष्ट्वा राक्षसमहर्षयास॥४६॥ ततः परम संहृष्टा लक्ष्मणं वाप्यपूजन
यनातनः प्रमाथी रमसः शरभो गंधमादनः ४७ अमृष्यमाणास्त्वरितास्त्वरितास्तु चत्वारः सुमहावेगा हरीश्वराः। नेवास्य हयमुख्येषु तूर्णं सुम्पत्य वानराः ४८ चतु
र्णां तु महावीर्या निपेतुर्भीमविक्रमाः। तेषामधिष्ठितानां ते वानरैः पर्वतोपमैः ४९ मुखेभ्यो रुधिरं व्यक्तं हयानां समपद्यत। ते हया मथिता भग्ना व्यस
वो धरणीं गताः ५० ते निहत्य हयांस्तस्य प्रमथ्य च महारथं। पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः ५१ स हताश्वादवप्लुत्य रथान्मथितसारथेः। शर
वर्षेण सौमित्रिमभ्यधावत रावणिः ५२ ततो महेंद्रप्रतिमः स लक्ष्मणः पदातिनं तं निशितैः पोत्तमैः। सृजन्तमाजौ निशितान्शरोत्तमान्भृशं तदा वाणगणै
र्व्यदारयत् ५३ इत्यार्षे रामायणे युद्धकांडे नवनितमः सर्गः॥ ॥ छा दशापहारः समाप्तः॥ स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः। इंद्रजित्परमक्रु
द्धः संप्रजज्वाल तेजसा १ तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशं। विजयेनाभिनिष्क्रांतौ वने गजवृषाविव २ निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः
भर्तारं न जहुर्युद्धे संपतन्तस्ततस्ततः ३ ततस्तान्राक्षसान्सर्वान्हर्षयन्रावणात्मजः। स्तुवानो हर्षमाणश्च इदं वचनमब्रवीत् ४ तमसा बहुलेनेमाः संसक्ताः
सर्वतो दिशः। नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ५ धृष्टं भवन्तो युध्यन्तु हरीणां मोहनाय वै। अहं तु रथमास्थाय आगमिष्यामि संयुगं ६
वौ धावतो निवर्हयेत्। मारयेत ततः इति। स्तुवानः। स्तुवतः स्तुत्यः इति। मोहनाय गमनापरिज्ञानाय॥ ॥

रा. यु. तथेति प्रविवेशाथ देशेषु पक्रांतेन सुग्रीवः समनगरप्रवेशविज्ञानार्थं मया सवानरा यथा युद्धं न कुर्युः तथा भवंतः कुर्वंत्विति पर्थः सोन्यत्कार्यकमिति त्वरि
११४ तया भवंतः कुर्वंतु यथेमे कानननौकसः। न युद्ध्येयुर्दुरात्मानः प्रविष्टे नगरं मयि। ७ इत्युक्त्वा रावणो गत्वा तेषां विश्वायनो कसः। प्रविवेश पुरीं लंकां रक्षो
हेतोरमित्रहा ८ सर्वे भूत्वा प्रविश्याथ विरहे मम भूपितां प्रापामि शरसंपूर्णां युक्तं परमवाजिभिः ९ अधिष्ठितं हयपतेनूलहतेनामोपरे शिना आरुरोह म
हातेजा रावणिः समितिंजयः १० स राक्षसगणो मुख्यैर्वृतो मंदोदरीसुतः। निर्ययौ नगरात्तूर्णं कृतांतबलचोदितः ११ सौमित्रिं निष्क्रम्य नगराद् इंद्रजित्परवीर
हा। अभ्यपालनवने रक्षैर्लक्ष्मणं सविभीषणं १२ ततो रथस्थमालोक्य सौमित्री रावणात्मजं। वानरास्ते महावीर्या राक्षसश्च विभीषणः १३ विस्मयं परमं ज
ग्मुर्लाघवात्तस्य धीमतः। रावणिश्चापि संक्रुद्धो रणे वानरयूथपान् १४ पातयामास बाणौघैः शतशोथ सहस्रशः। स संप्रीतिकृतधनू रावणिः समितिंज
यः १५ हरीनभ्यहनत्क्रुद्धः परं लाघवमास्थितः। ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः १६ सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः। ततः समरकोपे
न ज्वलितो रघुनंदनः १७ चिच्छेद कार्मुकं तस्य दर्शयन्पाणिलाघवं। सोन्यत्कार्मुकमादाय सज्जं चक्रे त्वरान्वितः १८ तदप्यस्य शितैर्बाणैर्लक्ष्मणो निरकृ
न्तत। अथैनं छिन्नधन्वानमाशीविषविषोपमैः १९ विव्याधोरसि सौमित्री रावणिं पंचभिः शरैः। तस्य कायं विनिर्भिद्य महाकार्मुकनिःसृताः। निपेतुर्धर
णीतलाः रक्ता इव महोरगाः। स भिन्नवर्मा रुधिरं वमन्वक्त्रेण रावणिः २१ जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरं। स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः
२२ ववर्ष शरवर्षाणि वर्षाणीव पुरंदरः। मुक्तमिंद्रजिता तत्तु शरवर्षमरिंदमः २३ अवारयदसंभ्रांतो लक्ष्मणः सुदुरासदं। निदर्शयामास तदा रावणिं रघु
नंदनः २४ असंभ्रांतो महातेजास्तदद्भुतमिवाभवत्। ततस्ते राक्षसाः सर्वे त्रिभिरेकैकमाहवे २५ अविध्यत्परमक्रुद्धः शीघ्रास्त्रं संप्रदर्शयन्। राक्षसेंद्र
सुतं चापि बाणौघैः समताडयत् २६ सोतिविद्धो बलवता शत्रुणा शत्रुघातिना। असक्तं प्रेषयामास लक्ष्मणाय बहून् शरान् २७ तानप्राप्ताञ्छितैर्बाणैश्चिच्छेद
रघुनंदनः। सारथेरस्य च रणे रथिनो रथसत्तमः २८ शिरो जहार धर्मात्मा भल्लेनानतपर्वणा। असूतास्ते हयास्तत्र रथमूहुरविक्लवाः २९ मंडलान्यभिधा राम
वंतस्तदद्भुतमिवाभवत्। अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः ३० प्रत्यविध्यद्धयांस्तस्य शरैर्वित्रासयन् रणे। अमृष्यमाणस्तत्कर्म रावणस्य सुतो बली ३१ ११४
वंशी प्रमेवा। संदर्शयामास आत्मपौरुषमिति शेषः। सोपि नितरां सक्तं। संततोस्त्रसृता रंतिः असूताः असारथयः। अविक्लवाः अनाकुलाः २९ ॥ ॥

अभेद्येति।। अभेद्यकवचमित्यनेन सर्वबंधनकवचस्य विशीर्णत्वात्कवचांतरं धृतवानित्यवगम्यते।२ गाग्रइति। समरश्लाघी समरं श्लाघतइति समरश्लाघी समर
प्रियः तस्यार्थः न मिति। युद्धे धनुर्विकृष्य शरान् इति तोवर नेविद्याधेनि संबंधः। लक्ष्मणेंद्रजिताविति। विशिखैर्विशिष्टैः शिखैर्निशितैः शितैरिति यावत्। तोपरस्पाः मिति।
१ विद्याधरं दशभिर्बाणैः सौमित्रिर्नमर्मभेदिभिः। ततस्य कवचं प्रतिमाः शराः सर्वविलीयमानाः विलयं तमसुरा गात्यकवचंकांचनप्रभं ३२ अभेद्यकवचं मत्वा पापवंराव
णात्मजः। ललाटे लक्ष्मणं बाणैः सुपुंखैस्त्रिभिरिंद्रजित् ३३ अविध्यत्परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन्। तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनंदनः ३४ रणाग्रेस
मरश्लाघी त्रिशृंग इव पर्वतः। स तथाप्यर्दितो बाणै राक्षसेन महामृधे ३५ तमाशु प्रतिविव्याध लक्ष्मणः पंचभिः शरैः। विकृष्येंद्रजितो युद्धे वदने शुभकुंडले
३६ लक्ष्मणेंद्रजितौ वीरौ महाबलशरासनौ। अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ ३७ ततः शोणितदिग्धांगौ लक्ष्मणेंद्रजितावुभौ। रणे तौ रेजतुर्वीरौ पु
ष्पिताविव किंशुकौ ३८ तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ। घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ३९ ततः समरकोपेन संयुतो रावणात्मजः। विभीषणं त्रिभि
र्बाणैर्विव्याध वदने शुभे ४० अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेंद्रं विभीषणम्। एकैकेनाथ विव्याध तान्सर्वान्हरियूथपान् ४१ तस्मै दृढतरं क्रुद्धो जघान गदया हयान्। विभी
षणो महातेजा रावणेः स दुरात्मनः ४२ महताश्चारथस्य प्रथानपथितः सारथेः। अथ शक्तिं महातेजाः पितृव्यायाप्य मुमोच ह ४३ तामापतंतीं संप्रेक्ष्य सुमित्रानंदव
र्द्धनः। चिच्छेद निशितैर्बाणैः शतधा सा पपात भुवि ४४ तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः। वज्रस्पर्शसमान्पंच ससर्जोरसि मार्गणान् ४५ ते तस्य कायं नि
र्भिद्य रुक्मपुंखा निमित्तगाः। बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः ४६ पितृव्यस्य ततः क्रुद्ध इंद्रजिच्छरमाददे। उत्तमं रक्षसां मध्ये यमदत्तं महाबलं ४७ तं
समीक्ष्य महातेजा महेषुं तेन संहितं। लक्ष्मणोप्याददे बाणमन्यं भीमपराक्रमः ४८ कुबेरेण स्वयं स्वप्ने यद्दत्तममितात्मना। दुर्जयं दुर्विषहं च सेंद्रैरपि
सुरासुरैः ४९ तयोस्तु धनुषी श्रेष्ठे बाहुभिः परिघोपमैः। विकृष्यमाणे बलवत्क्रौंचाविव चुकूजतुः। ताभ्यां तौ धनुषि श्रेष्ठे संहितौ सायकोत्तमौ। विकृष्यमा
णौ वीराभ्यां भृशं जज्वलतुः श्रिया ५० तौ भासयंतावाकाशं धनुर्भ्यां विशिखौ च्युतौ। मुखेन मुखमाहत्य सन्निपेततुरोजसा ५१ सन्निपातस्तयोरासीत् घोरो
रूपयोः सधूमविस्फुलिंगश्च तन्चामिदारुणोऽभवत् ५२ तौ महाग्रहसंकाशावन्योन्यं सन्निपत्य च। संग्रामे शतधा यातौ मेदिन्यां विप्रकीर्णतुः ५३ शरौ प्रतिहतौ दृ
ष्ट्वा तावुभौ रणमूर्द्धनि। व्रीडितौ जातरोषौ च लक्ष्मणेंद्रजितौ तदा ५४। ससंरब्धः सौमित्रिरस्त्रं वारुणमाददे। रौद्रमिंद्रजिदप्यस्त्रं विससर्ज युधि स्थितः ५५ ते
नपेहतमाग्नेयेनाभिप्रायोऽनेनाग्नेयेनेति। निमित्तगाः। निमित्तं लक्ष्यं गच्छंतीति निमित्तगाः वेध्यं लक्ष्यं शरव्यं च निमित्तं। नादहत्तं चाग्नेयं वारुणं पर्माहुतं।। ।।
शरं विद्युदिंरिति शासनात्। सरनिरस्तसाम ध्येअस्त्रं तस्मिन् संबंधः। तादिति। संनिपेततुः संघर्षप्राप्तौ।। ।।

ततः क्रुद्धस्त्रिलोकेशं क्षिप त्रिवसंहारत्रिवाहपत्रमिति। सुसंस्थितं सुसंस्थितांगं सुवर्णविकृतं सुवर्णालंकृतं। इत्युक्तेनादिमार्द्धश्लोकमेकं वाक्यं। लक्ष्मणः परवी
ततः क्रुद्धो महातेजा इंद्रजित्समितिंजयः ५६ आग्नेयं संदधे दीप्तं स लोकं संक्षिपन्निव ततो विनाशाय सौर्येणास्त्रेण वीरो लक्ष्मणः प्रत्यवारयत ५७ अस्त्रं निवारि
तं दृष्ट्वा रावणिः क्रोधमूर्छितः। आसुरं शत्रुनाशाय घोरमस्त्रमुपाददे। तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूटमुद्गराः। शूलानि च भुशुंडीश्च गदाखड्गपरश्वधाः ५९
तं दृष्ट्वा लक्ष्मणः संख्ये घोरमस्त्रं सुदारुणं। अवार्यं सर्वभूतानां सर्वशत्रुविदारणं ६० माहेश्वरेण द्युतिमान्तदस्त्रं प्रत्यवारयत्। तयोः सुतुमुलं युद्धं संब
भूवाद्भुतोपमं ६१ गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन्। भैरवाभिरुते भीमे युद्धे वानररक्षसां ६२ भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ। ऋषयः पि
तरो देवा गंधर्वगरुडोरगाः ६३ शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे। अथान्यं मार्गणं श्रेष्ठं संदधे राघवानुजः ६४ हुताशनसमस्पर्शं रावणात्मजदारणं
सुपत्रमनुवृत्तांगं सुपर्वाणं सुसंस्थितं ६५ सुवर्णविकृतं वीरः शरीरांतककारणं दुरावारं दुर्विषहं राक्षसानां भयावहं ६६ आशीविषविषप्रख्यं देवसंघैः
सुपूजितं येन शक्रो महातेजा दानवानजयत्प्रभुः ६७ पुरा देवासुरे युद्धे वीर्यवान्हरिवाहनः। तदैंद्रमस्त्रं सौमित्रिः संयुगेष्वपराजितं ६८ शरश्रेष्ठं धनुःश्रेष्ठे नर
श्रेष्ठोऽभिसंदधे। स्थायामिव समथाविवकर्ष शरासनं ६९ सज्यमायम्य दुर्धर्षः कालो लोकक्षये यथा। संधाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् ७० ल
क्ष्मीवाँल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः। धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि ७१ पौरुषे चाप्रतिद्वंद्वस्तदेनं जहि रावणिं। इत्युक्त्वा बाणमाक
र्णांतं विकृष्य तमहाबलः ७२ लक्ष्मणः समरे वीरः ससर्जैंद्रजितं प्रति। ऐंद्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ७३ तच्छिरः सशिरस्त्राणं श्रीमज्ज्वलितकुंड
लं प्रमथ्येंद्रजितः कायात्पातयामास भूतले ७४ तद्राक्षसतनूजस्य छिन्नस्कंधं शिरो महत्। तपनीयनिभं भूमौ ददृशे शोणितोक्षितं। हतस्तु निपपात
स धरण्यां रावणात्मजः। कवची सशिरस्त्राणो विध्वस्तः सशरासनः ७६ चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः। हृष्यंतो निहते तस्मिन्देवा वृत्रवधे य
था ७७ अथांतरिक्षे देवानामृषीणां च महात्मनां। अभिजज्ञे च संनादो गंधर्वाप्सरसामपि ७८ ऊचुश्च सहिता हृष्टा देवगंधर्वदानवाः। विज्वराः शां
ताः कलुषा ब्राह्मणा विचरंत्विति ७९ ततोऽभिनंदुस्तं हृष्टाः समरे हरियूथपाः ॥ ॥

इत्यत्र तु उत्तरशेषः। एकवाक्यत्वे एको लक्ष्मणशब्दः। लक्ष्मीवद्वचनः लक्ष्मीवाँल्लक्ष्मणः श्रीमानित्यर्थः। बाणो ऐंद्रास्त्रेण समायोज्य ससर्जेति संबंधः ॥ ॥

शांतरश्मिरिति। व्यथास्तगतजीवितः व्यपानो विहितः गोगतजीवितमुसत्वात्तिः। शांतार्चिराःइत्यत्वनिर्वाणपावकः वव व भ्र वैत्यर्थः प्रशांतेति। प्रशांतपीडाबहुलः प्र

तमप्रतिबलं दृष्ट्वा हतं नैऋतपुंगवं। बिभीषणो हनूमांश्च नावयावान्स्त सुग्रुपाः ८२ विनयेनाभिनंदं तमस्तु वुष्वापि नस्मणं। पतितं समभित्ता पराह्न मी मामहा
बभूःव व्यमसनादिशोभे नेहीनि र्जितकारिभिः। वानैर्वर्षमानात्तेशाखा प्युलवज्पराहताः ८४ लंकामभिमुखा मत्सर्गानवबंतंताः पथा विनाः। दुद्रुवुः शाखशोभी
ताराहमाव ऋधा दिशः ८५ मत्काहरणाम्सर्वे पदमाक्षिपाम्बधानाः। केचिल्लंकां परीत्य माः प्रविष्टा वानरा द्विताः ८६ समुद्रे पतिताः केचित्केचित्पर्वतमाश्रि
ताः हतपिंडं जितं दृष्ट्वा शयानं समरक्षितौ ८७ यजमानां सहस्रेषु न कश्चित्प्रत्यदृश्यत। यथास्तंगतआदित्ये वाद तिष्ठति रश्मयः ८८ तथा तस्मिन्निपतिते
राक्षसास्ते गता दिशः शांतरश्मिरिवादित्यो निर्वाणस्वपावकः ८९ बभूव समहाबाहुर्व्यपास्तगतजीवितः प्रशांतपीडाबहुले विनष्टारिः प्रहर्षवान्
९० बभूव लोकः पतिते तस्मिन्राक्षसाधिपात्मजे। हर्षं च शक्रो भगवान्सह सर्वैः सुरर्षिभिः ९१ जगाम निहते तस्मिन्राक्षसे क्रूरकर्म्मणि। आकाशे चा
पि देवानां शुश्रुवे देवदुंदुभिः ९२ नृत्यद्भिरप्सरोभिश्च गंधर्वैश्च महात्मभिः। ववर्षुः पुष्पवर्षाणि तदद्भुतमिवाभवत्। प्रशशांसु हते तस्मिन्राक्षसे क्रू
रकर्मणि। शुद्धा आपो नभश्चैव जहृषुर्दैत्यदानवाः ९४ आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे। ऊचुश्च सहितास्तुष्टा देवगंधर्वदानवाः ९५ वि
ज्वराः शांतकलुषा ब्राह्मणा विचरंत्विति। ततोऽभ्यनंदन्संहृष्टाः समरे हरियूथपाः ९६। तमप्रतिबलं दृष्ट्वा हतं नैऋतपुंगवं। विभीषणो हनूमांश्च जाम्बव
ानृक्षयूथपः ९७ विजयेनाभिनंदंतस्तुष्टुवुश्चापि लक्ष्मणं। क्ष्वेलंतश्च नदंतश्च गर्जंतश्च प्लवंगमाः ९८ लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे
। लांगूलानि प्रविध्यंतः स्फोटयंतश्च वानराः ९९ लक्ष्मणो जयतीत्येवं वाक्यं विश्रावयंस्तदा। अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः १०० चक्रु
रुच्चावचगुणा राघवाश्रयजाः कथाः १०१ तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म। परममुपलभन्मनःप्रहर्षं विनिहतमिंद्र
रिपुं निशम्य देवाः १०२ इत्यार्षे रामायणे लोपुद्धकांडे एकनवतितमः सर्गः।। ।। श्रेयोस्तु शोपहारः समाप्तः॥ ॥

शांतबहुलपीडः। एकादशपंचद्वादशपंचत्रयोदशपंचचतुर्दशेनेंद्रजिद्वधः। अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितनरस्तस्मा भिधानात॥ ॥ इति श्रीमहेश्वरतीर्थविपुद्रकां
एकनवतितमः सर्गः॥

विभीषणमिति। अवष्टभ्य अवलंब्य। सुहृत्पार्श्वस्थापि इति भावः॥ तत इति॥ इंद्रस्येव बृहस्पतिः प्रधानोपमर्दनानुभावेनावस्थानमात्रे दृष्टांतः। निसृष्टं सौमित्रिणेत्यत्र वशाद्वो वाक्य
युद्धकां लं कीरित्यपो रूपकथनं श्रीडितेन लक्ष्मणेन सर्वं कर्तृकत्वाभिधानेन कथितमिंद्रजिद्वधं लक्ष्मणकर्तृकत्वनिर्देशपूर्वकं विभीषणो वृत्तवानित्याह तेति॥ सततमित्यादि
११६ रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः। बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे १ ततः स जांबवंतं च हनूमंतं च वीर्यवान्। संनिपत्य महातेजास्तांश्च सर्वान्वनौकसः
२ आजगाम ततः शीघ्रं यत्र सुग्रीवराघवौ। विभीषणमवष्टभ्य हनूमंतं च लक्ष्मणः ३ ततो राममभिक्रम्य सौमित्रिरभिवाद्य च। तस्थौ भ्रातृसमीपस्थ इंद्रस्येव बृहस्प
तिः। ४ निष्टनन्निव वीरस्तु राघवाय महात्मने। आचचक्षे तदा वीरो घोरमिंद्रजितो वधं ५ रावणेश्च शिरश्छिन्नं लक्ष्मणेन महात्मना। न्यवेदयत रामाय तदा हृष्टो वि
भीषणः ६ श्रुत्वैव तु महावीर्यो लक्ष्मणेनेंद्रजिद्वधं। प्रहर्षमतुलं लेभे रामो वाक्यमुवाच ह ७ साधु लक्ष्मण तुष्टोस्मि कर्म चासुकरं कृतं। रावणेर्हि विनाशेन जित
मित्युपधारय ८ स तं शिरस्युपाघ्राय लक्ष्मणं कीर्तिवर्धनं। लज्जमानं बलात्स्नेहादंकमारोप्य वीर्यवान् ९ उपवेश्य तमुत्संगे परिष्वज्यावपीडितं। भ्रातरं ल
क्ष्मणं स्निग्धं पुनः पुनरुदैक्षत १० शल्यसंपीडितं शस्तं निश्वसंतं तु लक्ष्मणं। रामस्तु दुःखसंतप्तं निःश्वासपीडितं ११ मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च
त्वरात्। उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभं १२ कृतं परमकल्याणं कर्म दुष्करकर्मणा। अद्य मन्ये हते पुत्रे रावणं निहतं युधि १३ अद्याहं विजयी शत्रौ
हते तस्मिन्दुरात्मनि। रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे १४ छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः। विभीषणहनूमद्भ्यां कृतं कर्म महद्रणे १५
अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः। निरमित्रः कृतोस्म्यद्य निर्यास्यति हि रावणः १६ बलव्यूहेन महता श्रुत्वा पुत्रं निपातितं। तं पुत्रवधसंतप्तं नि
र्यांतं राक्षसाधिपं १७ बलेनावृत्य महता निहनिष्यामि दुर्जयं। त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे। न दुष्प्रापा हते तस्मिन् शक्रजेतरि चाहवे। स तं
भ्रातरमाश्वास्य परिष्वज्य च राघवः १९ रामः सुषेणं मुदितः समाभाष्येदमब्रवीत्। सशल्योयं महाप्राज्ञः सौमित्रिर्मित्रवत्सलः २० यथा भवति सुस्वस्थस्तथा
त्वं समुपाचर। विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः २१ ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनां। ये चाप्यन्येत्र युध्यंति सशल्या व्रणिनस्तथा २२ तेपि सर्वे प्र
यत्नेन क्रियंतां सुखिनस्तथा। एवमुक्तः स रामेण महात्मा हरियूथपः २३ लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधं ॥ ॥
श्लोक इत्यपि केवाक्यं। क्रियावाहुल्यात्समितिहि क्रि॥ अंकमारोप्य अंकं प्रत्यारोपणापाद्य उत्संगउपवेश्य वपीडितामिति पृथगुक्ता यथा तथा परिष्वज्य तं पुनः पुनरुदैक्षतेत्यन्वयः राम
अपाकृतमिति। दुष्करकर्मणा दुष्करपौरुषेणान्वयेनिशेषः। रावणस्येति। व्यपाश्रयः अवलंबनभूतः कृतमिति। समाभाष्य तं वीरोभाषत इति शेषः। वानरसैन्यानामिति ११६
निर्धारणे षष्ठी। एवमुक्त इति। नस्तः नासिकायां॥ ॥

इति श्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदीपिकायां युद्धकांडे द्विनवतितमः सर्गः ॥ ततइतिस्वेनास्वेन मेन्येनापरिहताः ततोवानरैः सहयुध्यंतः योनस्य सचिवास्तेचंद्रानि
तं हेतं कृत्वा अमित्राय हस्त्वामव्य थाः एवाप्याय वचसिरस्य पवर्गतव्यामि घतां श्रीमहा सुनरल्पनुपद्वेवाभिपानात ॥ सतमिति ॥ हाहा राक्षसा घोरास्तीत्यां प्रति सर्वं अनिम
पंकरं कृशमलं मद्धौ मनुत्वमिति ॥ कालांतकावपि कालः सर्वसंहारकः ॥ अंतकः कालाभिमानी पुरुषः यद्येति भूयो बहुमतः आनिशयेन संमतानि दुःखातिशयोक्तिः ये

सततमप्यागंधमाघ्राय विशल्यः समपद्यत । ततो निर्वेदनं श्रुत्वा वरं ४५ विभीषणमुखानां च सुहृदां राघवस्तथा । सर्ववानरमुख्यानां चिकित्सां तत्र कारो
त २६ ततः प्रकृतिमापन्नो हतशल्यो गतक्लमः । सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः २७ तथैव रामः प्लवगाधिपस्तथा विभीषणश्चर्क्षपतिश्च वीर्यवान् । अवेक्ष्य
सौमित्रिमरोगमुत्थितं मुदा ससैन्याः सुचिरं जहर्षिरे २८ अपूजयत्कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा । बभूव हृष्टो युधि वानरेन्द्रो निशम्य तं शक्रजितं
निपातितं २९ युद्धकांडे द्विनवतितमः सर्गः ॥ ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितं वधं । आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः १ युद्धे हतो महाराज लक्ष्मणेन
तवात्मजः । विभीषणसहायेन मिषतां नो महाबल २ शूरः शूरेण संगम्य संयुगेष्वपराजितः । लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेन्द्रजित् ३ गतः स परमाल्लोका
न्छरैः संतप्य लक्ष्मणं । स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणं ४ घोरमिन्द्रजितः संख्ये कश्मलं प्राविशन्महत् । उपलभ्य चिरात्संज्ञां राजा राक्षसपुंगवः ५ पु
त्रशोकाकुलो दीनो विललाप कुलेन्द्रियः । हा राक्षसचमूमुख्य मम वत्स महारथ ६ जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः । ननु त्वमिषुभिः क्रुद्धो भिंद्याः
कालांतकावपि ७ मंदरस्यापि शृंगाणि किं पुनर्लक्ष्मणं युधि । अद्य वैवस्वतो राजा भूयो बहुमतो मम ८ येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा । एष
पंथाः सुयोधानां सर्वामरगणेष्वपि ९ यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृच्छति । अद्य देवगणाः सर्वे लोकपालास्तथर्षयः १० हतमिन्द्रजितं दृष्ट्वा सुखं स्वप्स्यंति निर्
भयाः । अद्य लोकास्त्रयः कृत्स्नाः पृथिवी च सकानना ११ एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे । अद्य नैर्ऋतकन्यानां श्रोष्याम्यंतःपुरे स्वनं १२ करेणुसंघस्य
यथा निनादं गिरिगह्वरे । यौवराज्यं च लंकां च रक्षांसि च परंतप १३ मातरं मां च भार्यां च क्व गतोऽसि विहाय नः ॥ ॥

नवेव स्वतेन कालधर्मणा । कालधर्मेण तेन युक्तः संयोजितः युद्धमरणात्मकलक्षणकालनाकांतितनयाद्दहद तं त्वां नशोचामीत्याह । एषइति सुयोधानां मरणापथपं
थाः सर्वामरगणेष्वपि न केवलं मनुष्येषु सर्वामरगणेष्वपि सत्याप्य इतिभावः एतेन वधस्य स्वाश्रशोच्यत्वमुक्त्वा स्वर्गहेतुत्वादप्यशोच्यत्वमाह । यः कृतइ
ति । भर्तुः कृते यः हन्यते सः स्वर्गमृच्छति निश्चयं गच्छेति । त्रयोलोकाः पातालांतरिक्षस्वर्गाः पृथिव्याः पृथक् अभिधानात ॥ ॥

युद्ध ११७ मपनामेति।ममत्वयायेनकार्याणिकार्याणिकर्त्तव्यानिविपरीतेयुक्तमेवकर्त्तव्यमितिसंबंधः।यस्तुमित्यस्यप्रानीतिकार्थःस्पष्टः।वक्तनक्त।सलक्ष्मणेराघवेजीवतिसतिपत्त्वं
वितंकृत्वान्यज्ञातिनयोरसाध्यत्वादितिभावः।समाधिगतमिति।समप्यमाधिः समाधिः।मनोव्यथातांगच्छतीतितथा।मनोव्यथांप्राप्तमितियावत्।नाथ ह्न्येति।छन्यस्यावधः
सुतर्त्तंवंध्याधवः।पुत्रमरणमपि नमनःपीडेतियावत्।।मनुज्ञवंधस्यस्पष्टतीतिकार्थःस्पष्टः।वक्तनक्त।सपुत्रहननितावतो वै देत्या हे त्वभ्रत्यावधं स्ववंधुभ्यांमसमीक्ष्या रुन्
रंरामोमापवश्यंवधिष्यतीतिनिश्चित्यमस्यधंस्त्रारोचयमनक्ववधमिस्यनुषंगः।रावणक्रोधावेशस्यसीताहननोद्योगस्यचापमाशयः।स्वस्यरामहस्तवधेछयासर्वंराक्षसक्रु
मपनामन्वयानीरगतस्यपममारतं १४ येनकार्याणिकार्याणिविपरीतेहिकर्त्तनेयत्वंजीवतिसुग्रीवेलक्ष्मणेचसराघवे १५ ममशल्यमनुत्पन्नकृत्वानोमि
विहाभ्यतः।एवमादिविलापार्त्तंरावणंराक्षसाधिपं १६ समाधिगतनामीनंरावणंरासमाक्षिपांत्र्या।किंचेशमहाकोपः पुत्रव्यसनसंभवः।स्वभावात्कोपनंतस्य
नेपुनस्पुनराघवः।दीप्तंसंदीपयामासधर्मेकर्मविवस्वतः १८ ततोस्येभ्रुकुटिमिश्रंसंहतांमिव्यरोचत।युगांतेसहनक्रैस्तुमहोर्मिभिरिवोदधिः १९
कोपाद्विजृंभमाणस्यवक्त्रात्व्यक्तमभिज्वलन्।उत्पपातसधूमोग्निर्वृत्रस्यवदनादिव २० सपुत्रवधसंतप्तःशूरःक्रोधवशंगतः।समीक्ष्यरावणोबुध्या
वैदेह्यारोचयद्वधं २१ तस्यप्रकृत्यारक्तेचरक्तेक्रोधाग्निनापिच।रावणस्यमहाघोरेदीप्तेनेत्रेबभूवतुः २२ घोरंप्रकृत्यारूपंतत्तस्यक्रोधाग्निमूर्छितं।बभू
वरूपंक्रुद्धस्यरुद्रस्येवव्यवस्थितं।।तस्यक्रुद्धस्यनेत्राभ्यांप्रापतन्नश्रुबिंदवः।दीप्ताभ्यामिवदीपाभ्यांसार्चिषःस्नेहबिंदवः २४ दंतान्विदशतस्तस्यश्रूयते
दशनस्वनः।यंत्रस्यावेष्ट्यमानस्यमहतोदानवैरिव २५ कालाग्निरिवसंक्रुद्धोयांयांदिशमवैक्षत।तस्यांतस्यांभयत्रस्ताराक्षसाःसंनिलिल्यिरे।२६ तमंतकमि
वक्रुद्धंचाचराणिचरिष्णवीक्षमाणंदिशःसर्वाराक्षसानोपचक्रमुः २७ ततःपरमसंक्रुद्धोरावणोराक्षसाधिपः।अब्रवीद्रक्षसांमध्येसंस्तंभयितुमाहवे २८ मया
वर्षसहस्राणिचरित्वापरमंतपः।तेषुतेष्ववकाशेषुस्वयंभूःपरितोषितः २९ तस्यैवतपसोव्युष्ट्याप्रसादाच्चस्वयंभुवः।नासुरेभ्योनदेवेभ्योभयंममकदाचन ३० कव
चंब्रह्मदत्तंमेयदादित्यसमप्रभं।देवासुरविमर्देषुनच्छिन्नंवज्रशक्तिभिः ३१ तेनमामद्यसंयुक्तंरथस्थमिहसंयुगे।प्रतीयात्कोद्यमामाजौसाक्षादपिपुरंदरः ३२
लंनाशयतीतिसकलराक्षसानामपकरणायेतिदेतानिति।पंचम्यर्धंदीपंतस्यसम्यवैरा वेष्ट्यमानस्यभ्राम्यमाणस्यानमितितोपचक्रमुः।नोपसेदुः।ततरतिसंतत्तभ
पितुमाहवेतिपाठः।युद्धभीतानांराक्षसानांयुद्धेभ्यापपितुमित्यर्थः।समयेनि।अवकाशेषुतपःसमाप्तिसमयेषुतस्यैवेति।सह्याहृध्या।तपोभावेहेतुमाह।कवचमि
त्यर्द्धेन।आदित्यसदृशप्रभं।ब्रह्मदत्तंतस्मिन्नमिमस्वरेभ्योभयंनास्तीतिदर्शनंसंबंधः।तेनेति।तेनकवचेनसंयुक्तं।मांकःप्रतीयात्कोवाआभिमुख्येनागच्छे राम ११७
त्साक्षात्पुरंदरोपिआजौमांनप्रतिपद्यतेइतिशेषः।।।

पञ्चेदनिद्रेवासरो विमर्दे पुथिव्यां यं त्वयं पुवामस्त्वं ॥ अयतर्येनस्य यानीनि कार्थस्य पृष्टः वस्तु नत्त्वा श्रुयेति । राम लक्ष्मणा यो अहवे । रामलक्ष्मणायोः संवे ध्याहवे
वधाप । वानयणामि निशेषः ममभीमं धनुः न्नः यंशनैः सहजत्या प्यतामिति सिंवे यः । सपुत्रबंधवहनि सीतां हंतव्य वध्य तनि श्चित वानुक्तं नत्त सीतां हंतुं तां तं सीतां सर्व
नार्थं गंतव्य वध्यं तेत्पर्थः । हनहिंमात्योरितिधातुः । माप्येतावनोक्तमांवनाय । इयंसीतेति किंचिद्वेव अलीकमेव चक्त हतमितिदर्शितं । नदितातद्वननेत
थ्यमेवकरिष्येत दिवाहा तत्रवेधुमिति । मा पयेत्यादि श्लोक द्वयस्य वाल्वार्थक्त । ममवत्सेन बालेनापि सतार्विं इजिता वनौकसां वेवनायइयं सीतेति किंचिद्दे

यन्नदापि प्रसन्नेन सशर्कासुर्केमहतारे वासरविमर्दे पुमम हन्नं स्वयं सुधा ३३ अथ तस्य शमेमीमं धनुस्थाप्यतां मम । रामं लक्ष्मणायोरेव वधाय परमा
हवे ३४ सपुत्रबंधुसेनस्य श्रूः क्रोध वशंगतः । मनीसप वाणो बुध्या सीतां हंतव्य वस्यत ३५ प्रत्यवेक्षन तांप्राज्ञः सघोरोघोरदर्शनाराक्षीनो हीन स्वरा ।
मार्वोल्ना तु वाचनिशचरान् ३६ मा पयामम वत्सेन वेचनार्थ वनौकसां । किंचिद्देवहतंतत्र सीतेयमिति दर्शितं ३७ तुरिदं तथ्यमेवाहं करिष्येप्रियमा
त्मनः । वेदेहीं नाशयिष्यामि तत्र वंधुमनुव्रतां ३८ इत्येवमुक्त्वा सविधान वक्रमो धुपरामृशन् । उद्धृत्य गुणसंपन्नं विमलोव ध्वजं सं ३९ । निष्पातसर्वो
न समार्यः मचिवेर्वृतः रावणः पुत्रशोकेन भृश मालु नचेतनः ४० संक्रुद्धः खड्गमादाय सहसायत्र मैथिली व्रजंतं राक्षसं प्रेक्ष्य सिंहनादं विचुक्रुशुः ४१
४१ ऋचुश्चान्योन्यमालिंग्य संक्रुद्धं प्रेक्ष्य राक्षसं । अन्योन्यं तावुभौ घ्राश्च तद्वेष्टया विप्रमुखाश्च व्यथिष्यतः ४२ लोकपाला हिचत्वारः क्रुद्धेनानेन निर्जिताः बहवः शत्रु
वश्चान्ये संयुगेष्वभिपातिताः ४३ त्रिषु लोकेषु रत्नानि भुक्त्वा चाल्प रावणः । विक्रमेव बलेवैव नास्यान्यस्य दृश्यो भुवि ४४ तेषां संजल्पमानानामशोक वनिका
गतां । अभिदुद्राव वैदेहीं रावणः क्रोधमूर्छितः ४५ वार्यमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः । अभ्यधावत संक्रुद्धः खे यहो रोहिणीमिव ४६ मैथिली रक्ष्य
माणा तु राक्षसीभिरनिंदिता । ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणं ४७ तं निशाम्य सनिस्त्रिंशं व्यथिता जनकात्मजा । निवार्यमाणो बहुशः सुहृद्भिरनुवर्तिनि
४८ सीता दुःखसमाविष्टा विलपंतीदमब्रवीत् । यथायं मामभिक्रुद्धः समभिद्रवति स्वयं ४९ वधिष्यति सनाथां मामनाथामिव दुर्मतिः ॥॥

वज्ञलीकमेव हतं दर्शितं । अहं तेन वंधुत्वात्तां वधं परमासरा मम तु वतो वैदेहीं तथ्यं यथा तथा नाशयिष्यामि यदितदिदं आत्मनः प्रियमेव स्यात् । अतः करि
ष्ये इत्तर पर्त सहमनोयायं तुम्यः । किंचिद्दुः त्वामिति शेषः । तद्वयस्यादि श्लोक द्वयमेकं वाक्यं । विमलां बलं वर्चसं निर्मलाकाशसदृशं खङ्गमादाय उत्पपाको
शाद् भस्य पत्र मैथिली तत्र यानि मचिवैर्वृतः तं मन्निष्यपाते निसर्वं चं वच्चि इति । त्रिषु लोकेषु रत्नानि भुक्त्वा आत्स्परावणः । विक्रमे च बले चैव नास्य मस्य समत्व
शो भुवीति पाठः । आयुत्स्येति पाठे । आयत्स्य आक्रम्य वार्यमाणः इति ग्रहः । दृढग्रहः सन्निरीत्स्येति । अनुवर्तिने अभिमुखमागच्छंतं । पयेति । पद्यायस्माक्षा
णत ॥॥

अ॰ यु॰ यविष्यतीत्यत्र कारणमाह बहु शइति ॥ मोघमिति ॥ अनुपस्थानेमति ॥ अनंगीकारेमति ॥ अथचेति ॥ पुत्रशोकेन ॥ रामलक्ष्मण नावधी सुक्तः मम नोग्रहत्वातौ हंतुं अशक्तु
११८ वनमध्येत्वि निपदाश्रोष्यन्ते त्वद्वेव फलिष्यति स्फुटीष्यति मैथिलीमिति ॥ यत्पर्वेशस्वकालांतरे मैथिलीव शगा भविष्यति प्रतिचक्ष स्वेत्यर्थः अभ्युत्थानमिति ॥ अथ

बहुशश्चोदयामास भर्तारं मामनुव्रता ५० मायामम मवक्ष्ये निष्प्रत्याख्यातो ध्रुवं मया ॥ मोघं मामनुपस्थाने व्युक्तेनैराश्यमागता ५१ क्रोधमोहसमाविष्टो व्यक्तं मामहं
तमुद्यतः ॥ अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ ५२ मन्निमित्तमनार्येण समेयाद्य निपातितौ । भैरवां हि महाबाहो रामलक्ष्मणौ नांक्ष तो मया ५३ न ह नामिह ह
त्वा न तौ हा किको शतां प्रियाम् होथ्वि अत्रिमित्र्तौ यं विनाशोराज्ञपुत्रयोः ५४ अथवा पुत्रशोकेन अहत्वा राम लक्ष्मणौ ॥ विधमिष्यति मां रोदोरा ... पापानि
श्चयः ५५ हनूमतोपि पद्माक्षेन कृतं स्वयमपा ॥ यद्यहं तस्य पृष्टेनत दायाया मनिंदिता ५६ नाहोव मनुशोचे यं भर्तारं कृमता लतनी ॥ मन्येत हृद्यंतस्याः
कोशल्या या : फलिष्यति ५७ एकपुत्रा यदा पुत्रं श्रोष्यते युधि हं दिनामाहित्रम यद बाल्यं च यौवनं च महात्मनः ५८ धर्मकार्याणि रूपं च रुदंती सा रिष्य
ति ॥ निराशा निहते पुत्रे दत्वा श्राद्धमचेतना ५९ अग्निमारोक्ष्यते नूनमापो वापि प्रवेक्ष्यति ॥ धिगस्तु कुब्जामसतीं मंथरां पापनिश्चयां ६० यन्निमित्तमिम
शोकं कोसल्या प्रतिपत्स्यते ॥ इत्येवं मैथिलीं दृष्ट्वा विलपंतीं तपस्विनीं ६१ रोहिणीमिव चंद्रेण विना ग्रहवशं गतां ॥ एतस्मिन्नंतरे तस्य अमात्यः शीलवान् शु
चिः ६२ सुपार्श्वो नाम मेधावी रावणं राक्षसेश्वरं ॥ निवार्यमाणः स चिवैरिदं वचनमब्रवीत् ६३ कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज ॥ हंतुमिच्छसि वैदेहीं
क्रोधाद्धर्ममपास्यवै ६४ वेदविद्याव्रतस्नातः स्वकर्मनिरतः सदा ॥ स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ६५ मैथिलीं रूपसंपन्नां प्रत्यवेक्षस्व पार्थिव ।
तस्मिन्नेव सहास्माभिराहवे क्रोधमुत्सृज ६६ अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी ॥ कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ६७ शूरो धीमान्रथी
खड्गी रथप्रवरमास्थितः ॥ हत्वा दाशरथिं रामं भवान्प्राप्स्यति मैथिलीं ६८ स तद्दुरात्मा सुहृदा निवेदितं वचः सुधर्म्यं प्रतिगृह्य रावणः ॥ गृहं जगाम प्रत
तश्च वीर्यवान्पुनः सभां च प्रययौ सुहृद्वृतः ६९ युद्धकांडे त्रिनवतितमः सर्गः ॥ ॥

चतुर्दशी ॥ चतुर्दश्यां ॥ अभ्युत्थानं समरोद्योगं युद्धाय प्रस्थानं कृत्वा अमावास्यां अमावास्यायां ॥ विजयाय निर्याहि ॥ अत्र स्यमवामानीतिकार्थस्य सुष्टुः वक्तान राम
स्तु दाशरथिं हत्वा दाशरथिं प्रतिगत्वा दाशरथिमैथिलीं च भवान्प्राप्स्यति रणे हतः समनयोः पर्यहतां प्राप्स्यसीत्यर्थः ॥ ॥ इति श्रीमहेश्वरतीर्थविरचितायां युद्धकांडे ११८
त्रिनवतितमः सर्गः ॥ ॥

एकमिति परिक्षिप्य परितो निरुध्य। अथवेति। अथवा अद्य रामं हन्तास्मीति संबन्धः। निर्भिन्नगात्रं श्वो निहन्तास्मीति। एकं राममित्यादिश्लोकद्वयस्य वा स्वार्थत्वं
शरवर्षेण वर्तितुं परिक्षिप्य निलिन्नाए केपुस्त्वेषु मम मरणे हन्तुमर्हथ। नो चेदिति शेषः। अथवेति। अथवा भवद्भिः शरैः महारणे भिन्नगात्रं रामं लोकस्य पश्यतः सतः अहं श्वो निह
न्तास्मि निष्पादयिष्यामीत्यर्थः। संसंग्रामो महान् भीमः। सूर्यस्योदयनं प्रति। सूर्योदयमारभ्य। तेग दाभिरिति। अन्योन्यं समरे जघ्नुः। वानराणां गदाद्यायुधाभावात् हस्तादि

स प्रविश्य सभां राजा दीनः परमदुःखितः। निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन्॥ १ अब्रवीच्च स तान् सर्वान् बलमुख्यान् महाबलः। रावणः प्राञ्जलीन् वाक्यं पुत्रव्यस
नकर्शितः॥ २ सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः। निर्यान्तु रथसंघैश्च पादातैश्चोपशोभिताः॥ ३ एकं रामं परिक्षिप्य समरे हन्तुमर्हथ। प्रच्छन्नं शरवर्षेण
प्रावृट्काल इवाम्बुदाः॥ ४ अथवाहं शरैस्तीक्ष्णैर्भिन्नगात्रं महारणे। भवद्भिः श्वो निहन्तास्मि रामं लोकस्य पश्यतः॥ ५ इत्येतद्वाक्यमादाय राक्षसेन्द्रस्य राक्षसाः।
। निर्ययुस्ते रथैः शीघ्रैर्नागानीकैश्च संवृताः॥ ६ परिघान् पट्टिशांश्चैव शरखड्गपरश्वधान्। शरीरान्तकरान् सर्वे चिक्षिपुर्वानरान् प्रति॥ ७ वानराश्च द्रुमाञ्छैलान् राक्षसान्
प्रति चिक्षिपुः। स संग्रामो महान् भीमः सूर्यस्योदयनं प्रति॥ ८ रक्षसां वानराणां च तुमुलः समपद्यत। ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः॥ ९ अन्योन्यं स
मरे जघ्नुस्तदा वानरराक्षसाः। एवं प्रवृत्ते संग्रामे ह्युद्धूतं सुमहद्रजः॥ १० रक्षसां वानराणां च शान्तं शोणितविस्रवैः। मातङ्गरथकूलाश्च वाजिमत्स्या ध्वजद्रुमाः
११ शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः। ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः॥ १२ ध्वजवर्मरथानश्वान्नानाप्रहरणानि च। आप्लुत्याप्लुत्य
समरे वानरेन्द्रा बभञ्जिरे॥ १३ केशान् कर्णललाटांश्च नासिकाश्च प्लवंगमाः। रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि व्यकर्तयन्॥ १४ एकैकं राक्षसं संख्ये शतं वानर
पुंगवाः। अभ्यधावन्त फलितं वृक्षं शकुनयो यथा॥ १५ तदा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः। निर्जघ्नुर्वानरान् घोरान् राक्षसाः पर्वतोपमाः॥ १६ राक्षसैर्व
ध्यमानानां वानराणां महाचमूः। शरण्यं शरणं याता रामं दशरथात्मजम्॥ १७ ततो रामो महातेजा धनुरादाय वीर्यवान्। प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह॥ १८
प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे। नाभिजग्मुर्महाघोरा निर्दहन्तं शराग्निना॥ १९ कृतान्येव सुघोराणि रामेण रजनीचराः। रणे रामस्य ददृशुः कर्माण्य
सुकराणि ते॥ २० चालयन्तं महानीकं विधमन्तं महारथान्। ददृशुस्ते न वै रामं वातं वनगतं यथा॥ २१

धरहीतैस्तैराक्षसहननं संभविष्यतीति वेदितव्यं। कृतान्येवेति। रजनीचरा रामस्य रणे असुकराणि कर्माणि रामेण कृतान्येव ददृशुः। न तु क्रियमाणानीत्यर्थः। न
केवलं हस्तलाघवातिशयेन तत्कर्माणि ददृशुः। किं तु तत्कर्तारं रामं न ददृशुरित्याह। चालयन्तमिति। वातपक्षे विधमनादिकार्यलिंगाद्यथा वायुरनुमितो भव
ति तद्वद्रामोऽप्यनुमितः। न तु प्रत्यक्षतो दृष्टः॥ ॥

वं॰सु॰ प्रहरन्तमिति। इन्द्रियार्थेषु तिष्ठन्तं। इन्द्रियविषयेषु प्रेरकत्वेन शरीरे स्थितं नियमनं भूतात्मानं परमात्मानं प्रजा इव ते शरीरेषु प्रहरन्तं तेजसा निजयेन शरीरेषु योगपद्येन शरैः प्रह-
११९ रन्तं राघवं न पश्यन्ति। नाहं त्वरितिभावं धर्म्यप्रहारं इन्द्रियार्थेषु तिष्ठन्तं इन्द्रियाधीनतया वर्तमानं ते नातम वेना तु मीयमानमपि भूतात्मानं। जीवात्मानं। प्रजाः प्रधानवत् पश्यन्ति तद्वत्।
यद्वा। इन्द्रियार्थेषु शब्दादिविषयेषु तिष्ठन्तं भूतात्मानं परमात्मानं प्रजा इव परमात्मनः सर्वव्यापितया शब्दादिविषयेष्वपि सत्त्वेन तत्स्वरूपतया सन्निधानेन च तिष्ठन्तं तेषामन-
न्वेन तं यथा नोपलभन्ते तथेति॥ एष हन्तीति श्लोकद्वयमेकं वाक्यं। ते राक्षसाः रामस्य सदृशान् सदृशत्वेन प्रतीयमानान् एष हन्ति गजानीकं एष हन्ति महारथान् एष
हन्ति शरैस्तीक्ष्णैः पदातीन् वाजिभिः सह इति कुपिताः सर्वे राक्षसाः रामस्य सादृश्यादन्योन्यं जघ्नुरिति सम्बन्धः। तन्मानाराघवं सादृश्यप्रतीतौ कारणमाह। न ते ददृशिरे
इत्यादिना। भ्रमन्तीमिति। भ्रमन्तीं रामस्य मण्डलाकारेण तिर्यग्दिशां देशेषु भ्रमन्तीं अत एव अलातचक्रप्रतिमां कार्मुकस्य कोटिं ददृशुः न राघवमिति सम्बन्धः। धनुःशिरा

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितं। बलं रामेण ददृशुर्न रामं शीघ्रकारिणं २३ प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवं। इन्द्रियार्थेषु तिष्ठन्तं भूतात्मान-
मिव प्रजाः २४ एष हन्ति गजानीकमेष हन्ति महारथान्। एष हन्ति शरैस्तीक्ष्णैः पदातीन्वाजिभिः सह २५ इति ते राक्षसाः सर्वे रामस्य सदृशान् रणे
॥ अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते २६ न ते ददृशिरे रामं दहन्तमरिवाहिनीं। मोहिताः परमास्त्रेण गान्धर्वेण महात्मना २७ ते तु रामसह-
स्राणि रणे पश्यन्ति राक्षसाः। पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे २८ भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः। अलातचक्रप्रतिमां ददृशु-
स्ते न राघवं २९ शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकं। ज्याघोषतलनिर्घोषं तेजोबुद्धिगुणप्रभं ३० दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान्।
ददृशू रामचक्रं तत्कालचक्रमिव प्रजाः ३१

३१ निघर्षणीयस्य ततः तेजोबुद्धिगुणप्रभं तेजः शरीरकान्तिः बुद्धिर्ज्ञानं तेजोबुद्धिगुणा एव प्रभा यस्य तत्।
कृतवान् इत्यवातिशयानां उल्लीढत्वं कार्मुकत्वेन रामस्य निर्वर्तितं रामं चक्रत्वेन निरूपयति। शरीरेत्यादिना। शरीरं नाभिः शरीरमेव नाभिः। मध्यप्रदेशो यस्य तत्।
सत्त्वार्चिः सत्त्वं बलं तदेवार्चिः यस्य तत्। शरारं शरा एव अराणि यस्य तत्। अरं नाम नाभेः परितो वर्तिनि शलाकाविशेषः। नेमिकार्मुकं। नेमिः पृथिवीप्र-
मत्योपवस्य कारणाच्छिता नेमिभूतं कार्मुकं यस्य तत्। ज्याघोषतलनिर्घोषं तलं ज्याघातत्राणं तलशब्देन तदनुघोषोपलक्ष्यते। ज्याघोषतलघोषौ निर्घोषौ राम
दिव्यास्त्रगुणपर्यन्तं दिव्यास्त्राण्येव गुणाः माहात्म्यं शक्तिर्वा तदेव पर्यन्तो धारा यस्य तत् तथोक्तं। निघ्नन्तं निघ्नत् तत्सदृशरूपकेण निरूपणात् नपुंसकत्वमप्युपपन्नमिति कालचक्र ११९
मिति प्रजा इति॥ ॥

अनीकमित्यादिश्लोकत्रयमेकं वाक्यं। एकैकैकरथाश्वस्यपत्तिः पंचपदातिकः। पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः
अनीकिनी दशानीकिन्योक्षौहिणी अमरोक्तप्रकारेण दशसंख्याता पत्तिः। तत्त्रिगुणा सेनामुखं। सेनामुखं त्रिगुणो गुल्मः। गुल्मस्त्रिगुणो गणः। गणास्त्रिगुणो वाहिनी। वा
हिनी त्रिगुणा पृतना। एतत्त्रिगुणा चमूः। चमूस्त्रिगुणा अनीकिनी दशोत्तरशताधिकसप्तसहस्रसंख्यालक्षणा चमूः। अनीकिन्यां दशोत्तरे महस्राण्येव सहस्रा
र्थे अष्टादशसहस्राण्यमिमस्तीनि दशसहस्राण्यनंतरं हमारथानां दशसहस्राण्येतानि कानि इत्यर्थः। एकोनत्रिंशत्सहस्राधिकमाघकोटिसंख्या संख्या तारथा इत्युक्तं भ
वति। अष्टादशसहस्राणि इत्यत्र अनीकमित्येन द्विपरिणामेन योज्यं। अष्टादशसहस्राण्येतानि कानीत्यर्थः विंशतिसहस्राधिकाष्टादशलक्षोत्तरपदातीनां कोटिसं
अनीकं दशसहस्रं स्थानां चांतरे इमां। अष्टादशसहस्राणि कुंजराणां नरेश्विनं ३१ चतुर्दशसहस्राणि सारोहाणां च वाजिनां पूर्णे शतसहस्रे द्वेरान्त
मानां पदातिनां दिवसस्याष्टभागेन शरैरग्निशिखोपमैः। हतान्येकेन रामेण रक्षसां कामरूपिणां ३२ निहतास्तरथाः शांता विमस्थितध्वजाः। अभिपे
तः पुरीलंकां हतशेषा निशाचराः ३४ हतैर्गजपदात्यश्वैस्तद्बभूवरणाजिरं। आक्रीडभूमिः क्रुद्धस्य रुद्रस्येव महात्मनः ३५ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः
साधुसाध्विति रामस्य तत्कर्म समपूजयन् ३६ इत्यत्र वीक्ष्य तदारामः सुग्रीवं प्रत्यनंतरं। विभीषणं च धर्मात्मा हनुमंतं च वानरं ३७ जांबवंतं हरिश्रेष्ठं मैंदं द्विवि
दमेव च। एतदस्त्रबलं दिव्यं मम वा त्र्यंबकस्य वा ३८ निहत्य तां राक्षसराजवाहिनीं रामस्तदा शक्रसमो महात्मा। अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवग
णैः प्रहृष्टैः ३९ इति श्रीमद्युद्धकांडे चतुर्नवतितमः सर्गः॥ चतुर्दशापहारं समासतः॥ तानि नाम सहस्राणि साराहाणां च वाजिनां रथानां चाग्निवर्णा
नां सध्वजानां सहस्रशः १ रक्षसां नाम सहस्राणि गदापरिघयोधिनां कांचनध्वजचित्राणां शूराणां कामरूपिणां २ निहतानि शरैर्दीप्तैस्तप्तकांचनभूष
णैः। रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ३
ख्यातास्त्रयश्चितरः कुंजरा इत्युक्तं भवति॥ चतुर्दशसहस्राण्येतानि कानीत्यर्थः। षट्त्रिंशत्सहस्राधिकविंशतिलक्षोत्तरदशकोटिसंख्यासंख्याताः सारोहा वाजिन इत्युक्तं भवति॥ पू
र्णे शतसहस्रे द्वे अनीके इत्यर्थः॥ अशीतिलक्षोत्तरपंचत्रिंशत्कोट्यधिकशतसंख्यासंख्याताः पदाता इत्युक्तं भवति कामरूपिणां रक्षसां संबंधिनीरथादिचतुरंगब
लानि एकेन रामेण दिवसस्याष्टभागेन पादघटीकोनमुहूर्तद्वयेन हतानीत्यर्थः॥ चतुर्दशपीमूलवधः॥ इति श्रीमहेश्वरतीर्थविरचितायां रामायणतत्त्वदीपिकायां युद्धकांडे चतु
र्नवतितमः सर्गः॥ मूलबलस्य संख्या। एकशतकोटिशाहतरिकोटिएकताळीसलक्ष। अशीतिसहस्रदशाधिकमुक्तिकापाठगोचरा अल्पा मध्ये नास्ति। षट्त्रिंशत्सहस्र
नुकोटिएकत्वारिंशल्लक्ष अशीतिसहस्रं च पदातयः मुहूर्तद्वयेन हतानि॥ ॥

रा॰ लं॰ दृष्ट्वेति । हतशेषा निशाचराः । एतानात्मनि निहतान् लंकास्था दृष्ट्वा श्रुत्वा च संभ्रान्ता अभवन् । राक्षस्यश्च समागम्य संभूय दीनाश्चिन्तापरिप्लुताश्चाभवन्निति शेषः कथ
१२० मिति । निर्णतोदरी । लंबोदरी । तं दृष्ट्वेत्यर्धमेकं वाक्यं । मकाऽपिता ॥ वृद्धाका मयकाम सोऽप्याः सेनातः एकामिता । कथमिति । कामयामास । वरयामास । वलिनीव
त्वयः अस्याः प्रतीति । बालिनी आर्योदीर्घः । प्रत्ययमानामिति । अप्रतिरूपा । विकृतरूपा ॥ तन्निमित्तमिति ॥ तन्निमित्तं प्रधर्षणनिमित्तं वा प्रधर्षणरक्षसनाशाय वैदेहीमिति ।

दृष्ट्वा श्रुत्वा च संभ्रान्ता हतशेषा निशाचराः । राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः ४ विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः । राक्षस्यः सह संगम्य दुः
खार्ताः पर्यदेवयन् ५ कथं शूर्पणखा वृद्धा कराला निर्णतोदरी । आससाद वने रामं कंदर्पसमरूपिणं ६ सुकुमारं महासत्वं सर्वभूतहिते रतं ॥ तं दृष्ट्वा लोक
वध्या सा रूपहीना मकामिता ७ कथं सर्वगुणैर्हीना गुणवन्तं महौजसं । सुमुखं दुर्मुखी रामं कामयामास राक्षसी ८ जनस्यास्याल्पभाग्यत्वाद्वलिनी श्वेतमूर्धजा ॥
अकार्यमपहास्यं च सर्वलोकविगर्हितं ९ राक्षसानां विनाशाय दूषणस्य खरस्य वा । चकाराप्रतिरूपा सा राघवस्य प्रधर्षणं १० तन्निमित्तमिदं वैरं रावणेन
कृतं महत् । वधाय नीता सा सीता दशग्रीवेण रक्षसा ११ न च सीतां दशग्रीवः प्राप्नोति जनकात्मजां । बद्धं बलवता वैरमक्षयं राघवेण च १२ वैदेहीं प्रार्थ
यानं तं विराधं प्रेक्ष्य राक्षसं ॥ हतमेकेन रामेण पर्याप्तं तन्निदर्शनं १३ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः
१४ खरश्च निहतः संख्ये त्रिशिरा दूषणस्तथा । शरैरादित्यसंकाशैः पर्याप्तं तन्निदर्शनं १५ हतो योजनबाहुश्च कबंधो रुधिराशनः । क्रोधार्तो नर्दमानस्तु पर्याप्तं
तन्निदर्शनं १६ जघान बलिनं रामः सहस्रनयनात्मजं ॥ बालिनं मेघसंकाशं पर्याप्तं तन्निदर्शनं १७ ऋष्यमूके वसन् शैले दीनो भग्नमनोरथः । सुग्रीवः स्थापि
तो राज्ये पर्याप्तं तन्निदर्शनं १८ धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितं । युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते १९ विभीषणवचः कुर्याद्यदि स्म धनदा
नुजः । श्मशानभूता दुःखार्ता नेयं लंकापुरी भवेत् २० कुंभकर्णं हतं श्रुत्वा राघवेण महाबलं । अतिकायं च दुर्धर्षं लक्ष्मणेन हतं तदा २१ प्रियं चेन्द्रजितं पुत्रं
रावणो नैव बुध्यते । पुरा हस्मतालंकाद्यक्षांलोयल्लवर्द्धिना २२ हतमत्तकुमारं च दृष्ट्वा मौनाव बुध्यते ॥ ॥

वैदेहीं प्रार्थयानं एकेन रामेणाहं तं विराधं प्रेक्ष्य स्थितानामस्माकं । तत् विराधहननं पर्याप्तं निदर्शनं । रामस्य सर्वातिशायित्वपरिज्ञानाय निरपेक्षं निदर्शन राम
मित्यर्थः ॥ प्रियं चेन्द्रजितमिति वा बवुध्यते रामपराक्रममिति शेषः ॥ ॥ १२०

समेतानि कुलेकुलेभ्य हे प्रहेहे हतप्रवीरा इति। अपश्यंत इत्यत्र अपश्यंत्य इत्यत्र देवा इति उपरस्थ छोउ पद्नं। उत्पाता इति कथयिष्यंतीत्याहु ऋषिष्यंति। पितामहेनेति। देवदानवराक्ष
सैः देवदानवराक्षसेभ्यः इदानीं ब्रह्मवाक्यात् परिरक्षसां नांतःपेनियतं इत्याह। पीड्यमाना इति। सांप्रतं मम हा देववाक्यावगतं मीनां मां मध्यार्थ परिरक्षां तं नं निश्चिंतेति उ

मम पुत्रो मम भ्राता मम भर्ता हतो रणे। इत्येवं श्रूयते शब्दो राक्षसीनां कुले कुले २३ रथाश्वाश्च नागाश्च हताः शतसहस्रशः। रणे रामेण शूरेण राक्षसाश्च पदा
तयः २४ रुद्रो वायदि वा विष्णुर्महेंद्रो वा शतक्रतुः। हंति नो रामरूपेण यदि वा स्वयमंतकः २५ हतप्रवीरा रामेण निराशा जीविते वयं। अपश्यंती भयस्यांतमनाथा
विलपामहे २६ रामहस्ताद्दशग्रीवः शूरो दत्तमहावरः। इदं भयं महाघोरं समुत्पन्नं न बुध्यते २७ तं न देवा न गंधर्वा न पिशाचा न राक्षसाः। उपसृष्टं परित्रातुं शक्ता रामे
ण संयुगे २८ उत्पाताश्चापि दृश्यंते रावणस्य रणे रणे। कथयिष्यंति रामेण रावणस्य निबर्हणं २९ पितामहेन प्रीतेन देवदानवराक्षसैः। रावणस्याभयं दत्तं मानुषे
भ्यो न याचितं ३० तदिदं मानुषं मन्ये प्राप्तं निःसंशयं भयं। जीवितांतकरं घोरं रक्षसां रावणस्य च ३१ पीड्यमानास्तु बलिना वरदानेन रक्षसा। दीप्तैस्तपोभिर्विबुधाः पितामह
मपूजयन् ३२ देवतानां हितार्थाय महात्मा वै पितामहः। उवाच देवताः सर्वा इदं तुष्टो महद्वचः ३३ अद्यप्रभृति लोकांस्त्रीन् सर्वे दानवराक्षसाः। भयेन प्रावृता नित्यं विचरि
ष्यंति शाश्वतं ३४ दैवतैस्तु समागम्य सर्वैश्चेंद्रपुरोगमैः। वृषध्वजस्त्रिपुरहा महादेवः प्रसादितः ३५ प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत्। उत्पत्स्यति हितार्थं वो
नारी रक्षःक्षयावहा ३६ एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान् पुरा। भक्षयिष्यति नः सीता राक्षसघ्नी सरावणान् ३७ रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः। अयं नि
ष्टानको घोरः शोकेन समभिप्लुतः ३८ तं न पश्यामहे लोके यो नः शरणदो भवेत्। राघवेणोपसृष्टानां कालेनेव युगक्षये ३९ नास्ति नः शरणं कश्चिद्भये महति ति
ष्ठतां। दवाग्निवेष्टितानां करेणूनां यथा वने ४० प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना। यत एव भयं दृष्टं तमेव शरणं गतः ४१ इतीव सर्वा रजनीचरस्त्रियः प
रस्परं संपरिरभ्य बाहुभिः। विषेदुरार्त्ता भयभारपीडिता विनेदुरुच्चैश्च सुदारुणं तदा ४२ इति श्री युद्धकांडे पंचनवतितमः सर्गः

त्यक्ष्यंतीति। रावणस्येति अपनीतेन अपनयेन अभिप्राय। नाशः। आनकालमिति। अवितर्यो पौलस्त्येन विभीषणेन रूपमिति संबंधः युद्धकांडे पंचनवतितमः सर्गः

सलं राक्षसैरपीतिमूर्छितः। प्रज्वलितः। भयाव्यक्तकथः स्वनिशभयेनराक्षसानामस्पष्टवचनरस्थैः। भयाव्यक्तकथानीतिवापाठः। नस्येति॥ अथ आर्तानां राक्षसीनां हरहितान॥ अथ
१२१ वातेरिति॥ राघवंलक्ष्मणंचममसादनंनेष्यामि वक्तनस्करराघवंलक्ष्मणंविना अन्यानितिशेषः। वेराप्येत्पादिषु। हतस्येनिरोधः। अद्येति। पत्रिणा शोभनपक्षवता॥ आक्रोशेनिप

आर्तानां राक्षसीनां तु लंकायां वै कुले कुले। रावणः करुणं शब्दं शुश्राव परिदेवितं १ स तदीर्घं विनिश्वस्य मुहूर्तं ध्यानमास्थितः। बभूव परमक्रुद्धो रावणो भीमदर्शनः २ सं
दश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः। राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्छितः ३ उवाच च समीपस्थान् राक्षसान् राक्षसेश्वरः। भयाव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा ४ म
होदरं महापार्श्वं विरूपाक्षं च राक्षसं। शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ५ तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः। चोदयामासुरव्यग्रान् राक्षसान् रावणाज्ञया ६
ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः। कृतस्वस्त्ययनाः सर्वे रणायाभिमुखा ययुः ७ प्रतिपूज्य यथान्यायं रावणं ते महारथाः। तस्थुः प्रांजलयः सर्वे भर्तुर्विजयकां
क्षिणः ८ अथोवाच प्रहस्यैतान् रावणः क्रोधमूर्छितः। महोदरमहापार्श्वौ विरूपाक्षं च राक्षसं ९ अद्य बाणैर्धनुर्मुक्तैः युगान्तादित्यसन्निभैः। राघवं लक्ष्मणं चैव ने
ष्यामि यमसादनं १० खरस्य कुंभकर्णस्य प्रहस्तेन्द्रजितोस्तथा। करिष्यामि प्रतीकारमद्य शत्रुवधादहं ११ नैवान्तरिक्षं न दिशो न च द्यौर्नापि सागरः। प्रकाशत्वं गमि
ष्यंति मद्बाणजलदावृताः १२ अद्य वानरयूथानां तानि यूथानि भागशः। धनुःपाशशरजालेन वधिष्यामि पत्रिणा १३ अद्य वानरसैन्यानि रथेन पवनौजसा। धनुः
समुद्रादुद्धतैर्मथिष्यामि शरोर्मिभिः १४ आकोशपद्मवक्त्राणि पद्मकेसरवर्चसां। अद्य यूथतटाकानि गजवन्मथाम्यहं १५ सशरैरद्य वदनैः संख्ये वानरयूथपाः।
मंडयिष्यंति वसुधां सनालैरिव पंकजैः १६ अद्य युद्धप्रचंडानां हरीणां द्रुमयोधिनां। मुक्तेनैकेषुणा युद्धे भेत्स्यामि च शतं शतं १७ हतो भ्राता च येषां वै येषां च तनय
याहताः। वधेनाद्य रिपोस्तासां करोम्यास्रप्रमार्जनं। १८ अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः। करोमि वानरैर्युद्धे यत्नावेक्ष्यतलां महीं १९ अद्य गोमायवो ग
ध्राः ये च मांसाशिनोपरे। सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्पितैः २० कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः। अनुप्रयांतु मां सर्वे ये च शिष्टा निशाचराः २१
तस्य तद्वचनं श्रुत्वा महापार्श्वोब्रवीद्वचः। बलाध्यक्षान् स्थितांस्तत्र बलं संत्वर्यतामिति २२ बलाध्यक्षास्तु संत्वरा महापार्श्वप्रभाविताः। बलाध्यक्षाध्यक्षस्तरसा राप
समां लंकां गृहाद्गृहात् २३ १२१

घकेसरवर्चसां॥ वानराणामितिशेषः। यूथतटाकानि यूथान्येव तटाकानि यथामयीतिसंबंधः॥ ॥ ॥

ततो मुहूर्त्ताद्दिविजां मैथिल्या शुष्पन्नरोव्रतीयानन्तः प्रपाततम्ना मत्स्यगामीयो तावन्नानिशयाना ॥

ततो मुहूर्त्तात्स्वयं तु राक्षसानां महर्षीणां गनयं तो भीमवक्त्राना प्रहरो खङ्गैः २४ असिभिः पट्टिसैः शूलैर्गदाभिर्मुसलैर्हलैः शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः
कूटमुद्गरैः २५ यष्टिभिर्विविधैश्चक्रैर्निशितैश्च परश्वधैः भिन्दिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः २६ अथ धूम्रपश्चलाध्यक्षाश्चत्वारो रावणाज्ञया स्था
नानि युक्तं प्रायेणागानानि पतन्नयं २७ अश्वाना बाष्पिको घष्टस्वरो ष्ट्राणां तथैव च परानय स्वयं स्वामानमुत्तरानशास्मात् २८ बलाध्यक्षाश्च संप्रा
प्यततः सेनां पुरः स्थिताः एतस्मिन्नंतरे सूतः स्थापयामास तं रथं २९ दिव्यस्त्रवर्म्मसंपन्नं नानालंकारभूषितं दिव्यवाजिसमायुक्तं दिव्यालंकारभूषितं ३०
नानायुधसमाकीर्णं किंकिणीजालसंवृतं नानाप्रत्न परिष्कि रं नक्तमेवं विराजितं ३१ मौक्तिकनदमयैश्चैव सहस्रकलशैर्युतं तं दृष्ट्वा राक्षसाः सर्वे विस्मयं प
रं गताः ३२ तं दृष्ट्वा सहसोत्थाय रावणो राक्षसेश्वरः कोटिसूर्य्यप्रतीकाशं ज्वलंतमिव पावकं ३३ दुनेष्ठनतमं मायुक्तं युक्ताश्वं तं रथं ग्राह्य
दाभीमो दीप्यमानः स्वतेजसा ३४ ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः रावणः सत्वगामीयो नदारयन्निव मेदिनी ॥ ततश्चासी महानादं तूर्याणां
व नतस्ततः मृदंगैः पटहैः शंखैः काहलैश्च महास्तनां ३६ आगतो राक्षसो राजा छत्रचामरसंयुतः सीताप्रहारी दुर्वृत्तो ब्रह्मघ्नो देवकंटकः ३७ योद्धुं रघुवरे
णेति श्रुत्वैव काहल ध्वनिः तेन नादेन महता पृथिवी समकंपत ३८ तं शब्दं सहसा श्रुत्वा वानरा दुद्रुवुर्भयात् रावणस्तु महाबाहुः सचिवैः परिवारितः
३९ आजगाम महातेजा विजयायारीन्प्रति रावणेनाभ्यनुज्ञातो महापार्श्वमहोदरौ ४० विरूपाक्षश्च दुर्द्धर्षो रथानारुह्य राक्षसाः सन्नह्य सिंहविनिर्हंता
भिंदंत इव मेदिनीं ४१ नादं घोरं विमुंचंतो निर्ययुर्जयकांक्षिणः ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः ४२ निर्ययावुद्यतधनुः कालांतकयमोपमः
ततः प्रजविताश्वेन रथेन स महाबलः ४३ द्विरोपानि यं यातो नयनतो रामलक्ष्मणौ ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः ४४ द्विजाश्च नेदुर्घोराश्च
संचचाल च मेदिनी ववर्ष रुधिरं देवश्चस्खलुश्च तुरंगमाः ४५ ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवं शिवाः नयनं चास्फुरद्वामं वामो बाहुरकंपत ४६

रा.यु. ततो निष्क्रमत इति। रूपाणि दुर्निमित्तस्वरूपाणि॥ ॥ इति श्रीमहेश्वरतीर्थविरचितरामायणतत्त्वदीपिकायां युद्धकांडे षण्णवतितमः सर्गः॥ ॥ रावणस्येति॥ ॥
१२२ विवर्णं वदनं चासीत्किंचिदभ्रश्यत स्वनः। ततो निष्क्रमतो युद्धे दशग्रीवस्य रक्षसः ४७ रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे॥ अंतरिक्षात्पपातोल्का निर्घा-
तसमनिस्वना ४८ विनेदुरशिवा गृध्रा वायसैरभिमिश्रिताः। एतानचिंतयन्घोरानुत्पातान्समवस्थितान् ४९ निर्ययौ रावणो मोहाद्वधार्थी कालचोदितः। ते-
षां तु रथघोषेण राक्षसानां महात्मनाम् ५० वानराणामपि चमूर्युद्धायैवाभ्यवर्तत। तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम् ५१ अन्योन्यमाह्वयानानां क्रुद्धानां ज-
यमिच्छताम्। ततः क्रुद्धो दशग्रीवः शरैः कांचनभूषणैः ५२ वानराणामनीकेषु चकार कदनं महत्। निकृत्तशिरसः केचित्छिन्नतो महीं गताः ५३ केचिन्नि-
कृत्तशिरसो रावणेन वलीमुखाः। केचिद्विच्छिन्नहृदयाः केचिच्छ्रोत्रविवर्जिताः ५४ निरुच्छ्वासा हताः केचित्केचित्पार्श्वेषु दारिताः। केचिद्विभिन्नशिरसः केचि-
च्चक्षुर्विनाकृताः ५५ दशाननः क्रोधविवृत्तनेत्रो यतो यतोऽभ्येति रथेन संख्ये। ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरियूथपास्ते ५७ इत्यार्षे रामायणे युद्धकां-
डे षण्णवतितमः सर्गः॥ ॥ तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः। बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा १ रावणस्याप्रसह्यं तं शरसंपातमेकतः। न
शेकुः सहितुं दीप्तं पतंगा ज्वलनं यथा २ तेऽर्दिता निशितैर्बाणैः क्रोशंतो विप्रदुद्रुवुः। पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ३ प्लवगानामनी-
कानि महाभ्राणीव मारुतः। स ययौ समरे तस्मिन्विधमन्रावणः शरैः ४ कदनं तरसा कृत्वा राक्षसेंद्रो वनौकसाम्। आससाद ततो युद्धे त्वरितं राघवं रणे ५
सुग्रीवस्तान्कपीन्दृष्ट्वा भग्नान्विद्रावितान्रणे। गुल्मे सुषेणं निक्षिप्य चक्रे युद्धे द्रुतं मनः ६ आत्मनः सदृशं वीरं स तं निक्षिप्य वानरम्। सुग्रीवोऽभिमुखः शत्रुं
प्रतस्थे पादपायुधः ७ पार्श्वतः पृष्ठतश्चास्य सर्वे यूथाधिपाः स्वयम्। अनुजग्मुर्महाशैलान्विविधांश्च महीरुहान् ८ स नर्दन्युधि सुग्रीवः स्वरेण महता म-
हान्। पोथयन्विविधांश्चान्यान्ममंथोत्तमराक्षसान् ९ ममर्द च महाकायो राक्षसान्वानरेश्वरः। युगांतसमये वायुः प्रवृद्धानगमानिव १० राक्षसानाम-
नीकेषु शैलवर्षं ववर्ष ह। अश्मवर्षं यथा मेघः पक्षिसंघेषु कानने ११ कपिराजविसृष्टैस्तैः शैलवर्षैस्तु राक्षसाः। विकीर्णशिरसः पेतुर्विकीर्णा इव पर्व- राम
ताः १२ १२२
एकत इति। एकस्य रावणस्य शरसंपातमिति संबंधः। ममर्द चेति। अगमान्॥ वृक्षान्॥ ॥

अथेति। संत्रीपमानेषु हिंस्यमानेषु त्रिहिंसायामिति धातोः। मर्ता शिलामिति। अपक्रम्य शिलाप्रहारमोघीकारणार्थं पार्श्वतोपसृत्य सुग्रीवं प्रहरत्यर्थः। तलप्रहारमिति। नैपुण्यात्॥
युद्धगतिविशेषलाघवात्। मोचयित्वा मोघीकृत्य। ददर्शांतरमिति। शंखदेशे। ललाटपार्श्वदेशे। शंखो निःश्वोललाटास्थीत्यमरः। प्रपातेति। स्रोतोभ्यः नासादिरंध्रेभ्यः। विवृत्ते

अथ संत्रीपमानेषु राक्षसेषु समंततः। सुग्रीवेण प्रभग्नेषु पतत्सु च पतत्सु च १३ विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः। रथादाप्लुत्य दुर्धर्षो गजस्कंधमुपारुहत् १४ स तं द्वि-
रदमारुह्य विरूपाक्षो महाबलः। ननर्द भीमनिर्ह्रादं वानरानभ्यधावत १५ सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे। स्थापयामास चोद्विग्नान्राक्षसान्संप्रहर्षयन् १६ सोऽतिवि-
द्धः शितैर्बाणैः कपींद्रस्तेन रक्षसा। चुक्रोध स महाक्रोधो वधे चास्य मनो दधे १७ ततः पादपमुद्धृत्य शूरः संप्रधने हरिः। अभिपत्य जघानास्य प्रमुखं तु महागजं १८ स तु प्रहा-
राभिहतः सुग्रीवेण महागजः। अपासर्पद्धनुर्मात्रं निषसाद ननाद च १९ गजात्तु मथितात्तूर्णमपक्रम्य स वीर्यवान्। राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिं। आर्षभं
चर्म खड्गं च प्रगृह्य लघुविक्रमः। भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितं २१ स हि तस्याभिसंक्रुद्धः प्रगृह्य विपुलां शिलां। विरूपाक्षाय चिक्षेप सुग्रीवो जलदोपमां २२ स
तां शिलामापतंतीं दृष्ट्वा राक्षसपुंगवः। अपक्रम्य सुविक्रांतः खड्गेन प्राहरत्तदा २३ तेन खड्गप्रहारेण रक्षसा बलिना हतः। मुहूर्तमभवद्वीरो विसंज्ञ इव वानरः २४ स तदा सह-
सोत्पत्य राक्षसस्य महाहवे। मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि २५ मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः। तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे २६ कवचं पा-
तयामास स खड्गाभिहतोऽपतत्। स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् २७ तलप्रहारमशनेः समानं भीमनिस्वनं। तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतं २८ नै-
पुण्यान्मोचयित्वैनं मुष्टिनोरस्यताडयत्। ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः २९ मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा। ददर्शांतरं तस्य विरूपाक्षस्य वानरः ३० ततो
न्यपातयत्क्रोधाच्छंखदेशे महत्तलं। महेंद्राशनिकल्पेन तलेनाभिहतः क्षितौ ३१ पपात रुधिरक्लिन्नः शोणितं स समुद्गिरन्। स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ३२
विवृत्तनयनं क्रोधात्सफेनरुधिराप्लुतं। ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतं ३३ स्फुरंतं परिवर्तंतं पार्श्वेन रुधिरोक्षितं। करुणं च विनर्दंतं ददृशुः कपयो रिपुं ३४ तदा
तु तौ संयति संप्रयुक्तौ तरस्विनौ वानरराक्षसानां। बलार्णवौ सस्वनतुश्च भीमौ महार्णवौ द्वाविव भिन्नवेलौ ३५ निपातितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन। सर्वं बलं
सममस्तकपिराक्षसानामुन्मत्तगंगाप्रतिमं बभूव ३६ इत्यार्षे रामायणे वाल्मीकीये युद्धकांडे सप्तनवतितमः सर्गः॥ ॥

नीति। विरूपाक्षतरं अतिविरूपाक्षं ३३ स्फुरंतमिति। पार्श्वेन परिवर्तंतं विरूपाक्षं ददृशुरिति संबंधः ३४ तदा तु ताविति। भिन्नवेलौ उत्तीर्णवेलौ ३५ निपातनमिति। उन्मत्तगंगा-
प्रतिमं उद्वेलगंगाप्रवाहसदृशं ३६ इति श्रीमहेश्वरतीर्थीये युद्धकांडे सप्तनवतितमः सर्गः॥ ॥

हन्यमान इति॥ सरसीव॥ सरसीइव॥ सोपक्षीणौ॥ उपक्षीणा पुपक्षय॥ तस्मादिति॥ भर्तृपिंडस्येति॥ भर्तृपीडस्य निर्वेष्टुं ख्यामिदत्तवेतनमभाकर्तुमित्यर्थः॥५॥ प्रभग्नमिति॥ अनंतरं संनि

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे॥ सरसीव महाघर्मे सूपक्षीणौ बभूवतुः १ स्वबलस्य तु घातेन विरूपाक्षवधेन च॥ बभूव द्विगुणं क्रुद्धो रावणो राक्षसेश्वरः २ प्रक्षी
णं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः॥ बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययं ३ उवाच च समीपस्थं महोदरमरिंदमं॥ अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता
४ जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमं॥ भर्तृपिंडस्य कालोयं निर्वेष्टुं साधु युध्यतां ५ एवमुक्तस्तथेत्युक्त्वा राक्षसेंद्रो महोदरः॥ प्रविवेशारिसेनां स पतंग इव पाव
कं ६ ततः स कदनं चक्रे वानराणां महाबलः॥ भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ७ वानराश्च महासत्वाः प्रगृह्य विपुलाः शिलाः॥ प्रविश्यारिबलं भीमं जघ्नु
र्जनीचरान् ८ महोदरस्तु संक्रुद्धः शरैः कांचनभूषणैः॥ चिच्छेद पाणिपादोरू वानराणां महाहवे ९ ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशं॥ दिशो दश द्रुताः के
चित्केचित्सुग्रीवमाश्रिताः १० प्रभग्नं समरे दृष्ट्वा वानराणां महाबलं॥ अभिदुद्राव सुग्रीवो महोदरमनंतरं ११ प्रगृह्य विपुलां घोरां महीधरसमां शिलां॥ चिक्षेप
च महातेजास्तद्वधाय हरीश्वरः १२ तामापतंतीं सहसा शिलां दृष्ट्वा महोदरः॥ असंभ्रांतस्ततो बाणैर्विभिद र[illegible] दुरासदां १३ रक्षसा तेन बा
णौघैर्निकृत्ता सा सहस्रधा॥ निपपात शिला भूमौ गृध्रचक्रमिवाकुलं १४ तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्छितः॥ सालमुत्पाट्य चिक्षेप रक्षसे रणमूर्द्धनि
१५ तं चैव विददारैनं शूरः परबलार्दनः॥ स ददर्श ततः क्रुद्धः परिघं पतितं भुवि १६ आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन्॥ परिघेणोग्रवेगेन जघानास्य हयोत्त
मान् १७ तस्माद्धतहयाद्वीरः सोवप्लुत्य महारथात्॥ गदां जग्राह संक्रुद्धो राक्षसोथ महोदरः १८ गदापरिघहस्तौ तौ युधि वीरौ समीयतुः॥ नर्दंतौ गोवृषप्रख्यौ घनाविव
सविद्युतौ १९ ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः॥ ज्वलंतीं भास्कराभासां सुग्रीवाय महोदरः २० गदां तां सुमहाघोरामापतंतीं महाबलः॥ सुग्रीवो रोषताम्राक्षः समु
द्यम्य महाहवे २१ आजघान गदां तस्य परिघेण हरीश्वरः॥ पपात स गदो भिन्नः परिघस्तस्य भूतले॥ २२॥ ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात्॥ आयसं मुस
लं घोरं सर्वतो हेमभूषितं॥ २३॥ ॥

निहितं॥ ततः क्रुद्ध इति॥ भास्कराभासां भास्करवद्वभासां॥ गदां तां सुमहाघोरां दृष्ट्वेति शेषः॥ ससुग्रस्य परिघमिति शेषः॥ सुग्रीवः परिघेण तां घाने ति संबंधः॥ पपातेति॥ गदा
पपात सा परि घश्चेति चरेत्यर्थः॥॥

मतमिति। सः सुग्रीवः। तं सुमहांतं संख्ये पि महोदरो पि। उद्यतासी इति। दक्षिणां प्रदक्षिणां चकारेत्यन्वयो वामन्तत्वां सं पर्यंतः। अकुरुतां स चितिः। वीर्यशाला आघनतद्गति। वीर्यश्ला
घी। विषण्णवदना इति। सर्वे दीनचेतसो बभूवुरिति शेषः। भयविक्लवचेतसः भयकंपितचित्ताः सर्वे विद्रवंति। व्यद्रवत। अतः सर्वशाखामृगनरूपि। इति श्रीमद्रे श्रमरतीर्थीये युद्धकांडे ष्टनव

सतुग्रह्यप्रचिक्षेप सो प्यन्यां व्यक्षिपद्गदां। भिन्नावन्योन्यमासाद्य पेततुश्च महीतले २४ ततो भिन्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः। तेजोबलसमाविष्टौ दीप्ताविव हुता
शनौ २५ जघ्नतुस्तौ तदान्योन्यं नेदतुश्च पुनः पुनः। तलैश्चान्योन्यमासाद्य पेततुश्च महीतले २६ उत्पेततुस्तदा तूर्णं जघ्नतुश्च परस्परं। भुजैश्चिक्षेपतुर्वीरावन्योन्य
मपराजितौ २७ जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परंतपौ। आजहार च तदा खड्गमदूरपरिवर्तिनं २८ राक्षसश्चर्मणा सार्द्धं महावेगो महोदरः। तथैव च महाखड्गं चर्मणा पतितं स
ह २९ जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः। तौ तु रोषपरीतांगौ नर्दंतावभ्यधावतां ३० उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ। दक्षिणं मंडलं चोभौ सुतूर्णं संपरीयतुः ३१ अ
न्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ। स तु शूरो महावेगो वीर्यश्लाघी महोदरः ३२ महाचर्मणि तं खड्गं पातयामास दुर्मतिः। लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुंजरः।
३३ जहार सशिरस्त्राणं कुंडलोपगतं शिरः। निकृत्तशिरसस्तस्य पतितस्य महीतले। तद्बलं राक्षसेंद्रस्य दृष्ट्वा तत्र न तिष्ठते। हत्वा तं वानरैः सार्द्धं ननाद मुदितो हरिः। ३५ चुक्रोध
च दशग्रीवो बभौ हृष्टश्च राघवः। विषण्णवदनाः सर्वे राक्षसा दीनचेतसः। ३६ विद्रवन्ति ततः सर्वे भयवित्रस्तचेतसः। ३७ महोदरं तं विनिपात्य भूमौ महागिरेः कीर्णमिवैक
देशं। सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः। ३८ अथ विजयमवाप्य वानरेंद्रः समरमुखे सुरसिद्धयक्षसंघैः। अवनितलगतैश्च भूतसंघैर्हर्षसमा
कुलितैर्निरीक्ष्यमाणः ३९ इत्यार्षे रामायणे युद्धकांडे अष्टनवतितमः सर्गः। महोदरे तु निहते महापार्श्वो महाबलः। सुग्रीवेण समीक्ष्याथ क्रोधसंरक्तलोचनः। १ अंगदस्य
चमूं भीमां क्षोभयामास मार्गणैः। स वानराणां मुख्यानामुत्तमांगानि राक्षसः। २ पातयामास कायेभ्यः फलं वृंतादिवानिलः। केषांचिदिषुभिर्बाहून् स्कंधांश्चिच्छेद राक्षसः ३
वानराणां सुसंरब्धः पार्श्वं केषां विदारयन्। तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः। ४ विषादविमुखाः सर्वे बभूवुर्गतचेतसः। निशम्य बलमुद्विग्नमंगदो राक्षसार्दितं ५
वेगं चक्रे महाबाहुः समुद्र इव पर्वसु। आयसं परिघं गृह्य सूर्यरश्मिसमप्रभं ६ समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत्। स तु तेन प्रहारेण महापार्श्वो विचेतनः। ससूतः
तितमः सर्गः। महोदर इति। महोदरस्त्वेन। महापार्श्वे विशेषणं। तेऽर्दिता इति। विषादविमुखाः विषादेन विमुखाः। ॥ स्यंदनात्तस्माद्विसंज्ञः प्रापतद्भुवि ७॥

यु० स्त्वङ्गदाजइति॥अङ्गदाजेन जांबवता सहितः जांबवत्संगवाक्षं चेत्वत्र स्वचक्रप्रमाणात्वात्॥ तस्यां गदइत्यादिश्लोकद्वयमेकंवाक्यं॥ द्दरास्थितस्य वधार्थं परिघं विक्षेपेतिसंबंधः॥
१२४ सत्वङ्गदाजनेजस्वी नीलांजनचयोपमः॥ निघ्नत्यसुमहावीर्यःस्वयूथान्मेघसन्निभान् ९ अगृह्णाद्गिरिशृंगाग्रं कुद्धःसुविपुलांशिलां॥ अश्वाञ्जघानतरसा बभं
जस्यंदनं चततः १० युद्धन्ताह्निवस्तमहापार्श्वो महाबलः॥ अङ्गदं वक्रमिर्वाणैश्च्यवहंशस्त्रविधात् ११ जांबवंतं त्रिभिर्बाणैराजघानस्तनांतरे॥ ऋक्षराजंगवाक्षं चश
घानवक्रमिःशरैः॥ १२ गवाक्षंजांबवं तंच सदृष्ट्वा शरपीडितौ॥ जग्राह परिघं घोरंगदःक्रोधमूर्छितः॥ १३ तस्यांगदः प्रकुपितो राक्षसस्यतमायसं॥ दूरस्थितस्य
परिघं विरश्मिसमप्रभं १४ द्वाभ्यांभुजाभ्यां संगृह्य भ्रामयित्वाच्चवेगवत्॥ महापार्श्वाय विक्षेपवधार्थं वालिनःसुतः॥ १५ सतुक्षिप्तोवलवतापरिघस्तस्यरक्षसः॥ ध
नुश्चसशरं हस्ताच्छिरस्त्राणमपातयत् १६ तंसमासाद्यतेजस्वी वालिपुत्रःप्रतापवान्॥ तलेनाभ्यहनत्क्रुद्धः कर्णमूलेसकुंडले १७ सतुक्रुद्धोमहावेगोमहापा
र्श्वोमहाद्युतिः॥ करेणैकेन जग्राह सुमहांतंपरश्वधं १८ तंतैलधूतं विमलंशैलसारमयंदृढं॥ राक्षसःपरमक्रुद्धोवालिपुत्रेन्यपातयत्॥ १९ तेनवामांसफलके भृशंप्र
त्यवपातितं॥ अंगदोमोक्षयामास सरोषःसपरश्वधं २० सवीरोवज्रसंकाशमंगदोमुष्टिमात्मनः॥ संवर्तयत्सुसंक्रुद्धःपितुस्तुल्यपराक्रमः॥ २१ राक्षसस्यस्तनाभ्याशे
मर्मज्ञोहृदयंप्रति॥ इंद्राशनिसमस्पर्शं समुष्टिं विन्यपातयत् २२ तेनतस्यनिपातेनराक्षसस्यमहामृधे॥ पफालहृदयंचाशु सपपातहतो भुवि २३ तस्मिन्विनिहते
भूमौ तत्सैन्यंसंप्रचुक्षुभे॥ अभवच्चमहाक्रोधः समरेरावणस्यतु २४ वानराणांप्रहृष्टानां सिंहनादश्चपुष्कलः॥ स्फोटयन्निवशब्देनलंकांसाट्टालगोपुरां २५
महेंद्रेणेवदेवानां नादःसमभवन्महान्॥ २६ अथेंद्रशत्रुस्त्रिदशालयानां वनौकसां तत्र महाप्रणादं॥ श्रुत्वा सरोषं युधिराक्षसेंद्रःपुनश्चयुद्धाभिमुखोवतस्थे २७
इत्यार्षेरामायणेवाल्मीकीये युद्धकांडेएकोनशततमःसर्गः॥ ॥ १ सवीरइति॥ संवर्तयत् समवर्तयत्॥ वानराणामित्यादिसार्धश्लोकमेकंवाक्यं॥ इंद्रेणसहदे
वानांनादइवअंगदेनसहितानांवानराणांसिंहनादःसमभवत्   इतिश्रीमहेश्वरतीर्थीये युद्धकांडे एकोनशततमःसर्गः॥ ९९॥ ॥ ९९ ॥ ॥ ॥ ॥ ॥९९ १२४

निहतानामित्यादिश्लोकत्रयस्य घातीतिकार्थस्य ष्टअवक्तनक्र। निहतानामिति रामलक्ष्मणौ हत्वा गत्वा निहतानाममात्यानां दुःखमपनेष्यामि नतु तौ गत्वा केवलं कोपाद्दुःखमपनेष्यामी
त्यतत्राह। रामवृक्षमिति। हन्मीति हन्तः। राम एव वृक्षो रामवृक्षः तं शत्रुमेहारूपा रामवृक्षमित्यर्थः। सीतापुष्पफलप्रदं। सीता पुष्पं यस्य सम्यक्चासौ फलप्रदश्चेति सीतापुष्पफलप्रदः तं। अन्वे

नो

महोदरमहापार्श्वौ हतौ दृष्ट्वा तु राक्षसौ। तस्मिंश्च निहते वीरे विरूपाक्षे महाबले। १ आविवेश महान्क्रोधो रावणं तं महामृधे। सूतं संचोदयामास वाक्यं चेदमुवाच ह। २ निह
तानाममात्यानां रुद्धस्य नगरस्य च। दुःखमेषोऽपनेष्यामि हत्वा तौ रामलक्ष्मणौ। ३। रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदं। प्रशाखा यस्य सुग्रीवो जाम्बवान्कुमुदो नलः। ४ मैंद
श्च द्विविदश्चैव अंगदो गंधमादनः। हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः। ५ स दिशो दश घोषेण रथस्यातिरथो महान्। नादयन्प्रययौ तूर्णं राघवं चाभ्यवर्तत। ६ पूरिता तेन
शब्देन सनदीगिरिकानना। संचचाल मही सर्वा सवराहमृगद्विपा। ७ ततो विस्फारयामास नु कुंजं महाबलः। तामसं सुमहाघोरं चकारास्त्रं सुदारुणं। ८ निर्ददाह कपीन्सर्वा
न्ते प्रपेतुः समंततः। उत्पपात रजो घोरं तैर्भग्नैः संप्रधावितैः। ९ नहि तत्सहितुं शेकुः ब्रह्मणा निर्मितं स्वयं। तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः। १० दृष्ट्वा भग्नानि शतशो
राघवः पर्यवस्थितः। ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीं। ११ स ददर्श ततो रामं तिष्ठंतमपराजितं। लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा। १२ आलिखंतमिवाका
शमवष्टभ्य महद्धनुः। पद्मपत्रविशालाक्षं दीर्घबाहुमरिंदमं। १३ ततो रामो महातेजाः सौमित्रिसहितो बली। वानरांश्च रणे भग्नानापतंतं च रावणं। १४
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकं। विस्फारयितुमारेभे ततः स धनुरुत्तमं। १५ महावेगं महानादं निर्दहन्निव मेदिनीं। रावणस्य च बाणौघै रामविस्फारितेन
च। १६ शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा। तयोः शरपथं प्राप्य रावणो राजपुत्रयोः। १७ स बभौ च यथा राहुः समीपे शशिसूर्ययोः। तमिच्छन्प्रथमं योद्धुं लक्ष्मणो
निशितैः शरैः। १८ मुमोच धनुरायम्य शरानग्निशिखोपमान्। तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता। बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत्। एकमेकेन
बाणेन त्रिभिस्त्रीन्दशभिर्दश। २० लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवं। पुनस्तु शरवर्षेण लक्ष्मणस्तस्य वारयत् २१

त्यनुवर्ण्यते। यस्य वृक्षस्य ये सुग्रीवादयः शाखा तान्हन्मीति संबंधः। शाखारूपसुग्रीवादीन्हत्वा दुःखमपनेष्यामीत्यर्थः। रावणस्येति। रावणस्य बाणौघैः रामविस्फारितेन च
यः शब्दो जनितः तेन पेतुरिति संबंधः। तयोः शरपथमिति। सः राजपुत्रयोः समीपे चंद्रसूर्ययोः समीपे राहुर्यथा तथा बभाविति संबंधः॥

अभ्यतिक्रम्येति शैलमिवाचलं स्थिरं रामम् आससादेति संबंधः वेरत्वरिति । अन्योन्यबाणवेगात् छिन्नोच्छिन्नबंतौ निवारयंतौ विति यावत् । अपराजितौ अप्रतिहतौ संततमिति । स
ततमाक्रांतं । महावेगैरिति । रौद्रपत्रैः सुवाजितैः गृध्रपत्रैर्ह्नेत्यादि सुवाजितैः संजातशोभनपक्षैः उभाविति । येन मंडलबाणेन । ततइति । संसक्तहृष्टः वाराणायो गासक्तहृष्टाः तेम
हामेघेति । अवध्यौ अप्रोवध्यतां जनयतः मेघत्वमजनयत्र उभाव आर्कात मित्येति । बाणरूपाणि उरगाणीशेषांरूप पञ्चशाफणबाणा इत्यर्थः । आशीविषीव्यत्ययः । तेषु शरातवाणा

अभ्यतिक्रम्य सौमित्रिं रावणः समितिंजयः । आससाद ततो रामं स्थितं शैलमिवाचलं २१ समं क्रोधात्समासाद्य रक्तो यमं रक्तलोचनः । व्यसृजच्छरवर्षाणि रावणो राघ
वोपरि २२ शरधारास्ततो रामो रावणस्य धनुश्युतां । दृष्ट्वैवापततीं शीघ्रं भल्लान्जग्राह सत्वरं २३ तान्शरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः । दीप्यमानान्महावेगान्क्रु
द्धानाशीविषोपमान् । २४ राघवो रावणं तूर्णं रावणो राघवं तदा । अन्योन्यं विविधैस्तीक्ष्णैः शरवर्षैर्ववर्षतुः २५ चेरतुश्च चिरं चित्रं मंडलं सव्यदक्षिणं । बाणवेगात्परिक्षिप्ता
वन्योन्यमपराजितौ । २६ तयोर्भूतानि वित्रेसुर्युगपत्संप्रयुध्यतोः । रौद्रयोः सायकं हस्तैर्यमांतकनिकाशयोः ॥ २७ संततं विविधैर्बाणैर्बभूव गगनं तदा । घनैरिवातपा
पाये विद्युन्मालासमाकुलं । २८ गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः । महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः ॥ २९ शरांधकारं तौ वीरौ चक्रतुः परमं तदा ।
गतेस्तं तपने चापि महामेघाविवोत्थितौ ३० बभूव तुमुलं युद्धमन्योन्यवधकांक्षिणोः । अनासाद्यमचिंत्यं च वृत्रवासवयोरिव ३१ उभौ हि परमेष्वासावुभौ युद्धविशार
दौ । उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः ॥ ३२ उभौ हि येन व्रजतः तेन तेन शरोर्मयः । ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ३३ ततः संसक्तहस्तस्तु रावणो लोक
रावणः । नाराचमालां रामस्य ललाटे प्रत्यमुंचत । ३४ रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभां । शिरसा धारयन्रामो न व्यथामभ्यपद्यत ३५ अथ मंत्रानपि जपन्रौद्रमस्त्र
मुदीरयन् । शरान्भूयः समादाय रामः क्रोधसमन्वितः । ३६ मुमोच च महातेजाश्चापमायम्य वीर्यवान् । ते महामेघसंकाशाः कवचे पतिताः शराः । अवध्ये राक्षसेंद्रस्य नव्य
थां जनयंस्तदा । ३७ ते भित्त्वा बाणरूपाणि पंचशीर्षाण्युरगाः । श्वसंतो विविशुर्भूमिं रावणप्रतिकूलिताः । ३८ पुनरेवाथ तं रामो रथस्थं राक्षसाधिपं । ललाटे परमा
स्त्रेण दिव्येनाक्रुद्धोऽभिनत ४० निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्छितः । आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार ह ४१ ॥ ॥

प्रतिकूलिताः रावणेन निवारिताः अपि रावणस्य कवचं भित्त्वा प्रवशंतः पंचशीर्षाः उरगाः इव भूमिं विविशुरिति संबंधः । पुनरेवेति । ललाटे ललाटदेशे दृढेषो इत्यर्थः । परमास्त्रेणास्त्रेण ।

इति श्रीरा॰ वा॰ युद्धकाण्डे [illegible] ॥ ॥

यहनक्षत्रेति।विद्युज्जिह्वोपमानविद्युदर्चिसहयान्।कण्ठाजिह्वालयार्चिपदन्निहलाश्रुवः॥ ॥इतिश्रीमद्रामतीर्थविरचितरामायणतत्त्वदीपिकायांयुद्धकांडेशततमःसर्गः॥॥
सिंहव्याघ्रमुखांश्चैवकंककाकमुखानपि।गृध्रश्येनमुखांश्चापिसृगालवदनांस्तथा॥४३॥ईहामृगमुखांश्चापिव्यादितास्यान्भयावहान्।पंचास्यांल्लेलिहानांश्चससृ
जेनिशितान्शरान्।शरान्खरमुखांश्चान्यान्वराहमुखसंस्थितान्।श्वानकुक्कुटवक्त्रांश्चमकराशीविषाननान्॥४४॥एतानन्यांश्चविविधान्ससर्जनिशितान्
रुणान्।रामंप्रतिमहातेजाः क्रुद्धःसर्पइवश्वसन्॥४५॥आसुरेणसमाविष्टःसोऽस्त्रेणरघुपुंगव।ससर्जास्त्रंमहोत्साहःपावकंपावकप्रभः॥४६॥अग्निदीप्तमु
खान्बाणांस्तथासूर्यमुखानपि।चंद्रार्धचंद्रवक्त्रांश्चधूमकेतुमुखानपि॥४७॥ग्रहनक्षत्रवर्णांश्चमहोल्कामुखसंस्थितान्।विद्यु
ज्जिह्वोपमांश्चापिससर्जविविधाञ्छरान्। ४८ तेरावणशराघोराराघवास्त्रसमाहताः।विलयंजग्मुराकाशेजग्मुश्चैवसहस्रशः॥४९ तदस्त्रंनिहतंदृष्ट्वारामेणाक्लिष्टकर्म
णा।हृष्टानेदुस्ततःसर्वेकपयःकामरूपिणः। ५० सुग्रीवप्रमुखावीराःपरिवार्यतुराघवम्।तदस्त्रंविनिहत्यराघवःप्रसह्यतद्रावणबाहुनिःसृतम्।मुदान्वितोदाशर
थिर्महात्मविनेदुरुच्चैर्मुदिताःकपीश्वराः ५२ इत्यार्षेरामायणेयुद्धकांडेशततमःसर्गः॥।तस्मिन्निहतेदृष्ट्वारावणोराक्षसाधिपः।क्रोधंचद्विगुणंचक्रेक्रोधाच्चास्त्रमनंतरं
मयेनविहितंरौद्रमन्यदस्त्रंमहाद्युतिः।उत्स्रष्टुंरावणोभीमंराघवायप्रचक्रमे १ ततःशूलानिनिश्चेरुर्गदाश्चमुसलानिच।कार्मुकाद्दीप्यमानानिवज्रसाराणिसर्वशः २
मुद्गराःकूटपाशाश्चदीप्ताश्चाशनयस्तथा।निष्पेतुर्विविधास्तीक्ष्णावाताइवयुगक्षये ४ तदस्त्रंराघवःश्रीमानुत्तमास्त्रविदांवरः।जघानपरमास्त्रेणगांधर्वेणम
हाद्युतिः ५ तस्मिन्प्रतिहतेऽस्त्रेतुराघवेणमहात्मना।रावणःक्रोधताम्राक्षःसोऽन्यदस्त्रमुदीरयत् ६ ततश्चास्त्राणिनिष्पेतुर्भास्वराणिमहांतिच।कार्मुकाद्भीमवेगस्य
दशग्रीवस्यधीमतः। ७ तैरासीद्गगनंदीप्तंसंपतद्भिःसमंततः।पतद्भिश्चदिशोदीप्तैश्चक्रैरिवरथैरिव। ८ तानिचिच्छेदबाणौघैश्चक्राणितुसराघवः।आयुधानिचचि
त्राणिरावणस्यचमूमुखे ९ तदस्त्रंतुहतंदृष्ट्वारावणोराक्षसाधिपः।विव्याधदशभिर्बाणैरामंसर्वेषुमर्मसु १० सविद्धोदशभिर्बाणैर्महाकार्मुकनिःसृतैः।रावणेनमहा
तेजानप्राकंपतराघवः। ११ ततोविव्याधगात्रेषुसर्वेषुसमितिंजयः।राघवस्तुसुसंक्रुद्धोरावणंबहुभिःशरैः। १२ एतस्मिन्नंतरेक्रुद्धोराघवस्यानुजोबली।लक्ष्मणःसा
यकान्सप्तजग्राहपरवीरहा १३ तैःसायकैर्महावेगैरावणस्यमहाद्युतिः।ध्वजंमनुष्यशीर्षंतुतस्यचिच्छेदनैकधा १४

वरबमितिकीशाखाबमंत्ररिवाबादिवकाईरैसिकियासंवखशोतत
किमबुमततश्राश।।मयैतेति।।।

सावेगिनेनिदुरासदादुःसहावेगिता।वेगंप्रापिता। एतस्मिन्नितिअभ्यवपद्यतविभीषणसमीपमागतइत्यर्थः।कीर्यमाणइति।महात्मनालक्ष्मणेनविमुखीकृतविक्रमः।विमुखीकृ
तविभीषणविषयपराक्रमइत्यर्थः।विभीषणमितिशेषः।एषेति।लोहितलक्षणाशत्रुरुधिरचिह्नानामिति।राघवंलक्ष्मणायस्वस्त्यस्तुत्वंहतोद्यमा।नष्टहननोद्योगामोघाभवेतिआपत
सारथेश्चापिवाणेनशिरोज्वलितकुंडलंजहारलक्ष्मणःश्रीमान्नैर्ऋतस्यमहाबलः। २५ तस्यवाणेनचिच्छेदधनुर्गजकरोपमंलक्ष्मणोराक्षसेंद्रस्यपंचभिर्निशितैःशरैः २६
नीलमेघनिभांश्चास्यसदश्वान्पर्वतोपमान्जघानाप्लुत्यगदयारावणस्यविभीषणः। २७ हताश्वाद्वेगवान्वेगादवप्लुत्यमहारथात्।क्रोधमाहारयत्तीव्रंभ्रातरंप्रतिरावणः २८
ततःशक्तिंमहाशक्तिःप्रदीप्तामशनीमिव।विभीषणायचिक्षेपराक्षसेंद्रःप्रतापवान्। २९ अप्राप्तामेवतांवाणैस्त्रिभिश्चिच्छेदलक्ष्मणः।अथोदतिष्ठत्संनादोवानराणांतथारणे
तथारणे ३० सापपातत्रिधाछिन्नाशक्तिःकांचनमालिनी।सविस्फुलिंगाज्वलितामहोल्केवदिवश्च्युता २१ ततःसंभाविततरांकालेनापिदुरासदां।जग्राहविपुलांशक्तिंदीप्य
मानांस्वतेजसा। २२ सावेगिताबलवतारावणेनदुरासदा।जज्वालसुमहातेजाशक्राशनिसमप्रभा। २३ एतस्मिन्नंतरेवीरोलक्ष्मणस्तंविभीषणं।प्राणसंशयमापन्नंतूर्ण
मभ्यवपद्यत। २४ तंविमोक्षयितुंवीरश्चापमायम्यलक्ष्मणः।रावणंशक्तिहस्तंवैशरवर्षैरवाकिरत्। २५ कीर्यमाणःशरौघेणविसृष्टेनमहात्मना।नप्रहर्तुंमनश्चक्रेविमु
खीकृतविक्रमः २६ मोक्षितंभ्रातरंदृष्ट्वालक्ष्मणेनसरावणः।लक्ष्मणाभिमुखस्तिष्ठन्निदंवचनमब्रवीत्। २७ मोक्षितस्तेबलःश्लाघीन्यस्मादेवंविभीषणः।विमुच्यराक्षसंश
क्तिस्त्वयीयंनिपात्यते। २८ एषातेहृदयंभित्त्वाशक्तिर्लोहितलक्षणा।मद्बाहुपरिघोत्सृष्टाप्राणानादाययास्यति २९ इत्येवमुक्त्वातांशक्तिमष्टघंटांमहास्वनां।मयेनमाया
विहितामघोघांशत्रुघातिनीं ३० लक्ष्मणायसमुद्दिश्यज्वलंतीमिवतेजसा।रावणःपरमक्रुद्धश्चिक्षेपचननादच ३१ साक्षिप्ताभीमवेगेनवज्राशनिसमस्वना।शक्तिरभ्यप
तद्वेगाल्लक्ष्मणंरणमूर्द्धनि ३२ तामनुव्याहरच्छक्तिमापतंतींसराघवः।स्वस्त्यस्तुलक्ष्मणायेतिमोघाभवहतोद्यमा ३३ रावणेनरणेशक्तिःक्रुद्धेनाशीविषोपमा।मुक्ताशू
रस्यभीतस्यलक्ष्मणस्यममज्जसा ३४ न्यपतत्सामहावेगालक्ष्मणस्यमहोरसि।जिह्वेवोरगराजस्यदीप्यमानामहाद्युतिः। ३५ ततोरावणवेगेनसुदूरमवगाढया।शक्त्यानि
र्भिन्नहृदयःपपातभुविलक्ष्मणः। ३६ तदवस्थंसमीपस्थोलक्ष्मणंप्रेक्ष्यराघवः।भ्रातृस्नेहान्महातेजाविषण्णहृदयोभवत् ३७ समुहूर्तमिवध्यात्वावाष्पव्याकुललोचनः।ब
तींतांशक्तिमनुव्याहरत्।शक्तिमुद्दिश्यव्याहृतवानित्यन्वयः।स्पर्शमात्रेणामस्मीकरणसामर्थ्ययुक्तायशक्तेः।अनेनरामवाक्येनमोघीकरणाद्रामस्यसत्यसंकल्पत्वंसूचितंरावणेनतिभक्तौ।
शूरस्यभीतस्येत्यत्रमुक्ताशूरस्यभीतस्येतिच्छेदः॥ ॥

नविषादस्य कालस्त्यादि श्लोकद्वयमेकं वाक्यं नामिनि। अयमर्दितं। मोलयिन्तं। मां कराभ्यामिति। विचकर्षबवमंजचेति संबंध। पराक्रमस्येत्यादि सार्द्धश्लोकमेकं सा कांक्षा दानश्चा
तकस्य धर्मान्तेमेघदर्शनमिव विविधतोमे मयाकालः संप्राप्तः अतः पापान्मादशग्रीवो व्यात्ता मिति योजना। कांक्षतस्तोककस्येति पाठे। स्तोककश्चातकः। स्तोककश्चातकः
समाविल्पमः। अस्मिन्निति प्रतिश्रुतोस्मि प्रतिज्ञातनामि। राज्यनाशमिति। राज्यनाशं राज्यनाशजनितं दुःखं वनेवासं वनवासजनितं दुःखं एवं पुनरत्रापि दुःखं विशेषणा निर्वैरं

नविषादस्य कालोयमिति संचिन्त्य राघवः। चक्रे स्य तु सुग्रीवं युद्धं रावणस्य वधेप्सितः ३९ सर्वयत्नेन महता लक्ष्मणं सनिवीक्षय वा सहदर्शतनिरामः शत्रुघ्नाभिर्मं महहचे ४०
लक्ष्मणं च विराद्ध्यं स्वप्नवृन्दाभिवान्वितां मयि प्रहितां शक्तिं रावणेन बलीयसा ४१ पतन्तीं हि श्रेष्ठान शोकार्वमर्दितं। अर्दितां श्चैव बाणौघैः ह्लिष्टह तिनां त्मा ४२
सौमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलं। तां कराभ्यां निपरामृश्य राघवः शक्तिमपीवहां ४३ बभंज समरे क्रुद्धो बलवान्विचकर्ष ह। तस्य निष्कर्षतः शक्तिं रावणेन बली
यसा ४४ शराः सर्वेषु गात्रेषु पातिता मे महात्मनः। अचिंतयित्वा ताना बाणान् समालिंग्य च लक्ष्मणं ४५ अब्रवीच्च हनूमंतं सुग्रीवं चैव राघवः। लक्ष्मणं परिवार्येह तिष्ठध्वं वानरो
त्तमाः ४६ पराक्रमस्य कालोयं संप्राप्तो मे चिरेप्सितः। पापात्मायं दशग्रीवो वध्यतां पापनिश्चयः ४६ कांक्षतः स्तोककस्येव घर्मान्ते मेघदर्शनं। अस्मिन्मुहूर्ते न चिरात्सत्यं प्रति
श्रृणोमि वः ४८ अरावणमरामं वा जगद्द्रक्ष्यथ वानराः। राज्यनाशं वने वासं दंडके परिधावनं ४९ वैदेह्याश्च परामर्शं रक्षोभिश्च समागमं। प्राप्तं दुःखं महद्घोरं क्लेशं च
निरयोपमं ५० अद्य सर्वमहं त्यक्ष्ये हत्वा तं रावणं रणे। यदर्थं वानरानीकं समानीतमिदं मया ५१ सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे। यदर्थं सागरः क्रांतः सेतुर्बद्धश्च सागरे
५२। सोयमद्य रणे पापश्चक्षुर्विषयमागतः। चक्षुर्विषयमागम्य नायं जीवितुमर्हति ५३ दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः। ५४। स्वस्थाः पश्यत दुर्धर्षा युद्धं वानरपुंगवाः
। आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ५५ अद्य पश्यंतु रामस्य रामत्वं मम संयुगे। त्रयो लोकाः सगंधर्वाः सदेवाः सर्षिचारणाः ५६ अद्य कर्म करिष्यामि यल्लोकाः सचराचराः।
सदेवाः कथयिष्यंति यावद्भूमिर्धरिष्यति ५७ समागम्य सदा लोके यथा युद्धं प्रवर्त्तितं। एवमुक्त्वा शितैर्बाणैस्तप्तकांचनभूषणैः ५८ आजघान दशग्रीवं रणे रामः समा
हितः। तथा प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः ५९ अभ्यवर्षत रामं वै धाराभिरिव तोयदः। रामरावणमुक्तानामन्योन्यमभिनिघ्नतां ६० शराणां च शराणां च बभूव तुमु
लस्वनः। विछिन्नाश्च विकीर्णाश्च रामरावणयोः शराः ६१

घोरं निरयोपमं। अचिंतयित्वा तानितदुःखं लक्ष्मणप्रहारजनितमित्यर्थः। च स्तरिति। दृष्टिविषस्य सर्पस्य दृष्टिं दृष्टिविषयं प्राप्तो मनरव अयं नो जीवितुं नार्हतीति संबंधः। अद्येति। राम
स्य रामत्वं स्वपतीति रामस्य तिरस्कृत्य पराक्रमेणादिरमापितं च सुष्प्यते। अद्य कर्मेति। सदेवाः सचराचराः लोका जनाः समागम्य संश्रूय यथा प्रवर्त्तितं युद्धं एवं पराक्रमं पावद्
भूमिर्धरिष्यति यावत्स्थास्यति तावत् कालं सदा नित्यशः यथा लोके कथयिष्यंति तथा तत्कर्म करिष्यामीति संबंधः॥।

रा॰यु॰ इतिश्रीयुद्धकांडेएकशततमःसर्गः॥ एवमगोर्वीर्येणानिःशोकमुदीरयन्नाजनयन्नाशीलितावद्धमिति।भ्रातोऽन्यालेभ्यःलज्जतीविनिःलज्जतीवपार्श्वेपरमार्थंभ्राता मि
१२७ त्वा विना भ्रा तंनिहतंदृष्ट्वेत्येतत्सर्वशोकं।विनिश्वसंतंनामंरघुतं तं।किंमेयुद्धेनेति।यद्भवतः कारणात। नष्टवीर्यंमहाबाहो इतिश्या मोक्तविशांविवर्णोमितिपारत्यपामः

श्रंतरिक्षात्पात्यानिपेतुर्धरणीतले॥ तयोर्ग्रहतलनिर्घोषोरामरावणयोर्महान् ६२ आसपन्सर्वभूतानांबभूवाद्भुतदर्शनः विकीर्यमाणाःशस्त्रानक्षत्रैभिर्महा
त्मना दीप्तधनुष्मता इंतः।मयासरद्द्रावसमेत्परावणोपयान्निनेनाभिहमेवसाहकः ६४ इत्यार्षेरामायणेयुद्धकांडेएकशततमःसर्गः॥ ॥ शक्त्याविनिहितं
दृष्ट्वा रावणेनबलीयसा।लक्ष्मणंसमरेशूरंशोणितौघपरिप्लुतं १ सदत्त्वातुमुलंयुद्धंरावणस्यदुरात्मनः विसृजन्नेवबाणौघान्सुषेणमिदमब्रवीत् २ एषरा
वणवीर्येणलक्ष्मणःपतितःक्षितौ सर्पवद्वेष्टतेममशोकमुदीरयन् ३ शोणिताद्रमिमंवीरंप्राणैरिष्टतरंमम।पश्यतोममकाशक्तिर्योद्धुंपर्याकुलात्मनः ४ अ
यंसमरश्लाघीभ्रातामेशुभलक्षणः।यदिपंचत्वमापन्नःप्राणैर्मेकिंसुखेनवा ५ लज्जतीवहिमेवीर्यंभ्रश्यतीवकराद्धनुः।सायकाव्यवसीदंतिदृष्टिर्बाष्पवशंगता ६
अवसीदंतिगात्राणिस्वप्नयानेनृणामिव।चिंतामेवर्द्धतेतीव्रामुमूर्षाचोपजायते ७ भ्रातरंनिहतंदृष्ट्वारावणेनदुरात्मना।निष्टनंतंतुदुःखार्त्तंमर्मण्यभिहतंभृ
शं ८ राघवोभ्रातरंदृष्ट्वाप्रियंप्राणंबहिश्चरं।दुःखेनमहताविष्टोध्यानशोकपरायणः ९ परंविषादमापन्नोविललापाकुलेंद्रियः।किंयुद्धेनमेकार्यंनैवप्राप्तो
नंसीतया १० भ्रातरंनिहतंदृष्ट्वालक्ष्मणंरणपांसुषु।किंनोराज्येनकिंप्राणैर्युद्धेकार्यंनविद्यते ११ पश्यायंनिहतःशेतेरणाग्रेनिलक्ष्मणः।इत्येवंविलपंतंतं
शोकविह्वलितेंद्रियं १२ विवेष्टमानंकरुणंनिःश्वसंतंपुनःपुनः।राममाश्वासयन्वीरःसुषेणोवाक्यमब्रवीत् १३ नमृतोयंमहाबाहोलक्ष्मणोलक्ष्मिवर्द्धनः
नत्वस्यविकृतंवक्त्रंनापिश्यामंननिष्प्रभं १४ सुप्रभंचप्रसन्नंचमुखमस्याभिलक्ष्यते।पद्मरक्ततलौहस्तौसुप्रसन्नेचलोचने १५ एवंनविद्यतेरूपंगतानां
नोविशांपते।दीर्घायुषस्तुयेमर्त्यास्तेषांतुमुखमीदृशं १६ नायंप्रेतत्वमापन्नोलक्ष्मणोलक्ष्मीवर्धनः।माविषादंकृथावीरसप्राणोयमरिंदम १७ आख्या
स्यतेप्रसुप्तस्यगात्राणिप्रश्वसितो।सोच्छ्वासंहृदयंवीरकंपमानंमुहुर्मुहुः १८

स्यात्कपिशेनीलरस्पमरः।माविषादमिति॥ आख्यास्यतेप्रसुप्तस्यमुहुर्मुहुः कंपमानंहृदयमेनं।सोच्छ्वासं प्राणा आख्यास्यते आख्योति॥ ॥ ॥ राम १२७

एवमुक्ते नि॥ अत्र द्वितीय हनूमत्संदेशप्रशस्त इत्युपवनं युद्धा। हनुशब्दोऽत्र तानवाची। तान नानाहनूमानिति। शल्याणि वि। सौम्य शीघ्रमिति। शैलं गत्वा समुद्धितं विष
कल्यकरणीमिति द्वितीयो विशल्यकरणी शब्दोऽत्र नावधनं विशल्यं क्रियते नयेति विशल्यकरणी तां आस्मिन्हि शैले संज्ञा नामेति। अनकार्थ॥ अंतःकरणप्रसादादिलिं

एवमुक्त्वा तु वाक्यज्ञः सुषेणो राघवं वचः। समीपस्थमुवाचेदं हनूमंतमिदं वचः १९ सौम्य शीघ्रमितो याहि शैलमोषधिपर्वतं। पूर्वं ते कथितो योऽसौ वीर जांब
वता शुभः २० दक्षिणे शिखरे तस्य जातामोषधिमानय। विशल्यकरणीं नाम विशल्यकरणीं शुभां २१ सवर्णकरणीं चापि तथा संजीवनीमपि। संधानकरणीं चापि ग
त्वा शीघ्रमिहानय २२ संजीवनार्थं वीरस्य लक्ष्मणस्य महात्मनः॥ इत्येवमुक्तो हनुमान् गत्वा चौषधिपर्वतं २३ चिंतामभ्यगमद्धीमानजानंस्ता महौषधीः।
तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः २४ इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः। अस्मिन्हि शिखरे जाता ओषधी तां सुखावहा २५ तर्केणावग
च्छामि सुषेणो ह्येवमब्रवीत्। अगृह्य यदि गच्छामि विशल्यकरणीमहं २६ कालात्ययेन दोषः स्याद्वैक्लव्यं च महद्भवेत्। इति संचिंत्य हनुमान् गत्वा क्षिप्रं महाब
लः २७ आसाद्य पर्वतश्रेष्ठं त्रिः प्रकंप्य गिरेस्तटं। फुल्लनानातरुगणं समुत्पाट्य महाबलः २८ गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत्। स नीलमिव जी
मूतं तोयपूर्णं नभस्थलात् २९ आपपात गृहीत्वा तु हनुमान् शिखरं गिरेः। अधोगायासपरिश्रांतः पूर्वं ततोऽधरोत्तरं ३० कृत्वा सुवेलं निर्वत्य पप्रच्छ नरराक्षसा।
समागम्य महावेगः संन्यस्य शिखरं गिरेः ३१ विश्राम्य किंचिद्धनुमान् सुषेणमिदमब्रवीत्। ओषधीर्नावगच्छामि ता अहं हरिपुंगव ३२ तदिदं शिखरं कृ
त्स्नं गिरेस्तस्याहृतं मया॥ एवं कथयमानं तं प्रशस्य पवनात्मजं ३३ सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः। विस्मितास्तु बभूवुस्ते सर्वे वानररा
क्षसाः ३४ दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करं॥ ततः संक्षोदयित्वा तामोषधिं वानरोत्तमः ३५ लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः। सशल्यः स समा
घ्राय लक्ष्मणः परवीरहा ३६ विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात्। तमुत्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणं ३७ साधु साध्विति सुप्रीताः सुषेणं प्रत्य
पूजयन्। एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा ३८ सस्वजे गाढमालिंग्य बाष्पपर्याकुलेक्षणः। अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा॥ ॥

गेनेत्यर्थः॥ सुषेणो मां यथाब्रवीत्। दक्षिणे शिखरे तस्य जातामोषधिमानयेति। सुषेणो मां यथा यथावत्तत्राब्रवीत्। अतः अस्मिन्नशैले संज्ञा तामोषधीमवगच्छामि मनः
षहर्षलिंगेन सुषेणापद्यार्थवाक्येन च अहमहौषधीनां नामीत्यर्थः॥ ।।

रा॰यु॰ न्तां प्रतिज्ञां प्रतिज्ञाय ते नि। अहं हत्वा दशग्रीवं सप्रहस्तं सबांधवं। राजानं त्वां करिष्यामि लंकायां राक्षसेश्वरं त्येवं रूपो॥ ॥इति श्रीमहेश्वरानीश्वीये युद्धकांडे द्विशततमः
१२८ सर्गः॥ ततः कोपवनवित्रांगरनिकूबरो पुगाधारदारुणकूबरात्कपुंगवः दस्यमाः ममरथेरि नि को वनापीडेः स्वर्णानेकोरैः श्वेतपकीर्तिकैः अथ चामरैः चामरं तथा कीर्तिक

दिग्ध्यात्वं वीरपश्यामि मालाप्तपुरागनां नहि मेऽत्र जीवितेनार्थः सीतया चापि लक्ष्मण ५० कोऽहि मे जीवितेनार्थस्त्वयि पंचत्वमागते। इत्येवं वदतस्तस्य राघवस्य
हात्मनः ५१ किंतु शिथिलयावाचा लक्ष्मणोवाक्यमब्रवीत्। नाथ नित्यां प्रतिज्ञाय पुरा सत्यपराक्रम ५२ लघुः कश्चिदिवाशक्तो नैवं त्वं वक्तुमर्हसि। नहि प्रति
ज्ञां कुर्वंति वितथां साधवोऽनघ ५३ लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनं। नैराश्यमुपयातुं हे तेन तत्त्वं मत्कृतेऽनघ ५४ वधेन रावणस्याद्य प्रतिज्ञामनुपा
लय। न जीवन्यातु ते शत्रुस्तव बाणपथं गतः। नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः॥ अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः यावदस्तं न याति एषः कृतक
र्मा दिवाकरः ५६ यदि वधमिच्छसि रावणसंख्ये यदि च कृतां तव वेच्छसि प्रतिज्ञां परिचर रागमहत्तनामि नाथमाप्ति कुरुष्व वचो मम शीघ्रम वीर ५७ इति श्रीम
युद्धकांडे द्विशततमः सर्गः॥ ॥ लक्ष्मणेनैवं तद्वाक्यं श्रुत्वा शराघवः। संदधे परवीरघ्नो धनुरादाय वीर्यवान् १ रावणाय शरान्घोरान् विससर्ज
चमूमुखे। अथान्यं रथमारुह्य रावणो राक्षसाधिपः २ अभ्यधावत काकुत्स्थं स्वर्भानुरिव भास्करं। दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ३ आजघान
महाशैलं धाराभिरिव तोयदः। दीप्तपावकसंकाशैः शरैः कांचनभूषणैः ४ निर्बिभेद रणे रामो दशग्रीवं समाहितः। भूमिस्थितस्य रामस्य रथस्थस्य च रक्ष
सः ५ न समं युद्धमित्याहुर्देवगंधर्वदानवाः। ततो देववचः श्रीमान्श्रुत्वा तेषां वचोऽमृतं। आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ६ रथेन मम भूमिष्ठं शीघ्रं याहि रघू
त्तमं। आहूय भूतले यान्तं कुरु मे हितमुत्तमं ७ इत्युक्तो देवराजेन मातलिर्देवसारथिः। प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ८ शीघ्रं यास्यामि देवेंद्र सारथ्यं च क
रोम्यहं। ततो हयैश्च संयोज्य हरितैः स्यंदनोत्तमं। ततः कांचनचित्रांगः किंकिणीशतभूषितः ९ तरुणादित्यसंकाशो वैडूर्यमयकूबरः। सदश्वैः कांचनापीडैर्युक्तः श्वेतप्रकीर्ण
कैः १० हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः। रुक्मवेणुध्वजः श्रीमान्देवराजरथो वरः ११ देवराजेन संदिष्टो रथमास्थाय मातलिः। अभ्यवर्तत काकुत्स्थमवती
र्य त्रिविष्टपात् १२ अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः। प्रांजलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः १३ सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते। दत्तस्तव महा राम
सत्व श्रीमन् शत्रुनिबर्हण ११ इदमैन्द्रं महच्चापं कवचं चाग्निसंनिभं। शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता। १४ आरुह्येमं रथं वीर राक्षसं जहि रावणं। मया सार १२८
थिना राम महेंद्र इव दानवान्॥१३॥ ॥
सित्पमाः हरिभिरिमि रथमिः हरि नवुर्णः देवराजरथोवरः योन्निनिरोजः तमाहरो हेतुन्तेरण संवध्य ते। इत्यमिनिाम्य
इत्यमि प्यब्रवज्यते। एतच्चापादि सुपथापोष्य लिंगव्यत्यय वचनव्यत्ययं च विपरिणामेन योज्यं॥ ॥

रत्युक्त्वति॥ संपरिक्रम्य प्रदक्षिणी कृत्वा तेदीमवरनारति॥ व्यादिनावरनारति व्यादितास्याः व्यानवरनाः नोदृष्टेनिश्वाउ ... प्रयुयुजे॥ ननइति॥ शि॥ विश
माः॥ चिच्छेदेति॥ केतुमुद्दिश्य केतुमुद्दिश्य प्रयुद्दिश्यापात्रसीकृत्य केतुं चिच्छेदेरत्यर्थः रथानारथावपयकेतदंजाना केतुंपानवितापदा॥ केतुंकेतुरूपदंजं
रत्युक्तः संपरिक्रम्य तमभिवाद्य चाश्रारुरोह तदा रामो लोकानन्दरूपा विराजयन १५ तदृष्ट्वा कृतेबुद्धं द्वैरथं शेमहर्षयः॥ राममप्यच महाबाहो रावणस्य च रक्षसः
१६ गांधर्वेणा च गांधर्वं दैवं देवेन राघवः॥ अस्त्रं राक्षसराजस्य जघान परमास्त्रवित १७ अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः॥ ससर्ज परमक्रुद्धः पुनरेव निशाच
रः॥ १८ ते रावणधनुर्मुक्ताः शराः कांचनभूषणाः॥ अभ्यवर्तंत काकुस्थं सर्पा भूत्वा महाविषाः १९ ते दीप्तवदना दीप्तं वमंतो ज्वलनं मुखैः॥ राममेवाभ्यवर्तंत
व्यादितास्या भयावहाः २० तैर्वासुकिसमस्पर्शैः दीप्तभोगैर्महाविषैः॥ दिशश्च संतताः सर्वाः प्रदिशश्च समावृताः २१ तान्दृष्ट्वा पन्नगान्रामः समापतत आ
हवे॥ अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहं २२ ते राघवधनुर्मुक्ता रुक्मपुंखाः शिखिप्रभाः॥ सुपर्णाः कांचना भूत्वा विचेरुः सर्पशत्रवः २३ ते तान्सर्वा
राजघुः सर्परूपान्महाजवान्॥ सुपर्णरूपा रामस्य विशिखाः कामरूपिणः २४ अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः॥ अभ्यवर्षत्तदा रामं घोराभिः
शरवृष्टिभिः २५ ततः शरसहस्रेण राममक्लिष्टकारिणं॥ अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत २६ चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः॥ पातयि
त्वा रथोपस्थे रथात्केतुं च कांचनं २७ ऐंद्रानपि जघानाश्वान्शरजालेन रावणः॥ तदृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः॥ २८ विषेदुर्देवगंधर्वाः दान
वाश्चारणैः सह॥ राममार्त्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः २९ व्यथिता वानरेंद्राश्च बभूवुः सविभीषणाः॥ रामचंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुना ३० प्राजापत्यं च न
क्षत्रं रोहिणीं शशिनः प्रियां॥ समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ३१ सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः॥ उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाक
रं ३२ शस्त्रवर्णः सुपरुषो मंदरश्मिर्दिवाकरः॥ अदृश्यत कबंधांगः संसक्तो धूमकेतुना ३३ कौसलानां च नक्षत्रं व्यक्तमिंद्राग्निदैवतं॥ आक्रम्यांगारकस्त
स्थौ विशाखामपि चांबरे ३४ दशास्यो विंशतिभुजः प्रगृहीतशरासनः॥ अदृश्यत दशग्रीवो मैनाक इव पर्वतः ३५ निरस्यमानो रामस्तु दशग्रीवेण रक्षसा॥ नाश
को दभिसंधातुं सायकान्रणमूर्धनि ३६ स कृत्वा भ्रुकुटीं क्रुद्धः किंचित्संरक्तलोचनः॥ जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ३७ इत्यार्षे रामायणे वाल्मीकीये युद्धकां
रथा नारथोपस्थे पातयित्वा रामस्य तत्कृतवान् दर्शनिस संजातानि दिव्यानि भौमानि वैकृतान्याह रामचंद्रमसमित्यादिना॥ प्राजापत्यं च नक्षत्रं रोहिणीं विंशत्तमः सर्गः॥ ॥
शिरोधिजा पतिरेव तानस्त नक्षत्रारोहिणी॥ शहववर्णाइति॥ शहववर्णः असितवर्णपामः कोसलानामिति॥ इंद्राग्निदैवतं॥ विशाखा नक्षत्रमिति संबंधः॥ स कृत्वेति क्रुद्धः स
रामः सुमहाक्रोधं जगाम सुमहाक्रोधं प्रापेत्यर्थः॥ निर्दहन्निवेपरीभं रावणस्य पराक्रममभिनिमित्तं इति युद्धकांडे विंशततमः सर्गः॥ ॥ ॥

रा.यु. औत्पातिकानीनिमित्तानि कानि।।तस्यात्कत्वकानि नवविदान वेनितालोकसंवर्त मं स्थितं।लोकसंवर्तस्या पनपस्या संस्थितं।।संस्थानं।युक्यातमन थो क्तो।।क्तुरितिविग्रह
१२९ मागताः।।एमराक्षापक्षपानात्।।वराः अक्षुराश्च पाप्स्यो कलहायमानाइत्यर्थः।पक्षच्छवता प क्षच्छाः संतः।कृतैः स्फुलस्याङ्गिकृशमयशिखैः।कृत्तमामितित्वानि हत्वानि स्वा
नीरहत्सांसमकरिष्यामि।।होषभिः समं करिष्यामीत्यर्थः।।स्फूनेयंचलसाहत्यादिसार्द्धश्लोकश्चयमपत्वा मत वार्थ मक्त।।स्फलीपपिनि।।मयाऽऽघतः स्फुन्तुं तवधा लम हायमधा
तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः।सर्वभूतानि वित्रेसुः प्राकंपत च मेदिनी १ सिंहशार्दूलवाञ्छैलः संचचालाचलद्रुमः।बभूव चातिक्षुभितः समुद्रः सरितां प
तिः २ घनाश्च खरनिर्घोषा गगने परुषस्वनाः।औत्पातिकाश्च नर्दन्त समन्तात्परिचक्रमुः ३ रामं दृष्ट्वा सुसंक्रुद्धमुत्पातांश्च सुदारुणान्।वित्रेसुः सर्वभूतानि रावणस्या
भवद्भयं ४ विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः।ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ५ ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितं।नानाप्रहरणैर्भीमैः शूरयोः
संप्रयुध्यतोः ६ ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः।प्रेक्षमाणा महायुद्धं वाक्यं भक्त्या प्रहृष्टवत् ७ दशग्रीवं जयेत्याहुरसुराः समवस्थिताः।देवा राममथोचुस्ते त्वं
जयेति पुनः पुनः ८ एतस्मिन्नन्तरे क्रोधाद्राघवस्य स रावणः।प्रहर्तुकामो दुष्टात्मा स्पृशन्प्रहरणं महत् ९ वज्रसारं महानादं सर्वशत्रुनिबर्हणं।शैलशृङ्गनिभैः कूटैश्चितं दृष्टि
भयावहं १० सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमं।।अतिरौद्रमनासाद्यं कालेनापि दुरासदं ११ त्रासनं सर्वभूतानां दारणं भेदनं तथा।प्रदीप्त इव रोषेण शूलं
जग्राह रावणः १२ तच्छूलं परमक्रुद्धो जग्राह युधि वीर्यवान्।।अनीकैः समरे शूरै राक्षसैः परिवारितः १३ समुद्यम्य महाकायो ननाद युधि भैरवं।संरक्तनयनो रोषा
त्स्वसैन्यमभिहर्षयन्।पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा।प्राकंपयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः १४ अतिकायस्य नादेन तेन तस्य दुरात्मनः।सर्वभू
तानि वित्रेसुः सागरश्च प्रचुक्षुभे १६ स गृहीत्वा महावीर्यः शूलं तद्रावणो महत्।विनद्य सुमहानादं रामं सुखे।त्वां निहत्य रणश्लाघिन्करोमि तरसा समं १९ नि
नादं रामं परुषमब्रवीत् १७ शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः।तव भ्रातृसहायस्य सद्यः प्राणान्हरिष्यति १८ रक्षसामद्य शूराणां निहतानां चमूमुखे।त्वां
निहत्य रणश्लाघिन्करोमि तरसा समं १९ तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव।एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः २० तद्रावणकरान्मुक्तं विद्यु
ज्ज्वालासमाकुलं।।अष्टघंटं महानादं वियद्गतमशोभत २१ तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनं।।ससर्ज विशिखान्रामश्चापमायम्य वीर्यवान् २२
त्रैलक्ष्मणाय महायस्य वानरस्य प्रहस्येत्यर्थः।सद्यः प्राणान्हरिष्यतीति संबंधः।रक्षसामित्यादि सार्द्धश्लोकमेकं वाक्यं।शूलेनेत्यपि पाठः।त्वां न निहन्मि अतस्तं रा
तिष्ठ किं त्वां निहत्य आगमिष्यामीत्यर्थः।हत हि समस्तोरिमिश्रा तोरेवमयं निहतानां शूराणां रक्षसां तीयार्थेष्ववः।समं करोमि ताननरानि निशमनानि हतराक्ष १२९
सप्रनिकारः यर्थवानराणामिष्यामीति भावः।।तदिति।।विद्युज्ज्वालासमाकुलं विद्युत्सहशज्वाला विद्युज्ज्वाला तासमाकुलं।।।

निर्बिभेद नतो बाणो रिरिनि बाणोः । बाणावद्भिः शाखापमानैरिस्पर्धः २८ । निर्बिभेदेति । पत्रिभिः पत्रवद्भिः ॥ ३ ॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे चतुःशततमः स
आवर्तेन शरौघेण वारयामास राघवः । उत्पतन्तं सुवर्णाग्रैर्जलौघैरिव वासवः २३ निर्दहाम नाद्याणान् रामकर्मसु क निशिता नाराचास्य महाबलः
पतंगानिव पावकः २४ नाद्दृष्टा भस्मसाद्भूतान् स्थूलतस्पर्शान् तु तिनाम । साधकानं नतरि हस्यान राघवः क्रोधमाहरत् २५ ॥ सनतामातनिनाती नोश
क्तिं वासवनिर्मितां । जग्राह परमक्रुद्धो राघवो रघुनंदनः २६ सा तोलिता बलवता शक्तिर्घंटाकृतस्वना । नभः प्रज्वालयामास युगांतोल्केव सप्रभा सा क्षिप्ता राक्ष
सेंद्रस्य तस्मिन् शूले पपात ह । भिन्नः शक्त्या महान् शूलो निपपात गतद्युतिः २७ ता सुसाध्विनिध्ननानि पृश्चाश इरष्टन मे । निर्बिभेद ततो बाणो हया
नस्य महाजवान् । २८ । राम स्तीक्ष्णैर्महावेगैर्वज्रकल्पैरजिह्मगैः । निर्बिभेदोरसि तदा रावणं निशितैः शरैः । राघवः परमायत्तो ललाटे पत्रिभिस्त्रि
भिः ३० स शरैर्भिन्नसर्वांगो गात्रप्रस्रुतशोणितः । राक्षसेंद्रः समूहस्थः फुल्लाशोक इवाबभौ ३१ स रामबाणैरतिविद्धगात्रो निशाचरेंद्रः
न नार्द्रगात्रः । जगाम खेदं च समाजिमध्ये क्रोधं च चक्रे सुभृशं दशास्यः ३२ इत्यार्षे रामायणे युद्धकांडे चतुःशततमः सर्गः ॥ ॥ स तु तेन प्रहारे
णा काकुत्स्थेनार्दितो भृशं । रावणः समरश्लाघी महाक्रोधमुपागमत् १ स दीप्तनयनो मर्षाच्चापमुद्यम्य वीर्यवान् । अभ्यर्दयत्सुसंक्रुद्धो राघवं प
रमाहवे २ बाणधारासहस्रैस्तु समरे स्थितः । गभस्तीनिव सूर्यस्य प्रतिनयारवीर्यवान् ५ ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः । निनया
नो राम क्रुद्धो राघवस्य महात्मनः ६ स शोणितं समादिग्धः समरे लक्ष्मणाग्रजः । दृष्टः कृत्तश्चारण्ये सुमहान् किंशुको द्रुमः ७ शराभिघातसंरब्धः
सोऽभिजग्राह सायकान् । काकुत्स्थः सुमहातेजा युगांतादित्यवर्चसः ८ ततोऽन्योन्यं सुसंरब्धावुभौ तौ रामरावणौ । शरांधकारे समरे नोपलक्षयता
न दा ९ ततः क्रोधसमाविष्टो रामो दशरथात्मजः । उवाच रावणं वीरः प्रहस्य परुषं वचः १० मम भार्या जनस्थानादज्ञानाद्राक्षसाधम । हृता ते वि
वशा यस्मात्तस्मात्त्वं नासि वीर्यवान् ११ मया विरहितां दीनां वर्तमानां महावने । वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे १२ स्त्रीषु शूर वि
नाथासु परदाराभिमर्शक । कृत्वा कापुरुषं कर्म शूरोऽहमिति मन्यसे १३ भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित । दर्पान्मृत्युमुपादाय शूरोऽहमि
ति मन्यसे ॥ १४ ॥ ॥
र्गः ॥ ॥ बाणधारेति ॥ अंबरात्तोयद इव सरावाणः । तटाकमतीयं बाणैः बाणानि शाश्वायंतदनिवारणः तैर्बाणधारासहस्रैः राघवं पूरयत् । अपूरयदिति
संबंधः ॥ ततरति । अन्योन्यनोपलक्षयतामिति संबंधः । ममेति । अज्ञानादविवेकात् मम अदर्शनात् ॥ ॥

रा॰यु॰ भूरितोनिमूरेणोत्पाद्ये पोक्तिः का पुरुषं का पुरुषमं वधिष्यसि वलश्लाघनीयमित्याशयः। निरुक्तोक्तिः। उक्तेकेनेति। अभिपन्नस्य। अनुष्ठितस्यापि दमेनेति
न वीत। पिपासया बाणांशल्यांतरोत्थितं। बाणशल्यं तत्तद्विवरोत्थितं। बिम्बवेति। अवलम्बनविषयमरणं। द्विगुणं बध्नेत्यर्थः॥ हरीणामिति
१२०
भ्रंशनाद्धनदस्यास्त्राद्बलैः समरेिनेन वाश्लाघनीयं महत्कर्म यशस्यं च कृतं त्वया १५ उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च। कर्मणः प्राप्नुही
दानीं तस्याद्य सुमहत्फलं १६ शूरोहमिति चात्मानमवगच्छसि दुर्मते नैव लज्जास्ति ते सीतां चोरवद्व्यपकर्षतः १७ यदि मत्सन्निधौ सीता धर्षि
ता स्यात्त्वया बलात्। भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः १८ दिष्ट्यासि मम दुष्टात्मन् चक्षुर्विषयमागतः। अद्य त्वां सायकैस्तीक्ष्णैर्नया
मि यमसादनं १९ अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलं। क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु २० निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रा
वण। पिबन्तु रुधिरं तर्षाद्बाणशल्यान्तरोत्थितं २१ अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते। कर्षन्त्वन्त्राणि पतगा गरुत्मन्त इवोरगान्
२२ दृष्ट्वा तं महतः कालान्तदिप्याद्विपदं गतः। अथ चक्रोध विमोक्ता मिसीताहरणात्प्रभो २३ इत्येवं स वदन्वीरो रामः शत्रुनिबर्हणः। राक्षसेन्द्रं स
मीपस्थं शरवर्षैरवाकिरत् २४ बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे रामस्यास्त्रबलं चैव शत्रोर्निधनकांक्षिणः २५ प्रादुर्बभूवुरस्त्राणि सर्वा
णि विदितात्मनः। प्रकर्षाच्च महातेजाः शीघ्रहस्ततरोभवत् २६ शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः। भूय एवार्दयद्रामो रावणं राक्ष
सान्तकृत् २७ हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात्। हन्यमानो दशग्रीवो विघूर्णहृदयोभवत् २८ यदा च शस्त्रं नारेभे न व्यकर्षच्छरासनं
नास्य प्रत्यकरोद्वीर्यं विक्लवेनान्तरात्मना २९ क्षिप्ताश्चापि शरास्तेन शस्त्राणि विविधानि च। मरणार्थाय वर्तन्ते मृत्युकालोभ्यवर्तत ३० सूत
स्तु रथनेतास्य तदवस्थं निरीक्ष्य तं। शनैर्युद्धादसंभ्रान्तो रथं तस्यापवाहयत्। ततो रामशराभिभग्नो रावणो राक्षसेश्वरः। निरस्तविक्रमः संख्ये शोच्या
तं पपात सः ३२ ततः अश्मवृष्टिं बाणौघैः स्यन्दनस्थं निरीक्ष्य तं। तस्माद्रणाद्योवाह रावणं हतपौरुषं ३३ रथं च तस्याथ जवेन सारथिर्निवार्य भी
मं जलदस्वनं तदा। जगाम भीत्या समरान्महीपतिं निरस्तवीर्यं पतितं समीक्ष्य॥ ॥ इत्यार्षे रामायणे युद्धकाण्डे पंचोत्तरशततमः सर्गः॥ ॥ एप
राघवात्। राघवस्यापि घूर्णितहृदयो विक्लवहृदय॥ यदा चेत्यादिश्लोकद्वयमेकं वाक्यं। विक्लवेन विवशो नाशकत् शस्त्रप्रयोगे शरासनं च न व्यकर्षत्। यदा श्र १३०
स्य रामस्य वीर्यं च न प्रत्यकरोत्तदापि न जघानेति शेषः। पराक्रमवार्थाय निहन्तपेपरानया पातिताः शराः शस्त्राण्ययदाकर्तेति तदा मृत्युकालेऽभिवर्तन्तः
न स्वरावणस्य प्रसक्तः। यमपवाहयदिति निर्वेदः॥ ॥ इति युद्धकाण्डे पंचशततमः सर्गः॥ ॥

नदिदिति। तदित्यकाथहनं तदित्रुत्याभिःपताकाभिर्गहनं संकीर्णं दर्शितेंद्रायुधायुधं दर्शितानिंद्रायुधानि। इंद्रायुधसदृशानि आयुधानि येन तं। महद्दे तिवज्राभिमृष्टस्य वज्राभिह
तस्याघयेति। अपसव्यं यथा तथा अपतता नेनेति संबंधः। तदिति। तदश्वमादमातिष्ठ प्रत्युद्गच्छ। अविक्लवमिति। अविक्लवमित्यादिक्रियाविशेषणानि। अविक्लवं अक्रांतं। असंभ्रांतं। भ्रांतर
हितं। अव्यग्रहृदयेक्षणं अव्यग्रे हृदयदर्शने। रश्मिसंचारनियते। रश्मीनां संचारे आकुंचनप्रसारणे नियतं यथा तथा। रथं प्रचोदयेति संबंधः। कामिति। न समाधेयः। नोपदेष्टव्यः। अपस
व्यमिति। चक्रोत्क्षिप्तेन रथचक्रोत्क्षिप्तेन। व्यवधूनयत आछादयामास। धर्षणामर्षित इति। रोषेण सहर्षयेयं युद्धार्थं लंघयन्। अलंघयन् गच्छन्नाकुंचनित्यर्थः। ऐंद्रं शरासनं ऐंद्रं परमे

तडित्पताकागहनं दर्शितेंद्रायुधायुधं। शरधारा विसृजंतं धारासारमिवांबुदं। ६ सहस्रमेघसंकाशं आपतंतं रथं रिपोः। गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृ
शस्वनं। ७ विस्फारयित्वा वेगेन बालचंद्रानतं धनुः। उवाच मातलिं रामः सहस्राक्षस्य सारथिं ८ मातले पश्य संरब्धमापतंतं रथं रिपोः। यथापसव्यं
पतता वेगेन महता पुनः ९ समरे हंतुमात्मानं तथानेन कृता मतिः। तदप्रमादमातिष्ठ प्रत्युद्गच्छ रथं रिपोः। १० विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितं। अ
विक्लवमसंभ्रांतमव्यग्रहृदयेक्षणो ११ रश्मिसंचारनियतं प्रचोदय रथं द्रुतं। कामं न त्वं समाधेयः पुरंदररथोचितः। १२ युयुत्सुरहमेकाग्रः स्मारये त्वां न शि
क्षये। परितुष्टः स रामस्य तेन वाक्येन मातलिः। १३ प्रचोदयामास रथं सुरसारथिसत्तमः। अपसव्यं ततः कुर्वन् रावणस्य महारथं १४ चक्रोत्क्षिप्तेन रजसा रावणं व्य
वधूनयत। ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः। १५ रथप्रतिमुखं रामं सायकैरवधूनयत। धर्षणामर्षितो रामो धैर्यं रोषेण लंघयन्। १६ जग्राह सुम
हावेगमैंद्रं युधि शरासनं। शरांश्च सुमहावेगान् सूर्यरश्मिसमप्रभान्। १७ तदुपोढं महद्युद्धमन्योन्यवधकांक्षिणोः। परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः १८
ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः। समीयुर्द्वैरथं द्रष्टुं रावणक्षयकांक्षिणः। १९ समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः। रावणस्य विनाशाय राघवस्य
जयाय च २० ववर्ष रुधिरं देवो रावणस्य रथोपरि। वाता मंडलिनस्तीव्रा ह्यपसव्यं प्रचक्रमुः। २१ महद्गृध्रकुलं चास्य भ्रममाणं नभस्तले। येन येन रथो या

स्पर्यं ज्ञति धातोः निजायुधं जग्राहेत्यर्थः। तत इति। ततो देवा इति। द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धं द्वैरथं। ववर्षेति। मंडलिनो वाताः वात्याः। ति तेन तेन प्रधावति २२॥।
त्यर्थः। महदिति। गृध्रकुलस्य रावणसहागमनेन रावणस्य मरणं सूच्यते। शकुनार्णवे। आमंत्र कृत्यो निकटे चरंति गृध्रादयो मूर्ध्नि गृहे यदि भावपति॥ ॥

यु.
१३५

संध्ययेति। जपापुष्पनिकाशया संध्यया आकालिक्येति शेषः। लंकावृता। अत एव वसुंधरा लंकापर्यन्तभूमिः। रात्रावपि नातिसंप्रदीप्तेव दिवसेपि संप्रदीप्ता दृश्यत इत्यर्थः। सनिर्घाता इ-
ति। विषादयन्। विषादयंत्यः। ते रक्षांसि। ता निरक्षांसि। रक्षासामिति। प्रहरतां रक्षसां बाहव इव। पर्वतस्य धातव इव। ता आदिरूपाः। सूर्यस्य रश्मयः। रावणस्यांगे पतिताः सन्तो दृश्यन्त इ

संध्यया चावृता लंका जपापुष्पनिकाशया। दृश्यते संप्रदीप्तेव दिवसेपि वसुंधरा। २३ सनिर्घाता महोल्काश्च संप्रपेतुर्महास्वनाः। विषादयंस्ते रक्षां-
सि रावणस्य तदाहिता २४ रावणश्च यतस्तत्र चचाल वसुंधरा। रक्षसां च प्रहरतां गृहीता इव बाहवः २५ ताम्राः पीता इव श्वेताः पतिताः सूर्यरश्मयः
दृश्यंते रावणस्यांगे पर्वतस्येव धातवः। २६ गृध्रैरनुगताश्चास्य वमंत्यो ज्वलनं मुखैः। प्रणेदुर्मुखमीक्षंतः संरब्धमशिवं शिवाः। २७ प्रतिकूलं ववौ वायू
रणे पांसून्समुत्किरन्। तस्य राक्षसराजस्य कुर्वन्दृष्टिविलोपनं। २८ निपेतुरिंद्राशनयः सैन्ये चास्य समंततः। दुर्विषह्यस्वरा घोरा विना जलधरोदयं। २९
दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः। पांसुवर्षेण महता दुर्दर्शं च नभोभवत् ३० कुर्वंत्यः कलहं घोरं सारिकास्तद्रथं प्रति। निपेतुः शतशस्तत्र दारु-
णं दारुणारुताः ३१ जघनेभ्यः स्फुलिंगांश्च नेत्रेभ्योश्रूणि संततं। मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ३२ एवंप्रकारा बहवः समुत्पाता भयावहाः।
रावणस्य विनाशाय दारुणाः संबभूविरे ३३ रामस्यापि निमित्तानि सौम्यानि च शिवानि च। बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः। ३४ निमित्तानि
हि सौम्यानि राघवः स्वजयाय च। दृष्ट्वा परमसंहृष्टो हतं मेने स रावणं। ३५ ततो निरीक्ष्यात्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः। जगाम हर्षं
च परां च निर्वृतिं चकार युद्धेभ्यधिकं च विक्रमं। ३६ इति श्रीमद्रामायणे युद्धकांडे अष्टोत्तरशततमः सर्गः। ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा। सुमहद्वै-
रथं युद्धं सर्वलोकभयावहं १ ततो राक्षससैन्यं च हरीणां च महद्बलं। प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत २ संप्रयुद्धौ ततो दृष्ट्वा बलवन्नरराक्षसौ। व्याक्षि-
प्तहृदयाः सर्वे परं विस्मयमागताः। ३ नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः। तस्थुः प्रेक्ष्य च संग्रामं नाभिजग्मुः परस्परं। ४ रक्षसां रावणं चापि वानराणां

तिसैवं घ। इ श्रीमद्युद्धकांडे अष्टोत्तरशततमः सर्गः। ततदिति। निश्चेष्टं समतिष्ठत। अत्यद्भुतयुद्धदर्शनेति भावः। संप्रयुद्धाविति। संप्रयुद्धौ। संप्रयोगं युद्धं कुर्वन्तौ ते नाने निश्चेष्टेहपल-
क्षिताः संवृत्ताः। समीपमागच्छेतां। व्यग्रैः। व्याप्तैरपि विस्मयात् परस्परं नाभिजग्मुः प्रहर्तुमिति शेषः। परस्परमिति। चित्रमिव। चित्रलिखितमिव॥ ॥ १३५

तोऽस्त्विति।हतबुद्धी।निश्चयबुद्धी।निश्चयप्रकारमेवाह।जेतव्यमिति।जयोवश्यंभावीत्यर्थः।तेशरारति।रथशक्तिं।शक्तेरथं।हृदंरथमितियावत्।परामृश्यास्पृष्ट्वा।ध्वजस्येति।अ
मर्षितात्।असहनात्।तद्धर्षमिति।राघवरथंविमुच्य।क्रोधातिशयेनप्रयुक्तात्।प्रकृष्टपूरितमरथमतिक्रम्य।वानरबलेऽभवदितिसंबंधः।निःसंबंधः।निः[illegible]संगरहितेनव्यायच्छमानवि

तोत्ततत्रनिमित्तानिदृष्ट्वाराघवरावणौ।कृतबुद्धीस्थितावेतौयुद्धायनिर्भीतवत् ६ जेतव्यमितिकाकुत्स्थोमर्तव्यमितिरावणः।धृतौस्ववीर्यसर्वस्वंयुद्धेदर्शयतांतदा ७ एवंजयं
तःपश्यंस्तेदेवाःमर्षिगणास्तदा।ततःक्रोधाद्दशग्रीवःशरान्संधायवीर्यवान्।मुमोचध्वजमुद्दिश्यराघवस्यरथेस्थितं ८ तेशरास्तमनासाद्यपुरंदररथशक्तिंपरामृश्यनिपेतुर्धर
णीतले ९ ततोरामोपिसंक्रुद्धश्चापमाकृष्यवीर्यवान्।कृतप्रतिकृतंकर्तुंमनसासंप्रचक्रमे १० रावणध्वजमुद्दिश्यमुमोचनिशितंशरं।महासर्पमिवासह्यंज
लंतमिवतेजसा ११ रामश्चिक्षेपतेजस्वीकेतुमुद्दिश्यसायकं।जगामसमहींभित्वादशग्रीवध्वजंशरः १२ सनिकृत्तोपतद्भूमौरावणस्यंदनध्वजः।ध्वजस्योन्मथनंदृष्ट्वा
रावणःसुमहाबलः १३ क्रोधजेनाग्निनासंख्येप्रदीप्तइवपावकः।संप्रदीप्तोभवत्क्रोधादमर्षात्प्रदहन्निव।सरोषवशमापन्नःशरवर्षंववर्षह १४ रामस्यतुरगा
न्दीप्तैःशरैर्विव्याधरावणः।तेहयास्तत्रनास्खलन्नापिवभ्रमुः १५ बभूवुःस्वस्थहृदयाःपद्मनालैरिवाहताः।तेषामसंभ्रमंदृष्ट्वावाजिनांरावणस्तदावरगान्
१६ भूयएवसुसंक्रुद्धःशरवर्षंमुमोचह।गदाश्चपरिघांश्चैवचक्राणिमुसलानिच १७ गिरिशृंगाणिवृक्षांश्चतथाशूलपरश्वधान्।मायाविहितमेतत्तुशस्त्रवर्षं
मपातयत् १८ सहस्रशस्तदाबाणान्श्रांतहृदयोद्यमः।तुमुलंत्रासजननंभीमंभीमप्रतिस्वनं १९ तद्वर्षमभवद्युद्धेनैकशस्त्रमयंमहत्।विमुच्यराघवरथं
समंताद्वानरेबले २० सायकैरंतरिक्षंचचकारासुनिरंतरं।मुमोचचदशग्रीवोनिःसंगेनांतरात्मना २१ व्यायच्छमानंतंदृष्ट्वातत्परंरावणंरणे।प्रहस
न्निवकाकुत्स्थःसंदधेनिशिताञ्छरान्।समुमोचततोबाणान्शतशोथसहस्रशः।तान्दृष्ट्वारावणश्चक्रेविशिखैःखंनिरंतरं २३ चक्रातेतैःशरौघाभ्यांनि
रुद्धमिवांबरं।ततस्ताभ्यांप्रयुक्तेनशरवर्षेणभास्वता २४ शरबद्धमिवाभातिद्वितीयमिवचांबरं।नानिमित्तोभवद्बाणोनातिभेत्तानिष्फलः २५
अन्योन्यंतैर्यसंहत्यनिपेतुर्धरणीतले।तथाविसृजतोर्बाणान्रामरावणयोर्मृधे २६ ॥श्रीरामाय॥ ॥

ति।व्यायच्छमानं।व्यायच्छंतं।प्रवर्तयंतं।ततइति।शरबद्धं।शरग्रथितमंबरं।नानिमित्तइति।अनिमित्तः।अलक्षणः।नातिभेत्ता।व्रणादधिकंभेत्ता।ननिष्फलः।लक्ष्ये
पतितोपिनिष्प्रयोजनश्चनाभवतीत्यर्थः।अन्योन्यमिति।बाणान्विसृजतोस्तयोर्बाणाइतिशेषः।न्योन्यंसंहत्यनिपेतुरितिसंबंधः॥

प्रमुख्याविति।निरुद्धासांनीरध्रं।प्रविध्यमानाविति।प्रयुध्यमानाविरयना।यदाचस्वयंरणंशितिशेषः।तदाध्वजावपातेनराक्षसाधिपोभृशंप्रचुक्रोधेतिसंबंधः॥ ॥इतिश्रीयुद्धकांडेनवशततमः
सर्गः॥ ॥दर्शयंताविति।सूतसारथ्यजां।सूतकर्मनैपुणरूपां।अर्दयन्निति।अर्दयन्नवधृष्येतिशेषः ४ रावणस्येति।प्रत्यपसर्पयत।न्यवर्त्तयत।तयेति।मातलेर्हर्षणायायथातथा॥

प्रयुद्धेताविविच्छिन्नमस्यंतौप्रत्यदक्षिणां।चक्रतुश्चशरौघैश्चनिरुद्धासमिवांबरं २७ नांतरंददृशेकिंचित्प्रश्रयाजिरनिमेषयोः।भूमिस्थैःकपिरक्षोभिःखस्थैर्देवैर्दिवस्थानवैः
२८ रावणस्यदयाभ्रामोहयानुरामस्यराघवाः।जघ्नुस्तस्तौतेदानोन्यंकृतानुकृतकारिणौ २९ एवंततोसुसंक्रुद्धौचक्रतुर्युद्धमुत्तमं।मुहूर्त्तमभवद्युद्धंतुमुलंरोमहर्ष
णं ३० प्रयुध्यमानौसमरेमहाबलौशितैःशरैरावणलक्ष्मणाग्रजौ।ध्वजावपातेनसराक्षसाधिपोभृशंप्रचुक्रोधतदारघूत्तमे ३१ ॥ ॥इत्यार्षेरामायणेवाल्मीकीयेयुद्धकांडेन
वोत्तरशततमःसर्गः॥ ॥तौतथायुध्यमानौतुसमरेराघवरावणौ।ददृशुःसर्वभूतानिविस्मितेनांतरात्मना।१ अर्दयंतौवक्रसमरेतयोस्तौस्यंदनोत्तमौ।परस्परमभिक्रुद्धौपरस्प
रमभिक्रुद्धौपरस्परमभिद्रुतौ।२ परस्परवधेयुक्तौघोररूपौबभूवतुः।मंडलानिचवीथीश्चगतप्रत्यागतानिच।३ दर्शयंतौबहुविधांसूतसारथ्यजांगतिं।अर्दयन्रावणं
रामोराघवंचापिरावणः।४ गतिवेगंसमापन्नौप्रवर्त्तननिवर्त्तने।क्षिपंतौशरजालानितयोस्तौस्यंदनोत्तमौ।५ चेरतुःसंयुगमहींसासारौजलदाविव।दर्शयित्वातदातौ
तुगतिंबहुविधांरणे ६ परस्परस्याभिमुखौपुनरेवावतस्थतुः।धुरंधुरेणरथयोर्वक्त्रंवक्त्रेणवाजिनां।७ पताकाश्चपताकाभिःसमीयुःस्थितयोस्तदा।रावणस्यततोरा
मोधनुर्मुक्तैःशितैःशरैः।८ चतुर्भिश्चतुरोदीप्तान्हयान्प्रत्यपसर्पयत्।९ सक्रोधवशमापन्नोहयानामपसर्पणे।मुमोचनिशितान्बाणान्राघवायदशानन
सोतिविद्धोबलवतादशग्रीवेणराघवः।१० जगामनविकारंचनचापिव्यथितोभवत्।चिक्षेपचपुनर्बाणान्वज्रपातसमस्वनान् ११ सारथिंवज्रहस्तस्यसमुद्दिश्यद
शाननः।मातलेस्तुमहावेगाःशरीरेपतिताःशराः।१२ नसूक्ष्ममपिसंमोहंव्यथांवाप्रददुर्युधि।तयाधर्षणयाक्रुद्धोमातलेर्नतथात्मनः १३ ॥चकारशरजालेनराघवोविमुखंरि
पुं।विंशतिंत्रिंशतिंषष्टिंशतशोथसहस्रशः १४ मुमोचराघवोवीरःसायकान्स्यंदनेरिपोः।रावणोपिततःक्रुद्धोरथस्थोराक्षसेश्वरः १५ गदामुसलवर्षेणरामंप्रत्यर्दयद्रणे
॥तत्प्रवृत्तंपुनर्युद्धंतुमुलंरोमहर्षणं १६ गदानांमुसलानांचपरिघाणांचनिस्वनैः।शराणांपुंखपातैश्चक्षुभिताःसप्तसागराः १७ क्षुब्धानांसागराणांचपातालतला
लवासिनः।व्यथितादानवाःसर्वेपन्नगाश्चसहस्रशः १८ चकंपेमेदिनीकृत्स्नासशैलवनकानना।भास्करोनिष्प्रभश्चासीन्नववौचापिमारुतः १९

मनोधर्षणयानक्रुद्धः अतएवरिपुंविमुखंचकारेतिसंबंधः।शराणामिति।सागराणांक्षुब्धानांसतांपातालतलवासिनोव्यथितासुरितिशेषः॥ ॥

एवमिति। जपंतः रामरावणानुपमयुद्धदर्शनविस्मितदेवादिजल्पप्रकारमाह। गंधर्वाप्सरसामित्यादिश्लोकद्वयमेकं। यथा गगनसागरयोः सदृशवस्त्वंतराभावाद्गगनं गगनेनैवोपमीयते। सागरः।
सागरेणैवोपमीयते। तथैव रामरावणयोर्युद्धं रामरावणयोर्युद्धमिवाभवदित्येवं ब्रुवंतो गंधर्वादयः रामरावणं रामरावणयोः संबंधितद्युद्धं ददृशुः। [illegible] यथार्थो सागरं सागरोपममिति पाठेऽप्यर्थो
लिंगमित्यर्थः। अनन्वयाख्योऽलंकारः। तदुक्तं काव्यप्रकाशिकायां एकस्यैवोपमानोपमेयत्वेऽनन्वय इति। राहोः शिर इतिवदभेदेऽपि भेदव्यवहारः। ततः सामान्यतया यकवचनश्रवणानंत
रं रावणस्य शिरांसि रामसिंजानाविकर्तनेन छिंदत्। अच्छिन्नदशास्यो विंशतिभुजः अच्छहीनशरासनः अदृश्यत दशग्रीवो मैनाक इव पर्वत इति। दशशिरासहितस्य ग्रीवात्वाभिधानात्। शिर

ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः। चिंतामापेदिरे सर्वे सकिंनरमहोरगाः॥ २०॥ स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकास्तिष्ठंतु शाश्वताः। जयतां राघवः संख्ये रावणं राक्षसेश्वरं २१ एवं
जपंतः पश्यंस्ते देवाः सर्षिगणास्तदा॥ रामरावणयोर्दृष्ट्वा युद्धं सुघोरं रोमहर्षणं २२ गंधर्वाप्सरसां संघा दृष्ट्वा युद्धमनूपमं। गगनं गगनाकारं सागरं सागरोपमं २३ रामरावणयोर्युद्धं
रामरावणयोरिव। एवं ब्रुवंतो ददृशुस्तद्युद्धं रामरावणं २४ ततः क्रोधान्महाबाहू रघूणां कीर्तिवर्द्धनः। संधाय धनुषा रामः शरमाशीविषोपमं २५ रावणस्य शिरश्छिंदच्छ्रीमज्ज्वलित
कुंडलं। तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा २६ तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः। तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा २७ द्वितीयं रावणशिरश्छिन्नं संयति
सायकैः। छिन्नमात्रं च तच्छीर्षं पुनरेव प्रदृश्यते २८ तदप्यशनिसंकाशैश्छिन्नं रामस्य सायकैः॥ एवमेकशतं छिन्नं शिरसां तुल्यवर्चसां २९ न चैव रावणस्यांतो दृश्यते जीवितक्ष
ये॥ ततः सर्वास्त्रविद्वीरः कौशल्यानंदवर्द्धनः ३० मार्गणैर्बहुभिर्युक्तश्चिंतयामास राघवः। मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः ३१ क्रौंचारण्ये कबंधस्तु विराधो दंडकावने। यैः
साला गिरयो भग्ना वाली च क्षुभितोऽम्बुधिः ३२ त इमे सायकाः सर्वे युद्धे प्रात्यायिका मम॥ किं नु तत्कारणं येन रावणे मंदतेजसः ३३ ॥ ॥

इत्यत्र शिरांसीत्युक्तं प्रधानशिरो वाच्छिन्नमात्रमिति। छिन्नमात्रे तच्छीर्षे तदानीमेव अन्यच्छिरो दृश्यत इति संबंधः। एवमिति। एकशतं एकोत्तरशतं। एकशतवारं छिन्नमित्यर्थः। न चेति। रा
वणस्य जीवितक्षये विषये अंतो निश्चयो नैव दृश्यते। त इम इति। प्रात्यायिकाः विश्वस्ताः। अमोघा इत्यर्थः॥ ॥

तन्महद्युद्धमिति। त्रिकूटशिखरे। युध्यतोस्तयोः आश्रहस्ततगतिवशेनांतरिक्षे च भूमौ पुनश्च गिरिमूर्ध्नि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः। देवदानवेति देवादीनां पश्यतां सतां सर्वरात्रं महद्युद्धमवर्त्ततेति संबंधः॥ आगस्त्यागमनात्प्रागेव सिद्धस्य युद्धस्यायमनुवादः। अस्मिन्पाठे ससदा च कृतरामरावणयुद्धस्य अस्मिन्रामायणे अश्रूयमाणत्वेन अनुपपन्नत्वाच्च सर्वरात्रमवर्त्त

इति चिंतापरश्चासीदव्यग्रमनश्च संयुगे॥ ववर्ष शरवर्षाणि राघवो रावणोरसि ३४ ॥ रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ३५ तत्प्रवृत्तं महद्यु
द्धं तुमुलं रोमहर्षणं। अंतरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ३६ देवदानवयक्षाणां पिशाचोरगरक्षसां। पश्यतां तन्महद्युद्धं सर्वरात्रमवर्त्तत ३७ नचरात्रं न दिवसं न मुहूर्त्तं न च क्ष
णं॥ रामरावणयोर्युद्धं विराममुपगच्छति ३८ दशरथसुतराक्षसेंद्रयोस्तयोर्जयमनवेक्ष्य रणे स राघवस्य॥ सुरवररथसारथिर्महात्मा रणगतरामसुहृत्त्वेन चक्षणे॥ वा
क्यमाशु ३९ इति श्रीमद्युद्धकांडे दशोत्तरशततमः सर्गः॥ ॥ अथ संस्मारयामास राघवं मातलिस्तदा। अजानन्निव किं वीर त्वमेनमनुवर्त्तसे १ विसृजास्मै वधाय त्वमस्त्रं
पैतामहं प्रभो। विनाशः कथितो राम यः सुरैः सोद्य वर्त्तते २ ततः संस्मारितो रामस्तेन वाक्येन मातलेः। जग्राह स शरं दीप्तं निश्वसंतमिवोरगं ३ यमस्मै प्रथमं प्रादादगस्त्यो
भगवानृषिः। ब्रह्मदत्तं महाबाणममोघं युधि वीर्यवान् ४ ब्रह्मणा निर्मितं पूर्वमिंद्रार्थममितौजसा॥ दत्तं सुरपतेः पूर्वं त्रिलोकजयकांक्षिणः ५ यस्य वाजेषु पवनः फ
ले पावकभास्करौ॥ शरीरमाकाशमयं गौरवे मेरुमंदरौ ६ जाज्वल्यमानं वपुषा सुपुंखं हेमभूषितं। तेजसा सर्वभूतानां कृतं भास्करवर्चसं॥ सधूममिव कालाग्निं दीप्त
माशीविषोपमं। रथनागाश्ववृंदानां भेदनं क्षिप्रकारिणं ८ द्वाराणां परिघाणां च गिरीणां चापि भेदनं॥ नानारुधिरदिग्धांगं मेदोदिग्धं सुदारुणं ९ वज्रसारं महाना
दं नानासमितिदारुणं। सर्ववित्रासनं भीमं श्वसंतमिव पन्नगं १० कंकगृध्रबलानां च गोमायुगणरक्षसां॥ नित्यं भक्षप्रदं युद्धे यमरूपं भयावहं ११ नंदनं वानरेंद्राणां
रक्षसामवसादनं। वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः १२

तेति पाठः सम्यक्। सर्वरात्रं अहोरात्रमित्यर्थः। दशरथेति। दशरथसुतराक्षसेंद्रयोस्तयोरित्यत्र मिद्वारणो यष्टी॥ ॥ इति श्री युद्धकांडे दशोत्तरशततमः सर्गः॥ ॥ अथेति। अनुवर्त्तसे। अ राम०
नुकरोषि उपेक्षस इति यावत्। विसृजेति। अस्मै एनं प्रति। यस्येति। वाजेषु पक्षेषु। यस्य वाजेषु पवन इत्यादि पवनादीनामधिदेवतात्वेनावस्थानं विवक्षितं। तेजसेति। सारांशेन कृ १३७
तं निर्मितं द्वाराणां गोपुराणां। वाजितमिति। गरुत्मतश्चारुपक्षैर्वाजैर्वाजितं॥ ॥

तमिति । उत्तमेषुमित्येतत् । अभिमंत्र्येत्यनेन संबध्यते । तं महेषुमित्यस्य संबंधः धइत्यनेन संबंधः स शर इति । निभृतवत् विनीतवत् । ततः प्रजग्मुरिति । प्रशमं [illegible] मरुद्गणाः देवगणाः । मही न चकंपे

तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनं । द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः १३ अभिमंत्र्य ततो रामः स्तं महेषुं महाबलः । वेदप्रोक्तेन विधिना संदधे कार्मुके बली १४
तस्मिन्संधीयमाने तु राघवेण शरोत्तमे ॥ सर्वभूतानि वित्रेसुश्चचाल च वसुंधरा १५ स रावणाय संक्रुद्धो भृशमायम्य कार्मुकं । चिक्षेप परमायत्तः शरं मर्मविदारणं ॥१६॥ स वज्र इव दु
र्धर्षो वज्रिबाहुविसर्जितः । कृतांत इव चावार्यो न्यपतद्रावणोरसि १७ स विसृष्टो महावेगः शरीरांतकरः शरः । बिभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ १८ । रुधिराक्तः स वे
गेन शरीरांतकरः ॥ रावणस्य हरन्प्राणान्विवेश धरणीतलं १९ स शरो रावणं हत्वा रुधिरार्द्रीकृतच्छविः । कृतकर्मा निभृतवत्स्वतूणीं पुनराविशत् २० तस्य हस्ताद्धत
स्याशु कार्मुकं तत्ससायकं । निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात् । २१ । गतासुर्भीमवेगस्तु नैर्ऋतेंद्रो महाद्युतिः । पपात स्यंदनाद्भूमौ वृत्रो वज्रहतो यथा २२ तं दृष्ट्वा प
तितं भूमौ हतशेषा निशाचराः । हतनाथा भयत्रस्ताः सर्वतः संप्रदुद्रुवुः २३ । नर्दंतश्चाभिपेतुश्च वानरा जितकाशिनः । वदंतो राघवजयं रावणस्य च २४ अर्दिता वानरैर्हृष्टै
र्लंकामभ्यपतन्भयात् । हताश्रयत्वात्करुणैर्बाष्पप्रस्रवणैर्मुखैः २५ ततो विनेदुः संहृष्टा वानरा जितकाशिनः । वदंतो राघवजयं रावणस्य च तद्वधं २६ अथांतरिक्षे व्यनदद्घो
षवद्देवदुंदुभिः । दिव्यगंधवहस्तत्र मारुतः ससुखो ववौ २७ निपपातांतरिक्षाच्च पुष्पवृष्टिस्तदा भुवि । किरंती राघवरथं दुरवापा मनोहरा २८ राघवस्तवसंयुक्ता
गगने च विशुश्रुवे । साधु साध्विति वागग्र्या देवतानां महात्मनां २९ आविवेश महान्हर्षो देवानां चारणैः सह ॥ रावणे निहते रौद्रे सर्वलोकभयावहे ३० ततः स
कामं सुग्रीवमंगदं च महाबलं । चकार राघवः प्रीतो हत्वा राक्षसपुंगवं ३१ ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभोऽभवत् । मही चकंपे न हि मारुतो व
वौ स्थिरप्रभश्चाप्यभवद्दिवाकरः ३२ ततस्तु सुग्रीवविभीषणांगदाः सुहृद्विशिष्टाः सहलक्ष्मणास्तदा । समेत्य हृष्टा विजयेन राघवं रणेऽभिरामं विधिना ह्यपूजयन् ३३
स तु निहतरिपुः कृतप्रतिज्ञः स्वजनबलाभिवृतो रणे रराज । रघुकुलनृपनंदनो महौजास्त्रिदशगणैरभिसंवृतो यथेंद्रः ३४ इत्यार्षे रामायणे युद्धकांडे अमावास्यायां राव
णवधो नाम एकादशोत्तरशततमः सर्गः ॥ ॥

मारुतो ववौ सुखमिति शेषः । अमावास्यायां रावणवधः ॥ ॥ इति श्रीमहेश्वरतीर्थीये युद्धकांडे एकादशशततमः सर्गः ॥ ॥१

नस्वपमिति। अमन्येथाः अज्ञाः असार्थः। गत इति। सेतुः मर्यादा सुनीतानां नयानां संक्षेपः संक्षिप्यत इति संक्षेपः संग्रहः प्रस्तवानां प्रकृष्टानां स्तुतीनां च चित्तोक्तीनां वा। आदित्य इति। व्यवसा
यः उत्साहशक्तिः रावणसदृशाश्रयणीयस्याभावात् व्यवसायो निरुद्यमो निश्चेष्ट इत्यर्थः। अस्मिन्निपतिते भूमावित्यर्द्धं पूर्वशेषः। किं शेषमिवेत्यर्द्धं उत्तरशेषः। पांसुषु प्रसुप्त इव स्थिते सति। सांप्रतं हतवी
रस्य लोकस्य किमवशेषं न किंचिदवशिष्टमित्यर्थः। धृतिप्रवाल इति। प्रसहाग्र्यपुष्पः प्रसह्यत इति प्रसहः भावप्रधानोयं निर्देशः प्रसहत्वं। तदेव अग्र्यपुष्पं यस्य सः। प्रसवाग्र्यपुष्प इति पाठे।
प्रसवः संतानं। तेजोविषाण इति। कुलवंशवंशः। कुलं पितृपितामहादयः तेषां वंशो वर्गः स एव वंशः पृष्ठावयवविशेषो यस्य सः। वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेपि चेत्यमरः। अपि विश्वः।

भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितं। शोकवेगपरीतात्मा विललाप विभीषणः १ वीरविक्रांतविख्यातविनीतनयकोविद। महार्हशयनोपेत किं शेषे निहतो भुवि २ नि
क्षिप्य दीर्घौ निश्चेष्टौ भुजावंगदभूषितौ। मुकुटेनापवृत्तेन भास्कराकारवर्चसा ३ तदिदं वीर संप्राप्तं यन्मया पूर्वमीरितं। काममोहपरीतस्य यत्तेन रुचितं वचः ४ यन्न दर्पात्प्र
हस्तो वा नेंद्रजिन्नापरे जनाः। न कुंभकर्णोतिरथो नातिकायो नरांतकः। न स्वयं किं तु मन्येथास्तस्योदर्कोयमागतः। गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः ६ गतः सत्व
स्य संक्षेपः प्रस्तवानां गतिर्गता। आदित्यः पतितो भूमौ मग्नस्तमसि चंद्रमाः ७ चित्रभानुः प्रशांतार्चिर्व्यवसायो निरुद्यमः। अस्मिन्निपतिते वीरे भूमौ शस्त्रभृतां वरे ८ किं शेषमिव
लोकस्य हतवीर्यस्य सांप्रतं। रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ९ धृतिप्रवालः प्रसहाग्र्यपुष्पस्तपोबलः शौर्यनिबद्धमूलः। रणे महान्राक्षसराजवृक्षः संमर्दितो राघव
मारुतेन। तेजोविषाणः कुलवंशवंशः कोपप्रसादापरगात्रहस्तः। इक्ष्वाकुसिंहावगृहीतदेहः सुप्तः क्षितौ रावणगंधहस्ती ११ पराक्रमोत्साहविजृंभितार्चिर्निःश्वा
सधूमः स्वबलप्रतापः। प्रतापवान्संयति राक्षसाग्निर्निर्वापितो रामपयोधरेण १२ सिंहर्क्षलांगूलककुद्विषाणः पराभिजिद्गंधनगंधहस्ती। रक्षोवृषश्चापलकर्णच
क्षुः क्षितीश्वरव्याघ्रहतोवसन्नः १३ वदंतं हेतुमद्वाक्यं परिदृष्टार्थनिश्चयं। रामः शोकसमाविष्टमित्युवाच विभीषणं १४

कोपप्रसादापरगात्रहस्तः। कोपापरगात्रः प्रसादहस्तश्चेत्यर्थः। इक्ष्वाकुः रघुनाथः। पराक्रमेति। पराक्रमोत्साहादेव विजृंभितार्चिः स्वबलमेव प्रतापः। प्रतापवान् तेजस्वी। सिं
हर्क्षेति। सिंहर्क्षलांगूलककुद्विषाणः। सिंहर्क्षाः राक्षसाः त एव लांगूलककुद्विषाणानि यस्य सः। सिंहर्क्षा राक्षसाः प्रोक्ताः पक्षा[illegible]मता इति निघंटुः। परानभिजय
तीति पराभिजित्। गंधनगंधहस्ती। गंधने उत्साहे गंधहस्ती मत्तगजतुल्यः। गंधनं स्वबनोत्साहे हिंसने च प्रकाशने इति विश्वः। चापलकर्णचक्षुः। चापलं धर्मस्खलनं तदेव
कर्णचक्षुषी यस्य सः॥ ॥

नायमिति। अयं समरे निश्चेष्टः अशक्तो भूत्वा न विनष्टः। अपितु चंडविक्रमत्वादिगुणक एव अशंकितः भृत्यशंकारहित एव सन् दैवात्पतितः। ततः किमित्यत आह। नैवंविधा इति। ये वृद्धिं
यमाशंसमानाः रणाजिरे निपतंति क्षत्रधर्मव्यवस्थिताः एवं विनष्टास्तेन शोच्यंते न केवलं समरमरणादेवाशोच्यत्वं किंतु। यशश्चतापसंपन्नत्वादाह। येन सेंद्रा इति। तथापि मरणे प्रतिशो
चितव्यमित्याशंक्य उपपत्यंतराद्योपि न शोकस्थानमित्याह। नैकांतविजय इति। क्षत्रधर्मपर्यालोचनयापि न शोच्यत इत्याह। इयं हीति। तदेवेति। दृष्ट्वा ज्ञात्वा तत्त्वमास्थाय नि
श्चितत्त्वमवलंब्य कल्प्यमनुष्ठेयं। येनेति। दत्तानि। दानानि। भुक्तानि सुपूजितानि स्वनुष्ठितानि। भृताः नितरां पोषिताः एष इति। आहिताग्निः कर्मसु चाग्र्यशूरः। कर्मठः। प्रेतग

नायं विनष्टो निश्चेष्टः समरे चंडविक्रमः। अत्युन्नतमहोत्साहः पतितोयमशंकितः। १५। नैवं विनष्टाः शोच्यंते क्षत्रधर्मव्यवस्थिताः। वृद्धिमाशंसमाना ये निपतंति रणाजिरे। १६।
येन सेंद्रास्त्रयो लोकास्त्रासिता युधि धीमता। अस्मिन्कालसमायुक्ते न कालः परिशोचितुं। १७। नैकांतविजयो युद्धे भूतपूर्वः कदाचन। परैर्वा हन्यते वीरः परान्वा हंति सं
युगे। १८। इयं हि पूर्वैः संदिष्टा गतिः क्षत्रियसंमता। क्षत्रियो निहतः संख्ये न शोच्य इति निश्चितः। १९। तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः। यदिहानंतरं कार्यं कल्प्यं त
मनुचिंतय। २०। तमुक्तवाक्यं विक्रांतं राजपुत्रं विभीषणः। उवाच शोकसंतप्तो भ्रातुर्हितमनंतरं। २१। योयं विमर्देषु न भग्नपूर्वः सुरैः समेतैः सहवासवेन। भवंतमा
साद्य रणे विभग्नो वेलामिवासाद्य यथा समुद्रः। २२। अनेन दत्तानि सुपूजितानि भुक्ताश्च भोगा निभृताश्च भृत्याः। धनानि मित्रेषु समर्पितानि वैराण्यमित्रेषु च
यापितानि। २३। एषोहिताग्निश्च महातपाश्च वेदांतगः कर्मसु चाग्र्यशूरः। एतस्य यत्प्रेतगतस्य कार्यं तत्कर्तुमिच्छामि तव प्रसादात् २४ स तस्य वाक्यैः करुणैर्महा
त्मा संबोधितः साधु विभीषणेन। आज्ञापयामास नरेंद्रसूनुः स्वर्गीयमाधानविधिविधिज्ञः। २५। अत्र गायत्र्या नः। मरणांतानि वैराणि निवृत्तं नः प्रयोजनं। क्रियतामस्य सं
स्कारो ममाप्येष यथा तव २६ ॥ ॥इत्यार्षे रामायणे युद्धकांडे द्वादशोत्तरशततमः सर्गः॥ ॥ रावणं निहतं श्रुत्वा राघवेण महात्मना। अंतःपुराद्विनिष्पेतू राक्षस्यः
शोककर्शिताः १ वार्यमाणा बहुविधं वेष्टंत्यः क्षितिपांसुषु। मुक्तकेश्यः सुदुःखार्ता गावो वत्सहता इव २ उत्तरेण विनिष्क्रम्य द्वारेण सहात्मना। अंतःपुराद्विनि
चेति वादिन्यो हा नाथेति च सर्वशः। परिपेतुः कबंधांकां महीं शोणितकर्दमां। ४। ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः। करेण्व इव नर्दंत्यो नेदुर्हतयूथपाः ५

तस्यापि प्रेतत्वं गतस्य। सतस्येति। संबोधितः। आज्ञप्तः। स्वर्गीयहितं। आधानं संस्कारं। न इति गायत्र्याः विंशतिमाक्षरं। मरणांतानि वैराणीत्यस्य श्लोकस्य द्वादशाक्षरेण न इ
त्यनेन संगृह्णाति। एष रावणः तव यथा ममापि तथा। ममापि स्नेहविषय इत्यर्थः। अतः संस्कार्यं तां शंकां मा कुर्वीति भावः। इति श्री युद्धकांडे द्वादशोत्तरशततमः सर्गः॥

वार्यमाणा इति। वत्सहताः हतवत्साः॥

यइति।लंभितःप्रापितः।अश्रुपूर्णवतेति।स्वहृद्यंवाक्यमितिशेषः।एताइति।एतावयंतेराक्षसाः।आत्मात्वंचासमेएककालमेवपातिताःब्रुवाणाइति।दृष्टंभूतपक्षं।यदितित्वयानिर्यातिता।अत्यपित
चेत।हृतकामइति।हृतकामःनिष्पन्नकामः।निष्पन्नमनोरथः।स्ववाक्यकरणादितिभावः।मित्रकुलं।मित्रपक्षः।एवंरावणस्यस्वेच्छाचरणस्यराक्षसनाशहेतुतामभिधायेदानींतमभिरास

दृष्ट्वातंमहाकायंमहावीर्यंमहाद्युतिं।रावणंनिहतंभूमौनीलांजनचयोपमं ६ ताःपतिंनिहतंदृष्ट्वाशयानंरणपांसुषु।निपेतुस्तस्यगात्रेषुछिन्नावनलताइव ७ बहुमानात्प
रिष्वज्यकाचिदेनंरुरोदह।चरणौकाचिदालिंग्यकाचित्कंठेवलंब्यच ८ उत्क्षिप्यचभुजौकाचिद्भूमौस्मपरिवर्त्तते।हतस्यवदनंदृष्ट्वाकाचिन्मोहमुपागमत् ९ काचिदंके
शिरःकृत्वारुरोदमुखमीक्षती।स्नापयंतीमुखंवाष्पैस्तुषारैरिवपंकजं १० एवमार्त्ताःपतिंदृष्ट्वारावणंनिहतंभुवि।चुक्रुशुर्बहुधाशोकाद्भूयस्ताःपर्यदेवयन् ११ येनवि
त्रासितःशक्रोयेनवित्रासितोयमः।येनवैश्रवणोराजापुष्पकेणवियोजितः १२ गंधर्वाणामृषीणांचसुराणांचमहात्मनां।भयंयेनमहद्दत्तंसोयंशेतेरणेहतः १३
असुरेभ्यःसुरेभ्योवापन्नगेभ्योपिवापुनः।भयंयोनविजानातितस्येदंमानुषाद्भयं १४ अवध्योदेवतानांयस्तथादानवरक्षसां।हतःसोयंरणेशेतेमानुषेणपदातिना
१५ योनशक्यःसुरैर्हंतुंनयक्षैर्नासुरैस्तथा।सोयंकश्चिदिवासत्वोमृत्युंमर्त्येनलंभितः १६ एवंवदंत्योबहुधारुरुदुस्तस्यताःस्त्रियः।भूयएवचदुःखार्त्ताविले
पुश्चपुनःपुनः १७ अशृण्वतातुसुहृदांसततंहितवादिनां।मरणायाहृतासीताघातिताश्चनिशाचराः १८ एताःसममिदानींतेवयमात्माचपातितः।ब्रुवाणोपिहि
तंवाक्यंदृष्टोभ्राताविभीषणः १९ दृष्टंप्रधर्षितोमोहात्त्वयात्मवधकांक्षिणा।यदिनिर्यातितातेस्यात्सीतारामायमैथिली २० ननःस्याद्व्यसनंघोरमिदंमूलहरंमह
त्।वृत्तकामोभवेद्भ्राताराममित्रकुलंभवेत् २१ वयंत्वविधवाःसर्वाःसकामानचशत्रवः।त्वयापुनर्नृशंसेनसीतांसंरुंधताबलात् २२ राक्षसावयमा
त्माचत्रयंतुल्यंनिपातितं।नकामकारःकामंवातवराक्षसपुंगव २३ दैवंचेष्टयतेसर्वंहतंदैवेनहन्यते।वानराणांविनाशोयंराक्षसानांचतेरणे २४ तवचै
वमहाबाहोदैवयोगादुपागतः।नैवार्थेननकामेनविक्रमेणनचाज्ञया २५ शक्योदैवगतिर्लोकेनिवर्तयितुमुद्यता।विलेपुरेवंदीनास्ताराक्षसाधिपयोषितः
२६ कुरर्यइवदुःखार्त्ताबाष्पपर्याकुलेक्षणाः २७ ॥ ॥इत्यार्षेरामायणेयुद्धकांडेत्रयोदशोत्तरशततमःसर्गः॥ ॥ ॥

सर्वंकिंदैवस्यतत्कारणत्वंदर्शयति।नकामकारइति।तवकामकारःस्वेच्छाचरणंकामंवानास्तितवस्वेच्छाधीनव्यवहारोनास्तीत्यर्थः।कुतःदैवंचेष्टयतेसर्वंअतःदैव राम०
नहतमेवअन्येनहन्यतेनैवार्थेनेति।उद्यतासर्वयत्नेनापि॥ ॥इतिश्रीमहेश्वरतीर्थीयेयुद्धकांडेत्रयोदशोत्तरशततमःसर्गः॥ ॥ १३९

दशग्रीवमिति। मंडोदरी। मृडनभृतोदरी। कृशोदरीति यावत्। मडि भूषायामिति धातुः। कथमिति। वीर्येणाद्भुतेन त्रैलोक्यमाक्रम्य श्रियान्वितं त्वामिति संबंधः। मानुषाणामिति। मानुषाणामविषये। अ
प्राप्यदेशे। नचैतदिति। सर्वतः समुपेतस्य सर्वसाधनैः समुपेतस्य तवानेन रामेणाभिमर्शनं आक्रमणं एतत्। रामस्य नश्रद्दधामि रामसर्वंशमिति नश्रद्दधामीत्यर्थः। तर्हि केन वधः कृतइ
त्यत आह। अथवेति। रामरूपेण। मानुषरूपेण। मायां विधाय। मायां अपेक्षितशरीरग्रहणहेतुभूतां कांचिच्छक्तिं तस्मिन्नेवामानुषरूपे निर्मायेत्याह। यथैवेत्यादिना। यथैव नागरीभि
स्तिष्ठिताः रामस्यामानुषत्वनिश्चयेनेति भावः। इदानीं पक्षांतरमवलंबते। अथवेति। अथवान्यः पक्षोस्तीत्यर्थः। पूर्वस्मिन् पक्षे को दोष इत्याशंक्य दूषयितुं तदेवानुवदति
वासवेन त्वमिति। वासवेन धर्षितोसीति। यत्तु घटते कुतः। वासवस्येति। त्वां द्रष्टुमपि वासवस्य शक्तिर्नास्तीत्यर्थः। पक्षांतरं विशिनष्टि व्यक्तमेष इत्यादि महायोगी स्वाभावि

तासां विलपमानानां तथा राक्षसयोषितां। ज्येष्ठा पत्नी प्रियादीना भर्तारं समुदैक्षत १ दशग्रीवं हतं दृष्ट्वा रामेणाचिंत्यकर्मणा। पतिं मंडोदरी तत्र कृपणा पर्यदेवत २ ननु
नाम महाबाहो तव वैश्रवणानुज। क्रुद्धस्य प्रमुखे स्थातुं त्रस्यत्यपि पुरंदरः ३ ऋषयश्च महात्मानो गंधर्वाश्च यशस्विनः। ननु नाम तवोद्वेगाच्चारणाश्च दिशो गताः
४ स त्वं मानुषमात्रेण रामेण युधि निर्जितः। न व्यपत्रपसे राजन् किमिदं राक्षसेश्वर ५ कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितं। अविषह्यं जघान त्वां मानुषो वन
गोचरः ६ मानुषाणामविषये चरतः कामरूपिणः। विनाशस्तव रामेण संयुगे नोपपद्यते ७ नचैतत्कर्म रामस्य श्रद्दधामि चमूमुखे। सर्वतः समुपेतस्य तव तेनाभिम
र्शनं ८ अथवा रामरूपेण कृतांतः स्वयमागतः। मायां तव विनाशाय विधायाप्रतितर्कितां ९ अथवा वासवेन त्वं धर्षितोसि महाबल। वासवस्य कुतः शक्तिस्त्वां द्रष्टु
मपि संयुगे १० यदैव नगरीं लंकां दुष्प्रवेशां सुरैरपि। प्रविष्टो हनुमान्वीरस्तदैव व्यथिता वयं ११ यदैव हि जनस्थाने राक्षसैर्बहुभिर्वृतः। खरस्तव हतो भ्राता तदै
वासौ न मानुषः १२ यदैव वानरैर्घोरैर्बद्धः सेतुर्महार्णवे। तदैव हृदयेनाहं शंके रामममानुषं १३ व्यक्तमेष महायोगी परमात्मा सनातनः। अनादिमध्यनि
धनो महतः परमो महान् १४ तमसः परमो धाता शंखचक्रगदाधरः। श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः १५ ॥

कज्ञानशक्तियुक्तः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः। परमात्मा। आत्मनामात्मा सर्वांतर्यामीति यावत्। य आत्मनि तिष्ठन्नात्मानमंतरो यमयती
ति श्रुतेः। सनातनः सदास्तीत्युक्तः। अनादिमध्यनिधनः। जन्मवृद्धिनाशशून्यः। शाश्वतः। अपक्षयरहितः। ध्रुवः परिणामशून्यः एतेन षड्भावविकारशून्यत्वमुक्तं
तथाच। श्रीविष्णुपुराणे। अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः वर्जितः शक्यते वक्तुं यः सदास्तीति केवलमिति महतः परमो महान्महतो महीयान्। तमसः परमः
प्रकृतेः परः। धाता स्रष्टा। यतो वा इमानि भूतानि जायंते इति श्रुतेः। अयमंतस्वरूपमुक्त्वा इदानीं विग्रहगुणानाह। शंखचक्रगदाधर इत्यादिना। नित्यश्रीः नित्या अनपा
यिनी श्रीर्यस्य सः। अजेयो जेतुमशक्यः। महायोगीत्यादि। विशेषणविशिष्टो यो विष्णुः स एव रघुनाथ इत्यर्थः॥ ॥

यु० तस्यसर्वेश्वरस्यकथंमनुष्यतयाप्रतिमानंकथंचवानरैःसहसंवासः।अवाप्तसकलकामस्यरावणवधेनवाकिंप्रयोजनमित्याशंक्यकामेशोऽत्ररामस्याह।मानुषंवपुरास्थायेत्यादिश्लोकद्वये
१४० ना।लोकांतर्भूतस्यरावणस्यहननेसर्वलोकेश्वरस्यरामस्यवैषम्यनैर्घृण्येस्यातामित्याशंकायांस्वकृतकर्मवशादेवस्वस्यनाशाद्रामस्यवैषम्यनैर्घृण्येनस्तामित्याशयेनाह।इंद्रियाणी
ति।क्रियतामिति।व्युष्टिःफलं।व्युष्टिःफलेसमृद्धौत्वित्यमरः।अकस्मादिति।अभिलाषोऽसिवसुधायाइति।वसुधायाहिवसुधांक्षमावंतान्निदर्शनभूतार्थंश्रमेरपिदृष्टांतभूमि

मानुषंरूपमास्थायविष्णुःसत्यपराक्रमः।सर्वैःपरिवृतोदेवैर्वानरत्वमुपागतैः १६ सर्वलोकेश्वरःश्रीमान्लोकानांहितकाम्यया।महावीर्यंमहाशक्तिंदेवशत्रुंभयावहं
१७ सराक्षसपरीवारंहतवांस्त्वांमहाद्युतिः।इंद्रियाणिपुराजित्वाजितंत्रिभुवनंत्वया १८ स्मरद्भिरिवतद्वैरमिंद्रियैरेवनिर्जितः।क्रियतामविरोधश्चराघवेणेतियन्म
या १९ उच्यमानोनगृह्णासितस्येयंव्युष्टिरागता।अकस्माच्चाभिलाषोऽसिसीतांराक्षसपुंगव २० ऐश्वर्यस्यविनाशायदेहस्यस्वजनस्यच।अरुंधत्याविशिष्टांतांरोहि
ण्याश्चापिदुर्मते २१ सीतांधर्षयतामान्यांत्वयाह्यसदृशंकृतं।वसुधायाश्चवसुधांश्रीश्रीभर्तृवत्सलां २२ सीतांसर्वानवद्यांगीमरण्येविजनेशुभां।आनयित्वातु
तांदीनांछद्मनात्मस्वदूषण २३ अप्राप्यचैवतंकामंमैथिलीसंगमेकृतं।पतिव्रतायास्तपसानूनंदग्धोऽसिमेप्रभो २४ तदैवयन्नदग्धस्त्वंधर्षयंस्तनुमध्यमां।देवाबि
भ्यतिसर्वेसेंद्राःसाग्निपुरोगमाः २५ अवश्यमेवलभतेफलंपापस्यकर्मणः।घोरंपर्यागतेकालेकर्तानास्त्यत्रसंशयः २६ शुभकृच्छुभमाप्नोतिपापकृत्पापमश्नुते।वि
भीषणःसुखंप्राप्तस्त्वंप्राप्तःपापमीदृशं २७ संत्यन्याःप्रमदास्तुभ्यंरूपेणाभ्यधिकास्ततः।अनंगवशमापन्नस्त्वंतुमोहान्नबुध्यसे २८ नकुलेननरूपेणनदाक्षि
ण्येनमैथिली।मयाधिकावातुल्यावात्वंतुमोहान्नबुध्यसे २९ सर्वथासर्वभूतानांनास्तिमृत्युरलक्षणः।तवतावदयंमृत्युर्मैथिलीकृतलक्षणः ३० सीतानिमि
त्तजोमृत्युस्त्वयादूरादुपाहृतः।मैथिलीसहरामेणविहरिष्यति।अल्पपुण्यात्वहंघोरेपतिताशोकसागरे।।कैलासेमंदरेमेरौतथाचैत्ररथेवने ३१ [illegible]
[illegible]देवोद्यानेषुसर्वेषुविहृत्यसहितात्वया।।विमानेनानुरूपेणयायाम्यतुलयाश्रिया ३२ ॥

न्यर्थः।श्रियःश्रीःसर्वसौभाग्ययुक्तानांदृष्टांतभूतायाः।श्रियोऽपिदृष्टांतभूमिमित्यर्थः।सीतामिति।आत्मस्वदूषणआत्मीयदूषण।तदैवेति।तनुमध्यमां।सीतांधर्षयन्नतदैवधर्षणास
मयएवनदग्धइतियत्तेनमहात्म्येनदेवाअपितेबिभ्यतीतिसंबंधः।अवश्यमेवेति।कालेपरिपाकसमयेपर्यागतेसति।शुभकृदिति।[illegible]सुखं।पापंदुःखं।संतीति।तुभ्यंत्वत्तः राम०
सीतायाअपि।सर्वभूतानामलक्षणः।अहेतुकोमृत्युर्नास्तिअतएवतावपिमैथिलीकृतलक्षणः।मैथिल्याकृतलक्षणः।मैथिल्याकृतचिह्नः।मैथिलीहेतुकइत्यर्थः।। ॥ १४०

मैथिलीमित्याद्विसार्द्धश्लोकमेकंवाक्यं। मेदेवरोयद्विनाशः पतिपारकंवाक्यमब्रवीत्सोयंविनाशः पर्युपस्थितः इति संबंधः। कामक्रोधेति व्यसनेन स्त्रीप्रसक्तिः तस्ततो नाप्
प्रसंगिना प्रसक्तिमतात्वत्कृतेनेनं ह्रीयदुःखमेतत् आश्चर्यं अशेषेषु यत्लक्षणतो निवृत्तः सोयं मूलहरो महाननर्थश्चागमः इति शेषः। इत्यर्थोति। हेत्वर्थयुक्तो हेत्वर्थो जना
म्यां सहितं। हेतुमन्त्रकं त्वकवच्चानुष्ठितमित्यर्थः। मारीचेति मारीचकुंभकर्णाभ्यां। उक्तमिति शेषः। ममपितृमात्यवतां। ... कदर्थमेकंवाक्यं ... पंचवर्ग
साधनेन परिघोता शत्रून्तदपमे। तेनमूढकेन हेतुना। वज्रधारयन्नरश्वाश्रवितीवकुमतः पल्लवपतनेमेनिप्रहराणां नववृद्धांशत्रूणां प्रहरणाः प्रद्यावाकृप्रहरणाम्बधासा
मैथिलीमात्ततां दृष्ट्वा श्यालानिश्वासमायतां। सम्यवाक्यमहावाहुर्देवरामेयरब्रवीत् ७५ अयं पत्नसमात्यानां विनाशः समुपस्थितः। कामक्रोधसमुत्थेन
व्यसनेनाप्रसंगिना ७६ निहतस्त्वत्कृतेनार्थः सोयं मूलहरो महान्। त्वत्प्रकृतमिदं सर्वमनाथं रक्षसांकुलं ७७ नहि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः स्त्री
स्वभावात्तु मे बुद्धिः कारुण्यपरिवर्तते ७८ सुकृतं दुःकृतं च त्वं गृहीत्वा स्वां गतिं गतः। आत्मानमनुशोचामि त्वद्विनाशेन दुःखिता ७९ सुहृदां हितकामानां न श्रु
तं वचनं त्वया। भ्रातृणां चैव कार्त्स्न्येन हितमुक्तं दशानन ८० हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणं। विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ८१ मारीचकुंभकर्णा
भ्यां वाक्यं मम पितुस्तथा न कृतं वीर्यमत्तेन तस्येदं फलमीदृशं ८२ नीलजीमूतसंकाशः पीतांबरशुभांगदः स्वगात्राणि विनिक्षिप्य किं शेषे रुधिराप्लुतः ८३ प्रसुप्त
इव शोकार्तां किं मां न प्रतिभाषसे। महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः ८४ यातुधानस्य दौहित्रीं किं मां न प्रतिभाषसे। उत्तिष्ठोत्तिष्ठ किं शेषे नवे परिभवे कृ
ते ८५ अद्यवै निर्भया लंकां प्रविष्टाः सूर्यरश्मयः। येन सूदयसे शत्रून्समरे सूर्यवर्चसा ८६ वज्रो वज्रधरस्येव सोयं ते सततार्चितः। रणे बहुप्रहरणो हेमजालपरि
कृतः ८७ परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा। प्रियामिवोपसंगृह्य शेषे ... ८८ अप्रियामिव कस्मान्मां मामेवं नाभिभाषसे। धिगस्तु हृदयं यस्या ममेदं न सहस्र
धा ८९ त्वयि पंचत्वमापन्ने फलते शोकपीडितं। इत्येवं विलपन्ती सा बाष्पपर्याकुलेक्षणा ९० स्नेहावस्कन्नहृदया तदा मोहमुपागमत्। कश्मलाभिहता सन्ना बभौ सा रावणो
रसि ९१ संध्यानुरक्ते जलदे दीप्ता विद्युदिवोज्ज्वला। तथागतां समुत्थाप्य सपत्न्यस्ता भृशातुराः ९२ पर्यवस्थापयामासू रुदन्त्यो रुदतीं भृशं। किं ते न विदिता देवि लोकानां स्थि
तिरध्रुवा ... सोयं परिघः बाणैः सहस्रधा छिन्नः व्यवकीर्णः इति संबंधः। विनात्विति नियतप्राप्तं मन्दरपेशो। नित्यवा दशाविभागपर्याये राज्ञां चञ्चलया श्रिया ॥
कपीडितं मन्नप फलते नस्कः इति नाममाक्षिमित्यर्थः। कश्मलेनाकश्मलाभिहता सन्ना पतिना नितेने निक्षिप्येति महार्हेतनीया दशाभागादिपर्यायेदशानामवस्थानां
विभागः शुभपरिपाकः तस्य पर्याये ना शेयासिस नलोकानां स्थितिरात्तां चञ्चलया श्रिया सहस्य शुवेनिते न यानविरितेनिताकि तवविदितैवा नश्रीः मोकस्थिति श्रीमुखि
रेनित्यानाम्येवेत्यर्थः ॥

रामु. इत्येवमितिश्चमिमुखोऽग्रतौ न श्रितमिति श्रुतवाक्यः श्रुत्वा रामवाक्यं विभीषणः । रावणस्य संस्कारकृत्यं नामित्युक्ताकरणे रामानुष्ठ निश्चितित्वाच्चिन्मृश्य परामर्शहन्त्य धर्मवत्स्व ।
१४२ रूपं वचः पथ्यं ताप प्रथानथा वक्ष्य माण्यमित्यर्थः । वा उ संस्कारकरणे लोकापवादो भवेदित्याशंकायामाह । न मंशरदृ तिभ्रात्र संस्काराकरणे नयेमत्युजाः मां प्रथमं नमंशर
नि । पथेच्छं वक्ष्यन्ति ते सर्वे मन्युजाः पश्चान्त्य रावणस्य गुणान्कीर्तयन्ती दृष्ट्वा मां सुकृतं साधुकारिणमेव वक्ष्यन्तीत्यर्थः । नवापीनि तत्त्वयामेयियमपि कार्यमयपान्वह
त्तमम इत्येव वाच्यः कुतः त्वत्समा वाञ्छ पेजीवित मित्यर्थः त्वयापि मात्रियमेव कर्तव्यं मयापि नक्षितमेवोपदेष्टव्यं अतोमम वियमन वहितश्रुरावणस्य संस्कारं अश्पतर्निपध
इत्येवमुच्यमाना तासा महशरं प्रहरो रहा स्थापयंतीत्वमिमुखोत्तनावाक्यां वुविद्वद्वैः ९५ एनमिनं न रामो विभीषणमुवाच ह । संस्कारः क्रियतामस्य भ्राता गाव पारि
सान्त्वना । ९६ तं प्रश्रितमथो रामस्तत्वाक्यो विभीषणः विमृश्य बुद्ध्या धर्मज्ञो धर्मार्थसहितं वचः ९७ रामस्यैवानुवृत्त्यर्थमुत्तरं प्रत्युभाषत । पत्नीत्यस्य मंत्रं नहरं तव श
समन्त्रतथा ९८ नाहमर्हामि संस्कर्तुं परदाराभिमर्शनं । भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः ९९ रावणो नार्हति पूजां पूज्योऽपि गुरुगौरवात् । नृशंस इति मां राम वक्ष्य
न्ति मनुजा भुवि १०० श्रुत्वा तस्य गुणान्सर्वे वक्ष्यन्ति सुकृतं पुनः । तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः १०१ विभीषणमुवाचेदं वाक्यज्ञो वाक्यकोविदं । तवापि मे प्रियं
कार्यं त्वत्प्रभावाद्धि मे जितं १०२ अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वर । अधर्मानृतसंयुक्तः काममेष निशाचरः १०३ तेजस्वी बलवाञ्शूरः संग्रामे सुवनित्यशः । श
तक्रतुप्रभृतिभिर्देवैः श्रूयते न पराजितः १०४ महात्मा बलसंपन्नो रावणो लोकरावणः । मरणान्तानि वैराणि निवृत्तं नः प्रयोजनं । क्रियतामस्य संस्कारो ममाप्येष यथा तव ।
त्वत्सकाशान्महाबाहो संस्कारं विधिपूर्वकं १०६ क्षिप्रमर्हति धर्मेण त्वं यशोभाग्भविष्यसि । राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः १०७ संस्कारेणानुरूपेण यो
जयामास रावणं । ततः प्रविश्य लंकां तु राक्षसेन्द्रो विभीषणः १०८ रावणस्याग्निहोत्रं तु निर्यापयद्विनिश्चितः । तथा चन्दनकाष्ठानि काष्ठानि विविधानि च । अगरूणि सुगन्धी
नि गंधांश्च सुरभींस्तथा १०९ मणिमुक्ताप्रवालानि निर्वापयन्निरात्मसः । प्रोवराणि शिविकां दिव्यां आरोप्य ते सर्वाससि ११० रावणं राक्षसाधीशं अश्रुपूर्णमुखास्तदा । अम्बु
र्यो घोषैश्च विविधैस्तत्र वदिष्यामि नंदितः १११ एतामिश्राविविनानि समनोमिश्राविविनोऽग्निष्यशिविकांनाम विभीषणः पुरोगमाः ११२ दक्षिणाभिमुखाः सर्वे गृह्य
कष्टानि भोजितिरे । श्रौतः पुरा तोसवाति रोमानामिनन्वं । एष्टेनानुपूर्वः स्थानि सवमानामिन्त्वं नः रावणं प्रथमं देशे स्थाप्यते मृश उवितः । चितां चन्दनकाष्ठानां पद्मको
शो यसंबतां ब्राह्मांसंवोदयामास रांकवास्तर संहतां कर्तते वे लविधिनारतो वे पश्चि मन्दः । वक्त्रं तस्य नेदृस्य पितमेधम कृतं ११
विरोधवान्तथापि गुणाबहुत्या नाकार्य एवेत्यभिप्रायेणाह । अधर्मो इत्येत्यादिश्लोकद्वयेन तथापि तवदीप्तिवाद संस्कार्य इत्य [illegible] नी नि । एषरावणात्तदधया राम
तथाममापिपी निविषय इत्यर्थः । एष्वतस्ये नि श्विकरूपेण संस्कारो तत्परत्नामहेण । विनामिति । पश्चकूस्मां घिराखवि शेष [illegible] वेदोन कि पपा संवेशयां च १४२
कुः रावणाभिनिवेशः । अनन्तरं क्रियतारि रांकवास्तरणाद्दतां । रांकुः मृगविशेषः । नत्सं वधिरांक व । पश्चिमकं तः अंते दिशा ॥

वेशिमिति। दक्षिणो प्राच्यां चितायाः आग्नेय्यां गोवेदिं यथास्थानं पावकं च चक्रुरित्यनुपपन्नेः पृषदाज्येनं दधिसहितघृतेन पृषदा[illegible]आज्यमित्यमरः। पृषदाज्यशर्ता स्रु
वं प्रचिक्षिपुः अग्नाविति शेषः। पादयोः शकटमित्यादि श्लोकत्रयमेकं वाक्यं। आरणीमथानारणिं शास्त्रदृष्टेन वेदविहितेन। महर्षिविहि[illegible]केन। यथास्थानं सर्वं दत्त्वाश्रुव
लरणिकौ घृताक्तां समवेशयन्। अनुलारणिं कौशताजवीनाल्लम्पनेन घृमपूणां यन्मान्तं वर्त्सपर्घं यथा मृतायां तु स्त्रतां प्रीतिनीतिश्वा[illegible]शातवेति। प्रारायविधिपूर्वकं
वेदिवद्दक्षिणा प्राचीं यथास्थानं च पावकं ११ पृषदाज्येन शर्णीनवं समर्वे प्रचिक्षिपुः ११ पादयोः शकटं प्रादान्तरूर्वोरुलूखलं। दारुपात्राणि सर्वाणि अरणीं चोत्त
राराणिं। १२ दत्वातु मुसलं चान्यं यथास्थानं विचक्रमुः। शास्त्रदृष्टेन विधिना महर्षिविहितेन च १३ तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः अनुस्तरणिकां रा
ज्ञो घृताक्तां समवेशयन् १४ गंधैर्माल्यैरलंकृत्य रावणं दीनमानसाः। विभीषणसहायास्ते वस्त्रैश्च विविधैरपि १५ लाजैरवकिरन्ति स्म बाष्पपूर्णमुखास्तदा।।
सददौ पावकं तस्य विधिपूर्वं विभीषणः १६ स्नात्वा चैवार्द्रवस्त्रेण तिलान्दर्भाभिमिश्रितां। उदकेन च संमिश्रान्प्रदाय विधिपूर्वकं १७ प्रदाय चोदकं तस्मै मूर्ध्ना चै
नं नमस्य च। ता स्त्रियोनुनयामास सान्त्वमुक्त्वा पुनः पुनः। १८ गम्यतामिति ताः सर्वा विविशुर्नगरं ततः। प्रविष्टासु च सर्वासु राक्षसीषु विभीषणः। रामपार्श्व
मुपागम्य तदातिष्ठद्विनीतवत्। रामोपि सह सैन्येन ससुग्रीवः सलक्ष्मणः। १९ हर्षं लेभे रिपुं हत्वा यथा वृत्रं शतक्रतुः।। ।। इति श्रीमद्युद्धकांडे चतुर्दशोत्तरश
ततमः सर्गः।। ते रावणवधं दृष्ट्वा देवगंधर्वदानवाः। जग्मुस्तैस्तैर्विमानैः स्वैः कथयन्तः शुभाः कथाः। १ रावणस्य वधं घोरं राघवस्य पराक्रमं। सुयुद्धं वानराणां च
सुग्रीवस्य च मन्त्रितं। २ अनुरागं च वीर्यं च सौमित्रेर्लक्ष्मणस्य च। कथयन्तो महाभागा जग्मुर्हृष्टा यथागतं ३ राघवोपि रथं दिव्यमिन्द्रदत्तं शिखिप्रभं। अनु
ज्ञाय महाबाहुर्मातलिं प्रत्यपूजयत्। ४ राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः। दिव्यं तं रथमास्थाय दिवमेवारुरोह सः ५ तस्मिंस्तु दिवमारूढे सु
रसारथिसत्तमे। राघवः परमप्रीतः सुग्रीवं परिषस्वजे ६ परिष्वज्य च सुग्रीवं लक्ष्मणेनाभिवादितः। पूज्यमानो हरिश्रेष्ठैराजगाम बलालयं ७ अब्रवीच्च
तदा रामः समीपपरिवर्तिनं। सौमित्रिं सत्त्वसंपन्नं लक्ष्मणं दीप्ततेजसम् ८ विभीषणमिमं सौम्य लंकायामभिषेचय। अनुरक्तं च भक्तं च मम चैवोप
कारिणं। ९ एष मे परमः कामो यदीमं रावणानुजं। लंकायां सौम्य पश्येयमभिषिक्तं विभीषणं १० एवमुक्तस्तु सौमित्री राघवेण महात्मना।। तथे
त्युक्त्वा तु संहृष्टः सौवर्णं घटमाददे ।। तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान्। आदिदेश महासत्त्वान्समुद्रात्सलिलानये १२
स्थिनरनिशेषः गम्यतामिति।। उक्तार्थ इति शेषः।। ।। इति श्रीयुद्धकांडे चतुर्दशोत्तरशततमः सर्गः।। ।। तत इति। स्वैः स्वकीयैः सह कथाप्रकारमेवाह। रावणस्ये
त्यादिना। राघव इति। अनुज्ञाय रथं प्रत्यपूजयदिति शेषः। परिषस्वजे इति। बलालयं शिबिरमाजगाम चैव सुलक्ष्म निपदिरा बाणसत्कारवलालप्रवेशोनं घटमिति। घटे इ

[illegible]

यु १५३ समानीनीति। मंगलप्रयोजनं। मंगलं मंगलवस्तुजातं। अनुमान्येति। विजयेनाभिनंद्य जयकथनेनानंदयित्वा॥ इति श्रीमहेश्वरतीर्थविरचितायां रामायणतत्त्वदीपि
कायां युद्धकांडे पंचदशोत्तरशततमः सर्गः॥ दृष्टेति। मृजया शरीरसंस्कारेण। निष्प्रभं नि। निभृतः निश्चलः। प्रह्वः नम्रः। स्थित इति शेषः। दृष्ट्वेति। सा प्राप्तो दृष्ट्वा।

अतिशीघ्रं ततो गत्वा वानरा राक्षसा महाबलाः। आगतास्तज्जलं गृह्य समुद्राद्वानरोत्तमाः १३ ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने। घटेन तेन सौमित्रिर
भ्यषिंचद्विभीषणं १४ लंकायां रक्षसां मध्ये राजानं रामशासनात्। विधिना मंत्रदृष्टेन सुहृद्गणसमावृतं १५ अभ्यषिंचत्स धर्मात्मा शुद्धात्मानं विभीषणं। तस्या
मात्या जहृषिरे भक्ता ये चास्य राक्षसाः १६ दृष्ट्वाभिषिक्तं लंकायां राक्षसेंद्रं विभीषणं। स तद्राज्यं महत्प्राप्य रामदत्तं विभीषणः १७ प्रकृतीः सांत्वयित्वा च ततो
राममुपागमत्। अक्षतान्मोदकांल्लाजान्दिव्याः सुमनसस्तदा १८ आजह्रुरथ संहृष्टाः पौरास्तस्मै निशाचराः। स तान्गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् मं
गल्यं मंगलं सर्वं लक्ष्मणाय च वीर्यवान्। कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणं २० प्रतिजग्राह तत्सर्वं तस्यैव प्रियकाम्यया। ततः शैलोपमं वीरं प्रांज
लिं पुरतः स्थितं २१ अब्रवीद्राघवो वाक्यं हनूमंतं प्लवंगमं। अनुमान्य महाराजमिमं सौम्य विभीषणं २२ गच्छ सौम्य पुरीं लंकामनुज्ञाप्य यथाविधि।
प्रविश्य रावणगृहं विजयेनाभिनंद्य च। २३ वैदेह्या मा कुशलिनं ससुग्रीवं सहलक्ष्मणं। आचक्ष्व जयतां श्रेष्ठ रावणं च मया हतं २४ प्रियमेतदुदाहृत्य मैथि
ल्यास्त्वं हरीश्वर। प्रतिगृह्य च संदेशमुपावर्तितुमर्हसि २५॥ ॥ इति श्रीमद्युद्धकांडे पंचदशोत्तरशततमः सर्गः॥ ॥ इति प्रतिसमादिष्टो हनूमान्मारुता
त्मजः। प्रविवेश पुरीं लंकां पूज्यमानो निशाचरैः १ प्रविश्य च महातेजा रावणस्य निवेशनं। ददर्श मृजया हीनां सातंकामिव रोहिणीं २ वृक्षमूले निरानंदां रा
क्षसीभिः परीवृतां। निभृतः प्रणतः प्रह्वः सोभिगम्याभिवाद्य च ३ दृष्ट्वा तमागतं देवी हनूमंतं महाबलं। तूष्णीमास्ते तदा दृष्ट्वा स्मृत्वा प्रमुदिताभवत् ४ सौ
म्यं तस्या मुखं दृष्ट्वा हनूमान्प्लवगोत्तमः। रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ५ वैदेहि कुशली रामः ससुग्रीवः सलक्ष्मणः। विभीषणसहायश्च हरीणां
सहितो बलैः ६ कुशलं त्वां ह प्राह कार्योऽहिनशत्रुररिंदमः। विभीषणसहायेन रामेण हरिभिः सह ७ निहतो रावणो देवि लक्ष्मणस्य नयेन च॥ ॥

तूष्णीमास्ते ततो दृष्ट्वा स्मृत्वा हनूमानिति ज्ञात्वा हृष्टा चेति। कुशलं दृष्ट्वा राघवस्त्वामब्रवीदिति संबंधः॥ ॥ राम १५३

वचनप्रकारमेवाह। प्रियमाख्यामीत्यादि। प्रियमाख्यामीत्यारभ्य अयं चाभ्येतीत्यंतं संहृष्टस्त्वद्दर्शनमसुत्सुक इत्येतदंतं रामः संदेशवाक्यं देवि ते प्रियमाख्यामि त्वां तद्भूयः पुनः विशेषसभाजये प्रीणयामि
दिष्ट्येति। ममजयेन। मम जयेन हेतुना मम प्रजयं मिति दिष्ट्या वर्धसि जीवसीत्यर्थः। अत एव नः। अस्माभिः किंतु गोजयो लब्धः त्वत्प्रसादेनेति योजना। यद्वा। मम जयेन मत्पराक्रमेण गोजयो लब्धः त्वत्प्रसादेनेति
संबंधः। मयेति। जय निर्जयेशत्रुहननं च विमोचनं च तेन एकाग्रचित्तेन अनन्यमनसा न च निद्रेण मया महोदधौ सेतुं बद्ध्वा एषा प्रतिज्ञा रावणं हनिष्यामीति [illegible] निस्तीर्णेति संबंधः। अथ मडति। संप्र
मो भयं प्राप्त दाश्वसिहीत्यन्वयं विभीषणेन त्वद्दर्शनमसुत्सुकः मन्नभ्येतीति संबंधः प्रियमिति। तूर्णं नेत्रा त्वणमात्रेण केवलं हर्षवशादेव निर्वाक्यासीत् [illegible] प्रीया प्राप्यात त्वद्वचनेन तर इत्यतिविवक्षा

प्रियमाख्यामि ते देवि त्वां च भूयः सभाजये ८ दिष्ट्या जीवसि धर्मज्ञे जयेन मम संयुगे॥ दृष्ट्वा तु कुशलं रामो वीरस्त्वां रघुनंदनः ९ अब्रवीत्परमप्रीतः कृतार्थेनांतरात्मना दिष्ट्या व
र्धसि धर्मज्ञे त्वं मम जयेन च संयुगे १० लब्धो यो विजयः सीते त्वया भवगतव्यथा। रावणो निहतः पापः सामात्यः स हतो मृधे ११ मयात्तम् लब्ध निद्रेणाद्य तेन तद्वनिर्जये। पतितापा(
लितो देवि वधात्तेन महोदधौ १२ संदेहो न च कर्तव्यो वर्तत्या राक्षसालये। विभीषणविधेयं हि लंकैश्वर्यमिदं कृतं १३ तदाश्वसिहि विश्वस्ता स्वगृहे परिवर्तसे। अयं चाभ्येति
संहृष्टस्त्वद्दर्शनमसुत्सुकः। एवमुक्ता समुत्पत्य सीता शशिनिभानना। प्रहर्षेणावरुद्धा सा व्याजहार न किंचन १५ अब्रवीच्च हरिश्रेष्ठः सीतामप्रतिजल्पतीं। किं त्वं चिंत
यसे देवि किं च मां नाभिभाषसे १६ एवमुक्ता हनुमता सीता धर्मव्यवस्थिता। अब्रवीत्परमप्रीता हर्षगद्गदया गिरा १७ प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितां। प्रहर्षवशमा
पन्ना निर्वाक्यास्मि क्षणांतरं १८ नहि पश्यामि सदृशं चिंतयंती प्लवंगम। मत्प्रियाख्यानकस्येह तव प्रत्यभिनंदनं १९ न च पश्यामि तत्सौम्य पृथिव्यामपि वानर। सदृशं मत्प्रिया
ख्याने तव दातुं भवेत्समं २० हिरण्यं वा सुवर्णं वा रत्नानि विविधानि वा। राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुं २१ एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवंगमः। प्रगृहीतांजलिर्वा
क्यं सीतायाः प्रमुखे स्थितः २२ भर्तुः प्रियहिते युक्ते भर्तुर्विजयकांक्षिणि। स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषितुं २३ तवैतद्वचनं सौम्ये सारवत्स्निग्धमेव च। रत्नौघा
द्विविधाच्चापि देवराज्याद्विशिष्यते २४ अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः। हतशत्रुं विजयिनं रामं पश्यामि सुस्थितं २५ तस्य तद्वचनं श्रुत्वा मैथिली जनकात्म
जा। ततः शुभतरं वाक्यमुवाच पवनात्मजं २६

वचनस्याभावादपीत्याह। नहीति। मत्प्रियाख्यानकस्य मत्प्रियाख्यातुस्तव प्रत्यभिनंदनं प्रतिप्रियवाक्यं न पश्यामीति संबंधः। सदृशं प्रियवचनं न पश्यामीत्युक्त्वा सदृशं प्रदेयं वस्त्व
पि नास्तीत्याह। न च पश्यामीत्यादि श्लोकद्वयेन। न वदातुं सदृशं प्रदानं तत्पृथिव्यामपि न पश्यामि यतः स्वर्गयोग्यान्यपि शक्यार्थः। हिरण्यं रजतं। हिरण्याद्येतत्सर्वमपि मत्प्रिया
ख्यानसमत्वेन भाषितुं नार्हतीत्यर्थः। प्रियाख्यानसदृशं प्रदेयं वस्तु नास्तीत्यस्योत्तरमाह। तवैतद्वचनं निःसमाप्याधिक्यमेतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु
लब्धमिति भावः। अर्थतश्चेति। विजयिनं रामं पश्यामीति यत् अनेनैव अर्थः परमार्थतो देवराज्यादयो गुणाः। श्रेयांसि प्राप्ता इत्यर्थः।। ॥

सु. १४४ अनिलन्नतोनि। अतिलक्षणसंपन्नं आकारं च्छायो पततालविधिमत्पदस मूलरूपस्तलक्षणसंपन्नं माधुर्यगुणभूषितं श्रवणमात्रेणानंदजनकत्वं माधुर्यं अष्टांगयाशुश्रूषा श्रवणं
चैव ग्रहणं धारणं तथा। ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः इत्युक्ता अष्टांगयुक्तयायुक्तत्वं च मतिबलं मायामसहिष्णुत्वं शौर्यं युद्धोत्साहः सत्वं शारीरः सारः तेनः पराभिभवसा
मर्थ्यं विनीतत्वं शारीरः सारः तेनः पराभिभवसामर्थ्यं विनीतत्वं चेत्याद्यो बहवो गुणास्त्वय्येव संति अत्र तन्नं शपद् सर्वपः इत्याइति। राक्षस्यो राक्षसी किं रूपंतीनित्यादि सार्द्धश्लोकमे
कं वाक्यं। क्रूराः क्रूरतरेक्षणाः याराक्षस्यस्तापतिघोररूपसमाचाराः अतिघोरकर्माणः दारुणकथा श्रुताः सर्वाः सुष्ठ्यादिभिर्हंतुमिच्छाम्येतच्छेमेषपच्छे त्वं चयत्योगेत्यादि

अतिलक्षणसंपन्नं माधुर्यगुणभूषितं। बुध्यान्ह्यष्टांगया युक्तं त्वमेवार्हसि भाषितुं २६ साधनीयो निलस्य त्वं हतः पराम धार्मिकः। बलं शौर्यं श्रुतं सत्वं विक्रमो दा
क्ष्यमुत्तमं २७ तेजः क्षमा धृतिः स्थैर्यं विनीतत्वं न संशय। एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः २८ अथो वायुसुतः सीतामसंप्राप्तो विनीतवनताप्रहीतांजलिर्हर्षा
त्सीतायां प्रमुखे स्थितः २९ इमास्त्वाव्य नुराक्षस्यो पादित्यपनुमन्यसे। हंतुमिच्छाम्यहं सर्वा यामिस्त्वं तर्जिता पुरा ३० क्लिश्यंतीं पतिदेवां त्वामशोकवनिकागतां।
घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ३१ राक्षस्यो दारुणकथा वरमेतत्प्रयच्छ मे। मुष्टिभिः पाणिभिः सर्वाश्चरणैश्चापि शोभने ३२ इच्छामि विविधैर्घातैर्हंतुमे
ताः सुदारुणाः। घोरैर्जानुप्रहारैश्च दशनानां च पातनैः ३३ भक्षणैः कर्णनासानां केशानां लुंचनैस्तथा। भृशं शुष्कमुखीभिश्च दारुणैर्लंघनैर्हतैः ३४ निहत्य शं कुर्या
वां संप्राप्य के स्थ कृत्वैरा निपात्य हंतुमिच्छामि न वविप्रियकारिणीः ३५ एवंप्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि। हंतुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषाः ३६ एव
मुक्ता हनुमता वैदेही जनकात्मजा। उवाच धर्मसहितं हनूमंतं यशस्विनी ३७ राक्षसीनां वशस्थानां कुर्वंतीनां पराज्ञया। विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ३८
भाग्यवैषम्ययोगेन पुरा दुश्चरितेन च। मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ३९ प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितं। दासीनां रावणस्याहं मर्षयामीह दुर्बला
४० आज्ञप्ता रावणेनैता राक्षस्यो मामतर्जयन्। हते तस्मिन्न कुर्वंति तर्जनं वानरोत्तम ४१ अयं व्याघ्रसमीपे तु पुराणो धर्मसंहितः। ऋक्षेण गीतः श्लोकोस्ति तं निबोध प्लवंगम
४२

श्लोकद्वयमेकं वाक्यं। शुष्कमुखीभिः न खैः लंघनैः उत्प्लुत्योपरि पतनैः एवमिति श्लोकमित्रं वाक्यं। राज्ञे निराज्ञा न संश्रयपदवश्यानां। राज संश्रयो राजसेवा। राजसेवा परात्वां नित्यर्थः
प्राप्तव्यमिति। दशायोगेन पुंसकत्वमाचष्टे यद्दशायोगः। एतादृशदुरवस्था विशेषः मया प्राप्तव्य इति निश्चितः। निश्चयः कृतः कृतः स्त्वंविद्या पूर्वमेता दशायाविराकारणक राम
र्मकारणराज्ञा अतः रावणस्य दासीनां एतन्न [illegible] नादिकं मर्षयामि अहं सह इत्यर्थः। दशायोगादिति पाठे रावणस्य दासीना एतन्न [illegible] दृशायोगात्। अवस्थायोगात्। १४४
अनुभवयोग्यकालसंबंधादिति पावतः। प्राप्तव्यमिति मया निश्चितं कुतः दुर्बला। अतः एतन्मर्षयामि असह इत्यर्थः। राक्षसीनाम [illegible] रपरा नानामूलत्वं च वधप्रतिकूला
दर्शयति॥ अयमिति॥ ॥

तमे नक्तो कं दर्शयति नपार इति कस्मिंश्चिदपराधेप्यपात्या नुकुलतः कश्चिद्याधोत्रनत्पन्नस्मारु हनान्नमपूलगतो व्याघ्रोऋक्षोपरिस्थितं ऋक्षं संबन्ध्या पातमप्ता कं भ्रपं व्याधो मात्या
शत्रुः कृत्वा देनपान पेत्य प्रवीत् एव मुक्तो भल्लूकस्त्वा ब्रवीत् अनपातमेन नपातयिष्यामि ॥ तथा चैव धर्म हानि स्यादिति मुक्तस्तप्राप । तां रात्रिं मातमसुस्थं भ्रम हंपात पेनि व्याघ्रोत्ता ब्रीति
तं मन व्याधं तत्तत्त्वमपातयत् । तस्तसं भ्राम्य सह लेभ शाखां वानरम सर्वं घ्नता पनतत दनंतरम् नाथपरा धमिन पात्ययेति पुन र्व्याघ्रेणोक्त सतोपि भल्लूकः व ऊ शः कृतापराधमिन
तुभ्यं न दास्यामी त्यपि आपा रक्षेति पौराणिकी कथा ॥ न ऋत्वार्थ श्लोकः । परेषां पापकर्मणां वा तु हिंस्रा पापं कुर्वतां परः प्राज्ञः पुरुषः । पापं अल्प पकाराल्पा नादत्ते नाङ्गीकरो
ति न करोतीत्यर्थः । समय आचारः अपकर्त्र्यपि प्रत्युपकार स्वजनं नरूपः रक्षितव्य एव । तथा हि । संत चारित्रभूषणाः सद्भिश्चारित्रभूषणेति पाठे सद्भिः सम

नपरः पापमादत्ते परेषां पापकर्मणां ॥ समयो रक्षितव्यस्तु संतश्चारित्रभूषणाः ४३ पापानां वा शुभानां वा वधार्हाणां प्लवंगम ॥ कार्यं कारुण्यमार्येण न कश्चिन्नापराध्य
ति ४४ लोकहिंसाविहाराणां क्रूराणां पापकर्मणां ॥ कुर्वतामपि पापानि नैव कार्यमशोभनं ४५ एवमुक्तस्तु हनुमान्सीतया वाक्यकोविदः ॥ प्रत्युवाच ततः सीतां रामप
त्नीं यशस्विनीं ॥ युक्ता रामस्य भवती धर्मपत्नी यशस्विनी ॥ प्रतिसंदिश मां देवि गमिष्ये यत्र राघवः ४७ एवमुक्ता हनुमता वैदेही जनकात्मजा ॥ अब्रवीद्द्रष्टुमिच्छामि
भर्तारं वानरोत्तम ४८ तस्यास्तद्वचनं श्रुत्वा हनुमान्पवनात्मजः ॥ हर्षयन्मैथिलीं वाक्यमुवाचेदं महाद्युतिः ४९ पूर्णचंद्राननं रामं द्रक्ष्यस्यार्ये सलक्ष्मणं ॥ स्थिरमि
त्रं हतामित्रं शचीव त्रिदशेश्वरं ५० तामेवमुक्त्वा राजंतीं सीतां साक्षादिव श्रियं ॥ आजगाम महावेगो हनुमान्यत्र राघवः ५१ सपदि हरिवरस्ततो हनुमान्प्रतिवचनं
जनकेश्वरात्मजायाः कथितमकथयद्यथाक्रमं त्रिदशवरप्रतिमाय राघवाय ॥ ॥ इत्यार्षे रामायणे युद्धकांडे षोडशशततमः सर्गः ॥ ॥ स उवाच महाप्राज्ञमभिगम्य
प्लवंगमः ॥ रामं वचनमर्थज्ञो वरं सर्वधनुष्मतां १ यन्निमित्तोयमारंभः कर्मणां च फलोदयः ॥ तां देवीं शोकसंतप्तां मैथिलीं द्रष्टुमर्हसि २ सा हि शोकसमाविष्टा बाष्प
पर्याकुलेक्षणा ॥ मैथिली विजयं श्रुत्वा तव हर्षमुपागमत ३

योरक्षितव्य इति संबंधः । पापानां मिति पापानां वधार्हाणां वा शुभानां वधार्हाणां वा । पापजने षु वधार्हेषु शुभजनेषु वधार्हेषु मध्यमपि तेषु । आर्येण सज्जनेना कारु
ण्यं कार्यं कर्तव्यमित्यर्थः । न तु मापराधिषु पश्चापराधमेव स्पंदे स्मकर्तव्य इत्याशंक्याह इति धर्मं गेन परिहरति न कश्चिदिति कश्चिदपि नापराध्यतीति न सर्वोप्यपरा
ध्यत्येव अतः सर्वं विदं ध्यात्वा हृपा शान्निन् स्मीशर भेणा व दामि तिमानं सा समानां परक्षितं नं स्वाभावि कोधर्म इत्यतोपि न वध्यरक्षा इति लोकहिंसेति ॥ अशोभनं वर
कं ॥ इति युद्धकांडे षोडशशततमः सर्गः ॥ ॥ यन्निमित्त इति ॥ आरंभः उद्योगः । कर्मणां सेतुबंधादीनां फलोदयो रावणवधः पश्चात्प्रतिपत्तिः ॥ ॥

यु॰ र्वकत्वादिति पूर्वकालात्पत्यालातं देशकालीन सत्यपालत। आत्मीयोपनिनिविष्टामादित्यर्थः। एवमुक्तः इति। ताम ईषत्वाष्पपरिप्लुतः मस्त्र हसा ध्यानमगच्छत्। रावणापवनो
१४५ षितमसीतां यदि गृहे महान्लोकापवादो भवेत्तां निर्दोषां पालयामि परित्यागे महान्दोषः स्यादित्येवं कार्यद्वैध्यात् किं कर्तव्यमिति चिंतया ध्यानमित्यर्थः।। दिव्यांगरागां शिरस्नातां
सीतां उपस्थापयेत्यस्याभिप्रायः। यद्विसीतामविशोध्यैव हीव्यामितदा एतादृशदिव्यसंसीतां द्रष्टुं रावणामन्तर्ध्यानी निष्ठे तिष्ठ दुर्विधउत्क्षिप्तकल्कांकितवि
नाः निष्कलंकायां जग त्वनन्यापाय विदेव्यां शंकेयुरिति मत्वा नोजनान्मर्यादापरिपालनायावनीतां श्रीरामोपस्थापनारितिश्रेष्ठस्तत्र देवेशोतपरतिम्याप मनुस निष्कां

र्वकान्त्वयानघ। हनुमतो विश्वस्तया तया। भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणं ४ एवमुक्तो हनुमता रामो धर्मभृतां वरः। आगच्छत्सहसा ध्यानमीषद्बाष्पपरि-
प्लुतः ५ स दीर्घमभिनिश्वस्य मेदिनीमवलोकयन्। उवाच मेघसंकाशं विभीषणमुपस्थितं ६ दिव्यांगरागां वैदेहीं दिव्याभरणभूषितां। इह सीतां शिरस्नातामु-
पस्थापय मा चिरं ७ एवमुक्तस्तु रामेण त्वरमाणो विभीषणः। ८ प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत्। ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः। मूर्ध्नि ब-
द्धांजलिः श्रीमान्विनीतो राक्षसेश्वरः। दिव्यांगरागा वैदेहि दिव्याभरणभूषिता। यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति। एवमुक्ता तु वैदेही प्रत्युवाच विभीषणं।
अस्नात्वा द्रष्टुमिच्छामि भर्तारं राक्षसेश्वर १० तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः। यथाह रामो भर्ता ते तत्तथा कर्तुमर्हसि ११ ततः सीता शिरस्नातां युवतीभिर-
लंकृतां महार्हाभरणोपेतां महार्हाम्बरधारिणीं १३ आरोप्य शिबिकां दीप्तां परार्ध्याम्बरसंवृतां रक्षोभिर्बहुभिर्गुप्तामाजहार विभीषणः १४ सोऽभिगम्य महात्मानं ज्ञा-
त्वापि ध्यानमास्थितं प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् १५ तामागतामुपश्रुत्य रक्षोगृहचिरोषितां हर्षो दैन्यं च रोषश्च त्रयं राघवमाविशत्। १६ ततः पार्श्वग-
तं दृष्ट्वा सविमर्शं विचारयन्। विभीषणमिदं वाक्यमहृष्टो राघवोऽब्रवीत् १७ राक्षसाधिपते सौम्य नित्यं मद्विजये रत। वैदेही संनिकर्षं मे शीघ्रं समुपगच्छतु १८ तस्य तद्वच-
नं श्रुत्वा राघवस्य विभीषणः। तूर्णमुत्सारणं तत्र कारयामास सर्वतः १९ कंचुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः। उत्सारयन्तस्तान्योधान्समन्तात्परिचक्रमुः २० ऋ-
क्षाणां वानराणां च राक्षसानां च सर्वशः। वृन्दान्युत्सार्यमाणानि दूरमुत्तस्थुरन्ततः २१

देवीत्वयं तान नप्रिलोकापवादानिवृत्तये नस्यां हृषितद्द्वदकषोक्तिं वदन्नात्मायं पावेशपयमभवभवें द्रष्टुरवा मरणागे। संस्कृतं पार्थितोनित्यसुखां देवीं गीक-
त्वेमिति। सरसिता त्वा विभीषणोऽनुगमनं तात्वात मिति हर्षोरावणावधपूर्वकसीतासमागमेनेत हर्षः शवणमवनोषितत्वपे वदे परो वधो हेतुम अन्तरोपश्चभावि राम
शपथो धर्षकत्वाद्दारो पितरति हर्ष्या। दिव्यांगरागा पितिभर्त्सेत्वाद्दष्टुमिच्छतीति स्वामिह्रीभिरचोदयदित्यर्वेणार्पयंव॥ ततः पार्श्वगतामिति। तां वि मर्शमवि १४५
तर्कविचारवितिसंधः। उत्सारणमिति। उत्सारणः। उपचक्रमुः।।

तेषां मिति॥ वायुना हेतुना उद्दह्यमानस्य उद्भ्रमाणस्य उत्सार्यमाणानीति दाक्षिण्यमाचानरेथिति शेषः। तस्मशोल। तद्दर्शनात्मह्नात। किमर्थमि[illegible]नोदेषु जनः न मृद्गाणीति। तिरस्कृतानि
रस्कारिणः। व्यसने इति। इष्टजनमरणाजनितदुःखं व्यसनं। कष्टेषु आपत्सु एव तत्कालं इति सविमर्शः। मानाविषयेष्वपि नाश्विन्नं कीदृशं मिति सा[illegible]चारः विस्मयादिति। अनेकभा विलद्दर्शने आ
तमिति विस्मयः। प्रियस्य दर्शनेन हर्षः अथेति। समुपन्नुदत। समुपात्तदत्त   इति बृहत्कोशलखण्डे त्रयस्त्रिंशत्तमः सर्गः   गतोस्मीति। अने[illegible]मिति। मया विरहिता या त्वं चलवि

तेषां प्रत्सार्यमाणानां सर्वेषां च निजान्वितः॥ वायुनोद्दह्यमानस्य समुद्रस्येव निस्वनः २२ उत्सार्यमाणांस्तान्दृष्ट्वा समं ताज्जातसंभ्रमात्। दाक्षिण्यात्तद्दमर्षाच्च वारयामास राघवः २३
संरब्धः श्रावयन्रामः चक्षुषा प्रदहन्निव। विभीषणं महाप्राज्ञं सोपालंभमिदं वचः २४ किमर्थं मामनादृत्य क्लिश्यते यं त्वया जनः। निवर्त्यतामयमुद्वेगो जनोयं स्वजनो मम २५ न
गृहाणि न वस्त्राणि न प्राकारास्तिरस्क्रियाः। नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियः २६ व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे। न क्रतौ न विवाहे च दर्शनं दूष्यते स्त्रियः २७ सैषा
युद्धगता चैव कृच्छ्रे महति च स्थिता। दर्शने नास्ति दोषोस्या मत्समीपे विशेषतः २८ तदानय समीपे मे शीघ्रमेनां विभीषण। सा तापस्ववेषा मां सुहृज्जनवृता स्थिता २९ एवमुक्त
स्तु रामेण सविमर्शो विभीषणः। रामस्योपानयत्सीतां सन्निकर्षं विनीतवत् ३० ततो लक्ष्मणसुग्रीवौ हनूमांश्च प्लवंगमः। निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशं ३१ क
लत्रनिरपेक्षैश्च इंगितैरस्य दारुणैः॥ अप्रीतमिव सीतायां तर्कयंति स्म राघवं॥ लज्जया त्ववलीयंती स्वेषु गात्रेषु मैथिली॥ विभीषणेनानुगता भर्तारं सोभ्यवर्तत ३३ सा
वस्त्रसंरुद्धवदना लज्जया जनसंसदि। रुरोदासाद्य भर्तारं मार्यपुत्रेति भाषिणी ३४ विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता। उदैक्षत मुखं भर्तुः सौम्यं सौम्यतरानना। ३५ अ
थ समपनयन्मनः क्लमं सा सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य। वदनमुदितपूर्णचंद्रकांतं विमलशशांकनिभानना तदासीत ३६ इति श्रीबृहत्कोशलखण्डे त्रयस्त्रिंशत्तमः सर्गः तां
तु पार्श्वे स्थितां प्रह्वां रामः संप्रेक्ष्य मैथिलीं॥ हृदयांतर्गतं हेयोव्याहर्तुमुपचक्रमे १ एषासि निर्जिता भद्रे शत्रुं जित्वा मया रणे। पौरुषाद्यदनुष्ठेयं तदेतदुपपादितं २ गतोस्म्य
मर्षस्यान्तं धर्षणा संप्रमार्जिता। अवमानश्च शत्रुश्च मया युगपदुद्धृतौ ३ अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः। अद्य तीर्णप्रतिज्ञोहं प्रभवाम्यद्य चात्मनः ४ या त्वं वि
रहिता नीता चलचित्तेन रक्षसा। दैवसंपादितो दोषो मानुषेण मया जितः ५ ॥ ॥

तेन रक्षसा नीता त्वया हेतुभूतया। हेतुस्तत्याद्दैवसंपादितो दोषो मानुषेण मया जितः। मानुषेणापि उपेणेति वा जितः प्रभ्रष्टः दैवकृतं पुनरपयत्नेन निराकृतमिति भावः॥ ॥

स॰ यु॰ इत्येवमितितद्वचनं नैराश्यद्योतकं वचः निशम्येति शेषः। सव्रीडेति। तिर्यक्प्रेक्षितः लोचनः तिर्यक्प्रसृतं प्रेक्षितं येन तादृशे लोचने यस्य सः। यत्कर्त्तव्यमिति शत्रुहस्ता-
दमर्षणादित्युत्तरशेषः। सा ते धर्षणां परिमार्जिता मनुष्येण यत्कर्त्तव्यं तत्कृतमिति संबंधः। जीवलोकस्येति निर्धारणे षष्ठी॥ प्राणिजातस्य मध्ये तपसा भावितात्मना। तपसा शुद्ध वि-
१५६ त्तेन अगस्त्येन दुराधर्षा दक्षिणा दिगिव अमर्षणात् क्रोधाद्धेतोः शत्रुहस्तान्मया त्वं निर्जितेति संबंधः। विदितश्चेति। सुहृदां वीर्यान्नीर्णो योयं रणपरिश्रमः त्वदर्थं मया न कृत इ-
ति विदितश्चास्त्वित्यन्वयः। तर्हि किमर्थं कृत इत्यत्राह रक्षतेति॥ अत्र मया रणपरिश्रमः कृत इत्यनुषज्यते॥ वृत्तं चारित्रं रक्षता ख्यापयिता। अपवादं न्यंगः। अयशं न्यंगतां च परिरक्षा

संप्राप्तमवमानं यस्तेजसा न प्रमार्जति। कस्तस्य पुरुषार्थोस्ति पुरुषस्याल्पतेजसः ६ लंघनं च समुद्रस्य लंकायाश्चावमर्दनं। सफलं तस्य च श्लाघ्यं अद्य कर्म हनूमतः ७ युद्धे विक्र-
मतश्चैव हितं मंत्रयतस्तथा। सुग्रीवस्य ससैन्यस्य सफलोद्य परिश्रमः ८ निर्गुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः। विभीषणस्य भक्तस्य सफलोद्य परिश्रमः ९ इत्येवं व-
दतस्तस्य सीता रामस्य तद्वचः। मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता १० पश्यतस्तां तु रामस्य भूयः क्रोधोभ्यवर्द्धत। प्रभूताज्यावसिक्तस्य पावकस्येव दीप्यतः ११ स ब-
द्ध्वा भ्रुकुटिं वक्त्रे तिर्यक्प्रेक्षितलोचनः॥ अब्रवीत्परुषं सीतां मध्ये वानररक्षसां। यत्कर्त्तव्यं मनुष्येण धर्षणां परिमार्जिता। मयापि तत्कृतं सीते शत्रुहस्तादमर्षणात्। निर्जिता
जीवलोकस्य तपसा भावितात्मना॥ अगस्त्येन दुराधर्षा मुनिना दक्षिणा व दिक्। विदितश्चास्तु भद्रं ते योयं रणपरिश्रमः। सतीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः १५ रक्ष-
ता तु मया वृत्तमपवादं च सर्वशः॥ प्रख्यातस्यात्मवंशस्य न्यंगं च परिमार्जता १६ प्राप्तचारित्रसंदेहा मम प्रतिमुखे स्थिता। दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढं १७ त-
द्गच्छ ह्यभ्यनुज्ञाता यथेष्टं जनकात्मजे॥ एता दश दिशो भद्रे कार्यमस्ति न मे त्वया १८ कः पुमान् हि कुले जातः स्त्रियं परगृहोषितां॥ तेजस्वी पुनरादद्यात्सुहृल्लेख्येन चेत-
सा १९ रावणांकपरिक्लिष्टां दृष्टां दुष्टेन चक्षुषा॥ कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् २० तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया। नास्ति मे त्वय्यभिष्वंगो यथे-
ष्टं गम्यतामितः। इति प्रव्याहृतं भद्रे मयैतत्कृतबुद्धिना। लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखं। सुग्रीवे वानरेंद्रे वा राक्षसेंद्रे विभीषणे। निवेशय मनः सीते यथा वा सुख-
मात्मनः। न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमां। मर्षयेत चिरं सीते स्वगृहे पर्यवर्त्तिनीं॥ ततः प्रियार्हश्रवणा तदप्रियं प्रियादुपश्रुत्य चिरस्य मानिनी। मुमोच बाष्पं
भृशं प्रवेपिता गजेंद्रहस्ताभिहतेव वल्लरी २४ इति युद्धकांडे अष्टादशशतोत्तरतमः सर्गः॥ ॥ २

ता अपनयता। कः पुमानिति सुहृल्लेख्येन रागिकापेक्षया लेख्येन रक्षणीयेनेति। सुहृल्लेख्यं तेन रणहरिकामुकेनेत्यर्थः। यद्वा सुहृल्लोभेनाद्युदासीनेनेति वा लोभः। निवर्त्तायस्य तेन राव-
णांकेति। व्यपदिशन् प्रख्यापयन्॥ तदर्थमिति। तदर्थं कुलार्थं। अभिषंगः आसक्तिः। लक्ष्मणे इति। तत्सदृशेषु लक्ष्मणादिषु मध्ये यत्र कुत्रापि मनो निवेशय आत्मभरणा- राम
र्थमिति शेषः। तत इति। प्रियार्हश्रवणा प्रियश्रवणार्हा। गजेंद्रहस्ताभिहता वल्लीका वल्लरी यथा शीर्यते तथा बाष्पं मुमोचेत्यर्थः॥ इति युद्धकांडे अष्टादशशततमः सर्गः॥ ॥ १५६

सेमिति॥ लज्जयाव्रीडिताभवत् लज्जया ग्रतिनंम्रमुखी बभूवेत्यर्थः॥ किमिति॥ असदृशं त्वया वक्तुं मया श्रोतुं च अयोग्यं रूक्षं॥ पत्युर्मे अनुचितं श्रोत्रदारुणं श्रवणकटु॥ प्रीमात्रसाधा
रणेन नमाइ हलोत्याह॥ ग्रथ्यमिति॥ पृथक्स्त्रीणां प्रचारेण व्यापारेण हेतुना मम वाम पि जातिं स्त्रीजातिं त्वं परिशंकसे। अहं तेन त्वया यदि परीक्षिता तदा इमां शंकां जातिस्वभावात्मकां
त्यज॥ ज्ञातस्वभावयां मयि शंका न कार्येत्यर्थः॥ सत्स्वभावत्वान्मयि शंकाभावे पि यद्यहं गात्रसमये रावणगात्रस्पर्शेन दूषितेति शंका मास्यहेतुर्निवारयति॥ यद्यहमित्यादिना श्लोकद्वयेन
विवशा सत्यहं गात्रसंस्पर्शं गतास्मि यद्यपि तथापि तत्र मे कामकारः स्वेच्छाचरणं नास्ति यतस्तत्र मदधीनं त्वयि वर्तते अतः दैवमिति॥ मदधीनं यदि हृदयं त्वमशक्तं परा
ने पुरवेश्या त्वं शंकोस इत सहसंवृद्धेति॥ सहसंवृद्धभावात् स्वभावपरिज्ञानं हेतुत्वेन बाल्यादित आरभ्य एकत्र सहसंवृद्धत्वादेतोः संसर्गेण च तेन त्वया हं न विज्ञातेति चेत् तेन मत्स्वभावा

एवमुक्तातुवैदेहीपरुषंरोमहर्षणं॥ राघवेणससंवेगंभृशंप्रव्यथिताभवत् १ सातदश्रुतपूर्वंहिजनेमहतिमैथिली॥ श्रुत्वाभर्तृवचोरूक्षंलज्जयाव्रीडिताभवत् २ प्रविशंतीव
गात्राणिस्वानिसाजनकात्मजा॥ वाक्शरैस्तैःसशल्येवभृशंप्रव्यथिताभवत् ३ ततोबाष्पपरिक्लिष्टंप्रमार्जयंतीस्वमाननं॥ शनैर्गद्गदयावाचाभर्तारमिदमब्रवीत् ४ कि
मामसदृशंवाक्यमीदृशंश्रोत्रदारुणं॥ रूक्षंश्रावयसेवीरप्राकृतःप्राकृतामिव ५ नतथास्मिमहाबाहोयथात्वमवगच्छसि॥ प्रत्ययंगच्छमेस्वेनचारित्रेणैवतेशपे। ६ पृथ
क्स्त्रीणांप्रचारेणजातिंत्वंपरिशंकसे॥ परित्यजेमांशंकांतुयदितेहंपरीक्षिता॥ यद्यहंगात्रसंस्पर्शंगतास्मिविवशाप्रभो॥ कामकारोनमेतत्रदैवंतत्रापराध्यति ८ मदधी
नंतुयत्तन्मेहृदयंत्वयिवर्तते॥ पराधीनेषुगात्रेषुकिंकरिष्याम्यनीश्वरा ९ सहसंवृद्धभावाच्चसंसर्गेणचमानद॥ यद्यहंतेनविज्ञाताहतातेनास्मिशाश्वतं १० प्रेषि
तस्तेयदावीरोहनूमानवलोककः॥ लंकास्थाहंत्वयाराजन्किंतदानविसर्जिता॥ प्रत्यक्षंवानरेंद्रस्यत्वद्वाक्यसमनंतरं॥ त्वयासंत्यक्तयावीरत्यक्तंस्याज्जीवि
तंमया॥ नवृथातेश्रमोयंस्यात्संशयेन्यस्यजीवितं॥ सुहृज्जनपरिक्लेशोनचायंनिष्फलस्तव॥ त्वयातुनरशार्दूलक्रोधमेवानुवर्तता॥ लघुनेवमनुष्येणस्त्रीत्वमेवपु

रस्कृतं १३

परिज्ञानेन शाश्वतमत्यर्थं हतास्मीति संबंधः॥ प्रेषित इति॥ अवलोककः अवलोकितुं गवेषयितुं॥ अन्वेषणमिति यावत्॥ तथात्वे को विशेष इत्यत आह॥ प्रत्यक्षमिति॥ तदेवं त्वद्वाक्यं वि
तन्वानोऽस्य समीपे मृता॥ एतावता कालं महती त्वद्वियोगव्यथा न स्यादिति भावः॥ एवं कृतेन केवलं ममैव व्यथा भावः॥ किंतु॥ न वृथेति॥ तदा सुग्रीवादीनां वानराणां देहकष्ट्या
त्पप्रयासरूपः न स्यादित्याह॥ न वृथेति॥ जीवितं संशये न्यस्य कृतोयं वृथा परिश्रमस्ते न स्यात् तानि फलो यं सुहृज्जनपरिक्लेशश्च न स्यादित्यन्वयः॥ त्वया त्विति॥ स्त्री
त्वमेव पुरस्कृतं हृदये कृतं मम शीलमिति भावः॥ ॥ ४॥ २

स॰ यु॰ प्रमोत्पत्तिस्थानभूतयोरपि विचार्यमाणयोरियं शंका न संभाव्यत इत्याह। अपदेशेनेति। जनकादपदेशेनोत्पत्तिः। जनकव्याजेन तव वसुधातलादुत्पत्तिः। अन्वयान पुरस्कृता
२४८ न विचारिता। हन्त। वा त्वया त्वन्यत् उक्तं। सचारित्रं च न पुरस्कृतमित्यर्थः॥ अपरित्यागहेतुत्वेन सर्वलोकसमक्षं पाणिग्रहणमपि त्वया न प्रमाणीकृतमित्याह। नप्रमाणीकृत इ
ति। चितामिति। मिथ्यापवादो। मिथ्याभियोगः अभीतस्येति। गुणैरभीतस्य विद्यमानैः। पातित्यादिगुणैरभीतस्य भर्तुः। भर्त्रा त्यक्तायाः मया गन्तुं क्षमा मिति गम्यते न्याय

अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात्॥ मम वृत्तं च वृत्तज्ञ बहु तेन पुरस्कृतं १४ नप्रमाणीकृतः पाणिर्बाल्ये मम निपीडितः। मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतं १५
एवं ब्रुवाणा रुदती बाष्पगद्गदभाषिणी॥ अब्रवील्लक्ष्मणं सीता दीनं ध्यानपरं स्थितं १६ चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजं। मिथ्यापवादोपहता नाहं जीवितुमु
त्सहे १७ अप्रीतस्य गुणैर्भर्त्रा त्यक्ताया जनसंसदि। या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनं १८ एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा॥ अमर्षवशमापन्नो राघवानन
मैक्षत। स विज्ञाय ततश्छंदं रामस्याकारसूचितं॥ चकार सौमित्रिर्मते रामस्य वीर्यवान् २० अधोमुखं ततो रामं शनैः कृत्वा प्रदक्षिणं। उपासर्पत वैदेही दीप्यमानं हु
ताशनं २१ प्रणम्य दैवतेभ्यश्च ब्राह्मणेभ्यश्च मैथिली॥ बद्धांजलिपुटा चेदमुवाचाग्निसमीपतः २२ यथा मे हृदयं नित्यं नापसर्पति राघवात्॥ तथा लोकस्य सा
क्षी मां सर्वतः पातु पावकः २३ यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः २४ कर्मणा मनसा वाचा यथा नातिचराम्य
हं राघवं सर्वधर्मज्ञं तथा मां पातु पावकं २५ एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनं। विवेश ज्वलनं दीप्तं निःसंगेनांतरात्मना २६ जनश्च सुमहांस्तत्र बालवृद्धस
माकुलः॥ ददर्श मैथिलीं तत्र प्रविशंतीं हुताशनं २७ सा तप्तनवहेमाभा तप्तकांचनभूषणा। पपात ज्वलनं दीप्तं सर्वलोकस्य संनिधौ २८ ददृशुस्तां विशालाक्षीं प
तंतीं हव्यवाहनं। सीतां सर्वाणि भूतानि रुक्मवेदिनिभां तथा २९ ददृशुस्तां महाभागां प्रविशंतीं हुताशनं। सीतां कृत्स्नास्त्रयो लोकाः पुण्यामाज्याहुतीमिव ३०
प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने। पतंतीं संस्कृतां मंत्रैर्वसोर्धारामिवाध्वरे ३१ ददृशुस्तां त्रयो लोका देवगंधर्वदानवाः। शप्तां पतंतीं निरये त्रिदिवाद्देवता
मिव ३२ तस्यामग्निं विशन्त्यां तु हाहेति विपुलस्वनः। रक्षसां वानराणां च संबभूवाद्भुतोपमः ३३ इत्यार्षे रामायणे युद्धकांडे एकोनविंशच्छततमः सर्गः॥ ॥

यतेनयेति गतिः॥ प्रमाणं प्रत्ययजननात् स्थैर्योपस्थानमित्यर्थः। तं हव्यवाहनं प्रवेक्ष्य इति योजना। सइति। आकारसूचितं भ्रूभंगादिना सूचितं। यथेति॥ दुष्टां दुष्टत्वेन शंकि
तां मां शुद्धचारित्रां जानाति तथा मां सर्वतः पातु। यद्वा। राघवः यथा शुद्धचारित्रामेव मामन्यायेन दुष्टां जानाति। तथा मया वेद दुष्टामेव दुष्टेति जानातीति चेत्। पावको मां स राम
र्वतः पातु केशावशादिकमपि मा धाक्षीदित्यर्थः॥ प्रचुक्रुशुरिति। वसोर्धारां। संततां घृतधारां। ददृशुरिति निरये दुःखस्थाने एकोनविंशच्छततमः सर्गः॥ ॥ २४८

ननु इत्यादि योगरूपं कर्मकर्तृत्वेन विहितं तत्परोऽभूदित्यर्थः ॥ ननु इति । पदच्छेदः । उद्धृत्य कथयामि । सर्वे सर्वस्मिन्कल्पे स्युः । सर्वे वा चतुर्णां मध्ये नातुधामा नाम वस्तु ॥ तुष्याणामि
ति । आस्तिकत्वात् ब्रह्मादिपर्यन्ता धारकत्वात् कर्तृत्वार्थः ॥ स्वयंभुवः स्वयं प्रभवति लिङ्गात्मना अनियमत्वं च याते । रुद्राणामिति । रुद्राणाम् अष्टमो रुद्रः । रुद्राणामष्टमो नाम ध्ये
अष्टमो रुद्रः । महादेवः । तदक्षमभवः पशुपतिसंख्या । उग्रो भीमो महादेव इत्यष्टौ अग्निसंज्ञका इति । साध्यानां पञ्चमः ॥ वीर्यवान्नामतः ... मनो ... दिव्यालोकयमानो पितेः
तया नरश्चवीर्यवान् । चित्तिजयोन यस्यैव हंसो नारायणस्य ॥ प्रभवाय विधिश्चैव सः । धाता द्वादशजन्हि... विराट्तपतां वरायति अश्विनौ ... उत्पन्नः स्वस्वरूप
प्रजनायाश्च ... दात्मस्वरूपगणा विश्वतिस्वजने पिप्रत्यपाधितं स्वशोभा सर्वार्थयति । आत्मानं मासु प्रमितियो इत्यन्तं तत्त्वयं यस्य ... दीपयन् ... इच्छया पर्वते
श्रेष्ठो नरमाह । भवान्नारायण इति नारायणः । नराणामयनं ... प्रापदेवः स्वप्रकाशः एकशृङ्गो वराहः । आदिवराहः तस्य एकशृङ्गत्वात् कादेर्दर्शितः ।

ततो हिडिम्बनामासः कल्पेषु वदतां वरः । दधीचमुख्यांश्च धर्मात्मा बाकुललोचनः । ततो वैश्रवणो राजा यमस्वामि... कर्णेन । महर्षिर्माहेन्द्रश्च वरुणश्च स्वयं तपः २ षड्द्वैनयन
सामान्यास्तदेवो वृषध्वजः । कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ३ एते सर्वे समागम्य विमानैः सूर्यसंनिभैः । आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ४ ततः सहस्राभरणा
अप्रमेयविपुला भुजा । अब्रुवंस्त्रिदशश्रेष्ठा राघवं प्राञ्जलिं स्थितम् ५ कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां विभुः । उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने । कथं देवगणः
श्रेष्ठमात्मानं नावबुध्यसे । ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः ७ रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः । अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ८ अन्ते चा
दौ च भूतानां दृश्यसे त्वं परंतप । उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ९ इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः । अब्रवीत् त्रिदशश्रेष्ठान् रामो धर्मभृतां वरः १० आ
त्मानं मानुषं मन्ये रामं दशरथात्मजम् । सोऽहं यश्च यतश्चाहं भगवांस्तद् ब्रवीतु मे ११ इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः । अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम
१२ भवान्नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः । एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् १३ अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव । लोकानां त्वं परो धर्मो विष्वक्सेनश्च
तुर्भुजः १४ शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ॥ ॥

हरणं सलनं कृतवान्महता तत्र क्षत्रावतं देसं एकशृङ्गप्रसिद्धये । एकशृङ्गो वराहो भूतदा प्रभृति माधवइति । भूतभव्यभूतभव्यकालात्मकः अक्षरं परं ब्रह्म । तद् करं यद्भूतयो
नापरिपश्यन्ति धीरा इति श्रुतेः । सत्यं तावद् भूतं लोकानां मध्ये । अन्ते चा... दावपि परो धर्मः रामरमादिः समुद्रमादिप्राप्यत्वाज्ज्ञेयो व्यतो विष्वक्सेनः । विश्वग्विविधसेनागत
सेनायस्य सः चतुर्भुजः शत्रूणां निरसनं कृत्वा श्वला शेधुजायस्य सः । शार्ङ्गधन्वा कालरूपं शार्ङ्गं धनुर्यस्य सः । हृषीकेशः हृषीकाणामिन्द्रियाणामीशः पुरु
षः पुरुषाणि फलानि सुनोति ददातीति वा । पुरुषो नेदं सर्वं पुरुषो यदि केशेलि इति वा पुरुषः पूर्णत्वाद्वा पुरुषः । तेनेदं पूर्णं पुरुषेण सर्वं इति श्रुतेः पुरुषोत्तमः पुरुष
शब्दप्रतिपाद्यरूपेष्वयमुत्तम इत्यर्थः । यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति स्मृतेः ॥ ॥

 अजितः।गुणैरैश्वर्येण च केनाप्यजितः।खड्गधृत् विद्यामयनंदकाख्यखड्गं धारयतीति खड्गधृत्।विष्णुर्व्यापकः।कृष्णः कृषिर्भूवाचकः णश्च निर्वृतिवाचकः।तयोरैक्यं
 परं ब्रह्म कृष्ण इत्यभिधीयते इति वचनात्।बृहद्बलः बृहंति बलानि यस्येति तथा।सेनानी महती सेना।नयतीति सेनानीः।योधयितेत्यर्थः।ग्रामणीः ग्रामः प्राणिवर्गः।तं
नयति स्वकर्मफलं प्रापयतीति तथा।बुद्धिरध्यवसायात्मिका।क्षमा आश्रितानामपराधसहिष्णुत्वं।दमः इंद्रियनिग्रहः एतद्धर्मवत्त्वात्तदात्मना व्यपदेशः।प्रभवत्यस्माज्जगदिति
प्रभवः।अप्येति लीयते जगदस्मिन्नित्यप्ययः।उपेंद्रः।वामनः।मधुनामानमसुरं सूदयतीति मधुसूदनः।इंद्रकर्मा।इंद्रस्येश्वरस्य कर्म।ऐश्वर्यं तद्वानित्यर्थः।महेंद्रः महांश्चासा
विंद्रः ईशिता शक्ता जगत्कारणं पद्मं नाभौ यस्य सः पद्मनाभः।रणांतकृत् रणे शत्रूणां नाशकृत्।शरण्यं समाश्रयणीयं।शरणमुपायभूतं।सहस्रशृंगो वेदात्मा सहस्र
शाखसामवेदस्वरूपः।सहस्रं साम केंतीति प्रसिद्धिः।वेदानां सामवेदोऽस्मीति स्मृतेः।शतजिह्वः।नित्यनैमित्तिककाम्यरूपसामान्यविशेषचोदनारूपशतजिह्वः।शिख

अजितः खड्गधृग्विष्णुः कृष्णश्चैव बृहद्बलः १५ सेनानी ग्रामणीः सत्वं बुद्धिस्त्वं क्षमा दमः॥ प्रभवश्चाप्ययश्च त्वमुपेंद्रो मधुसूदनः १६ इंद्रकर्मा महेंद्रस्त्वं प
द्मनाभो रणांतकृत्॥ शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः १७ सहस्रशृंगो वेदात्मा शतजिह्वः महर्षभः॥ त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः १८
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः।त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परात्परः १९ प्रभवं निधनं वा ते न विदुः को भवानिति।दृश्यसे सर्वभूतेषु ब्राह्मणेषु
च गोषु च २० दिक्षु सर्वासु गगने पर्वतेषु वनेषु च। सहस्रचरणः श्रीमाञ्छतशीर्षः सहस्रदृक् २१ त्वं धारयसि लोकांश्च वसुधां च सपर्वतां। अंते पृथिव्याः सलि
ले दृश्यसे त्वं महोरगः २२ त्रींल्लोकान्धारयन्राम देवगंधर्वदानवान्। अहं ते हृदयं राम जिह्वा देवी सरस्वती २३ देवा गात्रेषु रोमाणि ब्रह्मणा निर्मिताः
प्रभो।निमेषस्ते भवेद्रात्रिरुन्मेषस्ते भवेद्दिवा॥ २४ संस्कारास्तेऽभवन्वेदा नैतदस्ति त्वया विना।जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलं २५

शीर्ष इति वा पाठः।महर्षभः श्रेष्ठतमः॥ आदिकर्ता ब्रह्मादीनामपि कर्ता।स्वयंप्रभुः।अनन्यप्रेर्यः।साध्यंते साध्यंते इति साध्याः तेषां सिद्धानां मुक्तानामप्याश्रयः।आश्रयः।पूर्व
जः।सृष्टेः सर्वमपि स्थितेः।त्वं यज्ञ इत्यादि।न विदुः को भवानिति।इदंतया न विदुरित्यर्थः।सर्वात्मतया प्राप्नोतीति दृश्यसे इति।सर्वभूतेषु प्राणिषु ब्राह्मणेषु गोषु वा अंत
र्यामितया दृश्यसे।गोब्राह्मणयोर्विश्वांतर्गतत्वेपि पृथगभिधानं विशिष्टाभिव्यक्त्यानतया।एवं जंगमांतर्यामित्वमभिधाय स्थावरांतर्यामितामाह।दिक्ष्विति।श्रुतप
र्वतस्य पदान्यवित्वा मेवप्रतिपादयंतीत्याह।सहस्रचरण इत्यादिना।सा प्रतिमा दिक्षु मीन्मनाप्नोति।त्वं धारयसीति।इदानीं भक्त्यर्थं शास्त्रप्राप्नोति अंतइति महोरगः
संकर्षण इत्यर्थः।विराड्रूपतामाह।त्रींल्लोकानित्यादिना।सा ईश्वरो कत्रयेण संस्कारास्तेऽभवन्वेदाः संस्क्रियंते बोध्यंते येभिर्लोकादि इति संस्काराः बोधकाः प्रवृत्ति
निवृत्तिव्यवस्थापकाः शक्तयो वत्।न तदस्ति त्वया विना।किं बहुना सर्वं पिदृश्यं जातं त्वदात्मकमेवेत्यर्थः।तदेवाह।जगत्सर्वं शरीरमिति॥ ॥ ४॥

संघन्यवतारफलमाह।भवान्विष्णुरित्यादिना॥तत्प्रयोजनमित्याह॥तदिदंनइति।स्तोत्रपाठस्यफलमाह।इममिति।आर्षंवेदसिद्धं।अक्लिष्टेति॥तथारूपं॥अग्निप्रवेशकालेयादृशवस्त्रांगरा
गस्रक्छोभायुक्तातादृशसौभाग्ययुक्तामित्यर्थः।अवश्यमिति॥रावणांतःपुरेदीर्घकालोषितासामान्यविज्ञलोकेष्वविषयेपावनेशोधनमर्हतीतियोजना।यद्वा॥अवश्यमित्यादिश्लोकद्वयमेकं

अग्निःकोपःप्रसादस्तेसोमश्रीवत्सलक्षणः।त्वयालोकास्त्रयःक्रांताःपुरास्वैर्विक्रमैस्त्रिभिः २६ महेंद्रश्चकृतोराजाबलिंबद्ध्वामहासुरं।सीतालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजा
पतिः २७ वधार्थंरावणस्येहप्रविष्टोमानुषींतनुं।तदिदंनःकृतंकार्यंत्वयाधर्मभृतांवर २८ निहतोरावणोरामप्रहृष्टोदिवमाक्रम।अमोघंबलवीर्यंतेनतेमोघाःपराक्रमाः
२९ अमोघंदर्शनंरामनचमोघस्तवस्तव।अमोघास्तेभविष्यंतिभक्तिमंतश्चयेनराः ३० येत्वांदेवंध्रुवंभक्ताःपुराणंपुरुषोत्तमं।प्राप्नुवंतिसदाकामानिहलोकेपरत्रच ३१
इममार्षंस्तवंदिव्यमितिहासंपुरातनं।येनराःकीर्तयिष्यंतिनास्तितेषांपराभवः ३२ इत्यार्षेरामायणेयुद्धकांडेविंशच्छततमःसर्गः एतच्छ्रुत्वाशुभंवाक्यंपितामहसमी
रितं।अंकेनादायवैदेहीमुत्पपातविभावसुः १ विधूयाथचितांतांतुवैदेहींहव्यवाहनः।उत्तस्थौमूर्तिमानाशुगृहीत्वाजनकात्मजां २ तरुणादित्यसंकाशांतप्तकां
चनभूषणां।रक्तांबरधरांबालांनीलकुंचितमूर्द्धजां।अक्लिष्टमाल्याभरणांतथारूपांमनस्विनीं।ददौरामायवैदेहीमंकेकृत्वाविभावसुः ४ अब्रवीत्तदारामंसा
क्षीलोकस्यपावकः।एषातेरामवैदेहीपापमस्यानविद्यते ५ नैववाचानमनसानानुध्यानान्नचक्षुषा।सुवृत्तावृत्तशौंडीरंनत्वामतिचचारह ६ रावणेनोपनीतेषावीर्यो
त्सिक्तेनरक्षसा।त्वयाविरहितादीनाविवशानिर्जनेवने।रुद्धाचांतःपुरेगुप्तात्वच्चित्तात्वत्परायणा।रक्षिताराक्षसीसंघैर्विकृतैर्घोरदर्शनैः ८ प्रलोभ्यमानाविविधं
भर्त्स्यमानाचमैथिली।नचिंतयततद्रक्षस्त्वद्गतेनांतरात्मना ९ विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वराघव।नकिंचिदभिधातव्यमहमाज्ञापयामिते १० ततःप्रीतमना
रामःश्रुत्वैवंवदतांवरः।दध्यौमुहूर्तंधर्मात्माहर्षव्याकुललोचनः ११ एवमुक्तोमहातेजाधृतिमान्दृढविक्रमः।अब्रवीत्त्रिदशश्रेष्ठंरामोधर्मभृतांवरः १२ अ
वश्यंत्रिषुलोकेषुसीतापावनमर्हति।दीर्घकालोषिताचेयंरावणांतःपुरेशुभा १३ बालिशःखलुकामात्मारामोदशरथात्मजः।इतिवक्ष्यतिमांसंतोजानकीमवि
शोध्यहि १४ अनन्यहृदयांभक्तांमच्चित्तपरिवर्तिनीं।अहमप्यवगच्छामिमैथिलींजनकात्मजां १५ प्रत्ययार्थंतुलोकानांत्रयाणांसत्यसंश्रयः।उपेक्षेचापिवैदे
हींप्रविशंतींहुताशनं १६ इमामपिविशालाक्षींरक्षितांस्वेनतेजसा।रावणोनातिवर्तेतवेलामिवमहोदधिः १७ ॥

वाक्यं।रावणांतःपुरेदीर्घकालोषितापिपरिशुद्धा।इयंसीतापावनमर्हतीतियद्यपितथापिरामःसांजानकीमविशोध्यःस्वाकरोति।यदितदारामोबालिशःकामात्मेतिचत्रिषुलोकेषुसंतोमां
वक्ष्यंतीतिसंबंधः॥ ॥ ३॥

रा० यु० इतिश्रीयुद्धकांडे एकविंशदुत्तमः सर्गः ॥ दिष्ट्येति। सर्वलोकस्य दिष्ट्या सर्वलोकभागधेयेन रावणाज्जं भयं अपाहृतमिति संबंधः। दशवर्षसहस्राणि दशवर्षशतानि च। वत्स्यामि मानुषे लो

१४९ कोइत्यवतारात्सर्वतः कृतां प्रतिज्ञां अनुस्मृत्याह। प्राप्य राज्यमित्यादि श्लोकद्वयेन। कुले वंशं संतानं स्थापयित्वा। प्रपद्य इति। देवदेहपरिग्रहेण परिज्ञायमानत्वात्। इहस्थितोप्येष इत्यर्थः

नहि शक्रः सुदुष्टात्मा मनसापि समैथिली॥ प्रधर्षयितुमप्राप्तां दीप्तामग्निशिखामिव १८ नेयमर्हति वैश्वर्यं रावणांतःपुरे शुभा। अनन्या हि मया सीता भास्करेण प्रभाय
था १९ विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा। नहि हातुमियं शक्या कीर्तिरात्मवता यथा २० अवश्यं च मया कार्यं सर्वेषां वो वचो हितं। स्निग्धानां लोकमान्यानां
एवं च ब्रुवतां हितं २१ इत्येवमुक्त्वा वचनं महाबलः प्रशस्यमानः स्वकृतेन कर्मणा॥ समेत्य रामः प्रियया महायशाः सुखं सुखार्होऽनुबभूव राघवः २२ इत्यार्षे वाल्मीकि
ये युद्धकांडे एकविंशदुत्तमः सर्गः ॥ एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितं। इदं शुभतरं वाक्यं व्याजहार महेश्वरः १ पुष्कराक्ष महाबाहो महावक्षः परंतप। दिष्ट्याकृ
तमिदं कर्म त्वया धर्मभृतां वर २ दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः॥ अपावृत्तं त्वया संख्ये राम रावणजं भयं आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीं॥ कैकेयीं
च सुमित्रां च दृष्ट्वा लक्ष्मणमातरं ४ प्राप्य राज्यमयोध्यायां नंदयित्वा सुहृज्जनं। इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ५ इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः॥ ब्रा
ह्मणेभ्यो धनं दत्वा त्रिदिवं गंतुमर्हसि ६ एष राजा दशरथो विमानस्थः पिता तव। काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ७ इंद्रलोकं गतः श्रीमांस्त्वया पुत्रेण
तारितः। लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ८ महादेववचः श्रुत्वा राघवः सहलक्ष्मणः। विमानशिखरस्थस्य प्रणाममकरोत्पितुः ९ दीप्यमानं स्वया लक्ष्म्या
विरजोंबरधारिणं॥ लक्ष्मणेन सह भ्रात्रा ददर्श पितरं प्रभुः १० हर्षेण महताविष्टो विमानस्थो महीपतिः॥ प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ११ आरोप्यांके
महाबाहुर्वरासनगतः प्रभुः॥ बाहुभ्यां संपरिष्वज्य ततो वाक्यं समाददे १२ नमे स्वर्गो बहुमतः संमानश्च सुरर्षभैः॥ त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते १३
कैकेय्या यानि चोक्तानि वाक्यानि वदतां वरः॥ तव प्रव्राजनार्थानि स्थितानि हृदये मम १४ त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणं॥ अद्य दुःखाद्विमुक्तो
स्मि नीहारादिव भास्करः १५ तारितोहं त्वया पुत्र सुपुत्रेण महात्मना। अष्टावक्रेण धर्मात्मा कहोलो ब्राह्मणो यथा १६ ॥

त्या निर्देशः॥ तारितोहमिति। कहोलनामऋषिः अष्टावक्रेण तारित इति इयं कथा पुराणप्रसिद्धा॥ ॥ श्रीरामायनमः॥ ॥ श्री ॥ राम १४८

इदानीं पितिा रावणस्य वधार्थं सुरेश्वरैः॥ इदं अभिषेकविधानरूपं कर्म विहितं इति इदानीं विज्ञानामीति संबंधः। निर्हृत्वेति। नेत्रयासहवासमिति शापः संबंधः विच्छेदरूपः। एतदिति। ब्रह्मनिर्मितं वेदत्रिपा
दितं। वेदानां हृदयं वेदान्तार्थविषयभूतं। अत्यंतरहस्यं। रामएवेतिसंबंधः कर्तव्य इति। इमं न्यायां नाभिमंत्र्य अभिवयोधयेत्रेगम्यते मितिन्त्वकं एव [illegible] रूपकार्यं॥ ॥ इति श्री महेश्वरतीर्थ

इदानीं च विजानामि यथासीम्मुक्तः सुरेश्वरैः॥ वधार्थं रावणस्येह पिहितं चरूपोत्तमं १७ सिद्धार्थाः खलु कौशल्या या त्वां राम गृहं गतं॥ वनानि हत्वा संतरसा इहागते शत्रुसूदन १८ सिद्धार्थाः खलु ते रा
म नरा ये त्वां पुरीं गतं। जलाईमभिषिक्तं च दक्षतिवसुधाधिप १९ अजरं चैन [illegible] वलिनाश्चिरिता धर्मचारिणा। इत्येयं त्वामहं द्रष्टुं भरतेन समागतं २० चतुर्दश समासोम्य वने निर्यापिता
स्त्वया॥ वसतासीतया सार्द्धं लक्ष्मणेन च धीमता २१ निवृत्तवनवासोसि प्रतिज्ञा सफला कृता। रावणं च रणे हत्वा देवाश्च परितोषिताः २२ कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन॥ भ्रातृभिः स
ह राज्यस्थो दीर्घमायुरवाप्नुहि २३ इति ब्रुवाणं राजानं रामः प्रांजलिरब्रवीत्॥ कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च २४ सपुत्रां त्वां त्यजामीति यदुक्ता कैकयी त्वया। स शापः कैकयीं घो
रः सपुत्रां न स्पृशेत्प्रभो २५ स तथेति महाराजो राममुक्त्वा कृतांजलिं। लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह। रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया। कृता मम महाप्रीतिः प्राप्तं धर्मफ
लं च ते २७ धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि। रामे प्रसन्ने स्वर्गं च महिमानं तथैव च २८ रामं शुश्रूष भद्रं ते सुमित्रानंदवर्द्धन। रामः सर्वस्य लोकस्य शुभेष्वभिरतः सदा २९ एते सें
द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः। अभिगम्य महात्मानमर्चंति पुरुषोत्तमं ३० एतत्तदुक्तमव्यक्तमक्षरं ब्रह्मनिर्मितं॥ वेदानां हृदयं सौम्य गुह्यं रामः परंतपः ३१ अवाप्तं धर्मचरणं य
शश्च विपुलं त्वया। तथोक्त्वा तु महाबाहुर्लक्ष्मणं प्रांजलिं स्थितं ३२ उवाच राजा धर्मात्मा वैदेहीं वचनं शुभं। कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति ३३ रामेण त्वद्विशुद्ध्य
र्थं कृतमेतद्धितैषिणा। न त्वं सुभ्रु समाधेया पतिशुश्रूषणं प्रति ३४ अवश्यं तु मया वाच्यमेष ते दैवतं परं। इति प्रतिसमादिश्य पुत्रौ सीतां तथा स्नुषां ३५ इंद्रलोकं विमानेन य
यौ दशरथो [illegible] ज्वलन्। इति श्रीमद्युद्धकांडे द्वाविंशत्ततमः सर्गः प्रतिप्रयाते काकुत्स्थे महेंद्रः पाकशासनः॥ अब्रवीत्परमप्रीतो राघवं प्रांजलिं स्थितं १ अमो
घं दर्शनं राम तवास्माकं परंतप। प्रीतियुक्तास्म तेन त्वं ब्रूहि यन्मनसेच्छसि॥ २ एवमुक्तस्तु काकुत्स्थः प्रत्युवाच कृतांजलिः। लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया
३ यदि प्रीतिः समुत्पन्ना मयि सर्वसुरेश्वर। वक्ष्यामि कुरु मे सत्यं वचनं वदतां वर ४॥ ॥ ॥

यु॰ त्वयसादादिति।समेयुः श्वशुपौत्रदारैरितिशेषः।महानयं वरइति॥ इतस्ततोविप्रकीर्णकरचरणाद्यङ्गादिस्वस्थानसंधानलोकांतरगतानयन रूपाद्भुतिताथ्यवरकत्वात्तवरस्यमहत्वं।द्विती
१५॰
ममहेकोपराक्रांतायेगतायमसादनं॥तेसर्वेजीवितंप्राप्यसमुत्तिष्ठंतुवानराः ५ मत्कृतेविप्रयुक्तायेपुत्रैर्दारैश्चवानराः।तान्प्रीतमनसःसर्वान्द्रष्टुमिच्छामिमानद ६ वि
क्रांताश्चापिशूराश्चनमृत्युंगणयंतिते।कृतयत्नाविपन्नाश्चजीवयैतान्पुरर्षभः ७ मत्प्रियेष्वभिरक्ताश्चनमृत्युंगणयंतिते॥त्वत्प्रसादात्समेयुस्तेवरमेतमहंवृणे ८ नीरु
जान्निर्व्रणांश्चैवसंपन्नबलपौरुषान्।गोलांगूलांस्तथैवर्क्षान्द्रष्टुमिच्छामिमानद ९ अकालेचापिमुख्यानिमूलानिचफलानिच।नद्यश्चविमलास्तत्रतिष्ठेयुर्यत्रवान
राः १० श्रुत्वातुवचनंतस्यराघवस्यमहात्मनः।महेंद्रःप्रत्युवाचेदंवचनंप्रीतिलक्षणं ११ महानयंवरस्तातत्वयोक्तोरघुसत्तम।द्विर्मयानोक्तपूर्वंचतस्मादेतद्भविष्यति।समु
त्तिष्ठंतुतेसर्वेयेहतायुधिराक्षसैः॥ऋक्षाश्चसहगोपुच्छैर्निकृत्ताननबाहवः १३ नीरुजोनिर्व्रणाश्चैवसंपन्नबलपौरुषाः।समुत्थास्यंतिहरयःसुप्तानिद्राक्षयेयथा १४ सु
हृद्भिर्बांधवैश्चैवज्ञातिभिःस्वजनेनच।सर्वएवसमेष्यंतिसंयुक्तापरयामुदा १५ अकालेपुष्पशबलाःफलवंतश्चपादपाः॥भविष्यंतिमहेष्वासनद्यश्चसलिलायुताः १६
सव्रणैःप्रथमंगात्रैस्तैर्वृत्तैर्निर्व्रणैःपुनः।ततःसमुत्थिताःसर्वेसुप्त्वेवहरिपुंगवाः १७ बभूवुर्वानराःसर्वेकिंन्वेतदितिविस्मिताः।काकुत्स्थंपरिपूर्णार्थंदृष्ट्वासर्वेसुरोत्त
माः १८ ऊचुस्तेप्रांजलिंरामंसहसौमित्रिणा तंसलक्ष्मणं।गच्छायोध्यामितोवीरविसर्जयचवानरान् १९ मैथिलींसांत्वयस्वैनामनुरक्तांतपस्विनीं।भ्रातरंभरतंपश्यत्वच्छोकाद्व्रतचारि
णं २० शत्रुघ्नंचमहात्मानंमातॄःसर्वाःपरंतप॥अभिषेचयचात्मानंपौरान्गत्वाप्रहर्षय २१ एवमुक्त्वातमामंत्र्यरामंसौमित्रिणासह।विमानैःसूर्यसंकाशैर्हृष्टाजग्मुःसुरादिवं
२२ अभिवाद्यचकाकुत्स्थःसर्वांस्त्रिदिवौकसः।लक्ष्मणेनसहभ्रात्रावासमाज्ञापयत्तदा २३ ततस्तुसालक्ष्मणरामपालितामहाचमूर्हृष्टजनायशस्विनी।श्रियाज्वलंती
विरराजसर्वतोनिशाप्रणीतेवहिशीतरश्मिना २४ इतिश्रीमद्युद्धकांडेत्रयोविंशच्छततमः सर्गः॥ ॥ ॥

तीयायांविभीषणाभिषेकः।तृतीयायांसीताप्राप्तिः।देवताप्रस्थापनंच इतिश्रीयुद्धकांडेत्रयोविंशच्छततमः सर्गः॥ ॥ ॥ ॥ ॥

नामिति॥ यस्मिन्दिने ब्रह्मादयो जग्मुः॥ तत्तां वसित्वा रात्रिमित्यर्थः। सुखोदितं सुखप्रबुद्धं। जयं पृष्ट्वा जयशब्दं प्रयुज्य स्नानानि। स्नानोपकरणानि। हृतं निर्जित्य संग्रामे इति। इदं लंकायां
वर्त्तमानस्यापि तव प्रकस्मात्तत्वमेन शिबिरस्थे रूपि हस्थमानत्वादिदमिति प्रत्यक्षवन्निर्देशः। प्रीतियुक्तस्येति। विहितां शास्त्रविहितां। मयोद्यतां अर्पितां सत्क्रियां। मे मम संकाशात्। गृहाण

तां रात्रिमुषितं रामं सुखोत्थितमरिंदमं। अब्रवीत्प्रांजलिर्वाक्यं जयं पृष्ट्वा विभीषणः १ स्नानानि चांगरागाणि वस्त्राण्याभरणानि च। चंदनानि च माल्यानि दिव्यानि विविधानि च २ अ
लंकारविदश्चैता नार्यः पद्मनिभेक्षणाः। उपस्थितास्त्वां विधिवत्स्नापयिष्यंति राघव ३ एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणं। हरीन्सुग्रीवमुख्यांस्त्वं स्नानेनाभिनिमंत्रय ४ स तु ता
पति धर्मात्मा मम हेतोः सुखोचितः। सुकुमारो महाबाहुः कुमारः सत्यसंश्रयः ५ तं विना केकयीपुत्रं भरतं धर्मचारिणं। न मे स्नानं बहुमतं वस्त्राण्याभरणानि च ६ इत एव पथा क्षिप्रं प्र
तिगच्छाम तां पुरीं। अयोध्यामागतो ह्येष पंथाः परमदुर्गमः ७ एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः। अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज ८ पुष्पकं नाम भद्रं ते विमानं
सूर्यसंनिभं। मम भ्रातुः कुबेरस्य रावणेनाहृतं बलात्। हृतं निर्जित्य संग्रामे कामगं दिव्यमुत्तमं। त्वदर्थं पालितं चेदं तिष्ठत्यतुलविक्रमं १० तदिदं मेघसंकाशं विमानमिह तिष्ठति। तेन
यास्यसि यानेन त्वमयोध्यां गतज्वरः ११ अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान्। वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदं १२ लक्ष्मणेन सह भ्रात्रा वैदेह्या चैव सीतया। अर्चितः सर्व
कामैस्त्वं ततो राम गमिष्यसि १३ प्रीतियुक्तस्य विहितां ससैन्यः ससुहृद्गणः। सत्क्रियां राम मे तावद्गृहाण त्वं मयोद्यतां १४ प्रणयाद्बहुमानाच्च सौहृदेन च राघव। प्रसादयामि प्रेष्यो
हं न खल्वाज्ञापयामि ते १५ एवमुक्तस्ततो रामः प्रत्युवाच विभीषणं। रक्षसां वानराणां च सर्वेषां चोपशृण्वतां १६ पूजितोहं त्वया वीर साचिव्येन परंतप। सर्वात्मना च चेष्टाभि
सौहृदेनोत्तमेन च १७ न खल्वेतं न कुर्यां ते वचनं राक्षसेश्वर। तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः १८ मां निवर्त्तयितुं योसौ चित्रकूटमुपागतः। शिरसा याचतो यस्य वचनं न कृ
तं मया १९ कौशल्यां च सुमित्रां च कैकेयीं च यशस्विनीं। गुरूंश्च सुहृदश्चैव पौरांश्च तनयैः सह २० उपस्थापय मे क्षिप्रं विमानं राक्षसेश्वर। कृतकार्यस्य मे वासः कथंस्विदि
ह संमतः २१ अनुजानीहि मां सौम्य पूजितोस्मि विभीषण। मन्युर्न खलु कर्तव्यस्त्वरितं त्वानुमानय २२ राघवस्य वचः श्रुत्वा राक्षसेंद्रो विभीषणः। तं विमानं समादाय त्वरया प्र
तिनिवर्त्तत २३ ततः कांचनचित्रांगं वैदूर्यमणिवेदिकं। कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभं २४ पांडुराभिः पताकाभिर्ध्वजैश्च समलंकृतं। कांचनं कांचनैर्हर्म्यैर्हेमपद्म
विभूषितैः २५

तिसंबंधः। कौसल्यां चेति। अत्रापि द्रष्टुं त्वरते मनः इत्यनुषज्यते॥ ॥ ॥ रामा॥ ॥ ७॥ ४॥ ॥३॥ ॥

॥ ॥ इतिश्री महेश्वरतीर्थविरचितरामायणतत्वदीपिकायां युद्धकांडे चतुर्विंशत्युत्तरशततमः सर्गः उपस्थितमिति तं रहस्यादर्शयित्वा। तत्काले विवापाठः। सहैभिरिति। एभिः सह लंका निर्जितेत्यनेन तं
वलं काराज्यजामित्रापि वानरपराक्रमादेवेत्युक्तं भवति। हीनमिति। रूपतिंस्वामिनं। सर्वैरिति गुणैः प्रातिकरैरौदार्यगुणोहीनं ग्रामिहंतावेहिंसनशीलमस्मादेविनाकोधैकं निरतमित्यावरः

प्रकीर्णांकिंकिणीजालेमुक्तामणिगवाक्षकं॥ घंटाजालैपरिक्षिप्तं सर्वतोमधुरस्वनं २६ तंमेरुशिखराकारं निर्मितं विश्वकर्मणा॥ बहुभिर्भूषितं हर्म्यैर्मुक्तारजतसन्निभैः २७ त
लैःस्फटिकचित्रांगैर्वैडूर्यैश्च वरासनैः। महार्हास्तरणोपेतैरुपपन्नं महाधनैः २८ उपस्थितमनाधृष्यं तद्विमानं मनोजवं। निवेदयित्वा रामाय तस्थौ तत्र विभीषणः २९ इत्यार्षे यु
द्धकांडे चतुर्विंशत्युत्तरशततमः सर्गः उपस्थितं तु तं दृष्ट्वा पुष्पकं पुष्पभूषितं। अविदूरे स्थितं रामं प्रत्युवाच विभीषणः १ स तु बद्धांजलिः प्रह्वो विनीतो राक्षसेश्वरः। अब्रवीत्त्वरयो
पेतः किं करोमीति राघवं २ तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः। विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतं ३ कृतप्रयत्नकर्माणो विभीषण वनौकसः। रत्नैरर्थैश्च विविधैश्च
विविधैस्तान्संपूजय ४ सहैभिरजिता लंका निर्जिता राक्षसेश्वर। हृष्टैः प्राणभयं त्यक्त्वा संग्रामेष्वनिवर्तिभिः ५ त इमे कृतकर्माणः सर्वथा सर्वथा नराः। धनरत्नप्रदानेन कर्मे
षामफलं कुरु ६ एवं संमानिताश्चैते नंद्यमानं त्वया। भविष्यंति कृतज्ञेन निहत्वा हरियूथपाः ७ त्यागिनं संग्रहीतारं सानुक्रोशं यशस्विनं। सर्वे त्वामभिगच्छंति ततः संबोध
यामहं ८ हीनं रतिगुणैः सर्वैरभिहंतारमाहवे। त्यजंति नृपतिं सैन्याः संविग्नास्तं नरेश्वरः ९ एवमुक्तस्तु रामेण वानरांस्तान्विभीषणः। रत्नार्थसंविभागेन सर्वानेवा
न्वपूजयत् १० ततस्तान्पूजितान्दृष्ट्वा रत्नैरर्थैश्च हरियूथपान्। आरुरोह ततो रामस्तद्विमानमनुत्तमं ११ अंकेनादाय वैदेहीं लज्जमानां यशस्विनीं। लक्ष्मणेन सह भ्रात्रा विक्रांतेन धनु
ष्मता १२ अब्रवीच्च विमानस्थः पूजयन्सर्ववानरान्॥ सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणं १३ मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः। अनुज्ञाता मया सर्वे यथेष्टं प्र
तिगच्छत १४ यत्तु कार्यं वयस्येन स्निग्धेन हितकांक्षिणा। कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा १५ किष्किंधां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः। स्वराज्ये वस लंकायां मया दत्ते विभी
षण १६

नंमेश्वरं सैन्याः संविग्नाः आहवे त्यजंतीति योजना एवमुक्त इति रत्नार्थैः रत्नैरर्थैश्च संविभागो नयमार्हं अंशपरिकल्पनयेत्यर्थः यत्तु कार्यमिति आधर्मभीरुणा धर्मोच्छेदः स्वराज्य इति नत्वा धर्ष
यितुं शक्ताः त्वमपि मत्प्रसादादिति भावः॥ ॥ २ ॥ ॥

२५ एतदिति। आयोधनं युद्धस्थानं। विशसनं। विशसनवत्। एष इति। दत्तवरः प्राप्तवरः एष रावणो मया निहतः शेते मत्स्यास्थिरूपेणावर्त्तते ॥ ॥ २५

अयोध्यामिति। अभ्यनुज्ञातुमिच्छामि भवद्भिरिति शेषः। प्रियादिति। प्रियात्प्रियतरं कृतं त्वया यस्मान्ममायोध्याप्रवेशनं प्रथमं प्रियं तत्र सुहृज्जनैर्भरतादिभिः सहिता भवद्भिः सहातिरेकप्रीतिमनु
भविष्यामीति तत्रतो प्रियप्रियतरमित्यर्थः। ययाविति हंसयुक्तेन च हंसशब्देन वाहकत्वाकारेण निर्मिता हंसा उच्यंते। प्रहृष्टः हृष्टरोमा प्रतीतः हृष्टचेताः ॥ ॥ इति युद्धकांडे पंचविंशशततमः ॥

अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम। अभ्यनुज्ञातुमिच्छामि सर्वांश्चामंत्रयामि वः १८ एवमुक्तास्तु रामेण वानरास्ते महाबलाः। ऊचुः प्रांजलयो राजन्राक्षसश्च विभीषणः।
अयोध्यां गंतुमिच्छामः सर्वान्नयतु नो भवान्। मुदिताः विचरिष्यामः वनानि नगराणि च २० दृष्ट्वा त्वामभिषेकार्द्रं कौसल्यामभिवाद्य च। अचिरेणागमिष्यामः स्वगृहा
न्नृपतेः सुत। २१। एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः। अब्रवीद्राघवः श्रीमान्ससुग्रीवविभीषणान्। २२। प्रियात्प्रियतरं लब्धं यदहं ससुहृज्जनः। सर्वैर्भव
द्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः। २३। क्षिप्रमारोह सुग्रीव विमानं वानरैः सह। त्वमप्यारोह सामात्यो राक्षसेंद्र विभीषण। २४। ततस्तत्पुष्पकं दिव्यं सुग्रीवः
सह सेनया। अध्यारोहत्ततः श्रीमान्सामात्यश्च विभीषणः। २५। तेष्वारूढेषु सर्वेषु कौबेरं परमासनं। राघवेणाभ्यनुज्ञातमुत्पपात विहायसं। २६। ययौ ते
न विमानेन हंसयुक्तेन भास्वता। प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत्। २७। ते सर्वे वानरर्क्षाश्च राक्षसाश्च महाबलाः। यथासुखमसंबाधं दिव्ये तस्मिन्नु
पाविशन्। इति श्रीमद्युद्धकांडे पंचविंशशततमः सर्गः ॥ ॥ अनुज्ञातं तु रामेण तद्विमानमनुत्तमं। हंसयुक्तं महानादं उत्पपात विहायसं। १। पातयित्वा
ततश्चक्षुः सर्वतो रघुनंदनः। अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननां। २। कैलासशिखराकारे त्रिकूटशिखरे स्थितां। लंकामीक्षस्व वैदेहि निर्मितां वि
श्वकर्मणा। ३। एतदायोधनं पश्य मांसशोणितकर्दमं। हरीणां राक्षसानां च सीते विशसनं महत्। ४। एष दत्तवरः शेते प्रमाथी राक्षसेश्वरः। तव हेतोर्वि
शालाक्षि रावणो निहतो मया। ५। कुंभकर्णोत्र निहतः प्रहस्तश्च निशाचरः। धूम्राक्षश्चात्र निहतो वानरेण हनूमता। ६। विद्युन्माली हतश्चात्र सुषेणेन महात्म
ना। लक्ष्मणेनेंद्रजिच्चात्र रावणिर्निहतो मया। ७। अंगदेनात्र निहतो विकटो नाम राक्षसः। विरूपाक्षश्च दुष्प्रेक्ष्यो महापार्श्वमहोदरौ। ८। अकंपनश्च निह
तो बलिनान्ये च राक्षसाः। त्रिशिराश्चातिकायश्च देवांतकनरांतकौ। ९। युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ। निकुंभश्चैव कुंभश्च कुंभकर्णात्मजौ बली ॥ १०
वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः। मकराक्षश्च दुर्धर्षो मया युधि निपातितः। ११। अकंपनश्च निहतः शोणिताक्षश्च वीर्यवान्। यूपाक्षश्च प्रजंघश्च निहतौ
तौ महाहवे। विद्युज्जिह्वोत्र निहतो राक्षसो भीमदर्शनः। यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः १३

एतत्त्विति। तीर्थं अवतरणस्थानं। यत्र तीरप्रदेशे। तां रात्रिमुषिता इत्युत्तीर्णः सागरः तत्संबंधिनी रात्री। एषइति। नलसेतुः सेतुनिर्माणे नलः कारणमिति कथनार्थं नलसेतु
रित्युक्तं। हिरण्यनाभ इति। हिरण्यनाभं। हिरण्यनाभनामानं मैनाकं विश्रमार्थं अवलंबनदाननरक्षणार्थं। एतत्कुक्षाविति। कुक्षौ मध्यप्रदेशे स्कंधावारनिवेशनं। सेनानि
वासस्थानं। तीर्थं। पुराण इत्येव। सेतुबंध इति ख्यातं सेतुनिर्माणस्थलप्रदेशत्वात्सेतुबंध इति प्रसिद्धिः। अत्र पूर्वमिति। महादेवः। महदिति जलं। जलरूपो देवो महादेवः। समुद्र इत
याहवैजयंती। गंभीरं गहनं रत्नं गह्वरं शरणं अवपुरा हस्तेन हस्तं महत्कृद्द्रवगुणं सर्वतोमुखं पातालं स्वाडदिवं च तत्त्रिपंचदशाप्युचेति। यद्वा। महादेवाष्टमूर्तिष्वन्यतमत्वात्स
मुद्रस्यात्र महादेवशब्देन समुद्र एवोच्यते। पूर्वं। सेतुबंधात्पूर्वं। प्रसादमकरोत्। जलोपरि सेतुधारणरूपं अकरोत्। यद्वा। प्रसादं स्वसन्निधानरूपं दर्शयामास चात्मानं समु

स्तत्र शत्रुस्त्वनिहतो ब्रह्मशत्रुमथापरः। अत्र मंदोदरी नाम भार्या तं पर्यदेवयत्। सपत्नीनां सहस्रेण सास्रेण परिवारिता। एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने। १५ य
त्र सागरमुत्तीर्य तां रात्रिमुषिता वयं। एष सेतुर्मया बद्धः सागरे लवणार्णवे।१६। तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः। पश्य सागरमक्षोभ्यं वैदेहि वरुणालयं॥
१७॥ अपारमभिगर्जंतं शंखशुक्तिसमाकुलं। हिरण्यनाभं शैलेंद्रं कांचनं पश्य मैथिलि।१८। विश्रमार्थं हनुमतो भित्वा सागरमुत्थितः। एतत्कुक्षौ समुद्र
स्य स्कंधावारनिवेशनं।१९॥ एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः। सेतुबंध इति ख्यातं त्रैलोक्येन च पूजितं २० एतत्पवित्रं परमं महापातकनाशनं॥
अत्र पूर्वं महादेवः प्रसादमकरोद्विभुः।२१। अत्र राक्षसराजोयमाजगाम विभीषणः। एषा सा दृश्यते सीते किष्किंधा चित्रकानना॥२२॥ सुग्रीवस्य पुरी र
म्या यत्र वाली मया हतः। अथ दृष्ट्वा पुरीं सीता किष्किंधां वालिपालितां।२३। अब्रवीत्प्रश्रितं वाक्यं रामं प्रणयसाध्वसा। सुग्रीवप्रियभार्याभिस्ताराप्रमु
खताभिर्नृप।२४॥ अन्येषां वानरेंद्राणां स्त्रीभिः परिवृता ह्यहं। गंतुमिच्छे सहायोध्यां राजधानीं त्वया सह।२५॥ एवमुक्तोथ वैदेह्या राघवः प्रत्युवाच तां। ए
वमस्त्विति किष्किंधां प्राप्य संस्थाप्य राघवः।२६॥ विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह॥ ॥

द्रः सरितां पतिरित्युक्तत्वात्। महादेवः समुद्र एव। अपारमभिगर्जंतं शंखशुक्तिनिषेवितमित्यतः परं हिरण्यनाभमिति श्लोकः। अतः परमेतत्कुक्षाविति श्लोकः।
अतः परं सेतुबंध इति श्लोकः। अतः परं। अत्र पूर्वं महादेवः प्रसादमकरोदिति श्लोकः। एवं पाठक्रमः। अथ दृष्ट्वेति। प्रणयसाध्वसा। प्रणयस्युक्तसाध्वसा प्रणत
साध्वसेति पाठे प्रणतं नुपनेतं प्राप्तं साध्वसं यया सा। सुग्रीवेत्यादि। ताराप्रमुखतः। ताराप्रमुखाभिः। सुग्रीवप्रियभार्याभिः सह अन्येषां वानरेंद्राणां स्त्रीभिः प
विवारिता त्वया सह अयोध्यां गंतुमिच्छामीति संबंधः। एवमुक्त इति। विमानं संस्थाप्येति संबंधः॥ ॥

इहीत्यादिश्लोकद्वयमेकं वाक्यं । यांत्वित्यत्रेतिकरणं द्रष्टव्यं । सर्वे भवंतः सीतया हेतुभूतया प्रीताः प्रियं स्वदारसहिताः संतः अयोध्यां यांत्विति सर्ववानरपुंगवान्ब्रूहि त्वम
पि सर्वाभिः स्वस्त्रीभिः सहायोध्यां गंतुं अभित्वरस्व गच्छाम इति संबंधः एवमिति । हे वानरेंद्र प्रियेत्वमित्यादि श्लोकद्वयमेकं वाक्यं । प्रिये म[illegible] प्रियकाम्यया मैथिल्याः प्रि
यं कर्तुमिच्छया राघवेण वानराणां नारीणां वानरगणानां नारीभिः सह त्वमभ्यनुज्ञाता अतः वानरयोषितः गृह्य गच्छाम अयोध्यां दशरथस्य क्षयं च दर्शयिष्यामः हे त्वामः
त्वमभित्वरेति संबंधः । केन प्रकारमेवाह । सुग्रीवेणेत्यादिश्लोकद्वयेन । सुग्रीवेणास्वस्वपत्नीभिर्वानरैश्च सह गंतुमभ्यनुज्ञाताः सूर्यामितिशेषः । मम चापि प्रियं कार्यं तस्मा

इह वानरशार्दूल सर्वान्वानरपुंगवान् । स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यांतु सीतया ।३६। तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल । अभित्वरस्व सुग्रीव गच्छामः प्ल
वगाधिप ३७ एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा । वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥३८॥ प्रविश्यांतःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत् । प्रियेत्वं सह नारीभिर्वा
नराणां महात्मना ॥३९॥ राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया । तूर्णं त्वमभिगच्छामो गृह्य वानरयोषितः ॥४०॥ अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः । सुग्रीवस्य
वचः श्रुत्वा तारा सर्वांगशोभना ॥४१॥ आहूय चाब्रवीत्सर्वा वानराणां तु योषितः । सुग्रीवेणाभ्यनुज्ञाता गंतुं सर्वैश्च वानरैः ॥४२॥ मम चापि प्रियं कार्यमयोध्यादर्शनेन च ।
प्रवेशं चैव रामस्य पौरजानपदैः सह ॥४३॥ विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च । तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः ॥४४॥ नेपथ्यविधिपूर्वेण कृत्वा चापि प्रदक्षि
णं । अध्यारोहन्विमानं तत्सीतादर्शनकांक्षया ॥४५॥ ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः । ऋश्यमूकसमीपे तु वैदेहीं पुनरब्रवीत् ॥४६॥ दृश्यतेऽसौ महान्सीते सवि
द्युदिव तोयदः । ऋश्यमूको गिरिश्रेष्ठः कांचनैर्धातुभिर्वृतः ॥४७॥ अत्राहं वानरेंद्रेण सुग्रीवेण समागतः । समयश्च कृतः सीते वधार्थं वालिनो मया ॥४८॥ एषा सा दृश्यते प
म्पा नलिनी चित्रकानना । त्वया विहीनो यत्राहं विललाप सुदुःखितः ॥४९॥ अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी । अत्र योजनबाहुश्च कबंधो निहतो मया ॥५०॥ दृ
श्यते च जनस्थाने सीते श्रीमान्वनस्पतिः । यत्र युद्धं महद्वृत्तं तव हेतोर्विलासिनि ॥५१॥ खरश्च निहतः संख्ये दूषणश्च निपातितः । त्रिशिराश्च महावीर्यो मया बाणैरजि
ह्मगैः । जटायुश्च महातेजास्तव हेतोर्विलासिनि ॥५२॥ रावणेन हतो यत्र पक्षिणां प्रवरो बली ॥ एतत्तदाश्रमपदमस्माकं वरवर्णिनि ॥५४॥ पर्णशाला तथा चित्रा दृश्यए
ते शुभदर्शना । यत्र त्वं राक्षसेंद्रेण रावणेन हृता बलात् ॥५५॥ एषा गोदावरी रम्या प्रसन्नसलिला शिवा । अगस्त्यस्याश्रमो ह्येष दृश्यते पश्य मैथिलि ॥५६॥ दीप्तश्चैवाश्रमश्चै

भिरिति शेषः । अतः अयोध्याया दर्शनेन हेतुना च पौरजानपदैः सह रामस्य प्रवेशं च दशरथस्य स्त्रीणां विभूतिं च द्रष्टुं आगच्छतेत्यध्याहारेण योजना । तारयेति । नेपथ्यविधिपू
र्वेण अलंकरणप्रकारपूर्वकं । ताभिरिति । ताभिः सहोत्थितमित्यनेन चतुर्थ्यां किष्किंधायां उषित्वा पंचम्यां ततः प्रस्थानमित्यवगम्यते । उपरि पंचम्यां भरद्वाजाश्रमप्रवेश
स्य वक्ष्यमाणत्वात् । एषेति । नलिनी । पद्मिनी ॥ विललाप । व्यलपं । दृश्यत इति । वनस्पतिः जटायुनिवासभूतो न्यग्रोधः । यत्र वनस्पतिसमीपे ॥ ॥ ॥

वैदेहीदृश्यतामिति। पुरंदरस्य उग्रमिताग्नि शरीराणि शत्रुपुराणि वादास्यतीतितथा। अत्रेति। तापसी अनसूया। पश्यतीति अयोध्यां उत्तीतिशेषः॥ ॥ इतिश्री युद्धकांडे षड्विंशोत्तरशततमः
सर्गः॥ ॥ पूर्णेचतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः भरद्वाजाश्रमं प्राप्य तेन न दृश्यतिपाद्यते। फाल्गुण्यां पौर्णमास्यां। सुवेलारोहणं। अत्र प्रमाणं। ततोस्त मगमत्सूर्यः संध्यया
तिरंजितः। पूर्णचंद्रप्रदीपा च क्षपाभितिवर्तते इति वचनात् ततोपरेद्युः कृष्णपक्षप्रथमायां युद्धस्य प्रारंभः तस्यामेव रात्रौ नागपाशवंधमोक्षौ। द्वितीयायां धूम्राक्षवधः
तृतीयायां वज्रदंष्ट्रवधः चतुर्थ्यां अकंपनवधः पंचम्यां प्रहस्तवधः षष्ठ्यां रामेण रावणस्य मुकुटभंगः सप्तम्यां कुंभकर्णवधः अष्टम्यादिदिवसत्रये नरांतकप्रतिकायादीनां
वधः नवम्यां इंद्रजितो ब्रह्मास्त्रप्रयोगमोक्षौ। तस्यामेव रात्रौ कुंभनिकुंभयोर्वधः द्वादश्यां रामेण खरपुत्रस्य मकराक्षस्य वधः त्रयोदश्यां एव कुंभनिकुंभमकराक्ष
राणां वधः एकादशीमारभ्य पुनरिंद्रजितः त्रिरात्रेयुद्धं लक्ष्मणेन त्रयोदश्यां इंद्रजितवधः अत्र चप्रमाणं। अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः इत्येतद्वचनं चतुर्दश्यामा

वैदेहीदृश्यतेचासौ शरभंगाश्रमो महान्। उपयातः सहस्राक्षो यत्र शक्रः पुरंदरः। पं। एतेते तापसावासा दृश्यंते तनुमध्यमे। अत्रिः कुलपतिर्यत्र सूर्यवैश्वा
नरप्रभः। ५८। अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी। अस्मिन्देशे महाकायो विराधो निहतो मया। ५९। असौ सुतनु शैलेंद्रः चित्रकूटः प्रकाशते। यत्र मां कै
केयीपुत्रः प्रसादयितुमागतः। ६०। एषा सा यमुना दूरात् दृश्यते चित्रकानना। भरद्वाजाश्रमो यत्र श्रीमानेषः प्रकाशते। ६१। एषा त्रिपथगा पुण्या दृश्यते वर
वर्णिनी। नानाद्विजगणाकीर्णा संप्रपुष्पितकानना। शृंगिवेरपुरं चैतत् गुहो यत्र समागतः। एषा च दृश्यते सीते सरयूर्यूपमालिनी। नानातरुगणाकीर्णा सं
प्रपुष्पितकानना। एषा च दृश्यते सीते राजधानी पितुर्मम। अयोध्यां कुरु वैदेहि प्रणामं पुनरागता। ततस्ते वानराः सर्वे राक्षसश्च विभीषणः। ६४। उत्पत्यो
त्पत्य ददृशुः तां पुरीं शुक्लकाननां। ततस्तु तां पांडरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिसंकुलां। पुरीमयोध्यां ददृशुः प्लवंगमाः पुरीं महेंद्रस्य यथामरा
वतीं ६७ इत्यार्षे युद्धकांडे षड्विंशत्युत्तरशततमः सर्गः॥ ॥ पूर्णे चतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः। भरद्वाजाश्रमं प्राप्य ववंदे नियतो मुनिं। १। सोपृच्छदभिवा
द्यैनं भरद्वाजं तपोधनं। शृणोषि कच्चिद्भगवन्सुभिक्षानामयं पुरे २

लक्ष्मणवधःश्रमायां रावणवधः अत्र च प्रमाणं। अस्मिन्त्यानंतमथैव कृष्णपक्षे चतुर्दशी। कृत्वा निर्याह्यमावास्यां विजयाय वृतो बलैः इत्येतद्वचनं। चैत्रशुक्लपक्षप्र
थमायां रावणस्य संस्कारः द्वितीयायां विभीषणस्याभिषेकः तृतीयायां देवीसमागमः तां रात्रिमुषितं रामभित्स कत्वात्। चतुर्थ्यां प्रतिप्रयाणं किष्किंधायामिश्च पंचम्यां
भरद्वाजाश्रमप्राप्तिरिति अस्यां पंचम्यां चतुर्दशवर्षसंपूर्णं। चतुर्दशे हि संपूर्णे वर्षेहनि रघूत्तम न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनं। तथेति च प्रतिज्ञाय संपरिष्व
ज्य सादरमित्येतद्वचनमाणं षष्ठ्यां नंदिग्रामं प्राप्य जटाविवेचनं कृत्वा अयोध्यागमः सप्तम्यां पुष्यनक्षत्रे श्रीरामस्य भद्राभिषेक इत्येवं क्रमो वेदितव्यः॥ शृणोषीति। सुभिक्षा
नामयं। सुभिक्षं अन्नानां समृद्धिः समृद्धावव्ययीभावः सुभिक्षं चानामयं चेति वि

कच्चिदिति॥ युक्तः। समाहितः प्रजापालने॥ एवमिति॥ स्मितपूर्वं प्रत्युवाच सर्वज्ञोऽपि भवानजाननिव मां पृच्छतीति स्मितकारणं प्रहृष्टवत्॥ प्रहृष्टो हि पंकदिग्धेति॥ तेपादु
के पुरस्कृत्य सर्वं च कुशलं गृहे पुरे च संपादयन्भरतस्त्वां प्रतीक्षते॥ सांप्रतमिति॥ प्रीतिर्जातेति शेषः॥ संपतंति पुरीं॥ अयोध्यां प्रति त्वामागमनं निवेदयितुमिति शेषः॥ दक्षि

कच्चित्स युक्तो भरतो जीवंत्यपि च मातरः॥ एवमुक्तस्तु रामेण भरद्वाजो महामुनिः॥३॥ प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत्॥ पंकदिग्धस्तु भरतो जटिलस्त्वां प्रती
क्षते॥४॥ पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे॥ त्वां पुरा चीरवसनं प्रविशंतं महावनं॥५॥ स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं च केवलं॥ पदातिं त्यक्तसर्वस्वं पितुर्नि
र्देशकारिणं॥६॥ सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरं॥ दृष्ट्वा तु करुणा पूर्वं ममासीत्समितिंजय॥७॥ कैकेयीवचने युक्तं वन्यमूलफलाशनं॥ सांप्रतं सुसमृद्धा
र्थं समित्रगणबांधवं॥८॥ समीक्ष्य विजितारिं च ममाभूत्प्रीतिरुत्तमा॥ सर्वं च सुखदुःखं ते विदितं मम राघव॥९॥ यत्त्वया विपुलं प्राप्तं जनस्थानवधादिकं॥ ब्राह्मणा
र्थे नियुक्तस्य रक्षतः सर्वतापसान्॥१०॥ रावणेन हृता भार्या बभूवेयमनिंदिता॥ मारीचदर्शनं चैव सीतोन्मथनमेव च॥११॥ कबंधदर्शनं चैव पंपाभिगमनं तथा॥
सुग्रीवेण च ते सख्यं यत्र वाली हतस्त्वया॥१२॥ मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च॥ विदितायां च वैदेह्यां नलसेतुर्यथा कृतः॥१३॥ यथा चादीपिता लंका प्रहृ
ष्टैर्हरियूथपैः॥ सपुत्रबांधवामात्यः सबलः सहवाहनः॥१४॥ यथा च निहतः संख्ये रावणो बलदर्पितः॥ यथा च निहते तस्मिन्रावणे देवकंटके॥१५॥ समागमश्च त्रिदशैर्यथा
दत्तश्च ते वरः॥ सर्वं ममैतद्विदितं तपसा धर्मवत्सल॥१६॥ संपतंति च मे शिष्याः प्रवृत्ताख्याः पुरीमितः॥ अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर॥१७॥ अर्घ्यं प्रतिगृहाणेदम
योध्यां श्वो गमिष्यसि॥ तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः॥१८॥ बाढमित्येव संहृष्टः श्रीमान्वरमयाचत॥ अकालफलिनो वृक्षाः सर्वे चापि मधुस्रवाः॥ फ
लान्यमृतगंधीनि बहूनि विविधानि च॥ भवंतु मार्गे भगवन्नयोध्यां प्रति गच्छतः॥ तथेति च प्रतिज्ञाते वचनात्समनंतरं॥ अभवन्पादपास्तत्र स्वर्गपादपसंनिभाः॥
निष्फलाः फलिनश्चासन्विपुष्पाः पुष्पशालिनः॥ शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः॥ सर्वतो योजनास्तिस्रो गच्छतामभवंस्तदा॥ ततः प्रहृष्टाः प्ल
वगर्षभास्ते बहूनि दिव्यानि फलानि चैव॥ कामादुपाश्नंति सहस्रशस्ते मुदान्विताः स्वर्गजितास्तुदेव २३ युद्धकांडे सप्तविंशशततमः सर्गः

दृष्टा मिश्रणाः स्त्रेति योजना॥ त्रीणि शुपांसुल्लंघ्य उत्पादिता देशान्तत इति॥ जयंतीति प्राप्नुवंतीति जितः॥ स्वर्गस्पृजितः स्वर्गाजितः॥ ते स्वर्गजितस्तद्वत्प्रसिद्धाः स्व
र्गजितः प्रहृष्टाः प्लवगर्षभा इति॥ तत्र हृदयस्य निर्वाहः उपाश्नंति वापाश्नन्॥ ॥इति श्रीमाहेश्वरतीर्थीये युद्धकांडे सप्तविंशोत्तरशततमः सर्गः॥

यु॰टी॰ अयोध्यामिति।चिंतयामासकर्तव्यजातमितिशेषः।शृंगिबेरेति।गहनगोचरंवनगोचरं।कुशलंमदीयं।ममवचनाद्ब्रूहीतिसंबंधः।भरतइति।सिद्धार्थंनिर्वृत्तपि
त्वचनपरिपालनरूपप्रयोजनं।मैथिल्यन्वेषणमिति।यथाचाधिगता।अमवलितव्रता।यथादृष्टेत्यर्थः।उपयानंवानरसेनयासहगमनं।सागरस्यदर्शनमित्र
१५४ पथारोणादर्शनं।वरदानमिति।ब्रह्मणावरुणेनचेतिसहार्थेतृतीया।वस्त्वानस्यस्तुत्यापनरूपः।अत्रब्रह्मस्यवरुणस्यापिवरदानकथित्वात्तिधानान्वरदान

अयोध्यांतुसमालोक्यचिंतयामासराघवः।प्रियकामःप्रियंरामःततस्त्वरितविक्रमः॥१॥चिंतयित्वाततोदृष्टिंवानरेषुन्यपातयत्।उवाचधीमांस्ते
जस्वीहनूमंतंप्लवंगमं॥२॥अयोध्यांत्वरितोगच्छक्षिप्रंप्लवगसत्तम।जानीहिकश्चित्कुशलीजनोनृपतिमंदिरे॥३॥शृंगिवेरपुरंप्राप्यगुहंगहनगोच
रं।निषादाधिपतिंब्रूहीकुशलंवचनान्मम॥४॥श्रुत्वातुमांकुशलिनमरोगंविगतज्वरं।भविष्यतिगुहःप्रीतःसममात्मसमःसखा॥५॥अयोध्यायाः
श्चतेमार्गंप्रवृत्तिंभरतस्यच।निवेदयिष्यतिप्रीतोनिषादाधिपतिर्गुहः॥६॥भरतस्तुत्वयावाच्यःकुशलंवचनान्मम।सिद्धार्थंशंसमांतस्मैसभार्यंसह
लक्ष्मणं॥७॥हरणंचापिवैदेह्यारावणेनबलीयसा।सुग्रीवेणचसंवादंवालिनश्चवधंरणे॥८॥मैथिल्यन्वेषणंचैवयथाचाधिगतात्वया।लंघयित्वामहातो
यमापगापतिमव्ययं॥९॥उपयानंसमुद्रस्यसागरस्यचदर्शनं।यथाचकारितःसेतुरावणस्ययथाहतः॥१०॥वरदानंमहेंद्रेणब्रह्मणावरुणेनच।महा
देवप्रसादाच्चपित्राममसमागमं॥११॥उपयातंचमांसौम्यभरतायनिवेदय।सहराक्षसराजेनहरीणांप्रवरेणच॥१२॥जित्वाशत्रुगणान्रामःप्राप्यचानुत्तमंयशः।
उपयातिसमृद्धार्थःसहमित्रैर्महाबलः॥१३॥एतच्छ्रुत्वायमाकारंभजतेभरतस्ततः।सचतेवेदितव्यःस्यात्सर्वंयच्चापिमांप्रति॥१४॥ज्ञेयाःसर्वेचवृत्तांताभरतस्यें
गितानिच।तत्त्वेनमुखवर्णेनदृष्ट्याव्याभाषितेनच॥१५॥सर्वकामसमृद्धंहिहस्त्यश्वरथसंकुलं।पितृपैतामहंराज्यंकस्यनावर्तयेन्मनः॥१६॥संगत्याभरतःश्री
मान्राज्येनार्थीस्वयंभवेत्।प्रशास्तुवसुधांसर्वांअखिलांरघुनंदनः॥१७॥तस्यबुद्धिंचविज्ञायव्यवसायंचवानर।यावन्नदूरंयाताःस्मक्षिप्रमागंतुमर्हसि॥१८॥
इतिप्रतिसमादिष्टोहनूमान्मारुतात्मजः।मानुषंधारयन्रूपमयोध्यांत्वरितोययौ॥१९॥अथोत्पपातवेगेनहनूमान्मारुतात्मजः।गरुत्मानिववेगेनजिघृक्षन्नु

कालेब्रह्मा[illegible]स्तुमत्यामहेंद्रोवरंप्रादादित्यवगम्यते।एतदिति।यमाकारंवेदनंदस्त्ववकंतेत्वयाज्ञेयाइति।तत्त्वेनयाथार्थ्येन।वृत्तांताःज्ञेयाइतिसंबंधः।लयितादृश राम
सौहृदवतोभरतस्यभावपरीक्षणेनकर्तव्यमित्याशंक्यतादृशनामपिहृदयस्पृशायशोराज्यश्रियाकथिगांसंभाव्यतइत्याह।सर्वकामेति।पितृपैतामहं।पितृपितामह १५४
हेत्यागतंनावर्तयेत्।नापकर्षेत्।तस्यराज्याकांक्षाचेत्किंकरिष्य[redacted]तीत्याशंक्यतत्रतमेवस्थापयामीत्याह।संगत्येति।संगत्या।चिरकालपरिचयेनोराज्येनार्थी।
राज्यार्थीभवेत्तर्हिवसुधांप्रशास्त्वितिसंबंधः

लंघयित्वेति। पितृपथं विहगेन्द्रालयं पक्षीन्द्राणां मेघानां च स्थानं मध्ये। मार्गमध्ये। स्थितं गंगायमुनयोः सन्निपातं प्रयागं। पंचमीमिति पंचमीं। पंचमीसंबंधिनीमद्य रजनीं॥
एतां रजनीमुषित्वा प्रातः भरद्वाजाभ्यनुज्ञातं समायातं रामं द्रक्ष्यस्यद्यैव चिरेणोवृक्षस्येत्यर्थः। एवमिति। संप्रहृष्टतनूरुहः सकलजगदानंदकारी [illegible] श्रुत्वा गमनमयाम्नाव
यितव्यमित्यस्माद्धेतोरिति भावः। अविचारयन्। अश्रममिति शेषः। सुराधिपतेः। सुराधिपस्योपवनेन नन्दनवनेन चैत्ररथं कुबेरोद्यानं। भ्रातृवियोगाद्गृहीतस्य वल्कलादिधारण

लंघयित्वा पितृपथं विहगेन्द्रालयं शुभं। गंगायमुनयोर्भीमं समतीत्य समागमं।२२॥ शृंगिवेरपुरं प्राप्य गुहमासाद्य वीर्यवान्। स वाचा शुभया हृष्टो हनूमानिदमब्रवीत्
२३॥ सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः। ससीतः सह सौमित्रिः स त्वां कुशलमब्रवीत्।२४॥ पंचमीमद्य रजनीमुषित्वा वचनान्मुनेः। भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस
द्यैव राघवं।२४॥ एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहः। उत्पपात महावेगो वेगवानविचारयन्।२५॥ सोऽपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा। वरूथीं गोमतीं चैव भी
मं सालवनं तथा।२६॥ प्रजाश्च बहुसाहस्रीः स्फीताञ्जनपदानपि। स गत्वा दूरमध्वानं त्वरितः कपिकुंजरः।२७॥ आससाद द्रुमान्फुल्लान्नंदिग्रामसमीपगान्। सुराधिप
स्योपवने यथा चैत्ररथे द्रुमान्।२८॥ स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलंकृतैः। क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनांबरं।२९॥ ददर्श भरतं दीनं कृशमाश्रमवासि
नं। जटिलं मलदिग्धांगं भ्रातृव्यसनकर्शितं।३०॥ फलमूलाशिनं दांतं तापसं धर्मचारिणं। समुन्नतजटाभारं वल्कलाजिनवाससं।३१॥ नियतं भावितात्मानं ब्रह्मर्षि
समतेजसं। पादुके ते पुरस्कृत्य प्रशासंतं वसुंधरां।३२॥ चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात्। उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः।३३॥ बलमुख्यैश्च युक्तै
श्च काषायांबरधारिभिः। न हि ते राजपुत्रं तं चीरकृष्णाजिनांबरं।३४॥ परिभोक्तुं व्यवस्यंति पौरा वै धर्मवत्सलाः। तं धर्ममिव धर्मज्ञं देहवंतमिवापरं।३५॥ उवाच प्रांज
लिर्वाक्यं हनूमान्मारुतात्मजः। वसंतं दंडकारण्ये यं त्वं चीरजटाधरं।३८॥ अनुशोचसि काकुत्स्थं स त्वां कौशलमब्रवीत्। प्रियमाख्यामि ते देव शोकं त्यज सु
दारुणं।३९॥ अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह संगतः। निहत्य रावणं रामः प्रतिलभ्य च मैथिलीं।४०॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः। लक्ष्मणश्च महा
तेजा वैदेही च यशस्विनी।४१॥ सीता समग्रा रामेण महेंद्रेण शची यथा। एवमुक्तो हनुमता भरतः कैकयीसुतः।४२॥ पपात सहसा हृष्टो हर्षान्मोहमुपागमत्॥
ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः।४३॥ हनूमंतमुवाचेदं भरतः प्रियवादिनं। अशोकजैः प्रीतिमयैः कपिमालिंग्य संभ्रमात् ४४

भक्त्या अमात्यादीनां तु किं निमित्तमित्याशंक्याह नहि ते राजपुत्रमिति। ते अमात्यादयः। धर्मवत्सलाः ये पौरास्ते च। राजपुत्रं भरतं परिभोक्तुं परिवर्जनार्थे
भरतं वर्जयित्वा भोक्तुं न व्यवस्यंतीत्यर्थः। तमिति। द्वितीय इव शब्दो वाक्यालंकारे। प्रियमिति। रामेण सह संगतः संगतप्रायः

 प्रियाख्यानस्येति। प्रियं श्रुतवतस्ते तत्संबंधिनः प्रियाख्यानस्य प्रियकथनस्य गवां शतसहस्राधिकं ददामीति संबंधः॥ ॥इति श्रीमहेश्वरतीर्थीये युद्धकांडे पंचविंश
ततमः सर्गः॥ ॥बहूनीत्यादि श्लोकद्वयमेकं वाक्यं। बहूनि वर्षाणि वनं गतस्य मम नाथस्य प्रीतिकरं कीर्तनं यतः शृणोमि। अतः जीवंतं नरं वर्षशतादपि आनंदः

 सिषेच भरतः श्रीमान्विपुलैरश्रुबिंदुभिः। देवो वा मानुषो वा त्वमनुक्रोशादिहागतः॥४५॥ प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियं। गवां शतसहस्रं
च ग्रामाणां च शतं परं॥४६॥ सकुंडलाः शुभाचाराः भार्याः कन्याश्च षोडश। हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः॥४७॥ सर्वाभरणसंपन्नाः संपन्नाः
कुलजातिभिः। निशम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदद्भुतोपमं। प्रहर्षितो रामदिदृक्षयाभवत्पुनश्च हर्षादिदमब्रवीद्वचः ४९ इति श्री
मद्युद्धकांडेऽष्टाविंशच्छततमः सर्गः। बहूनि नाम वर्षाणि गतस्य सुमहद्वनं। शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनं॥१॥ कल्याणी बत गाथेयं लौकि
की प्रतिभाति मा। एति जीवंतमानंदो नरं वर्षशतादपि॥२॥ राघवस्य हरीणां च कथमासीत्समागमः। कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः॥३॥ स पृ
ष्टो राजपुत्रेण बृस्यां समुपवेशितः। आचचक्षे ततः सर्वं रामस्य चरितं वने॥४॥ यथा प्रव्राजितो रामो मातुर्दत्ते वरे तव। यथा च पुत्रशोकेन राजा दशरथो मृतः
५॥ यथा हृतस्त्वमानीतो दूतैः राजगृहात्प्रभो। त्वयायोध्यां प्रविष्टेन यथा राज्यं न चेप्सितं॥६॥ चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्शनः। निमंत्रितस्त्वया भ्रा
त्रा धर्ममाचरता सतां। स्थितेन राज्ञो वचने यथा राज्यं विसर्जितं। आर्यस्य पादुके गृह्य यथासि पुनरागतः। सर्वमेतन्महाबाहो यथावद्विदितं तव। त्वयि प्रतिप्रयाते तु
यद्वृत्तं तन्निबोध मे॥८॥ अपयाते त्वयि तदा समुद्भ्रांतमृगद्विजं। परिद्यूनमिवात्यर्थं तद्वनं समपद्यत॥९॥ तद्धस्तिमृदितं घोरं सिंहव्याघ्रमृगाकुलं। प्रविवेशाथ वि
जनं सुमहद्दंडकावनं॥१०॥ तेषां पुरस्ताद्बलवान् गच्छतां गहने वने। विनदन्सुमहानादं विराधः प्रत्यदृश्यत॥११॥ तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखं
निपाते प्रक्षिपंति स्म नदंतमिव कुंजरं॥१२॥ तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ॥ सायाह्ने शरभंगस्य रम्यमाश्रममीयतुः॥१४॥ शरभंगे दिवं प्राप्ते रामः स
त्यपराक्रमः। अभिवाद्य मुनीन्सर्वान् जनस्थानमुपागमत्॥१५॥ पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता। ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः॥१६॥
प्रगृह्य खड्गं चिच्छेद कर्णनासे महाबलः। चतुर्दश सहस्राणि जनस्थाननिवासिनां॥१७॥ हतानि वसता तत्र राघवेण महात्मना

एतीति। लौकिकी गाथा। जनवार्ता मे मम कल्याणी सत्यार्था प्रतिभातीति संबंधः। सन्नतीन्द्रस्यां। तपस्विनां सनेऽपयाते त्वयि तिपरिद्यूनं परितप्तमिव वा नष्टं दृ
प्येति। एवाते गर्भ।

एकेनेति। अत्र अग्निश्चतुर्थभागेनाग्न्यधिकमुहूर्त्तेन। अग्न्यधिकमुहूर्त्तेनेत्यारण्यकांडे भिहितत्वात्। ततः पश्चाच्छूर्पनखेत्यत्र क्रमो न विवक्षितः। ततः इति वालामुनीनेत्यथ रा
ममितिमृगं रक्षार्थमारण्ये अब्रवीत्। अब्रवीद्वैदेही कांता अयं मृगो मृगत्वं गतां गृहाणेननः आश्रमे मनोहरो भविष्यतीति सर्वेषां प्रणयतीति। ... इति अचिंतय

एकेन सह संग्रामे रामेण रणमूर्द्धनि॥ २८॥ अत्र चतुर्थभागेन निःशेषा राक्षसाः कृताः। महाबला महावीर्या तपसो विघ्नकारिणः। ... निहता राघवेण ... दंड
कारण्यवासिनः। ... निहता रणे॥ २९॥ ... ततः सैन्यादिता ... समुपागतो॥ ३१॥ राघवेणानु
चरो योऽरीमारीचो नाम राक्षसः। लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः॥ ३२॥ सा राममब्रवीद्दृष्ट्वा वैदेही गृह्यतामिति। अहो मनोहरः कांत आश्रमे नो भविष्यति
॥ ३३॥ ततो रामो धनुष्पाणिर्मृगं तमनुधावति। स तेन धावता ... प्रेरेण नतपर्वणा॥ ३४॥ अथ सौम्य दशग्रीवो मृगयायां ... निष्क्रांते
प्रविवेशाश्रमं तदा॥ ३५॥ जग्राह ... सीतां ग्रहः खे रोहिणीमिव। ... ततो युद्धे हत्वा गृध्रं जटायुषं॥ ३६॥ प्रगृह्य सहसा सीतां जगाम ...
सन् ततस्तद्भुतसंकाशाः स्थिताः पर्वतमूर्द्धनि॥ ३७॥ सीतां गृहीत्वा गच्छंतं वानराः पर्वतोपमाः। ददृशुर्विस्मिताकारा रावणं राक्षसाधिपं॥ ३८॥ ततः शी
घ्रतरं गत्वा तद्विमानं मनोजवं। आरुह्य सह वैदेह्या पुष्पकं स महाबलः॥ ३९॥ प्रविवेश ततो लंकां रावणो राक्षसेश्वरः। ... शुभे महति
वेश्मनि॥ ... प्रविश्य ... सीतां ... अशोकवनिकां गता॥ ...
वर्त्तत ... ॥ ३३॥ ... रामः ... प्रियतरं पितुः॥ ३३॥ ... वैदेही
राघवः ... लक्ष्मणः। गोदावरीमनुचरन् वनानि ... पुष्पितानि॥ ३४॥ ... ततः ... वचनाद्रामः सत्यपराक्रमः॥
... गिरिं गत्वा सुग्रीवेण समागतः। ततः समागमः पूर्वं प्रीत्या ... जायत॥ ३६॥ ... वालिना पुरा॥ इतरेतर
संवादात्प्रगाढः प्रणयस्तयोः॥ ३७॥ रामः स्ववाहुवीर्येण ... वालिनं समरे हत्वा महाकायं महाबलं॥ ३८॥ सुग्रीवस्थापितो रा
ज्ये सहितः सर्ववानरैः। रामाय प्रतिजानीते राजपुत्र्याश्च मार्गणं॥ ३९॥ आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना। दश कोट्यः प्लवंगानां सर्वाः प्रख्यापितादिशः ४०
तीति अगणयंतीत्योरिति तयोः रामसुग्रीवयोः पूर्वं दर्शनात्प्रागेव ... ततः ... पूर्वं पुर्थः सुग्रीवस्य रामस्य
पत्न्याः कारणमाह। अनेनेति यतो वालिना निरस्तः अतस्तयोः प्रणय आसीदिति शेषः। रामायेति। अत्र क्रमो न विवक्षितः। राज्यप्राप्तेः पूर्वमेव प्रतिज्ञातत्वात्। आ

दिष्टा इति। आदिष्टाः नियुक्ताः प्रख्यापिताः इति संबंधः

यु॰टी॰ २५६

तेषामिति। विप्रनष्टानां विलप्रवेशानंतरं निर्गमिमार्गमजानतामित्यर्थः समोहमिति। ज्ञातिनामित्यत्र दीर्घाभावश्चार्षः। तयेति विधिवत्। नीतिशास्त्रमार्गेण पृष्ट्वाम
णिः। रामदत्ताभिज्ञानस्यांगुलीयकत्वेपि तन्मणि श्लाघामात्रं [?] उद्योजयिष्यन्निति। उद्यत्य ते तयो नेने तु घोरं वलं तं उद्योजयिष्यन् आत्मानं [?]

तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे। भृशं शोकाभितप्तानां महान्कालोत्ययर्वत॥ ४२॥ भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्य्यवान्। समाख्या
ति स्म वसतीं सीतां रावणमंदिरे॥ ४३॥ सोहं दुःखपरीतानां दुःखं तज्ज्ञातिनां नुदन्। आत्मवीर्य्यं समास्थाय योजनानां शतं प्लुतः॥ ४४॥ तत्राह
मेकामद्राक्षमशोकवनिकां गतां। कौशेयवस्त्रां मलिनां निरानंदां दृढव्रतां। तया समेत्य विधिवत् पृष्ट्वा सर्वमनिंदितां। अभिज्ञानं मया दत्तं राम
नामांगुलीयकं॥ ४५॥ अभिज्ञानं मणिं लब्ध्वा चरितार्थोहमागतः। मया च पुनरागम्य रामस्याक्लिष्टकर्म्मणः॥ ४६॥ अभिज्ञानं मया दत्तमर्चिष्मा
न्स महामणिः। श्रुत्वा तां मैथिलीं रामस्त्वाशशंसे च जीवितं। जीवितांतमनुप्राप्तः पीत्वामृतमिवातुरः। उद्योजयिष्यन्नुद्योगं दध्रे लंकावधे मनः
॥४७॥ जिघांसुरिव लोकांते सर्व्वांल्लोकान्विभावसुः। ततः समुद्रमासाद्य नलं सेतुमकारयत्॥ ४८॥ अतरत्कपिवीराणां वाहिनी तेन हेतुना। प्रहस्त
मवधीन्नीलः कुंभकर्णं तु राघवः॥ ५०॥ लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणं। स शक्रेण समागम्य यमेन वरुणेन च॥ ॥ महेश्वरस्वयंभूभ्यां
तथा दशरथेन च। तैश्च दत्तवरः श्रीमानृषिभिश्च समागतैः। सुरर्षिभिश्च काकुत्स्थो वराँल्लेभे परंतपः। स तु दत्तवरः श्रीमान्वानरैश्च समागतः
॥ पुष्पकेन समानेन किष्किंधामभ्युपागमत्। तां गंगां पुनरासाद्य वसंतं मुनिसंनिधौ॥ ५४॥ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि। ततः स वाक्यै
र्मधुरैर्हनूमतो निशम्य हृष्टो भरतः कृतांजलिः। उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः॥ ५६॥ इति श्रीमद्युद्धकांडे एकोन
त्रिंशत्तमः सर्गः॥ ॥ श्रुत्वा तु परमानंदं भरतः सत्यविक्रमः। हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा॥ १॥ दैवतानि च सर्वाणि चैत्यानि नगरस्य
च। सुगंधमाल्यैर्वादित्रैरर्चंतु शुचयो नराः॥ २॥ सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा। सर्वे वादित्रकुशला गणिकाश्चैव सर्वशः॥ ३॥ राजदा
रास्तथामात्याः सैन्याः सेनांगनागणाः। ब्राह्मणाश्च सराजन्याः श्रेणिमुख्यास्तथा गणाः॥ ४॥ अभिनिर्यांतु रामस्य द्रष्टुं शशिनिभं मुखं। भरतस्य
वचः श्रुत्वा शत्रुघ्नः परवीरहा॥ ५॥ विष्टीरनेकसाहस्रीश्चोदयामास वीर्य्यवान्। समीकुरुत निम्नानि विषमाणि समानि च॥ ६॥ ॥ ॥ ॥

नत इति। मे मनोरथः पूर्णः इत्युक्त्वा चेति संबंधः॥ इति श्रीयुद्धकांडे एकोनत्रिंशत्तमः सर्गः॥ श्रुत्वेति। परमानंदं परमानंदकरं वच इति शेषः। वैतालिकाः। वंशशलाकानि
काः। सैन्या राजभवनाः इति मतो गंतराः सेवनगणाः। आदिविकोतसेनाभेदाः। श्रेणीमुख्याः श्रेणी नानाजातीयसंघः। भरतस्येति। विष्टिर्भृतिकरान्। समीकुरुतेति

राम २५६

समुछ्रितेति। पताकाः कर्णाः सूर्यस्योदयनं प्रतियावत्तत्र्यं उदेति। तावदेव पताकाः रथ्याः वेश्मानि चानेभयंत्विति सिंवंयं नसेः दामेति। ग्रथितैः मालातिः
दाम तिस्तवकैः मुक्तपुष्पैः केवलपुष्पैः पंचवर्णकैः पंचवर्णाविद्भिः द्विजातिमुख्यैरिति। सेनेगामेः वणिक्जिनवैदेहिकः माईवाहेनेगमो वाणिजो वणि
गित्यमरः आर्यीति। आर्यपादोऽत्र रामस्य पादुको उपवासेनेति तत्त्वं हर्षमागत इत्यनेन श्रीराममागमनाश्रवणात् सर्वहर्षोनाश्रीत्य वगम्यते। कश्चिदिति। कांपे
यीकपिसंवधिनी चलचित्तता सेव्यतेन कश्चिल्लयतिशेषः। एवमुक्तः इति। अर्थं विलंव हेतुं विज्ञापयन्नग्रथस्याद्विपयमाद्देशद्वे वाच्यप्रयं जनेन्यवहरथनेशा

स्यानानिवनिस्स्पृंतानं द्वियामादितः परं। सिंचंतु पृथिवीं कृत्स्नां महीशीतेन वारिणा। ७। ततोत्यवकीरंत्वन्ये जालैः पुष्पैश्च सर्वतः। समुछ्रितपताकास्तु
रथ्याः पुरवरोत्तमा। ८। शोभयंतु च वेश्मानि सूर्यस्योदयनं प्रति। स्रग्दाममुक्तपुष्पैश्च सुवर्णैरजतैरपि। ९। राजमार्गमसंबाधं किरंतु शतशो नराः। तत
स्तच्छ्रावणं श्रुत्वा शत्रुघ्नस्य मुदान्विताः। १०। शक्तिर्जयंतो विजयः सिद्धार्थश्चार्थसाधकः। अशोको मंत्रपालश्च सुमंत्रश्चापि निर्ययुः। ११। मत्तैर्नागसहस्रैश्च
सध्वजैः सुविभूषितैः। अपरे हेमकक्ष्याभिः सगजाभिः करेणुभिः। १२। निर्ययुस्तुरगाक्रांतैः रथैश्च सुमहारथाः। शक्त्यृष्टिप्रासहस्तानां सध्वजानां पताकिनां। १३। तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः। पदातीनां सहस्रैश्च वीराः परिवृता ययुः। १४। ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः। कौसल्यां
प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः। १५। द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः। माल्यमोदकहस्तैश्च मंत्रिभिर्भरतो वृतः। १६। शंखभेरीनिनादैश्च वंदिभिश्चाभिनंदितः। पादुके ते शिरसा कृत्वा शिरसा धर्मकोविदः। १७। पांडुरं छत्रमादाय शुक्लमाल्योपशोभितं। शुक्ले च वालव्यजने राजार्हे हेमभू
षिते। १८। उपवासकृशो दीनश्चीरकृष्णाजिनांबरः। भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः। १९। प्रत्युद्ययौ तदा रामं महात्मा सचिवैः सह। अश्वानां खु
रशब्दैश्च रथनेमिस्वनेन च। २०। शंखदुंदुभिनादेन संचचालेव मेदिनी। गजानां वृंहितैश्चापि शंखदुंदुभिनिस्वनैः। २१। कृत्स्नं तु नगरं तत्तु नंदिग्राममु
पागमत्। समीक्ष्य भरतो वाक्यमुवाच पवनात्मजं। २२। कच्चिन्न खलु कापेयी सेव्यते चलचित्तता। नहि पश्यामि काकुत्स्थं राममार्यं परंतप। २३। कच्चिन्न चानुदृश्यंते कपयः कामरूपिणः। अथैवमुक्ते वचने हनूमानिदमब्रवीत्। २४। अर्थं विज्ञापयन्नेव भरतं सत्यविक्रमं। सदाफलान् कुसुमितान् वृक्षान् प्राप्य मधुस्रवान्। २५। भरद्वाजप्रसादेन मत्तभ्रमरनादितान्। तस्य चैष वरो दत्तो वासवेन परंतप। २६। ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितं। निस्वनः श्रूयते भीमः प्रहृष्टानां व

केवलं हेतुर्निर्दिष्ट इति विज्ञपयंती हेतुमेवाह। मदाफलानीत्यादि सार्द्धश्लोकद्वयमेकं वाक्यं। उक्तविशेषणविशिष्टान् वृक्षान् प्राप्य प्रहृष्टानां वनौकसां निस्वनः श्रूय
ते। अनेन्स्य विश्वसिहीतिशेषः। हृष्टास्तथा विधाः कथं स्युरित्यत्राह। भरद्वाजप्रसादेनेति। तेनापि कथमेवं शक्यमित्यत्राह। तस्य चेति। तस्य भरद्वाजस्यातिथ्यं वा
सवेन भरद्वाजतपः प्रसादितेनेति शेषः। यद्येवमतः ससैन्यस्य रामस्य सर्वगुणान्वितं आतिथ्यं कृतं भरद्वाजेनेति शेषः। योकां॰ ९

मन्यमतीति वाल्मीकिर्नीनंदी। तदेतदिति मनसा ब्रह्मनिर्मितं विश्वकर्मणा मनसा ब्रह्मार्थनिर्मितं धनदस्येत्यर्हभिन्नं वा कुआं। एतद्धनदस्य प्रसादेन धनदविधुर्येन
प्रसादेन ब्रह्मणा मनोजवं विनिर्मितमित्यर्थः। यद्वा। दिव्यमनोजवमेतद्विमानं प्रसादेन ब्रह्मस्वरूप प्रसादेन धनदस्य धनदसंबंधीत्यर्थः। परेणातपसा लेभे यत्कुबेरः पि
तामहादिति सुंदरकांडे अभिहितत्वात्। एतस्मिन्निति। राज्ञस्तु विभीषणः स्त्यनंतरं आपतस्तिष्ठे घं। ततो लक्ष्मणमिति। लक्ष्मणं प्रसाद्य कृतनमस्कारं लक्ष्मणमालिं

मन्येवानरसेना सा नदीं तरति वालुकी। प्रजो वर्षं समुद्धृतं पश्य सालवनं प्रति॥२८॥ मन्ये सालवनेरम्यं लोलयंति प्लवंगमाः। तदेतद्दृश्यते दूराद्विमानं चंद्रसन्निभं
॥२९॥ विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितं। रावणं बांधवैः सार्द्धं हत्वा लब्धं महात्मना॥३०॥ तरुणादित्यसंकाशं विमानं रामवाहनं। धनदस्य प्रसादेन
दिव्यमेतन्मनोजवं॥३१॥ एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ। सुग्रीवश्च महातेजा राक्षसश्च विभीषणः॥३२॥ ततो हर्षसमुद्भूतो निःस्वनो दिवमस्पृ
शत्। स्त्रीबालयुववृद्धानां रामोयमिति कीर्तिते॥३३॥ रथकुंजरवाजिस्थास्तेवतीर्य महीं गताः। ददृशुस्तं विमानस्थं नराः सोममिवांबरे॥३४॥ प्रांजलिर्भर
तो भूत्वा प्रहृष्टो राघवोन्मुखः। स्वागतेनार्घ्यपाद्याद्यैस्ततो राममपूजयत्॥३५॥ मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः। रराज पृथुदीर्घाक्षो वज्रपाणि
रिवामरः॥३६॥ ततो विमानाग्रगतं भरतो भ्रातरं तदा। ववंदे प्रणतो रामं मेरुस्थमिव भास्करं॥३७॥ ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमं। हंसयुक्तं महा
वेगं निपपात महीतले॥ आरोपितो विमानं तं भरतः सत्यविक्रमः। राममासाद्य मुदितः पुनरेवाभ्यवादयत्॥३९॥ तं समुत्थाप्य काकुत्स्थः चि
रस्याक्षिपथं गतं। अंके भरतमारोप्य मुदितः परिषस्वजे॥४०॥ ततो लक्ष्मणमासाद्य वैदेहीं च परंतपः। अथाभ्यवादयत्प्रीतो भरतो नाम चाब्रवीत्॥
४१॥ सुग्रीवं केकयीपुत्रो जांबवंतमथांगदं। मैंदं च द्विविदं नीलमृषभं चैव सस्वजे॥४२॥ सुषेणं च नलं चैव गवाक्षं गंधमादनं। शरभं पनसं चैव
परितः परिषस्वजे॥४३॥ ते कृत्वा मानुषं रूपं वानराः कामरूपिणः। कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा॥४४॥ अथाब्रवीद्राजपुत्रः सुग्री
वं वानरर्षभं। परिष्वज्य महातेजा भरतो धर्मिणां वरः॥४५॥ त्वमस्माकं चतुर्णां वै भ्राता सुग्रीव पंचमः। सौहृदाज्जायते मित्रमपकारोरिल
क्षणं॥४६॥ विभीषणं च भरतः सांत्ववाक्यमथाब्रवीत्। दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करं॥४७॥ शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणं।
सीतायाश्चरणौ वीरो विनयादभ्यवादयत् ४८

गनेन संभाव्य वैदेहीं चाभ्यवादयत्। अन्ये त्वाहुः पांचजन्यात्मा कैकेय्यां भरतोभवत्। तदन्ये त्वाहुः सुमित्रायां अनंतात्मा च लक्ष्मणः सुदर्शनात्मा शत्रुघ्नो
हौ जातौ युगपत्प्रिय इति। पार्वतीं प्रति शिवेनोक्तपद्मपुराणस्थरामायणोक्तप्रकारेण भरतस्य ज्येष्ठत्वादिवं व्याख्यातं वैदेहीं चेति च कारो रामनमस्कारं

एतन्नेरञ्जितमिति।तेननिर्यातितंप्रत्यर्पितंनिवेदितंपुरोहितस्येति।आत्मसमस्यस्वानुरूपस्य।इत्थमासनेतेनवसिष्ठेनसहैवउपविवेशइत्यर्थः।आसनेषूपगदेवोपविविशन्तु.
वित्यर्थः॥ ॥इतिश्रीमहेश्वरतीर्थीयेयुद्धकांडेत्रिंशच्छततमःसर्गः॥ ॥पूजितेति।मामिकामाताइजिता।राजपरित्यागरूपंवनवासाभीकारेणत्वयातोषिता।अन

रामोमातरमासाद्यविवर्णांशोककर्शितां।जग्राहप्रणतःपादौमनोमातुःप्रहर्षयन् ४८ अभिवाद्यसुमित्रांचकैकेयींचयशस्विनीं।समातॄश्चततःसर्वाःपुरोहित
मुपागमत् ४९ स्वागतंतेमहाबाहोकौसल्यानंदवर्द्धन।इतिप्रांजलयःसर्वेनागरारामम‌ब्रुवन् ५० तान्यंजलिसहस्राणिप्रगृहीतानिनागरैः।आकोशानीवपद्मानि
ददर्शभरताग्रजः ५१ पादुकेतेतुरामस्यगृहीत्वाभरतःस्वयं।चरणाभ्यांनरेंद्रस्ययोजयामासधर्मवित् ५२ अब्रवीच्चतदारामंभरतःसकृतांजलिः।एतत्तेसकलंरा
ज्यंन्यासंनिर्यातितंमया ५३ अद्यजन्मकृतार्थंमेसंवृत्तश्चमनोरथः।यत्त्वांपश्यामिराजानमयोध्यांपुनरागतं ५४ अवेक्षतांभवान्कोशंकोष्ठागारंगृहंबलं।
भवतस्तेजसासर्वंकृतंदशगुणंमया ५५ तथाब्रुवाणंभरतंदृष्ट्वातंभ्रातृवत्सलं।मुमुचुर्वानराबाष्पंराक्षसश्चविभीषणः ५६ ततःप्रहर्षाद्भरतमंकमारोप्य
राघवः।ययौतेनविमानेनससैन्योभरताश्रमं ५७ भरताश्रममासाद्यससैन्योराघवस्तदा।अवतीर्यविमानाग्रादवतस्थेमहीतले ५८ अब्रवीच्चतदा
रामस्तद्विमानमनुत्तमं।वहवैश्रवणंदेवमनुजानामिगम्यतां ५९ ततोरामाभ्यनुज्ञातंतद्विमानमनुत्तमं।उत्तरांदिशमुद्दिश्यजगामधनदालयं ६० विमा
नंपुष्पकंदिव्यंसंगृहीतंतुरक्षसा।अगमद्धनदंवेगात्रामवाक्यप्रचोदितं ६१ पुरोहितस्यात्मसमस्यराघवोबृहस्पतेःशक्रइवामराधिपः।निपीड्यपादौपृ
थगासनेशुभेसहैवतेनोपविवेशवीर्यवान् इत्यार्षेरामायणेमक्षितिमृत्तसहस्र्यांआदिरामरामभरतसमागमोसुरामात्यमित्रवर्गसहितस्यरामस्यभरताश्रम
प्रवेशोनामत्रिंशच्छततमःसर्गः॥ ॥शिरस्यंजलिमादायकैकेयीनंदवर्द्धनः।बभाषेभरतोज्येष्ठंरामंसत्यपराक्रमं॥१॥पूजितामामिकामातादत्तंराज्यमिदंमम।
तद्ददामिपुनस्तत्वंयथात्वमददाःमम॥२॥धुरमेकाकिनान्यस्तामृषभेणबलीयसा।किशोरवद्गुरुंभारंनवोढुमहमुत्सहे ३ वारिवेगेनमहताभिन्नःसेतुरि
वक्षरन्।दुर्बंधनमिदंमन्येराज्यच्छिद्रमसंवृतं॥४॥गतिंखरइवाश्वस्यहंसस्येववायसः।नान्वेतुमुत्सहेवीरतवमार्गमरिंदम ५

ततंममयादत्तंराज्यंचित्रकूटेदत्तद्राज्यंत्वंयथायेनप्रकारेणममअददाः।तेनप्रकारेणपुनस्तत्त्वंददामिन्यासरूपेणमयिस्थापितंराज्यंपुनर्ददामीत्यर्थः।त्व
भवतस्त्वंपरिपालयेत्याशंक्याहधुरमिति।एकाकिनाअसहायेनबलीयसावृषभेणन्यस्तांधुरंकिशोरवीवत्सतरीवत्गुरुंभारंवोढुंअहंनोत्सहेइतियोजना॥ ॥

वंशपरंपराप्राप्तराज्यपरिपालनार्थं दशरथेनोत्पाद्य संवर्द्धितस्य मम सकलगुणसंपन्नस्याप्यभिषेकपूर्वकप्रजापरिपालनरूपफलाप्रदर्शनात् फलाप्रदर्शनरू
पोपमामाह। यथा चेत्यादिश्लोकत्रयेण। अन्तर्निवेशने आरोपितः उप्तः वृक्षः महाकायः घनवालवान् डरारोहो जातः सन्पुष्पितो भूत्वा फलानि न प्रदर्शयन्नाशीर्ये
तशीर्येच्चेत्। यस्य हेतोः यस्य फलस्य हेतोर्येन रोप्यते स रोपयिता तस्य वृक्षस्यार्थं फलं। यथा यथावन्नानुभवेत्। एवं यस्मात्कारणात् मनुजेन्द्र भर्ता भृत्यान्समानुन
शासि यदि तदा दशरथस्य दृष्टोपमादेशस्य फलाप्रदर्शनदृष्टान्ततुल्यत्वमित्यर्थः। एतदुक्तं भवति। केनचित्कुटुंबिना कुटुंबार्थं समारोपितो वृक्षः पुष्पितो भूत्वा यदि
दिनफलं न दद्यात्तस्य कुटुंबस्य तद्वृक्षात् न प्रयोजनं भवेत्। एवं पित्रा जनितः सर्वगुणसंपन्नो यदि त्वं लोकं न रक्षेः तदा लोकस्य त्वया जनप्रयोजनमिति। यावदावर्ते

यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने। महानपि दुरारोहो महास्कंधः प्रशाखवान् ६ शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन्। तस्य नानुभवेदर्थं
यस्य हेतोः स रोपितः। एषोपमा महाबाहो त्वमर्थं वेत्तुमर्हसि। यद्यस्मान्मनुजेन्द्र त्वं भर्ता भृत्यान्न शाधि हि ८ जगदद्याभिषिक्तं त्वामनुपश्यतु राघव। प्र
तपन्तमिवादित्यं मध्याह्ने दीप्ततेजसं ९॥ तूर्यसंघातनिर्घोषैः कांचीनूपुरनिस्वनैः। मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व राघव। १०। यावदावर्तते चक्रं यावती च व
सुंधरा। तावत्त्वमिह लोकस्य स्वामित्वमनुवर्तय। ११। भरतस्य वचः श्रुत्वा रामः परपुरंजयः। तथेति प्रतिजग्राह निषसादासने शुभे। १२। ततः शत्रुघ्नवच
नान्निपुणाः श्मश्रुवर्द्धनाः। सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत। १३। पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले। सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे। १४।
विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः। महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन्। १५। प्रतिकर्म च रामस्य कारयामास वीर्यवान्। लक्ष्मणस्य च लक्ष्मी
वानिक्ष्वाकुकुलवर्द्धनः। १६। प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः। आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरं। १७। ततो वानरपत्नीनां सर्वासामेव शोभ
नं चकार यत्नात्कौसल्या प्रहृष्टा पुत्रवत्सला। १८। ततः शत्रुघ्नवचनात्सुमंत्रो नाम सारथिः। योजयित्वाभिचक्राम रथं सर्वांगशोभनं। १९। अग्न्यर्कामल
संकाशं दिव्यं दृष्ट्वा रथे स्थितं। आरुरोह महाबाहू रामः परपुरंजयः। २०। सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती। स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुंडलौ।
सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुंडलाः। सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः २२

तद्धति। चक्रं ज्योतिश्चक्रं। यावदावर्तते परिभ्रमति अनेन कालावधिरुच्यते। यावती। यावत्कालस्थितिः। यावत्तिष्ठतीत्यर्थः। भरतस्येति। रामः भरतस्य वचः प्रतिजग्राह
सः भरतः। आसने निषसादेति संबंधः। ततइति। श्मश्रुवर्द्धनाः। श्मश्रुकर्त्तनाः। वर्द्धनं छेदनं मध्ये आनंदनं समाजनं स्नपनं। पूर्वमित्यादि। अत्र भरतलक्ष्मणयोः स्ना
नाद्यभिधानकाले शत्रुघ्नस्य स्नानानभिधानात् तस्य सर्वेषां स्नानादिकारयितृत्वस्यैवाभिधानात्। भरतादीनां व्रताद्यंगीकारकाले व्रताद्यंगीकारानभिधानाच्छ
त्रुघ्नस्य व्रतं नास्तीत्यवगम्यते। प्रतिकर्मचेति। प्रतिकर्म अलंकरणं। इक्ष्वाकुकुलवर्द्धनः शत्रुघ्नः॥

अयोध्यायामिति।मंत्रयामासुःअभिषेकोपयोगिमंगलद्रव्यसंपादनार्थमेवंकर्तव्यमितिमंत्रयामासुरित्यर्थः।अशोकइत्यादिश्लोकत्रयमेकंवाक्यं।अशोकादयःरामवृद्ध्यर्थं
नगरस्यचवृत्त्यर्थंसंगताःमंत्रयन्।मंत्रयंतःमहात्मनोरामस्याभिषेकार्थंयद्यन्मंगलपूर्वकंकर्तुमर्हथप्रजायावक्तुवचनमितिसर्वेमंत्रिणः।पुरोहितंसंदिश्यरामदर्शनबुद्ध
यःसंतोनगरान्निर्ययुरितिसंबंधः।लक्ष्मणइति।पुरःस्थितोलक्ष्मणःव्यजनंतालवृंतकं।तस्यमूर्ध्निसंवीजयन्।श्वेतंवालव्यजनंजग्राहेतिसंबंधःअभिषेकेइतिस्तूयमानस्य

अयोध्यायांचसचिवाराज्ञोदशरथस्यचापुरोहितंपुरस्कृत्यमंत्रयामासुरर्थवत् २३ अशोकोविजयश्चैवसिद्धार्थश्चसमाहिताःमंत्रयन्रामवृद्ध्यर्थंवृत्त्यर्थंनगरस्यच. २४ सर्वमेवा
भिषेकार्थंजयार्हस्यमहात्मनःकर्तुमर्हथरामस्ययद्यन्मंगलपूर्वकं २५ इतितेमंत्रिणःसर्वेसंदिश्यचपुरोहितान्नगरान्निर्ययुस्तूर्णंरामदर्शनबुद्धयः २६ हरियुक्तंसहस्राक्षोर
थमिंद्रइवानघःप्रययौरथमास्थायरामोनगरमुत्तमं २७ जग्राहभरतोरश्मीञ्छत्रुघ्नःछत्रमाददेलक्ष्मणोव्यजनंतस्यमूर्ध्निसंवीजयंस्तदा। २८ श्वेतंचवालव्यजनंजग्रहेपरि
तस्थिवान्‌अपरंचंद्रसंकाशंराक्षसेंद्रोविभीषणः २९ ऋषिसंघैस्तदाकाशेदेवैश्चसमरुद्गणैःस्तूयमानस्यरामस्यशुश्रुवेमधुरध्वनिः ३० ततःशत्रुंजयंनामकुंजरंपर्वतो
पमंआरुरोहमहातेजाःसुग्रीवःप्लवगर्षभः ३१ नवनागसहस्राणिययुरास्थायवानराःमानुषंविग्रहंकृत्वासर्वाभरणभूषिताः ३२ शंखशब्दप्रणादैश्चदुंदुभीनांच
निस्वनैःप्रययौपुरुषव्याघ्रस्तांपुरींहर्म्यमालिनीं ३३ ददृशुस्तेसमायांतंराघवंसपुरःसरंविराजमानंवपुषारथेनातिरथंतदा ३४ तेवर्द्धयित्वाकाकुत्स्थंरामेणप्रतिनं
दिताःअनुजग्मुर्महात्मानंभ्रातृभिःपरिवारितं ३५ अमात्यैर्ब्राह्मणैश्चैवतथाप्रकृतिभिर्वृतःश्रियाविरुरुचेरामोनक्षत्रैरिवचंद्रमाः ३६ सपुरोगामिभिस्तूर्यैस्ता
लस्वस्तिकपाणिभिःप्रव्याहरद्भिर्मुदितैर्मंगलानिययौवृतः ३७ अक्षतंजातरूपंचगावःकन्याःसहद्विजाःनरामोदकहस्ताश्चरामस्यपुरतोययुः ३८ सख्यंचरा
मःसुग्रीवेप्रभावंचानिलात्मजेवानराणांचतत्कर्मव्याचचक्षेथमंत्रिणां ३९ श्रुत्वाचविस्मयंजग्मुरयोध्यापुरवासिनःवानराणांचतत्कर्मराक्षसानांचतद्बलं ४०
द्युतिमानेतदाख्यायरामोवानरसंवृतःहृष्टपुष्टजनाकीर्णामयोध्यांप्रविवेशसः ४१ ततोह्यभ्युच्छ्रयन्पौराःपताकास्तेगृहेगृहेऐक्ष्वाकाध्युषितंरम्यमाससा
दपितुर्गृहं ४२ अथाब्रवीद्राजपुत्रोभरतंधर्मिणांवरंअर्थोपहितयावाचामधुरंरघुनंदनः ४३ पितुर्भवनमासाद्यप्रविश्यचमहात्मनःकौसल्यांचसुमित्रांच
कैकेयीमभिवाद्यच ४४ यच्चमद्भवनंश्रेष्ठंसाशोकवनिकंमहत्मुक्तावैदूर्यसंकीर्णंसुग्रीवायनिवेदय ४५ तस्यतद्वचनंश्रुत्वाभरतःसत्यविक्रमःहस्तेगृही
त्वासुग्रीवंप्रविवेशतमालयं ४६

रामस्यमधुरध्वनिःरावणनिरसनादिरामापदानुवर्णनध्वनिरित्यर्थः।शंखशब्देति।शंखशब्दप्रणादैःशंखशब्दैःजनानांहर्षप्रणादैश्च।अथाब्रवीत्पादिश्लोकद्वयमे
कंवाक्यं।पितुर्भवनमासाद्यकौसल्याद्याअभिवादयन्भरतमब्रवीदितिसंबंधः

यु॰टी॰ यथेतीति हे वानराः चतुर्णां सागराम्भसां च तत्सागराम्भोभिः पूर्णैर्घटैरुपलक्षिताः प्रत्यूषसमये यथा प्रतीक्षध्वं प्रतीक्षिष्यध्वे अस्मानिति शेषः। तथा कुरुतेति योजना।
१५९ तत इति। तत्तत्सिद्धं नदीतीर्थसागराणां जलात् ततः इति प्रयतः प्रयत्नवान् रत्नमयपीठे रत्नसिंहासने। सीतासहितं रामं न्यवेशयत्। वसिष्ठ इत्यादिश्लोकद्वयमेकं

ततस्ते तैलप्रदीपांश्च पर्यङ्कास्तरणानि च। गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ४७ उवाच च महातेजाः सुग्रीवं राघवानुजः। अभिषेकाय रामस्य दूतानाज्ञा
पय प्रभो ४८ सौवर्णान्वानरेन्द्राणां चतुर्णां चतुरो घटान्। ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ४९ यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम्। पूर्णैर्घटैः
प्रतीक्षध्वं तथा कुरुत वानराः ५० एवमुक्ता महात्मानो वानरा वारणोपमाः। उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ५१ जाम्बवांश्च हनूमांश्च वेगदर्शी च वा
नरः। ऋषभश्चैव कलशाञ्जलपूर्णानथानयत् ५२ नदीशतानां पञ्चानां जलं कुम्भैरुपाहरन्। पूर्वात्समुद्रात्कलशं जलपूर्णमथानयत् ५३ सुषेणः सत्त्वसं
पन्नः सर्वरत्नविभूषितम्। ऋषभो दक्षिणात्तूर्णं समुद्राज्जलमानयत् ५४ रक्तचन्दनकर्पूरैः संवृतं काञ्चनं घटम्। गवयः पश्चिमात्तोयमाजहार महार्णवात्। ५५
रत्नकुम्भेन महता शीतं मारुतविक्रमः। उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः ५६ आजहार स धर्मात्मा नलः सर्वगुणान्वितः। ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य
तज्जलम् ५७ अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह। पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ५८ ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह। रामं रत्नमये
पीठे ससीतं संन्यवेशयत् ५९ वसिष्ठो विजयश्चैव जाबालिरथ काश्यपः। कात्यायनो गौतमश्च वामदेवस्तथैव च ६० अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुग
न्धिना। सलिलेन सहस्राक्षं वसवो वासवं यथा ६१ ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा। योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टैः सनैगमैः ६२
सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः। चतुर्भिर्लोकपालैश्च सर्वैर्देवैश्च संगतैः ६३ ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम्। अभिषिक्तः पुरा येन म ९
नुस्तं दीप्ततेजसम् ६४ तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः। सभायां हेमक्लृप्तायां शोभितायां महाधनैः ६५ रत्नैर्नानाविधैश्चैव चित्रितायां सुशो
भनैः। नानारत्नमये पीठे कल्पयित्वा यथाविधि ६६ किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना। ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः ६७ छत्रं तस्य च राम
जग्राह शत्रुघ्नः पाण्डुरं शुभम्। श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ६८ अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः। मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्क १५९
रां ६९। राघवाय ददौ वायुर्वासवेन प्रचोदितः। सर्वरत्नसमायुक्तं मणिभिश्च विभूषितम् ७० मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः। प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोग

वाक्यं। वसिष्ठादयः प्रसन्नेन निर्मलेन। सकलवेदोक्तमन्त्रातिमन्त्रितेति पवित्रेण सुगन्धिना सलिलेन नरव्याघ्रं श्रीरामं अभ्यषिञ्चन्निति संबन्धः। ऋत्विग्भिरित्यादिश्लोकद्वयमेकं वाक्यं। अत्रापि ॥
अभ्यषिञ्चन्नित्यनुषज्यते। अत्र वसिष्ठादयः प्रयोजककर्तारः। वसिष्ठादिभिर्हेतुभूतैः। ऋत्विग्ब्राह्मणादयः। अभ्यषिञ्चन्नित्यर्थः। ऋत्विगादिभिः। अभिषिक्तो राम इति शेषः॥

सहस्रशतमितिशेषः । नवां गवां । नवप्रसूतानां गवां धेनुस्थानत्र वत्सतिकृत्यमग्रतः ततो द्विविदेति कामगुणानां कामपूर्तानीतिकामाः प्रार्थनीयाः गुणाः येतांल्लब्ध्वा कुलधन
मितिलब्ध्वा कुलधनराजा लंकां प्राप्याद्विभीषणइत्यत्र कुलधनशब्देन पूर्वमेवरामाज्ञेनराक्षसकुलधनंलंकाराज्यंदत्तमितिविभीषणानुवादः क्रियते केचित्तु लब्ध्वा
कुलधनमित्यत्र कुलधनशब्दस्यार्थः इक्ष्वाकुकुलदैवतरंगविमानमिति वर्णयंति तन्नोपपद्यते कृतः कुलधनमित्यत्र इक्ष्वाकुपदस्याप्रमाणत्वात् अवतारसमाप्ति
समयेविशेषणायइक्ष्वाकुकुलदैवतंपरमगुरवे रंगविमानदानस्योत्तरश्लोकमायणेवदयमाणत्वात् तथा हि विभीषणं प्रति श्रीरामवचनं किं चान्यद्वक्तुमिच्छामि राक्षसें

अभिषेके तत्र दृष्ट्वा तद्रामस्य धीमतः ॥ भूमिः सस्यवती चैव फलवंतश्च पादपाः ॥ ७२ ॥ गंधवंति च पुष्पाणि बभूवू राघवोत्सवे । सहस्रशतमश्वानां धेनूनां च गवां तथा
७३ ॥ ददौ शतवृषान्पूर्वं द्विजेभ्यो मनुजर्षभः । त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः । ७४ ॥ नानाभरणवस्त्राणि महार्हाणि च राघवः । अर्करश्मिप्रतीकाशां कां
चनीं मणिविग्रहां । सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः । वैदूर्यमयचित्रे च वज्ररत्नविभूषिते । ७६ ॥ वालिपुत्राय धृतिमानंगदायांगदे ददौ । मणिप्रवरजुष्टं तं मु
क्ताहारमनुत्तमं ॥ ७७ ॥ सीतायै प्रददौ रामश्चंद्ररश्मिसमप्रभं । अरजे वाससी दिव्ये शुभान्याभरणानि च ॥ ७८ ॥ अवेक्षमाणा वैदेही प्रददौ वायुसूनवे । अवमुच्यात्मनः कंठा
द्धारं जनकनंदिनी ॥ ७९ ॥ अवैक्षत हरीन्सर्वान्भर्तारं च मुहुर्मुहुः । तामिंगितज्ञः संप्रेक्ष्य बभाषे जनकात्मजां ॥ ८० ॥ प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि । तेजो धृतिर्य
शो दाक्ष्यं सामर्थ्यं विनयो नयः ॥ ८१ ॥ पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा । ददौ सा वायुपुत्राय तं हारमसितेक्षणा ॥ ८२ ॥ हनूमांस्तेन हारेण शुशुभे वानरर्षभः । चं
द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः ॥ ८३ ॥ सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः । वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥ ८४ ॥ विभीषणोऽथ सुग्रीवो हनूमान्जां
बवांस्तथा ॥ सर्वे वानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥ ८५ ॥ यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैः । प्रहृष्टमनसः सर्वे जग्मुरेव यथागतं । ततो द्विविदमैंदा
भ्यां नीलाय च परंतपः ॥ सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः ८७ ॥ दृष्ट्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः । विसृष्टाः पार्थिवेंद्रेण किष्किंधामभ्युपागमन्
सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनं । पूजितश्चैव रामेण किष्किंधां प्राविशत्पुरीं ॥ ८८ ॥ विभीषणोऽपि धर्मात्मा सह तैर्नैरृतर्षभैः । लब्ध्वा कुलधनं राजा लंकां
प्राययन्महायशाः । ८९ ॥ स राज्यमखिलं शासन्निहतारिर्महायशाः ॥ राघवः परमोदारो रराज परया मुदा ॥ उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ॥

द्रुमहाबलां ॥ आराधय जगन्नाथमिक्ष्वाकुकुलदैवतं । परमगुरणे च अवतारसमाप्तिसमयेसमागतं विभीषणं प्रति श्रीरामवचनं । यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मे
दिनी । तावद्रमस्व राज्यस्थः कालेन मम पदं व्रज । इत्युक्त्वा प्रददौ तस्मै स्वविश्लेषासहिष्णवे । श्रीरंगशायिनं त्वार्ची इक्ष्वाकुकुलदैवतं । रंगविमानमादाय लंकां प्रयाहि
विभीषण । इति । अवतारसमाप्तिकाले रंगविमानदानश्रवणात् । कुलधनशब्देन राक्षसकुलधनं लंकाराज्यमेवोच्यत इति । वेदितव्यं । नराज्यमिति । शासन्दुष्टनिग्रहं

[illegible]

यु॰ टी॰ १६० आतिष्ठेति। बलेन सर्वराजाध्युषितां सर्वराजानो यस्य चादयः तैरध्युषितां पृथिवीं पितृभिः पितृपितामहप्रपितामहैः। कृतायां मया सह तुल्यं यथा त
थायौवराज्ये धुरमुद्वहस्वेति संबंधः। आत्मना सह वनवासे दुःखाभावात् राज्ये सहसुखाभावाल्लक्ष्मणं प्रति यौवराज्ये प्रार्थनेति भावः॥ सर्वात्मनेति। स

आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन। तुल्यं मया त्वं पितृभिर्धृता या तां यौवराज्ये धुरमुद्वहस्व॥ सर्वात्मना पर्यनुनीयमा
नो यदा न सौमित्रिरुपैति योगं॥ ९३॥ नियुज्यमानो भुवि यौवराज्ये ततोऽभ्यषिंचद्भरतं महात्मा॥ पौंडरीकाश्वमेधाभ्यां वाजिमेधेन चासकृत्
अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवात्मजः॥ ९५॥ राज्यं दश सहस्राणि प्राप्य वर्षाणि राघवः। शताश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान्॥ आजा
नुलंबिबाहुः स महावक्षाः प्रतापवान्। लक्ष्मणानुचरो रामः शशास पृथिवीमिमां॥ ९७॥ राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमं॥ ईजे बहुविधै
र्यज्ञैः ससुहृद्भ्रातृबांधवः॥ ९८॥ न पर्यदेवन्विधवा न च व्यालकृतं भयं। न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति॥ ९९॥ निर्दस्युरभवल्लोको नाः
नर्थः कश्चिदस्पृशत्। न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते॥ १००॥ सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत्। राममेवानुपश्यंतो नाभ्यहिंसं
स्परस्परं॥ आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः॥ निरामया विशोकाश्च रामे राज्यं प्रशासति॥ १०२॥ नित्यपुष्पा नित्यफ
ला स्तरवस्तत्र पुष्पिताः। कालवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः॥ १०३॥ स्वकर्मसु प्रवर्तंते तुष्टाः स्वैरेव कर्मभिः। आसन्प्रजा धर्मपरा रामे शा
सति नानृताः॥ सर्वे लक्षणसंपन्नाः सर्वे धर्मपरायणाः। दशवर्षसहस्राणि रामो राज्यमकारयत॥ १०५॥ धर्म्यं यशस्यमायुष्यं राज्ञां च विजयावहं
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतं॥ १०६॥ यः शृणोति सदा लोके नरः पापात्प्रमुच्यते। पुत्रकामश्च पुत्रान्वै धनकामो धनानि च॥ लभते म
नुजो लोके श्रुत्वा रामाभिषेचनं॥ महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति॥ राघवेण यथा माता सुमित्रा लक्ष्मणेन च। भरतेन च कैकेयी जीवपुत्रास्तथा
स्त्रियः॥ १०९॥ श्रुत्वा रामायणमिदं दीर्घमायुश्च विंदति। रामस्य विजयं चेमं सर्वमक्लिष्टकर्मणः॥ ११०॥ शृणोति य इदं काव्यं पुरा वाल्मीकिना
कृतं॥ श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ॥ १११॥ समागमं प्रवासांते लभंते सह बांधवैः। शृण्वंति य इदं काव्यं पुरा वाल्मीकिना कृतं॥ ११२॥ ते

वलिकापर्यंतमुपवीयमानस्य मनेन ज्येष्ठे भरते वर्तमाने अहं सज्यानर्ह इति लक्ष्मणेन निषेधे कृते रामेण पुनरेव कृते। तत्र पं कृतमित्यनुसंधेयं। आदिकाव्यमि राम १६०
ति। आर्षं ऋषिवेदः तत्संबंधि वेदोपबृंहणमिति यावत्॥ पुरा। पुत्रेतेनं॥ पुत्रकामइति। रामाभिषेचनं रामाभिषेकाद्यधिकमित्यर्थः॥ ॥ गोपालजयति॥

श्रवणेनेति। संश्रृण्वतामितिपाठः। विनायकाः विघ्नकारिणो भूतविशेषाः। भक्त्या रामस्येति। ये मुनिना कृतां रामस्य संहितां रामायणाख्यां श्रृण्वन्ति। संहितां संहितालब्ध
गुणसप्तकांडवत्त्वादिकाव्यस्यास्य संहितेतिव्यपदेशः। लिख्यंतिचा श्राद्धाः शृण्वंति नमहात्मानः। इहलोकेपुत्रमैश्वर्यं सपुत्रादीर्घायुषः सर्वैः पूजिताः महात्मानो भवंतीत्यर्थः
श्रृतेतेषांश्रृण्वतां। लिखितां चात्रिविष्टपो ब्रह्मलोकवासी भवति। श्रावनामायणाभ न्यायः पादपदमेव वासयाति ब्रह्मणाख्यानमब्रह्मणा प्रस्तुत संदेति वचनात्॥ ॥इति श्रीमत्स

श्रवणेनसुराः सर्वे प्रीयंते संप्रशृण्वतां २३ विनायकाश्चशाम्यंति गृहे तिष्ठंति यस्य वै। विजयेत महीं राजा प्रवासी स्वस्तिमान्भवेत् १४ स्त्रियो रजस्व
लाः श्रुत्वा पुत्रान्सूयुरनुत्तमान्। पूजयंश्च पठंश्चैव मितिहासं पुरातनं १५ सर्वपापैः प्रमुच्येत दीर्घमायुरवाप्नुयात्। प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रि
येर्द्विजात् १६ ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः। रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा १७ प्रीयते सततं रामः सहि विष्णुः सनातनः॥
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः। एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्द्धतां १९ देवाश्च सर्वे तुष्यं
ति ग्रहणाच्छ्रवणात्तथा। रामायणस्य श्रवणे तुष्यंति पितरः सदा २० भक्त्या रामस्य ये चेमां संहितामृषिणा कृतां। ये लिखंतीह च नराः तेषां वासस्त्रि
विष्टपे २१ कुटुंबवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च। श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिं २२ आयुष्यमारोग्यकरं
यशस्यं सौभ्रातृकं बुद्धिकरं शुभं च। श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः १२३ इति श्रीमद्युद्धकांडे सर्वजनपरिहितस्य राजाधि
राजस्य श्रीरामभद्रस्य महाभिषेकमहाख्यानं नाम एकत्रिंशदुत्तरशततमः सर्गः॥ ॥इति श्रीगोमतीतीरे नैमिषारण्ये पार्श्वमेधसत्रे तत्रानुवादगतमुनींद्रहृ
ज्जेद्वानरेंद्र हेंद्र गोपुच्छेंद्र राक्षसेंद्र परिहितस्य जनककेकयेंद्रादिवसुधाधिपेंद्र परिहितस्य मुनिवृंदहृद्दारकहंदवंद्यमानकोरकाकारचरणयुगल
स्य सद्भ्रातृसन्मित्रसन्मंत्रिसहितस्य साकेतपुरवराधीश्वरस्य दीनानाथदैन्यनिहरणस्य उदीर्णवीर्यौत्सिक्तरावणवधार्थं देवैः प्रार्थितस्य रघुकुल
तिलकसंभूतस्य श्रीसीताविशेषकस्य लक्ष्मीपतेस्साम्राज्यस्य लक्ष्मीवतो राजाधिराजस्य लोकाभिरामस्य रामस्यानिकटे कथया श्रीरामात्मजयो
राहिकुशवेषशिष्ययोः कुशलवयोराख्याने श्रीमद्वाल्मीकीये आदिकाव्ये श्रीमद्रामायणे चतुर्विंशत्सहस्रिकायां संहितायां श्रीमद्युद्धकांडे पंच
विंशाद्विवर्द्धमानकथाप्रसंगः समाप्तः श्रीमद्रामायणं समाप्तं॥ ॥ रमहंसपरिव्राजकाचार्यः श्रीनारायणतीर्थस्वामिशिष्य श्रीमहेश्वरतीर्थविर
चितारामायणतत्त्वदीपिकायां युद्धकांडे एकोनत्रिंशोत्तरशततमः सर्गः। महेश्वरतीर्थविरचितारामपादसमर्पिता। टीका श्रीयुद्धकांडस्य समाप्ता तत्त्वदी
पिकाः श्रीरामायणटीकेयं महेशयतिनाकृता। शिवरामेण यतिना ना दि

[illegible]